Chapter-6

# काव्यशास्त्रेषु नायक-नायिका भेद विमर्श:

# षष्ठोऽध्याय:

# काव्येषु नायक-नायिका भेद विमर्शः

महाकाव्येषु नायक-नायिकयोः चित्रणम् आदर्शरूपेण कृतम् वर्तते। महाकविना कालिदासेन आर्याणाम् त्यागाः संस्कृतेः प्रदानत्वम्। राजकुमाराणाम् त्यागाः साहसम् धैर्यम्, परंपराया अवतार्यम् वर्णितम् वर्णति। तारक सदसानाम् असुराणानाम् विनाशार्थम् आर्य संस्कृतेः संस्थापनाअर्थम् तपत्याः भगवत्याः पार्वत्याः तपश्चर्या त्यागभावनायाः निदर्शनम् कविना कालिदासेन अवतार्य अत्र कुमारसम्भवे वर्णितम्। सीरीशपुष्पादति कोमलांगी पार्वति यदा शरीर शारीरिकसुखस्य परित्यागम् करोति। राजधर्मस्य परित्यागाः रघुवंशीय राजकुमाराणाम् वैशिष्ट्यम् वर्तते। क्षात्रधर्मस्थ रक्षणाय शरीरस्य परित्यागाः दीलीपेन यज्ञस्य रक्षाणाये तद्गुण अनेन पत्नीः संगरक्षणायोः प्रमनुरंजनाय सीतायाः परित्यागाः रामचन्द्रेण कृतम्। एवम् रघुवंश महाकाव्ये परंपराया प्राप्तम् निदर्शनम् अत्र द्रष्टुम् शक्यते। रघुवंश महाकाव्यस्य पंचमेसर्गे नैतिक मूल्यानाम् संगरक्षाणाय कुशलतया उपार्जनम् कृतम् वर्तते। देवऋण, पितृऋण, आचार्यऋण, गर्भाधान संस्कार प्राज्य सोढषसंस्कारा निरूपणम् धर्म, अर्थ, काम, मोक्ष चतुर्थपुरूषार्था नाम निरूपणम् क्षौत यज्ञानाम् सांख्ययोग, वेनान्त दर्शन, वर्णाश्रम-व्यवस्था, विद्या, कला, तपश्चरण भक्ति, ध्यान, वैराग्य, तपोवन विविधानाम् भोगानाम् संमुल्लेखा महाकवि कालिदास विरचितम् महाकाव्ये द्रष्टुम् शक्यते। विश्वामित्रेण सह यज्ञस्यरक्षाणाय भगवताः रामस्य नायकरूपेण चित्रणम् महत्वपूर्णम् स्थानम् वर्णति। एवमेव अश्वघोष महाकविनाम् महाकाव्यद्वव्यम् सौन्दरानन्दम् तथा बुद्धचरितम् अपि आदर्श परंपरायाः निदर्शनम् करोति। सौन्दरानन्द महाकाव्ये सुन्दरी विलापाः कुमासंभवे कालिदासस्य मदनदहन प्रसंगे रतिविलापाः समाानभावम् भजते। महाकवि अश्वघोषकृत बुद्धचरितम् अष्टाविंशती सर्गात्मकम् महाकाव्य वर्तते। यस्मिन् भगवता बुद्धस्य जीवनम् अधिकृत्य उपदेश तथा तत्प्रति पादितानाम् सिद्धांतान। महाकाव्यत्वेन रचितम् वर्तते। बुद्धचरितस्य चीनी-भाषायाम् तथा तिब्बटीभाषायाम् अनुवादाः लब्धेन द्वितीयम् महाकाव्यम् अश्वघोषकृत् सौन्दरानन्दम् वर्तते। एतस्मिन् महाकाव्ये महात्माबुद्धस्य विमार्तजस्य नंदस्य तथा तस्य पत्नी सौन्दर्याः तथा निरुपितम् वर्तते नन्दससौन्दर्याः प्रेमणोनिदर्शनम् चक्रवाक चक्रवाकीयु विलापस्य चित्रणम् कृतम् वर्तते। महाकवेः अश्वघोषस्य काव्यम् बौद्धमतम् अनुश्रृत्य वर्तते। महाकविना अश्वघोषेन बुद्धचरितम् तथा सौन्दरानन्दम् उभयोः काव्ये श्रृंगार

करुणयोः निर्वाहा सुन्दरनित्याकृतम् वर्तते। वीररसस्य समावेषापि उभयोः काव्ये समानभावान् भजते।

नवसाहसांकचरितम् नामे महाकाव्ये नायक सिन्धुराज नायिका शशिप्रभायाः प्रेमनानिदर्शनम् अतिवमनोहारि नायकस्य धैर्यम् साहसम् कष्ट सहिष्णुतायाम् निदर्शनम् कृतम् वर्तते। अनेन नायको अयम् धीरोदात्त नायक रूपेण चित्रितम् वर्तते। शोभा प्रताप, यश, क्षमा, त्याग, विलास, विनय, गौरव समानतयाः निदर्शनम् न रन्तिदेव कर्तुम् शक्नोति न पृथु न युधिष्ठिरा[1]। नायिका केवल प्रेमिकारूपेण वर्णिता दृश्यते महाकाव्येषु नवसाहसाङ्क चरित्रस्य नायकः सिन्धुराजाः धीरोदात्तः तथा धीरललित गुणैः युक्ता पुरूषार्थी, तेजस्वी गंभीर प्रकृतिकाः परमोत्साही वर्तते। अनेन कारणे नवसाहसांकरूपेण वर्णितोऽयम्।

**निर्व्यूढनानाद्भुतसाहस च रपे वृत्तं च स्वयमेव लक्ष्म्या।**
**नाम्ना यमेके नवसाहसांककुमार नारायणमाहुरन्ये।।**[2]

अयम् अलिययात् वचसि स्वमूजबलेन वसुधाम प्राप्नोति। साह ययाति, पाण्डु, दिलीप इव तेजस्वी वर्तते[3]। नवसाहसांकचरितस्य नायिकं शशिप्रभा अतुल्य सौंदर्य युक्त नैसर्गिक छटाभीः मंडिता। अद्वितीय सुन्दरी। सुन्दरताषु तथा सया साम्यम् रति चित्रलेखा, तिलोत्तमापि न कर्तुम् शक्नोनि। यम् अनुरागिणी नायिका। यम् धैर्यशीला माधुर्य, शोभा प्रेम धैर्ययोः साक्षात् मूर्तिः।

महाकवि श्रीहर्ष प्रेरित नैषधचरिते नकदमयन्तीयाः प्रेम वर्णनम् मर्यादाम् अनुश्रृत्य कृतम् वर्तते। एतस्मिन् महाकाव्ये नायकोऽयम् नलाः परंपराय धीरोदात्त नायक महाकाव्यस्य प्रारम्भे कविना श्रीहर्षेण नकोऽयम् पुण्यशीलाः, विद्वान्, शास्त्रचक्षु, शूरः, त्यागी गुणानुरागी रूपेण वर्णनम् कृतम् वर्तते। अनेन नकोअयम् धीरोदात्तनायक रूपेण चित्रितम् वर्तते। महापुरूषोचित गुणैः दुक्तोअयम् नला नलस्यजीवने चर्तुविधपुरूषार्थाणाम् साधना दृश्यते। एवम् दमयन्ती अस्य काव्यस्य

[1] नवसाहसांकचरित सर्ग 2 श्लोक 88।
[2] नवसाहसांकचरित सर्ग 1 श्लोक 59।
[3] नवसाहसांकचरित सर्ग 1 श्लोक 84।

महानायिका दम्यन्तया: प्रथमोपरिचय विनयशील; रूपेण भवति। नेयम् युवतिनामयो कामवासनायान् लिप्ता दृश्यते नेयम् नणस्यदासिरूपेणापि एषा चित्रिता दृश्यते। चंद्रोपालम्भम् अवसरे नलस्य विरहावसीयाम् सा मूर्छिता भवति यथा समाजे नलस्य प्रतिष्ठा वर्तति। तथैव दमयन्तीया: अपि प्रतिष्ठा नारी रूपेण एतस्मिन् महाकाव्ये चित्रिता दृश्यते। नैषधियचरितम् महाकाव्यस्य नायिका दम्यन्ती राजाभीमस्य पुत्री दमयन्ती अपूर्व सौन्दर्यवति। दम्यन्ती दृढ़ संकल्पशीला।

विक्रमांकदेवचरिते महाकाव्ये वास्वविकम् चरित्र-चित्रणम् नैवद्रष्टुम् शक्यते विक्रमांक देवचरितस्य नायको अयम् विक्रमादित्य: आहवमललदेवस्य द्वितीया: पुत्रा आदित्य सदृशा: तेजा: अस्य सविक्रमादित्या:[1]।

**स विक्रमेणाद्भुततेजसा च चेष्टाविशेषानुमितेन बाल:।**
**श्री विक्रमादित्य इति क्षितीन्दोरवाप विख्यातगुण: समाख्याम्।।3.1।**

विक्रमांकदेव अयम् दानशीला: पितृभक्तो अयम् मातृ प्रेमना निदर्शनम् एतस्मिन् महाकाव्ये द्रष्टुम् शक्यते। चंद्रलेखा अस्य नायिका: महाराज करुहाट देवस्य पुत्री चंद्रलेखा राजहंसीयो बिहारशीला चकित हरिणीयोनेत्रम् कदलियोजंगा विनयआर्जोआदि गुणै: युक्ता मुग्धा नायिका।

सुरथोत्सव महाकाव्यस्य सुरथोअयम् धीरोदात्त नायक। स अतीव यशस्वी, धर्मभीरु:, दानशीला: वर्तति। राजा सुरथोअयम् अत्येन धैर्यशाली, स्वराज्यम् त्यकत्वा तपस्यायाम् निरतो अस्ति। भगवत्या: जगदर्अबाया: प्रसादात् पूना: राज्यम् प्राप्नोति।

यादवाभ्युदय: महाकाव्यस्य नायकोअयम् श्रीकृष्णा: धीरोदात्त नायक स: धर्मसंरक्षणाय कंस, नरकासुर, शिशुपाल पौण्डक आदिनाम् नृपानाम् विनाशम् करोति। इन्द्रा: अपि पराजयम् प्राप्नोति। श्रीकृष्णो अदम् क्षमाशीला:। श्रीकृष्णयोअयम् दक्षिण नायिका: श्रीकृष्णोअयम् दिव्यादिव्य नायक। स्वयं विष्णुरूपेण निर्दशीलम् वर्तति।

---

[1] नैषधचरितम् 1/1, 4,6,10,15,16,17।

महाकवि कालिदास विरचितेषु महाकाव्येषु खण्डकाव्येषु च कुमारसंभवम् रघुवंशमहाकाव्यम् ऋतुसंहार, मेघदूतम् इत्यादिस्वरूपा नायक - नायिकायो: परस्पर योग-वियोगयो: सुन्दरम् निरूपणम् कृतम् वर्तते। महाकवि कालिदास विरचितम् षष्ठ सर्गात्मकम् खण्डकाव्यम् वर्तते। अस्य मूलप्रतिपाद्यमू प्रकृति चित्रणम् वर्तते। ऋतुसंहारस्य प्रकृतिचित्रणम् महाकवि वाल्मीकिइव आलम्बन प्रधानम् नास्ति। अपितु उद्दीपन प्रधान वर्तते। ऋतुसंहार काव्ये कविना कालिदासेन याम् केन्द्रियकृत्य षड्ऋतुनाम वर्णनम् कृतम् वर्तते। कवे: काव्यम् ग्रीष्मपरितो: प्रचंड ग्रीष्मकालात आरभ्य षडऋतुनाम वर्णनम् कृतम् वर्तते। महाकवि कालिदास विचचित् मेघदूतम् 118 अध्यात्मकम् वर्तते।[1] कुबेर शापम् अधिकृत्य अंगिकृत्य रमगिरिनाम् पर्वते निवासम् करोति। वर्षाकालस्य आरम्भ भवति तद। स्वप्रियाम् स्मुत्य दु:खम् अनुभवति। विरहवेदना संतपता स गच्छा: अषाढस्य प्रथम दिवसे आकाशे परिणतगबइव मेधानदृष्ट्वा स स्वप्रियाम् विरहवेदनाया अनुरक्तो भवति। रामगिरि शिखराद् आरभ्य अलकापुरी पर्यनतम् एषा: यक्षा: प्रियामृ प्रति संदेशाम् प्रेषयति। पत्निया: विरहेन संतपतोअयम् एवम् इच्छति। यत मेघो अयम् कामरूपा इच्छाचारी वर्तते। अत: मम संदेशान प्रियान प्रति संप्रेसयितुम् एषा: समर्थरुपा: भविष्यति। अनेन ममोपरि तवमहान उपकार भविष्यति। एतस्मिन् मेघदूते भाम द्वव्यम् अस्तु। उर्मिमेघा उत्तरमेघश्च पूर्वमेघ रामगिरिका आरभ्य अलकापुरी गमनाय मार्गस्य वर्णनम् अस्ति। अनेन मर्गिण एषा: कामरूपा: मेघा अलकापुरीम् गमिष्यति। एतस्मिन मार्गे जनपदवधुनाम आकाशे उदीयमाना बलाकादिनाम सिद्धिकामीनिनाम् वर्णनम् अस्ति। उज्जैन्यम महाकाल दर्शनम् अभिसरन्ति नायकाया: दर्शनम् एवम् अनेकविध प्रकृतिनाम निदर्शनम् कृतम् वर्तते।

कुमारसंभवे नाम्ये महाकाव्ये तपत्या: पार्वत्या: चित्रणम् कृतम् वर्तते। महाकाव्यम् इदम् 17 सर्गात्मकम् वर्तते। अष्टमसर्गे शिवपार्वत्या: संभोगवर्णनम् कृतम् वर्तते। कुमारसंभवस्य मुख्यम कारणम् शिवपार्वत्या: संयोगश्रृंगाराद् आरभ्य स्कंदकुमारस्य जन्म पर्यनतम निदर्शनम् करोति।

---

[1] वल्लभदेव के अनुसार मेघदूत मे 112 पद हैं, मल्लिनाथ के मत से 118। सम्भवत. ये 7 पद बाद के प्रक्षेप हैं।

रघुवंश महाकाव्यम् कुमारसंभवस्य अपेक्षया अधिकम् विस्तृत रूपेण कथाम् विस्तृतक्षत्रेम् अधिकृत्य कथाया: निदर्शनम् करोति। रघुवंश महाकाव्यम् इदम् इति वृतात्मकम् काव्यम् वर्तते। यत्र अनेकेषाम् चरित्राणाम् चित्रशाला अस्ति। एष्याम दिलीपाद आरभ्य अग्निवर्ण पर्यनतम् अनेकेषाम् चरित्राणाम् विस्तृतम् वर्णनम् निदर्शयति। परन्तु मुख्य चरित्रम् अधिकृत्य कवे: काव्यकला अधिकाधिकृत्य रमणियतर भिष्यते। महाकाव्यस्य प्रारंभे महाराज रघो: आदर्श चरित्रम् अध्यधिकम् उदत्तरूपेण वर्णितम् दृष्यते। अज तथा दिलीपस्य चरित्रम् तत्र अंगीरूपेण द्रष्टुम् शक्यते। महाकाव्यस्य उत्तरार्धे रामस्य चरित्रम् समुत्पाटयितुम् कवि: माहतिउत्कंठया संलग्ना: वर्तते। एषा चरित्रम् अपि तथैव मनोमुक्तकारी वर्तते। तत्पश्चात् अनेके राजान: छायारूपेण वर्णिता: दृष्यन्ते। एतस्मिन् महाकाव्ये रामचन्द्रस्य चरित्रम् कविना कालिदासेन निश्चितरूपेण सर्वश्रेष्ठतवेन उद्घोषितम् वर्तते। दिलीप, रघु अज तथा रामस्य चरित्रम् नि:स्वार्थ भावनया जगत: प्रेरणाय वर्तते। रघुवंश महाकाव्यस्य प्रथमे, द्वितीयसर्गे पुत्रविहीनस्य दिलीपस्य कथाचित्रिता वर्तते। तत्र नन्दिनीया: सेवाया: त्यागपूर्ण चित्रम् समान धेनुनाम् सेवाम् कर्तुम् प्रेश्यति। तृतिय तथा चतुर्थ सर्गेषु महाराज रघु: वीरताया: निदर्शनम् तुअसन एव तथा स: दानशीलताया: अपि निदर्शनम् कृतम् वर्तते। अजस्य चरित्रम् अपि अतिव मनोहारी वर्तते। अज इन्दुमती प्रेमणा निदर्शनम्। चिरवियोगस्य कविना औतार्य निरुपितम् वर्तते। अष्टम्सर्ग पर्यनतम् अज इन्दुमति प्रेमणा निदर्शनम् दृष्टपथे आयामि। नवमे सर्गे महाराज दशरथस्य चरित्रम् उद्गाठितम् वर्तते। अन्यसर्ग यतुस्ष्ठेषु कुशात आरभ्य अग्निवर्ण पर्यनतम् 22 नृपानाम् चरित्रम् उद्घाटितम् वर्तते। प्राय: सर्वे नायका: धीरोदात्तरूपेण वर्णिता: सन्ति। एको न द्विशतीसर्गे अग्निवर्णस्य धीरललित नायकत्वेन चरित्रम् समुद्घाटितम् वर्तते।

महाकवि भारवे: रचितम् किरातार्जुनीयम् महाकाव्यम् प्रसिद्धम् वर्तते। तस्य कथाया: मुलम् महाभारतम् वर्तते। भगवता: इन्द्रम् तथा भगवता: शिवम् प्रासादयितुम् उभयो: कृपा कटाक्ष प्राप्नार्थम् अर्जुनद्वारा कृतस्य तपस्या: आधारम् मत्तवा कविनाम् भारवे: अष्टादश सर्गात्मक महाकाव्यस्य रचनाकृता वर्तते। कथाया: प्रारंभा: द्यूत-क्रीड़ात् आरभ्य अपराजितानाम् पाण्डवानाम् वनवास आरभ्य भवति। युधिष्ठिरस्य

अत्र निवासा: दूर्योधनात् कष्टदायकम् वर्तते। द्रौपदी युधिष्ठिराय तथा अन्यान पाण्डुपुत्रान युध्धाय प्रेरयति। द्वितीय सर्गे भीमेन द्वैपदया: वचनम् पालइतुम् युधिष्ठिराय युध्ध निमित्तम् प्रेरयति। नियति विशारतोअयम् युधिष्ठिरा: नियति विषयकम् प्रवचनम् करोति। महात्मना व्यासेन अर्जुनाय दिव्यास्त्र प्राप्ति निमित्तम् इन्द्रस्य आराधनाम् कर्तुम् प्रेरयति। व्यासस्य वचनम् मत्वा अर्जुना: नप निमित्तम् इन्द्रकील पर्वतस्य उपरी गच्छति। ताम् दृष्ट्वा इन्द्र्येण अप्सराम् तपस्यायाम् विध्नम् दातुम् प्रेरयति। परंतु अर्जुनस्य व्रतम् भंगो न भवति। प्रसन्नो भूत्वा इन्द्र्या: शिवस्य कृपाम् प्राप्तय अर्थम् उपदेशति। अर्जुना: पून: तपस्या करोति। तत्र मायावी सुअरसह इन्द्रस्य युद्धम् भवति। भगवत: शिव: अर्जुनस्य रक्षणाये किरातस्य मायावी वेश धृत्वा रक्षणम् करोति। किरात तथा अर्जुन उभयो: मिलित्वा सुअरसह युद्धम् कुरूते। अर्जुन: बाणेन सुअर मारयति। अंते किरात अर्जुनयो: विवादा जायते। पञ्चदशे सर्गे उभयो: मल्लयुद्धम् भवति। अनेन अर्जुनस्य साहसम् दृष्ट्वा भगवता: शिवा: प्रसन्नो भुत्वा: अर्जुनाय पाशुपातस्त्रम् ददाति। अनेन महाकाव्ये अस्मिन् अर्जुनोअयम् धीरोदात्त नायक रूपेण प्रतिभाति। अस्य महाकाव्यस्य मुख्योरसा: वीर:। अप्सरा विरहादि वीररसस्य अंङ्गिभूतम् तत्वम्।

महाकवि भट्टि विरचितम् रावणवधम् नामना महाकाव्यस्य इतिवृत्तम् रामायणात् उत्कंठितम् वर्तते। रामचंद्रस्य जन्मकालाद आरभ्य रावणवध पर्यन्तम् एषा कथा 22 सर्ग पर्यन्तम् महाकाव्य निबद्धय अस्ति। अस्ये महाकवे: ध्येया: इतिवृत्तम् प्रति ध्यानम् अदत्वा घटनाचक्रे औत्सुक्यम् उपस्थापयितुम् प्रयत्नकृता वर्तते। अस्य कथा रामस्य जीवनम् आधारिकृत्य वर्तते। एतस्मिन् महाकाव्ये रामो अयम् धीरोदात्त नायिकासीत। धीरामुग्धा नायिका अस्य महाकाव्यस्य रसा: वीर रसा:। प्रथम सर्गाद् आरभ्य 22 पर्यन्तम् राजनिते: चित्रणम् स्पष्टदया दृष्यते। एतस्मिन् महाकाव्ये व्याकरण नियमानाद प्रदर्शनम् कविना कृतम् वर्तते।

महाकवि भारवियु माघ कविना विरचितम् शिशुपालवध महाकाव्यम् किरातार्जुनीयम् इव महाभारतस्य कथाम् आदित्य वर्तते। कृष्ण तथा शिशुपालयो: वैर भावा: शिशुपालम् हिरण्याकश्यपु योद्धा रावणइव बलशाली चित्रितम् वर्तते।[1] एतस्मिन्

[1] अधोपपत्ति कलनाडपरी पराभयाप्य शैलूष इवैष मुमिकाम्।

महाकाव्ये रूक्मिणीहरण संगस्य कथाम् आदित्य निरूपणम् कृतम् वर्तत। प्रथमसर्गस्य प्रारंभा: नारदस्य आगमनेन आरभ्यते। आकाश मार्गेण नारदोअयम् शनै:-शनै: अधैस्तरति। नारदस्य सत्कारम् कृत्वा तस्य आगमन कारणम् नारदात पृच्छयति। द्वितीयसर्गे कृष्ण, बलरामेणसह तथा उद्धयवादिनाम् मंत्रणाचरति। कृष्णास्यसमस्याम् प्रथापयति युधिष्ठिरा: राजसूय यज्ञस्य प्रारंभम् करोति। तत्र भगवता: कृष्णस्य मुख्यत्वेन नियुक्ति भवति। तृतीयसर्गे कृष्णस्य सेना इन्द्रप्रस्थ प्रति गन्तुम् उध्नोभवति। चतुर्थेसर्गे खैतक पूर्वतक सोपरी गच्छति। पञ्चमसर्गे सेनाया: पर्वतस्य उपत्कियान् निवासा:। षष्ठेसर्गे षड्गऋतुनाम् कृष्णस्य सेवाया निमित्तम् आगमन भवति। सप्तमे सर्गे यदुदम्पति विकासपूर्णम् वनविहारस्य वर्णनम् अस्ति। अष्टम् सर्गे जलक्रिदायाम् वर्णनम् अस्ति। नवम् सर्गस्य आरंभा: सूर्यास्त द्वारा भवति। दशमसर्गे सुरा सुन्दर्या: वर्णनम् अस्ति। एकोदशेसर्गे प्रात: काले वर्णनम् अस्ति। द्वादशे सर्गे सेनाप्रयाणम् वर्णनम् अस्ति। त्रयोदशेसर्गे कृष्णम् दृष्टोकामा: इन्द्रप्रस्थ स्थितानाम् नरनारीणाम् वर्णनम् अस्ति। चतुर्दशेसर्गे राजसूय यज्ञस्य वर्णनम् अस्ति। चतुर्दशे सर्गे एव कृष्णस्य पूजा अर्चनाया: वर्णनम् अस्ति। पंचदशे सर्गे कृष्णस्य पूजा दृष्ट्वा: शिशुपालस्य गालि प्रदानम् वर्णितम् दृष्यते। षोडषेसर्गे शिशुपाल: कृष्णाम् पराजय निमित्तम् संदेशम् प्रेषयति। सप्तदशेसर्गे तथा अष्टादशसर्गे युद्धस्य वर्णनम् अस्ति। एकोनविंशति तथा विंशति सर्गे उपसंहार रूपेण शिशुपालस्य जीवनम् सह नाटकमअपि समाप्तम् भवति। एतस्मिन् महाकाव्ये कृष्णस्य धीरोदात्त रूपेण नायकत्वम् प्रतिपादितम् वर्तते।

महाकवि कालिदासस्य काव्यं खलु श्रृंगारभूयिष्ठिमिति प्रत्याययितुमेव कथैषा प्रकल्पिता भवेत्। तदश्च कवित्वकलासम्पन्न: समुपलब्धवाग्देवतादिव्यप्रसाद: कालिदास: गृहं प्रतिनिवृत्य प्रेयसीं प्रत्याह "अनावृतकपाटं द्वारं देहीति।" तदा सापि विदुषी 'अस्ति कश्चिद् वाग्विशेष' इति तं सादरं पप्रच्छ। तदासौ प्रश्नस्यास्यादिमध्यान्तगतं पदमभिलक्ष्य 'कुमारसम्भवम्', 'मेघदूतम्', 'रघुवंशम्', चेति काव्यत्रयं कयापि प्रसादगुणगुम्फितया सहृदयहृदयसंदेद्यया गिरामगोचरया गिरा जुगुम्फ। 'अस्ती'त्यालम्ब्य' अस्त्युत्तरस्यां दिशि देवतात्मा' इति कुमारसम्भवं, 'कश्चिदि'त्यालम्ब्य च "कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्त:", इति मेघदूतं, 'वागि'त्युद्दिश्य च

---

तिरोहिनात्मा शिशुपालसञ्ज्ञया प्रतीयते सम्प्रति सोऽप्यस परौ ।। (1, 61)

'वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये', इति रघुवंशञ्च प्रणीतम्। नाटकचक्रेऽपि सुविख्यातं मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अनन्यसामान्यपदमलंकुर्वाण-मभिज्ञानशाकुन्तलं चेति नाटकत्रयं निबबन्ध। ऋतुसंहार-श्रृंगारतिलकादयश्च केचनान्येपि प्रबन्धा अस्यैव कृतित्वेनाभिमन्यन्ते कैश्चित्, तत्रान्ये विप्रतिपद्यन्ते।

केचिद्वदन्ति यत्कालिदःसेन कुमारसम्भवस्य सर्गष्टिकमेव प्रणीतम्, तदुत्तरभागस्तु केनचिदन्येन प्रणीतम् इवाभाति। अतएव मल्लिनाथेन पूर्वसर्गाष्टकपर्यन्तमेव टीका कृता, उत्तरभागस्य तत्कृतटीकानुपलम्भाच्चेदमवसीयते नैतत्प्रामाण्यमर्हति। पूर्वं सप्तमसर्गान्तमेव मल्लिनाथ-टीकाऽऽसीत्। सप्तसर्गनिबद्धमेव काव्यमासीत्। इदानीमष्टमसर्गोऽपि क्वचिदुपलब्धो मल्लिनाथटीकानिबद्ध इति अष्टसर्गात्मकमेवेदं काव्यं कालिदासेन निबद्धमिति प्रवादो लब्धप्रचार: सञ्जात:। यदि अतोऽनन्तरमन्येऽपि सर्गा: मल्लिनाथव्याख्यासनाथिता: समुपलभ्येरन् तर्हि तेषामपि कालिदास प्रणीतत्वं सम्पद्येत इति कोऽयन्नभिनिवेश: पाश्चात्यपण्डितानां यया कयापि विधया कविकालादिनिर्णयकर:। इति तु कथमपि न बुद्धिपद्धतिमधिरोहति। अत: कविकालजन-देशादिनिर्णये निकषायमाणा मल्लिनाथविवृत्तिर्नेद प्रामाण्यकोटिमवगाहते।

किञ्च मल्लिनाथादिभि: कुमारसम्भवस्य टीकामाटीकमानै: आशीर्नमस्क्रियादिवस्तुनिर्देशस्य महाकाव्यलक्षणस्य प्रतिपादनादस्य महाकाव्यत्वमङ्गीकृतं विभाव्यते। 'सर्गैद्वादशभिर्युक्तमष्टादशभिरप्युत' इति नियमात्कथमिवाष्टसर्गात्मकस्यास्य महाकाव्यत्वं सिद्ध्येत्। तस्माद् अखिलमपि काव्यं कालिदासकृतमेव विभावनीयम्।

कुमारसम्भवं नाम कालिदासस्य सप्तदशसर्गोपनिबद्धम् आदिमहाकाव्यम् यत्र शिवपार्वत्यो: विवाहादारभ्य कार्त्तिकेयन्जन्मन: तारकासुरवधस्य च सुरुचिरं काव्यकलापूर्णं वर्णनन् विहितम्। अस्मिन् हि काव्ये महाकाव्यानां निखिलानि लक्षणानि समीचीनतया चरितार्थतां गतान्यवलोक्यन्ते। भाषाया रमणीयता, भावानां गाम्भीर्यम्, छनदसाम् औचित्यम्, रसानां च सरस: परिपाक: परिपूर्णविषयतामवगाहते। मानवीयान्त:प्रकृते: सालंकारं स्वाभाविकं विश्लेषणम्, यादृशमत्र यौगपद्येन समपद्यत न तादृशमन्यत्र सुलभम्। नूनं भारतीयसंस्कृते: तदीयप्राचीनपरम्परायाश्च किमपि सहृदयहृदयावर्जकं निरूपणं यथेदं ग्रथ्नाति न

तथान्यत्र दृग्गोचरम्। कवेरस्य रूपनिरूपणचातुरी, लोकोत्तरं च तच्चित्रनिर्माणकौशलं न कस्य हृदयमानन्दतुन्दिलं कुरुते। कुमारसम्भवे अस्मिन् भगवत्या: पार्वत्या: सर्वाङ्गीणवर्णनमतीव सौन्दर्यशालि संवृत्तम्। 'अभ्युन्नतांगुष्ठनखप्रभाभि:', इत्यारभ्य 'सर्वोपमाद्रव्यसमुच्चयेने'त्यन्तै: एकोनविंशतिभि: पद्यै: सुसम्पन्नं वर्णनं न कस्य हृदयाल्हादि। एषु श्लोकेषु अन्तिमं श्लोकं तावत्प्रणिभालयन्तु रसिका:। एष हि प्रकृतार्षमतिरिच्य किंचिदभिनवार्थान्तरमपि ध्वनयति वैलक्षण्येन :

**किञ्च :-**

**सर्वोपमाद्रव्यसमुच्येन यथाप्रदेशं विनिवेशितेन।**
**सा निर्मिता विश्वसृजा प्रयत्नात् एकस्थसौन्दर्यदिदृक्षयेव।।**

अत्र पार्वतीसौन्दर्यवर्णनव्यतिरिक्तं किमपि प्रबन्धप्रकर्षपरम् अर्थान्तरमपि निर्दिशति कवि:।

तच्चेदम्, 'यदत्र मदीयकाव्ये अनुपमोपमालंकाराणाम् कोमलकान्तपदावलीविन्यासानां यथाप्रदेशं सन्निवेशादिना यदतीव रामणीयकत्वमापादितम् तदपि कोविदै: सूक्ष्मेक्षिकया समीक्ष्यताम्, इत्यादिकमर्थान्तरमपि च सन्दर्भसंभृतं वरीवर्तीति सुतरां ध्वनितं भवति। तथा हि अत्र मदीये काव्ये, सर्वोपमाद्रव्याणां यथाप्रदेशं सन्निवेशितानां समुच्चयो हि मया प्रयत्नतो विहित: काव्यविश्वसृजा एकत्रैव काव्यसौन्दर्यदिदृक्षयेवेति भाव:। तदेतत्कालिदासकाव्यं प्रकृतार्थमपास्य अर्थान्तरेणाप्यलंकृतमस्तीत्यप्यामनन्ति विसृष्टार्थविचक्षणा: परीक्षणचणा: विद्वांस:। एतादृगद्भुतगुणगरिम्णैव याथार्थ्येन तद्रचनागाम्भीर्यतलमनवगाहमाना अखिल साहित्यसम्पदा सनाथ: महाटीकाकृत्सवयं मल्लिनाथोऽपि उद्गृणाति कालिदास गिरमुद्दिश्य :-

**कालिदासगिरां सारं कालिदास: सरस्वती।**
**चतुर्मुखोऽथवा साक्षाद् विदुर्नान्ये तु मादृशा:।।**

अपि च पार्वत्या बिम्बाधरमधुरस्मितानि प्रकृतिप्रतानेषु अनुकृतानीव विभावयति कवि:। तथा हि:-

**पुष्पं प्रवालोपहितं यदि स्यात्**
**मुक्ताफलं वा स्फुटविद्रुमस्थम्।**
**ततोनुकुर्याद् विशदस्य तस्या**
**स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य।।**

यद्येवं स्यात्तदाऽपि स्मितस्यानुकरणमेव सम्पत्स्यते न खलु वास्तविकत्वमिति भावः।

निर्झराणां जलकणेषु रविकिरणसंक्रान्तेषु कालिदासः इन्द्रधनुषः साक्षात्कारं करोति। तथा हि :-

**सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति।**
**इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी।।**

आदर्शसौन्दर्यनिदर्शनमपि- वैलक्षण्येनारचयति-

**स्थिताः क्षणं पक्ष्मसु ताडिताधराः।**
**पयोधरोत्सेधनिपातचूर्णिताः।**
**बलीषु तस्याः स्खलिताः प्रपेदिरे**
**चिरेण नाभिं प्रथमोदबिन्दवः।।**[१]

कालिदासः रूपचित्रणे यादृशीं प्रयोगचातुरीमभिव्यनक्ति न तादृशीं कश्चिदन्यः। नायं प्रायेणावलम्बते अभिधावृत्तिम्, व्यञ्जनामेवाधिश्रित्य भूम्ना समुपवर्णयति। यदा महर्षिः अंगिरा हिमालयात् शङ्करार्थं भगवतीं पार्वतीं याचमान आस्ते, तदा स्वपितुः सविधे स्थितायाः पार्वत्याः मनोदशाया यादृशं वर्णनमारचितं तत्कस्य मनसि कौतूहलं नावहति:

[1] कुमारसम्भवम्, 1/1।

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**
**लीलाकमलपत्राणि गणयामास पार्वती।।**[१]

यद्यप्यत्र कश्चनालंकारविशेषो न व्यज्यते तथापि कविना कमलदलगणना वर्णनेन पार्वत्याः निसजर्गलज्जालृतायाः, तन्मनोतुगतप्रणयोल्लासविलासस्य, तदाऽनन्दातिरेकसंगोपनप्रवृत्तेश्च यद् व्यंजनयोपवर्णनमारचितं तन्न कस्य वा विस्मयावहम्? शब्दलाघवेन विशदार्थवर्णनप्रवणतैव कवेरस्य वैशिष्ट्यं कवीतरेभ्यः।

न केवलं कविरयं प्रकृतेर्निपुणः परीक्षकः अपितु प्रकृतेर्निगूढरहस्यानामपि पारदृश्वा। प्रकृत्यनुगुणवर्णनचातुरी तु अस्मै सरस्वत्यैव उपायनीकृतेवावगम्यते। सकलपेव संस्कृतसाहित्यं कालिदासीयरुचिररचनारत्नावलीमयूखैः नितरामवभासमानं विलसति।

कुमारसम्भवे कृतं रतिविलापवर्णनं रघुवंशकृताऽजविलापवर्णनापेक्षया न कथमपि अनौज्ज्वल्यं वहति। तथा हि-

**गत एव न ते निवर्त्तते स सखा दीप इवानिलाहतः।**
**अहमेव दशेव पश्य सामविषह्यव्यसवेन धूमिताम्।।**

किं च-

आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी। हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः।।

**कीदृशं स्त्रीमनोभावानुगुणं स्वाभाविकं चित्रणम्।**

रघुवंश हि नाम महाकायं रघुकुलोद्भवानां नृपाणां वंशवर्णनविषयकः कश्चन सारगर्भः सन्दर्भः। महामहिमशालिनी दिलीपपुत्रस्य रघोर्नाम्ना, सर्व एवं

---
[1] कुमारसभवम्, 1/20।

इक्ष्वाकुवंशो रघुवंश इति ख्यातिं गतः। अस्येक्ष्वाकुवंशास्य रघुनाम्ना प्रसिद्धिहेतुस्तु कविना निम्नपद्ये समुद्भावितः-

**'ततः समानीय स मानितार्थी**
**हस्तौ स्वहस्तार्जितवीरशब्दः।**
**वंशस्य कर्त्तारमनन्तकीर्तिं**
**सुदक्षिणायां तनसं ययात्ते।'**[1]

अस्मिन् काव्ये दिलीपरध्वजदशरथादीनामूनत्रिंशद्भूपतीनां वर्णनं पल्लवितम्। रघुवंशाख्यं काव्यमिदं खलु सर्वैरेव महाकाव्यलक्षणैः समलङ्कृतम्। अस्मिन्नङ्गी वीरो रसः, करुणशान्तादयश्चाङ्गानि। प्रारम्भेऽस्मिन् 'वागर्थाविव सम्पृक्ता' वित्यादिना पद्येन पार्वती-परमेश्वरयोर्नमस्कारलक्षणमङ्गलपुरस्सरं वागर्थात्मकस्य काव्यस्वरूपस्य लक्षणमपि लक्षितमवगन्यते। 'वागर्थप्रतिपत्तय' इत्यनेन काव्यतत्त्वावगमाय काव्यमिदमपरिहार्यतया परिशीलनीयमित्यपि पाटवेन सङ्केतितं विभाव्यते। महाकाव्ये वर्णनीयाः सन्ध्यासूर्येन्दुरात्रिप्रदोषादयः सर्व एव विषया अत्र यथास्थानं चारुतया वर्णिताः। काव्येऽस्मिन् नातिस्वल्पा नातिदीर्घाश्च ऊनविंशतिसर्गाः सन्निवेशिताः।

रघुवंशस्य 'वंशतिभ्योऽप्यविकाः श्रूयन्ते टीकाकाराः। तेषु दक्षिणावर्त्तनाथः, मल्लिनाथः, दिनकरमिश्रः चरित्रवर्धनश्च मुख्याः। तत्रापि मल्लिनाथ सर्वोत्कृष्टत्वेनाद्रियते। तस्य 'सञ्जीवनी' समाख्या टीकाऽद्यत्वे जाता भूगना लब्धप्रचारा, लोकप्रिय च संवृत्ता।

रघुवंशमहाकाव्यम् कालिदासस्य प्रौढ़प्रज्ञाखनिप्रसूतं द्वितीयं महोज्ज्वलं रत्नम्। अस्मिन् हि काव्यस्य सर्वेऽपि उत्कृष्टा गुणा एकत्र संकलिता इवावगम्यन्ते। भाषा प्रसादगुणगुम्फिता, लालित्यसंवलिता, कमनीयकोमलपदावल्यलंकृता, सुपरिष्कृता, मधुरमधुरा, सालंकारा, अनुप्रासविन्यासोल्लासा, सर्वाङ्गपूर्णा च वरीवर्त्ति। अलंकाराणामुपमोत्प्रेक्षाश्लेषार्थान्तरन्यासादीनामपि सन्निवेशः चारुतरः सम्पन्नः उपमालंकारविषये तु किमु वक्तव्यम्। उपमा त्वस्य निसर्गसिद्धा प्रेयसीव प्रतीयते। अस्य रचनासु उपमालता यादृशी पल्लविता पुष्पिता न तादृशी अन्यत्र कुत्रचित्।

---

[1] रघुवंशमहाकाव्यम्, 2/64।

अतएवं महाकविमेनमुद्दिश्य "उपमा कालिदासस्ये" त्युक्तिरपि चरितार्थिता प्रतिभाति कात्स्न्र्येनेति।

वास्तविकं तत्वं त्विंद यत् कालिदासस्य काव्यसुषमा इयत्तयावच्छेतुमेव न शक्यते। अस्य काव्येषु नाटकेषु च यत्कवित्वकलायाश्चित्रणचातुर्यं प्रतीतिपथमवतरित तदन्यत्र न सुलभम्। यः कोऽपि रसस्तेनानुगृहीतः स खल्वनन्यसामान्यतयोत्कर्षस्य पराकाष्ठां नीत इत्यभिहितपूर्वम्। नूनं कविसार्वभौमोऽयं सर्वानपि कवीश्वरानतिशेत इत्यत्रं न काऽप्यत्युक्तिः। कालिदासस्य भारती किल सर्वत्र सप्रसन्नैवा भातीति सर्वाभिमतः कल्पः।

यद्यपि कालिदासस्याखिला कृतिरेव चमत्कृतिपूर्णा, तथाऽपि क्वचित् क्वचित्तन्प्रातिभं ज्योतिः काव्यकलायाः पराकाष्ठामासादादुल्ललास। तन्निदर्शनदिशाऽत्र किञ्चिदिव प्रपञ्च्यते सुमनसां मनसः प्रमोदाय।

सीतायाः परित्यागः-रघुवंशस्य चतुर्दशसर्गगतं सीतायाः परित्यागचित्रणमुट्टङ्कयन् यन् कविरुपश्लोकयतिः- 'स लक्ष्मणं लक्ष्मणपूर्वजन्मे' त्यारभ्य त्रिचत्वारिंशच्छ्लोकदारभ्य, 'तथेति तस्याः प्रतिगृह्य वाचम्' इत्यन्तम्। तत्रापि रमणीयतमानि रत्नानि सहृदयहृदयात्यन्ताह्लादकानि समुदाह्रियन्ते। तद्यथा-

उपमा कालिदासस्येति लोकोक्तिमभिलक्ष्य किंचिदिवाधुना विविच्यते। उपमाविषये कविकुलचूडामणिः कालिदास इनरानखिलान् कवीश्वरान् नितरामति शेन इति उक्तिः सुतरां ऋतम्भरेति मन्यामहे। न चेयं लोकख्यातिः आख्याति केवलं कालिदासीवकाव्येषु उपमाभूयिष्ठत्वमपितु उपमासौष्ठवमपि। यद्यपि बहुभिरन्यैः कवीश्वरैरपि उपमा समुपलालिता तथापि सा रामणीयकत्वेन परिपूर्णत्वेन थाथातथ्येन प्रकृत्यनुरूपनिरूपकत्वेन च कालिदासीयोपमायाः तुलां नाधिरोहति। कालिदासस्योपमा यादृक्तया विमज्जयन्ती रसिकानानन्दसागरे, पायन्ती कामपि लोकोत्तररसवारां, चमत्कुर्वन्ती चेतांसि विपश्चितामुपदिशन्ती स्वभवनस्य वर्णनपूर्वकं प्रेयस्याश्च विरहावेदनं कुर्वन्नन्ते प्रणयसन्देशं प्रददाति तस्मै मेघाय प्रेयस्यै समर्पयितुम्। इति "कश्चित्कान्ता विरहगुरुणा स्वाधिकारात्प्रनत्तः" इत्याद्येन "एतत् कृत्वा

प्रियमनुचितप्रार्थनावर्त्तिनो मे'' इत्यन्तेन च मन्दाकान्ताछन्दोनिबद्धैः पंचदशोत्तरशतश्लोकैरतिकमनीयं गीतकाव्यनिदं प्रणिनाय।

मेघदूतस्य भाषाऽतीव प्रांजला, परिमार्जिता, प्रवाहवाहिनी, सुमधुरा, प्रसादगुणशालिनी च। कल्पना च पुनरतीव रमणीया कलात्मिका कोमला वर्ण्यविषयानुकला चेति नापेक्षते वक्तव्यविशेषम्। तथा च मेघं प्रति याचनाप्रकारः कियान् मनोहारीः-

**जातं वंशे भुवनविदिते पुष्करावर्त्तकानम्,**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहम्**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।**

अहो मनोज्ञमिदं वर्णनम् पर्यालोच्य न कस्य मनसि समुदेति कौतूहलपरम्परा। अधमे निर्गुण पुंसि लब्धकामापि याचना न वरम्। गुणाढ्ये पुरुषे तु पुनरसफलापि सा वरीयसी इति अर्थान्तरन्यासानुप्राणितः प्रेयोलंकार इति कियान् सुभगः। किं च -

**धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः,**
**संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययात्ते,**
**कामार्त्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।।**

अत्र भौतिकविज्ञानतत्त्वज्ञापनपुरस्सरं 'धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघ' इत्यादिकं भौतिक तथ्यं सन्देशाहरणरूपं चेतनसाध्यमर्थमचेतनेन मेघेन साधयितुं प्रवृत्तस्य यक्षस्य तादृगौचितीभर्थान्तरन्याससमुपवृंहितेन विद्वमालंकारेण कियच्चारुतयोपपादयति कविरिति समीक्षणीयम्। अथ च -

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं,
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदमिन्या कनकनिकषस्निग्धया दर्शयोर्वीम्,
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः।।

अत्र सूचिभेद्यैस्तमोभिः इति सान्द्रतामवगमयितुं तनसः सूचिभेद्यमितिः विशेषणमतीव चमत्कृत्याधायकम्। अपरं च -

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि।
वाचालं मां न खलु सुभगंमन्यभावः करोति,
प्रत्यक्षं ते निखिलमचिराद् भ्रातरक्तं मया यत्।।

अत्र सुभगंमन्यभावः इति पदमतीव ममस्पृक्। यक्षः मेघं विज्ञापयन् सावधानं करोति यन्मां सुभगंमन्यभावः वाचालं न करोति खलु भ्रातः, अचिरादेव तेनिखिलं प्रत्यक्षीभविष्यति यन्मयोक्तम्। एतेनैतदपि ध्वन्यते यत्सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागारोपणं नाम।

मेघदूतेऽपि यथाऽन्यत्र काव्यमुखेन प्रकृतिचित्रणं हि कालिदासस्य वैशिष्ट्यं प्रत्याययति। अखिलविरहिणीसाधारणलक्षमणानि समुत्प्रेक्षमाणोऽयं कुलकेनारचयतिः -

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु या भावगम्यं लिखन्ती।
पृच्छन्ती व मुधरवचना सारिकां पंजरस्थां
कच्चिद् भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति।।
उत्संगे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्रांकं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्राम् नयनसलिलैः सारवित्यवा कथंचित्

भूयोभूयः स्वयमपि कृत मूर्च्छनां विस्मरन्ती।।
शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा
विन्वस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।
मत्संगं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायणैते रमणविरहेष्वङ्गनानां विनोदाः।।

अतीव कलात्मकं वर्णनम्। पुनश्च -

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन् मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः।।

वस्तुतः कालिदासेन यक्षस्य तत्प्रेयस्याश्च विरहदशावर्णनमुखेन नानवीयान्तःप्रकृतेः मार्मिकं स्नेहस्पन्दनं करुणक्रन्दनं चित्रार्पितमिव काव्यमुखेन समर्पितम् :-

तां जानीथाः परिमितकथां जीवितं मे 'द्वितीयं,
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कंठा गुरुषु दिवसेष्वेषु गच्छत्सु बालां,
जातां मन्ये शिशिरमथितां पद्मिनीं वाऽन्यरूपाम्।।

अग्रे विरहोपनतदुःखस्य निरवधितामावेदयन् स्वपत्नीं सान्त्वयति :-

शापान्तों में भुजगशयनादुत्थिते शार्ङ्गपाणौ,
शेषान्मासान्गमय चतुरो लोचने मीलयित्वा।
पश्चावावां विरहगुणितं तं तमात्माभिलाषं,
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु।

ततः निरवधौ हेतुमाह :-

**नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे,**
**तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।**
**कस्याऽत्यन्तं सुखमुपनतं दुःखमेकान्ततो वा,**
**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।**

यदा यक्षः स्वप्नावस्थायां प्रेयसीमालिंगितुकामः भुजयुगलं प्रसारयित तदा तस्य करुणादशामवलोक्य प्रकृतिरपि मर्मस्पृक्संवदेनयाऽश्रुपातं करोति इति प्रकृतेः सहानुभूतिमावेदयन् प्रपंचयति किमपि रोमांचकृद् वर्णनम् :-

**मामाकशप्रणिहितभुजं निर्दयाश्लेषहेतोः,**
**लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।**
**पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां,**
**मुक्तास्थूलारतरुकिसलयेष्वश्रुलेशाः पतन्ति।।**

एवं पूर्वमेघे विरही यक्षः सृष्टिसौन्दर्यम् विभावयन् विरहविषण्णं हृदयमाश्वासयति, उत्तरमेघे च प्रकृतिरुमवेतमानवीयान्तःप्रकृतेः निसर्गजान् भावावेशान् अनुभूय भविसम्मेलनस्य स्वर्णस्वप्नमभिनन्दयति।

वस्तुतः मेघदूतरयानितरसुलभलोकप्रियत्वे विविधालंकारसमावेऽशसचिव-मधुर-कोमल-पदविन्यासविलसितकमनीयकल्पनाप्रसूतकथावस्तुव्यतिरिक्तं तत्त्ववर्णनार्थम् यन्मन्दाक्रान्ताछन्दोनिबन्धनं नाम मन्यामहे कारणान्तरेषु तदापि प्रमुखं कारणम्। नूनं मन्दाक्रान्तयाऽस्मिन्सन्दर्भे सुवर्णे सुरभिशुभावानमारचितम्। मन्दाक्रान्ताछन्दः किल मृदुलपदविन्यासविलसितम् यद्यपि सर्वत्र श्रवणमधुरं किमपि सुधानिष्यन्दि सङ्गतमुपजनयति, विशिष्य तु विप्रलम्भश्रृगांरकरुणकोमलभावाविश्चिकीर्षुसन्दर्भेषु। अस्य महिमा नितरां प्रशंसावधिमतिक्रामतितराम् अतएव कालिदासस्य मन्दाक्रान्तां प्रशंसन् महाकविः क्षेमेन्द्रः प्राह-

**सुवशा कालिदासस्य मन्दाक्रान्ता विराजते।**
**सदश्वदमकस्येव काम्बोजतुरगांगना।।**

अमोघराघवप्रणेता कविवरो दिवाकरोऽपि कालिदासं यत् प्रशंसातिरेकेणाभ्यनन्दत् तन्यन्यामहे मेघदूतमभिलक्ष्यैव। तथा हि -

**रम्या श्लेषवती प्रसादमधुरा श्रृंगारसंगोज्जवला,**
**चाटूक्तैरखिलप्रियैरहरहसम्मोहयन्ती मनः।**
**लीलान्यस्तपदप्रचाररचना सद्वर्णसंशोभित,**
**भाति श्रीमति कालिदासकविता कान्तेव कान्ते रता।।**

मेघदूतस्य रचना श्रृंगारभूयिष्ठापि क्वचित् शिष्टतां न जहाति, अनुपालयति च नीति-मर्यादाम्। यक्षदम्पतिप्रणयनयं सर्वथाऽऽदर्शतयाभिरक्षति। दाम्पत्यनिष्ठामुपलालयन् कालिदासः वस्तुतो मेघदूत मुखेन प्रणयसिद्धान्तस्य निगूढतत्त्वं सन्दिशति निर्दिशति च यद् वियोग एव परिपोषयन् प्रेमतत्त्वं वास्तविकतया परिपक्वतायां परिणमयति। आप्याययति च वास्तविक प्रेमपुष्पं विरह एव। एतदेव तत्त्वं साकल्येन पम्फुल्यमानं श्रृंगाररसालङ्कृतं कमनीयकल्पनारथारूढं मेघदूतरचनायां परिस्फुरति आरोपयति च काव्यमिदं गीतिकाव्येषु मूर्द्धाभिपिक्ते पदे। केचन विवेचकास्तु बलवद् व्यवतिष्ठन्ते यदि नाम कालिदासः मेघदूतातिरिक्तं किमपि काव्यान्तरं नाप्यरचयिष्यत्तदापि से केवलमेघदूतरचनयैव संसारस्य श्रेष्ठानां महाकवीनां श्रेणीमेव कविकुलगुरुत्वेन समलमकरिष्यत्। मेघदूतमुद्दिश्य चत्वारिंशत्प्रमिताः टीका आटीकिता दृश्यन्ते, या निर्विशंकं मेघदूतसय व्यापकाध्ययनं, लोकप्रियत्वं च परिचाययन्ति। 'मेघे माघे गतं वय' इत्युक्तिरप्युपोद्वलयति पूर्वनिर्दिष्टं तत्त्वम्।

कालिदासस्य मेघदूतं नाम गीतिकाव्यं गीतिकाकाव्यान्तेषु मूर्द्धाभिरिक्तं शब्दालङ्काररसरीतिभापावावेशविशेषदृशेति नास्त्यत्र कस्यापि भार्मिकस्य विप्रतिपत्तिः परन्तु प्रायशः मेघदूतं कूलङ्कषमालोचयन्तो विद्वज्जनाः केवलमेतस्य बाह्याऽलङ्काराडम्बररूपं प्राकृतिकवर्णनात्मकमेव प्रशंसन्ति,

प्राकृतिकदृश्यगिरिनिर्झरसरिद्वनावलिवर्णनमेव बहुश आलोचयन्ति, तदेव चास्य वैशिष्ट्यत्वेनाभ्युपगच्छन्ति। तदतिरिक्ततया यदि किचिञ्दालोचयन्ति तर्हि श्रृङ्गार।

बौद्धमतावलम्बिषु कविषु महाकविरश्वघोषो नामात्युच्चपदमलङ्करोति। प्रचलितपरम्परानुरोधेन, विदितं भवित यदसौ कैस्तप्रथमशताब्द्यां राज्ञ: श्रीकनिष्कदेवस्य, गुरुपदमलङ्कर्वाण: तत्सभायां राजकविपदमध्यतिष्ठ्त। जन्मभूमिरस्य खलु साकेतमण्डलम्। कस्मिंश्चिद् वेदशास्त्रसम्पन्ने विप्रकुले चायं लब्धजन्मा जननी चास्य स्वर्णाक्षीनाम्नी परमविदुषी देवी।

बौद्धधर्मदीक्षानन्तरमनेनाखिलाऽपि शक्तिसम्पद् बौद्धधर्मप्रचारायैव समर्पिता बौद्धधर्मस्य रहस्यपूर्णान् निगूढान राद्धान्तान् असौ कवित्वमय्याऽतिमधुरया भाषया सर्वसाधारणजनानवबोधयितुमतितरां प्रायतत। एकतस्त्वयमत्युच्चकोटिमाटीकमान: कविरपरतश्च प्रौढतमो दार्शनिक:। तदेतम् सुवर्णे सुरभ्याधानमिवाभ्युपपन्नमस्य रचनासु।

अस्य परमप्रथितं सर्वप्रथमं सौन्दरानन्दाख्यम् महाकाव्यम्। काव्येऽस्मिन् भगवती बुद्धदेवस्य नन्दनाम्नोऽनुजस्य निजप्रेयस्या सुन्दरीनाम्न्या देव्या सह बौद्ध धर्मदीक्षाग्रहणवृत्तान्तं कथाऽपि मर्मभेदिन्या गिरा समुपन्यस्तम्।

मानवान् दु:खावसायिनो भोगविलासाद् विमुखीकृत्य तेषां त्यागतप: परोपकृतिं प्रत्युन्मुखीकरणमेवास्य चरमोद्देश्यतवेनावगम्यते। अस्य काव्यस्य शैली तु विशुद्धा वैदर्भी, भाषा प्रासादिकी, भावावेशाश्च सुकोमला: प्रकुतिवर्णनञ्चातीव हृदयङ्गमम्। तदित्थं काव्यमिदं सर्वतोभावेन हृदयावर्जकं सम्पन्नम्। अत्र सुन्दरी नन्दयोर्वियोगं निशानिशानाथयोर्वियोगेन सहोपमिमान: कवितल्लजोऽयं कियच्चारुतया ग्रथ्नाति :-

**'तां सुन्दरीं चेन्न लभेत नन्द:, सा वा निषेवेत न तं नतभ्रू:।**
**द्वन्द्वं ध्रुवं तद्विकलं न शोभेतान्योन्यहीनाविव रात्रिचन्द्रौ।।'**

अपि च :-

**तं गौरव बुद्धगतं चकर्ष भार्यानुरागः पुनराचकर्ष।**
**सोऽनिश्चयान्नापिययौ न तस्थौ तरन्तरङ्गेष्विव राजहंसः।।**

अहो नन्दस्य तदानीन्तनायाः कारुण्यविपन्नावस्थायः कीदृशमिदं मार्मिकं चित्रणम् ! एकतो बुद्धस्य मार्मिकाः उपदेशास्तमाकर्षन्ति, अपरतश्च प्रेयस्यास्तेकेऽपि समुद्वेल्यमानाः प्रेमोल्लासाः कदर्थयन्ति, इति तरङ्गेषु तरन् राजहंस इव असौ न यातुंशशाक, न वा स्थातुम। किं कर्त्तव्यविमूढतयेति भावः।

बुद्धचरिताख्यं नामास्यपरं महाकाव्यम् अष्टाविंशतिसर्गैरुपनिबद्धम्। सम्प्रति केवलमस्याद्भुतकाव्यस्य सप्तदशसर्गा एव समुपलभ्यन्ते इति विषादस्थानम्। अस्मिन ! हि काव्ये भगवतो गोतमबुद्धस्य पवित्रचरितमतीव चारुतया संग्रथितम्। भाषाऽस्य सुमधुरा प्राञ्जला च। यत्र-तत्र प्रकृतिवर्णनमपि रमणीयतरं संवृत्तम्।

नूनवश्वघोषस्य कृतिरियं कवित्वकलाचमत्कृतिपूर्णा। यद्यपि क्वचित् क्वचिद् बौद्धसिद्धान्तप्रतिपिपादयिषया पद्येषु तत्तद्दार्शनिकतत्त्वनिवेशार्थ कृतः प्रयासः दूरूहतायां परिणत इवावभासते, तथाऽपि तावता काव्यस्त चारुता चमत्कारं वापह्नोतुं कः पारयेत। अश्वघोषविरचितानि काव्यानि गीर्वाणवाङ्मयालङ्कारभूतानिः न तानि कथमपि निम्नकोट्यां गणयितुमर्हाणि। यद्यपि तानि कालिदासीयकवित्वकलातुलां न स्पृशन्ति तथापि यत्र-कुत्र तादृशमकल्पनीयं सादृश्यं बिभ्रति, यद्विलोक्य बहवस्तु इयद्यावद्धावन्ति, कालिदासपूर्वकालभवामश्वघोषस्य स्थितिम्। परं सूक्ष्मेखणेन प्रव्यक्तमिदं भवित यदश्वघोषस्य काव्यानि न मनाक् कालिदासीयकवित्वे, कोमलतायां, पदाविन्यासमाधुर्ये च स्पर्द्धितुं क्षमाणि। मनोविज्ञानानुगतभावनां सविश्लेषचित्रणे च यथा कालिदासः कविमण्डलाखण्डलतां बिशत्ति न तथाऽन्ये केऽपि महाकवयः, वराकस्याश्वघोषस्य तु वार्तेव का।

यद्यपि अनयोः काव्ये सादृश्यमपि क्वचित्क्वचित् विस्मयावहं सम्पन्नम्। तद्यथा बुद्धचरितस्य तृतीये सर्गे :-

**ततः कुमारः खलु गच्छतीति, श्रुत्वा जनः प्रेष्यजनात्प्रवृत्तिम्।**

दिदृक्ष्या हर्म्यतलानि जग्मुर्जनेन मान्येन कृताभ्यनुज्ञाः।। 13।।
ताः स्त्रस्तकाञ्चीगुणविघ्निताश्च सुप्तप्रबुद्धाकुललोचनाश्चः।
वृत्तान्तविन्यस्तविभूषणाश्च कौतूहलेनाऽपि भृताः परेयुः ।। 14 ।।
प्रासादसोपानतलप्रणदैः काञ्चीरवैर्नूपुरनिस्वनैश्च।
विभ्रामयन्त्यो गृहपक्षिसंघानन्योन्यवेगाच्च समाक्षिपन्त्यः।। 15।।
वातायनेभ्यस्तु विनिःसृतानि, परस्परोपाश्रितकुण्डलानि।
स्त्रीणां विरेजुर्मुखमण्डलानि सक्तानि हर्म्येष्विव पङ्कजानि।। 19।।
दृष्ट्वाचतं राजसुवं स्त्रियता जाज्वल्यमानं वपुषा श्रिया च।
धन्याऽस्य भार्येति दानैरवोचन् शुद्धैर्मनोभिः खलु नान्यभावात्। 23।।
अयं किल व्यायतपीनबाहू रूपेण राक्षादिव पुष्पकेतुः।
त्वक्त्वा श्रियं धर्ममुपेष्यतीति तस्मिन् स्त्रियो गौरवमेव चक्रुः।। 24।।

इमानि पद्यानि रघुवंशस्य सप्तसर्गगतैरधस्तादङ्कितैः पद्यैः सह सादृश्यमनुबध्नन्ति तत्कियद्यावदौचितीमावहति इति तु सुधियः स्वयमेवावलोकयन्तु। यदा अजः इन्दुगत्या सह रजमार्ग प्राप तदा पुरसुन्दरीणां विचेष्टितानि वर्णयन् आह कालिदासः -

तदा तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि।। 5।।
ओलाकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः।
बोद्धुं न सम्भावित एव तावत् करेण रूद्धोऽपि च केशपाशः।। 6।।
प्रसाधिकालम्बितमग्रपादमाक्षिप्य कात्तिद् द्रवरागमेव।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान।। 7।।
विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवारानेत्रा।
तथैव वातायनसंनिकर्षं ययौ शलाकामपरां वहन्ती।। 8।।
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम्।
नाभिप्रवष्टिाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः।। 9।।
रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथाहि बाला।

गतेयगात्मप्रतिरूपमेव मनो हि जन्मान्तरसङ्गतिज्ञम् ।। 15।। इति।

अहो कीदृग्विस्मयावहं साम्यम्? ईदृशं हि खल्वद्भुतं सादृश्यमनयोरवलोक्य मिथ: फवित्वच्छायाऽनहरणं केचन संशेरते। परं महोद्दामवाचां महाकवीनां विषये तादृशं साजात्यं निसर्गसुलभया गत्याऽपि सम्भवन्न नान्योऽन्यछायानुहरणकोटिं मात्रयाऽप्याटीकते। अतर्कोपनतं तादृशं सादृश्यं न मनाक् सम्भवकोटित: प्रच्यवते। अत्र नास्ति सन्देहलवोऽपि यदश्वघोषस्य काव्यं परमोच्चकोटिमालम्बते । नूनं काव्यमेतदत्यन्तसफलं प्रशंसार्हञ्चाभ्युपपन्नम्। निर्वाणतत्त्वमत्र दीपदृष्टान्तेन कियच्चारुतयोपन्यस्तम् :-

**दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।**
**दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात्केवलमेति शान्तिम्।।**

काव्यकलयाऽपि और प्रथमां श्रेणीमालम्बते:-

**'कृपणं बत यूथलालसो महतो व्याधभयाद् विनिस्सृत:।**
**प्रविविक्षति वागुरां मृगश्चपलो गीतरवेण वञ्चित:।।**

अश्वघोषस्य रचनान्तरेषु सौन्दरानन्दं बुद्धचरितञ्चातिरिच्य सूत्रालङ्कार: महायानश्रद्धोत्पाद:, वज्रसूची, गण्डितस्तोत्रमित्येतेऽन्ये सन्दर्भा: अपि अतीव हृदयङ्गमा:। परमस्य काव्येषु भूयसा काव्यान्तरच्छाया प्रतिबिम्बिता इव प्रतिभाति।

संस्कृतकाव्ये कविवरस्य भर्तृमेण्ठस्य नामातीव प्रतिभाशालित्वेन स्मर्यते। राजशेखरेणास्य संस्मरणं स्वकीये बालरामायणाख्ये परमरमणीये काव्ये कृतमवलोक्यते :-

**बभूव वाल्मीकभव: पुरा कवि-**
**स्तत: प्रपेदे भुवि भर्तृमेण्ठताम्।**
**स्थित पुनर्यो भवभूतिरेखया**
**स वर्त्तते सम्प्रति राजशेखर:।।**

तदिदं कौतूहलास्पदं यद् वाल्मीकि-भवभूतिकालमध्यवर्त्तिनं लोकविश्रुतं कविकुलगुरुं कालिदासमप्रस्तुत्य भर्तृमेण्ठस्य प्रशंसनं विहितम्। तन्नूनम्महाकवेरस्य गौरवशालित्वमभिव्यनक्ति।

महाकविना काश्मीरकेण कह्लणेनापि राजतरङ्गिण्यामस्य वर्णनमुपन्यस्तम् :-

**'हयग्रीववधं मेण्ठस्तदग्रे दर्शयन् नवम्।**
**आसमाप्ति ततो नाऽपत् साध्वसाध्विति वा वचः।।**
**अथ ग्रन्थयितुं तस्मिन् पुस्तके प्रस्तुते न्यधात्।**
**लावण्यनिर्याणभिया राजाऽधः स्वर्णभाजनम्।।**
**अन्तरज्ञतया तस्य तादृश्या कृतसत्कृतिः।**
**भर्तृमेण्ठः कविर्मेने पुनरुक्तं श्रियोऽर्पणम्।।**[1]

इत्यनेनावगम्यते यत्कविरेष काश्मीरेषु एव राज्ञो मातृगुप्तस्य सभापण्डितत्वमलञ्चकार। राजतरङ्गिणीसाक्ष्येण मातृगुप्त-भर्तृमेण्ठसमयः खलु समसामयिक एव। एतदनुरोधन कैस्त 430 मिताब्दसन्निकर्ष एवं क्वचित्सम्भाव्योऽस्य समयः।

अस्य रचनात्वेन प्रसिद्ध काव्यं हयग्रीववधाख्यम्। यद्यप्येतदद्यत्वे न सुलभोपलम्भम्, तथाऽपि ग्रन्थान्तरेषु अस्य प्रशंसनावलोकनेने अस्य महनीयत्वं सुतरामाविर्भवति। श्रीमम्मटाचार्येण काव्य-प्रकाशस्य सप्तमोल्लासे 'अङ्गस्याप्यतिविस्तृतिः' इति काव्यदोषं मन्यमानेन 'हयग्रीववधा'देव पद्यमेकं समुदाहृतम्। अनेनास्य सुप्रसिद्धिः सुतरां ध्वनिता भवति। परं समकालावच्छदेनैवास्य काव्यस्य सदोषत्वमप्युपोद्वेलितम्भवति। इममत्र बोध्यम् यदालङ्कारिकाणामेष समयः यत्काव्येषु रूपकेषु च अङ्गिनो मुख्यपात्रस्यैव विस्तृतं वर्णनं भवति न तदङ्गस्यामुख्यस्येति। परन्तु 'हयग्रीववधे' एष नियमः समुल्लङ्घितोऽवलोक्यते। अत्र हि खल्वङ्गी विष्णुः; अङ्गञ्च पुनः हयग्रीवः। अत्र नायकस्य स्थान प्रतिनायकस्यैव

[1] राजतरंगिणी तृतीयेतरङ्गे 264-266

यद् विस्तृतं वर्णनं प्रपञ्चितं तदेष दोष:। स एव मम्मटाचार्यण दोषत्वेन निर्दिष्ट: 'अङ्गस्याप्यतिविस्तृति:'। कविराजेन सोड्ढलेनाप्यस्य प्रशंसायामुट्टङ्गितम् :-

**'य: कश्चिदालेख्यकर: कवित्वे,**
**प्रसिद्धनामा भुवि भर्तृमेण्ठ:।**
**रसप्लवेपि स्फुरति प्रकामं,**
**वर्णेषु यस्योज्ज्वला तथैव।।**

अस्य वक्रोक्तिं प्रशंसन् कवीश्वरो धनपाल आह :-

**'वक्रोक्त्या मेण्ठराजस्य वहन्त्या सृणिरूपताम्।**
**आविद्धा इव धुन्वन्ति मूर्द्धानं कविकुञ्जरा:।।**

यत्र क्वचित् हस्तिपकनाम्ना सुभाषितेषु सूक्तय: उपलभ्यते ता अपि हस्तिपकापरनाम्ना भर्तुमेण्ठराज्स्य बहवोऽनूचाना आशेरते। अस्य काव्यरसोऽपि समास्वाद्यताम् :-

**त्वक्तो विन्ध्यगिरि: पिता भगवती मातेव रेवा नदी,**
**ते ते स्नेहनिबन्धबन्धुरधियस्तुल्योदया: दन्तिन:।।**
**त्वल्लोभान्ननु हस्तिनि! स्वयमिवं बन्धाय दत्तं वपु-**
**स्त्वं दूरे ध्रियसे लुठन्ति च शिर:पीठे कठोराङ्कुशा:।।**

अपि च:-

**घासग्रासं गृहाण, त्यज गजकला! प्रेमबन्धं करिण्या:;**
**पाशग्रन्थिव्रणानामभिमतमधुना देहि पङ्कानुलेपम्।**
**दूरीभूतास्तवैते शवरवधूविभ्रभोद्भ्रान्तरम्या,**
**रेवाकूलोपकण्ठद्रुमकुसुमरजोधूसरा विन्ध्यपादा:।।**

महाकवि श्रेण्यां कालिदासाश्वघोषयोरनन्तरं कालक्रमानुरोधात् महाकविर्भारविरेव रविरिवोदेति संस्कृतसाहित्यमहाम्बरे। अस्य कवेः किलार्थगाम्भीर्यतुन्दिलवचनरचनापटीयसी, सुललितपदाविलासलास्यलीलावती, विशुद्धरमणीयवर्णाभरणा भारती अमन्दावन्दसन्दोहोल्लासेन कस्य वा सहृदयस्य हृदयसरोवरं नोद्वेल्लयति। यद्यपि व्यास-वाल्मीकिकविपुरन्दराणां संस्कृतसाहित्यपुरन्धराणां काव्यवीणानिक्वणनप्रावीण्यं तु न पस्पर्शास्य कवित्वझङ्कारः, तथापि सोऽतीव श्रवणमधुरः प्रशस्यतरश्च संवृतः।

## रचना

महामहिमाशालिनी महाकवि-भारवेः लेखनीलताप्रसूतमिदं किरातार्जुनीयं नाम महाकाव्यकुसुमम्। तत्कथावस्तु तु कविना महाभारतस्य वनपर्वतः सङ्कलितम् यद् द्वैतयनमधिवसतां पाण्डवानां तात्कालिकवृत्तान्तविशेषमधिकृत्य प्रवृत्तम्। तत्र च पाण्डवानामन्यतमस्य प्रकाण्डवीरस्यार्जुनस्य किरातरूपधारिणः पशुपतेः सकाशाद् मोघास्त्रोपलब्धिरूपं वृत्तमुपगुम्फितम्। अष्टादशसर्गैरुपनिबद्धेऽस्मिन् महाकाव्ये इन्द्रकीलवामके पर्वते प्रवृतस्य शङ्करार्जुनयोर्युद्धस्यातीव रोमहर्षणं वर्णनं न कस्य हृदयङ्गमम्। अस्य काव्यस्यारम्भः श्रीशब्देनोपसंहारश्च लक्ष्मीपदेन कृतः। श्रृङ्गारादिरसानां गौणतया वीररसस्थ पुनः प्राधान्येन चित्रणमतिमनोहरं सम्पन्नम्। प्राकृतिकदृशनां निरूपणं, शैल-सूर्यास्तमन-जलक्रीडादीनाञ्च वर्णनमतीव मनोज्ञम्। स्वल्पैः पदैर्विशदार्थवर्णनमेव कवेरस्य वैशिष्ट्यम्। "भारवेरर्थगौरवम्" इत्युक्तिरस्य विषये सुतरां समाञ्जस्यमशनुते। पाशुपतसंज्ञकास्त्रासंप्राप्तिपर्यवसानमेवास्य काव्यस्य फलत्वेनावसीयते। तथा चाह मल्लिनाथ :-

**नेता मध्यमपाण्डवो भगवती नारायणस्यंशजः,**
**तस्योत्कर्षकृते नु वर्ण्यचरितो दिव्यः किरातः पुनः।**
**श्रृङ्गारादिरसोऽङ्गमत्र विजयी वीरप्रधानो रसः,**
**शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रालाभः फलम्।। इति।**

सोऽयं कविः भारतस्य कतमं जनपदं स्वजनुषाऽलमकार्षीत् कस्य वंशस्यावतंसताङ्गत इत्यद्यापि न निर्णयपथमारोहति। तथापि प्रचलितप्रवादमनुसन्धाय पुरावृत्तविदां भारवेः कालनिर्णयविषये केवलं कतिपयैर्बहिरैरिव प्रमाणः किञ्चिदुन्नेतुं पार्यते नान्तरङ्गैः। भारवेः रचनास्वनेकत्र कालिदासीयरचनायाः प्रतिबिम्बं प्रत्यवभासमानं कालिदासादस्य परभवत्वं प्रत्याययति। एवं माघेऽपि भारवेः प्रभावो भूम्नाऽवभासते। श्रीबाणभट्टस्य कृतिषु तु न कुत्रापि भारवेरवभासः प्रतिभाति। अतः बाणभट्टस्य स्थितिकाले भारवेर्यश:प्रकाशो दिग्दिगन्तरालं न पस्पर्शेति न दुष्करमूहितम्। दक्षिणापथे राज्ञः श्रीराहोलस्य शिलालेखेषु चालुक्यवंशोद्भवस्य श्री पुलकेशिनाम्नो नृपमणेः प्रशस्तिलेखेषु भारवेरुल्लेखोऽधोङ्कितरूपेणोपलभ्यते :-

**येनायोजि न वेश्मस्थिरमर्थविधौ विवेकिना जिन वेश्म।**
**स विजयतां रविकीर्त्तिः कविताश्रितकालिदासभारविकीर्त्तिः।।**

यच्च रविकीर्त्तिसमुल्लिखिते पुलकेशिद्वितीयस्य ताम्रशासनफलके भारवेर्नामोल्लसति, तत्पत्रं षट्षष्ट्युत्तरपञ्चशततमें, (566) शकसम्वत्सरे कैस्ते चतुस्त्रिशदुत्तरषट्शतकमिते (634) कालिदासप्रसङ्गेन सम्यगुट्टङ्कितम् सविवरणम्। तदिदं सुस्पष्टमावेयदयति यदस्य स्थितिकालः क्रीस्तीय 634 संवत्सरतः पूर्वतन एव। अवन्ती-सुन्दरीकथापर्यालोचनञ्चाऽयं पुलकेशिद्वितीयस्य विष्णुवर्द्धनस्य राजसभा पण्डितमण्डलललामभूतोऽयमासीदिति राम्यक् पुष्णाति। एतावता प्रोक्तकाल एव कवेरस्याविर्भावकालः इति प्रतिपत्तुं न दुष्करम्।

**'तावद् भा भरावेर्भाति यावन्माघस्य नोदयः।**
**उदिते नैषधे काव्ये क्व माघः कव च भारविः।।**

इत्यस्मिन् नैषधप्रशस्तिपरे पद्ये नैषपप्रशंसकानां केषाविञ्चद्वचनेन समं भारविमाघयोर्नामोत्कीर्त्तनमाकलय्य केचन समालोचकाः समुपकल्पयन्ति भारविमाघयोः समकालवर्त्तित्वम्। परं तन्न विचारसहम्। यतो माघादूर्ध्वतनकालविरचितेषु सन्दर्भेष्वपि भारवेः सुभाषितमुपलभ्यते तस्मात्तदूर्ध्वतनकालस्तु भारवेराविर्भावकाल इति तु सुतरामनुमातुं शक्यते। न च तावतेदमपि वक्तुमर्ह यन्माघकविरत्यर्वाचीनः इति यतो

भारवेः अनेके श्लोकाः प्राक्तनालङ्कारिकस्य भट्टमम्मटाचार्यस्य कृतौ काव्यप्रकाशे एवमन्येष्वपि सन्दर्भेषूद्धृता दृश्यन्ते। अतः तस्मात्पूर्वतन एवं माघसमयः। मम्मटाचार्यस्य स्थितिकालः कीस्तीयैकादशशतकमिति सम्भाव्यते। कवेर्माघस्याविर्भावस्तु तत्पूर्वस्मिन् नवमशतके दशमशतके वा समवाधार्यते कालप्रतिपद्यते एतच्च भारवीयरचनायाः माघीयकाव्येषु प्रतिबिम्बितत्वदर्शननावगतं भवति। यथाहि शिशुपालवधस्य प्रथमसर्गे महर्षिनारदेन मदगर्वितस्य कृष्णद्विषश्चेदिभूभुजोऽवस्थाया निरूपणं तदनुश्रवणे महाविद्वेषिणः बलदेवस्य निरतिद्वविर्णविशधारिणो वनेचरस्य मुखेन दुर्योधनस्य गतिविधिविज्ञापनम्, वदनु भीमादेः ओजस्विगिरां प्रसरः, तत्प्रशमनार्थं युधिष्ठिरस्य नीतिसंवलितवचनप्रपञ्चीकरणम् इत्यादिकं परस्परं सादृश्यं प्रणिभाल्य सम्यक् शक्यते प्रतिपत्तुं यन्मोघोऽपि तत्पूर्ववर्तिनो भारवेः छायां स्वरचनास्यनुहरित भूयसेति।

यच्च केचन व्याहरन्ति यद् भारविणा जन्मना महाराष्ट्रभूमिः सुभूषिता किरातार्जुनीयस्य निम्नाङ्कितं पद्यमाधीकृय :-

**उरसि शूलभृतः प्रतिहता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः।**
**भृशरया इव सह्यमहीभृतः प्रथुनि रोधसि सिन्धुमहोर्म्मयः।। इति।**

अत्र सह्यमहीभृतः इति पददर्शनात् सह्याद्रिरेव कवेरावासभूमिरिति कल्पितमवगम्यते। अतएव कविरपि महाराष्ट्रदेशीय इत्थं प्रतिपन्नम्। परन्तत्रान्ये विप्रतिपद्यन्ते। तेषां वाचोयुक्तिरियम् यत् सह्याद्रिनामोल्लेखेनैव यदि सैव भूमिः कवेर्जन्मभूमिरिति अनुमन्येत तर्हि दक्षिणदिग्विभागानां, सह्यसुलोशादिशैलमालानाम्, गोदावरी-कावेरी-ताम्रवर्णीभृतिनदीनां, वनोपवनस्थलीनां च वर्णयितुः 'हरिविजय' काव्यरचयितुः काश्मीरजस्य रत्नाकरस्य तत्तद्देशावासलंकृतत्वपरिकल्पने को वा प्रत्यूहः। एवं विन्ध्याद्रिवननिर्झरवर्णनप्रवीणो बाणोऽपि तत्प्रदेशाधिवासित्येन कथङ्कारं नालङ्करणीयः? तस्मात्कस्यचित्स्थनविशेषस्य वर्णनवशत् कवीनां तत्रैव निवासस्थल-कल्पना न मानक् श्रद्धेयपद्धतिमाधरोहति।

कविवरोऽयमलङ्कारशास्त्रनिपुणो नीतितन्त्रेषु प्रकाण्डपण्डितः प्रौढो वैयाकरणश्चासीद् इति धारणाा तद्विषयेऽद्यापि सुतरां स्वारस्येन जागर्तितरां विद्वन्मण्डले। प्रकृतिपर्यालोचनं भारविणा तार्क्ष्यतीक्ष्णदृशा कृतमिवावलोक्यते। अतएव अस्य वर्णनप्रसरे सजीवता दृग्गोचरीभवित। सायंकालवर्णनं कियच्चमत्कारपूर्णम्?

**मध्यमोपलनिभे लसदंशावेकतः च्युतिमुपेयुषि भानौ।**
**द्योरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीम्।।**

अत्र परिवृत्तिविलोलामिति कीदृगौचितीपूणः प्रयोगः भारवेः काव्यं तत्प्रणेतुः संसारानुभवस्योच्चकोट्यावगाहिऽतिपत्तिमावेदयति, प्रत्यायवति न तस्य संसारचक्रस्य पारदृश्वताम्। याचनावृत्ति स धिक्करोति, अभिनन्दति चात्माभिमानगुणम् सृभृशम्।

**'अयातपूर्वा परिवादगोचरं, सत हि वाणी गुणमेव भाषते।।'**
**सज्जनानां वाणी निन्दां न जानाति।**
**"वसन्ति हि प्रेम्णि गुणाः न वस्तुनि"**

गुणः खलु प्रेम्णि निवसन्ति न तु वस्तुनि इति कथनं कियत्तथ्यतां बिभर्ति।

किरातार्जुनीयस्य चतुर्थे सर्गे शरद्ववर्णनम्, पञ्चगे चर हिमालयवर्णनम्, अष्टमे सर्गे गन्धर्वसहिताप्सरसां कुसुमावचयवर्णनम्, जलाक्रीड़ावर्णनम् सालङ्कृतं, दशमे षड्तुवर्णनमतीव मनोज्ञं संवृत्तम्। एवं काव्यमिदं अलङ्कृतिना, शैल्य च निदर्शनभूततया कवये यशःप्रतिष्ठाप्रदञ्च प्रत्यपद्यत। अयावितथा उपदेशा निरतिशयसहृदयहृदयावर्जकाः -

**तावदश्रियते लक्ष्म्या तावदस्य स्थिरं यशः।**
**पुरुषस्त वदेवाऽसौ यावन्मानान्न हीयते।।**
**स पुमानर्थवज्जनमा यस्य नाम्नि पुरःस्थिते।**
**नान्यामङ्गुलिमभ्येति, सङ्ख्यायामुद्यताङ्गुलिः।।**
**ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जलनः,**
**अभिनतभयदासूनतः सुखमुज्झन्ति न धाम मानिनः।।**

सर्वथा स्वहितमाचरणीयम्, किं करिष्यति जनो बहुजल्पः।
विद्यते नहि स कश्चिदुपायः, सर्वलोकपरितोषकरो यः।।
मुनिरस्मि निरागसः कुतो से भयमित्येष न भूतयेऽभिमानः।
परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामसाध्यम्।। इत्यादि

कवेरस्य सम्प्रति किरातार्जुनीयाख्यमेकमेव काव्यमुपलभ्यते। अर्थगौरवदृशा, राजनीतिरहस्यनिरूपणधिया च काव्यमिदं काव्यान्तरेभ्यः अतितरां वैशिष्ट्यामावहति। वर्णनशैली चास्यौजःपूर्णा। अस्मिन् हि महाकाव्यस्य अखिलानि लक्षणानि परिपूर्णतया अभिव्यक्तिमुमगतानि विभाव्यन्ते किल। महाभागेन कृष्णकविना स्थान एवोक्तं खलुः-

तदेव वृत्त्यापि महान्तमय, प्रदर्शयन्ती रसमादधाना।
सा भारवेः सत्पथदीपिकेव, रम्याकृतिः कैरिय नोपजीव्या।।

चतुर्थसर्गे शरद्वर्णनमारचयन्नाह :-

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशंगीः कलमस्य बिभ्रती।
शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोऽनुगच्छति।।
कीदृशी सुसंश्लिष्टा अपूर्वा कल्पना !

जल क्रीडामारचयन्तीनामप्सरसरसां चारुचित्रणमपि किंचिदालोचनीयम् :-

तिरोहितान्तानि नितान्तमाकुलैरपां विगाहदालकैः प्रसारिभिः।
ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः।।[1]

यद्यपि भारवेः भाषा क्वचित्क्वचिदर्थगाम्भीर्यवशाज्जटिला सञ्जाता तथापि रसगर्भनिर्भरत्वान्न विजहाति मनागपि सा माधुर्यम्। वाह्यरूपमेव कठिनं प्रतीयते

---

[1] किरातार्जुनीयम्, 8/47

नारिकेलफलवत् आभ्यन्तरन्तु तत्सरसरससम्भृतमानन्दमेव आतनुते सहृदयानाम्। तथा मल्लिनाथोऽप्याह :-

**नारिकेलफलसम्मितं वचो, भारवेः सपदि तद्विभज्यते।**
**स्वादयन्तु सरगर्भनिर्भरं, सारमस्य रसिका यथेप्सितम्।।**

कविशिरोमणिः क्षेमेन्द्रोऽप्यस्य वंशस्थवृत्तोत्कृष्टतां वर्णयन्नाह :-

**वृत्तच्छत्रस्य सा कापि, वंशस्थस्य विचित्रता।**
**प्रतिभा भारवेर्येन, सच्छायेनाधिकीकृता।।**

महाकाव्यचक्रेतिवृत्ते भारविः सालङ्कृतकाव्यशैलीप्रवर्तकेषु कविमूर्धन्येषु प्रमुखपदमल रोत। प्रायशः नीति-निगढतत्त्वनिगुम्फनं संवादरूपेणातिचारुतया निरूपयति। तत्किञ्चदास्वादयन्तु विज्ञरसिका अपि तद्रचनारसमाधुरीम् :-

**व्रजन्ति ते मूढधियः पराभंव भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्ताथाविधाः न संवृतांगन्निशिता इयेषवः।।**[1]

किञ्च-

**विहाय शान्तिं नृप धाम तत्पुनः प्रसीद संधेह वधाय विद्विषाम्।**
**व्रजन्ति शत्रूनवधूय निःस्पृहा शनेन सिद्धिं मुनयो न भूभृतः।।**[2]
**विषमोऽपि विगाह्यते नयः कृतीर्थः पयसामिवाशयः।**
**स तु तत्र विशेषदर्लभः सदुपन्यस्यति कृत्यवर्त्म यः।।**[3]
**क्षययुक्तमपि स्वभावजं दधते धाम शिवं समृद्धये।**
**प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम्।।**[4]
**अभिमानवतो मनस्विनः प्रियमुच्चैपदमारुरुक्षतः।**
**विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम्।।**[5]

---

[1] किरातार्जुनीयम् 11/30
[2] किरातार्जुनीयम् 11/42
[3] किरातार्जुनीयम् 11, 12/3
[4] किरातार्जुनीयम् 12/11
[5] किरातार्जुनीयम् 12/13

तेजस्विनां स्वभावं कीदृक्चारुतया वर्णयति :-

**किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः।**
**प्रकृतिः खल सा महीयतः सहते नान्यसमुन्नतिं यया।।**[१]
**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**[२]
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।**[३]
**लभ्या धरित्री तव विक्रमेण ज्यायाँश्चवीर्यास्त्रवलै विपक्षः।**
**अथ प्रकार्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः।।**

श्रीवत्सपदलाच्छनस्तत्रभवान् भट्टिनामा महाकविः पदावक्यप्रमाणवित्, कुशलःकाव्यकलाकलाकारः सौराष्ट्रेषु वलभीनाम्नीं नगरीं स्वजनुषा संमलञ्चकार। एष किल कविः महीपालश्रीधरसेनस्य आसीत् सभापण्डितमणिः। श्रीधरसेनस्य च स्थितिकालः कैसत्पष्ठाबद्युत्तरार्द्धादारभ्य सप्तमाबद्याः आरम्भकालपर्यन्त एव निर्धारित कालविद्भिरित शिलालेखैत्वगम्यते।

महाकविभट्टिप्रणीतं 'रावणवध'' मित्यपरनामवेयं भट्टिकायमिदं व्याकरणशास्त्रमधिजिगांसूनामत्युपकाराकं व्याकृतिप्रक्रियाऽलङ्कृतं महाकाव्यम्। शब्दालङ्कारसहकृतार्थालङ्कार एवास्य काव्यस्य वैशिष्ट्यम्। यमकावलिरपि अतीत मञ्जुला, भाषा च नितंरा प्राञ्जला। तद्यथा-

**नगजा नगजा दयिता दयिता, विगतं विगतं ललितं ललितम्।**
**प्रमदा महता पहता मरणं मरणं समयात् समयात्।।**

कवेरस्य प्रकृतिचित्रणम्, पौढा च व्यञ्जनाप्रणाली, प्रभावशाली च संवादप्रसरः कस्य मनो न रञ्जयति। तद्यथा-

---

[1] किरातार्जुनीयम् 12/21
[2] किरातार्जुनीयम् 2/20
[3] किरातार्जुनीयम् 12/30

न तज्जलं यन्न सुचारुपङ्कजं, न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यत् क्लं, न गुञ्जितं तन्न जहार यन्मनः।।
एकावल्यलङ्कारस्यैतदतिरमणीयमुदाहरणम्।
अस्य तावच्चकवाल-यमकाऽलङ्कारोऽप्यति मनोहरः।
अवसितं हसितं प्रसितं मुदा विलसितं ह्रसितं स्मरभासितम्।
न समदा प्रमदा हतसम्मदा पुरहितं विहितं न समीहितम्।।
मण्डलाकारेण यमितत्वादेतच्चकवालमुदीर्यते।

काञ्ची-यमकमपि:-

पिशता शितामनुदिशं स्फुटताम् स्फुटता जगाम परिविह्वलता।
हलता जनेन बहुताचरितं चरितं महत्त्वरहितं महता।। इति।।

महाकवरस्य शरद्वर्णननैपुणीं प्रणिभालयन्तु विद्वच्चणाः अणुवीक्षणेन। अयोध्याया निर्वत्य रामः सलक्ष्मणः शरदं ददर्श। कालस्याप्रत्यक्षत्वात् तत्कार्यदर्शनादेवात्र शरद औपचारिकदर्शनं गम्यते :-

तरङ्गसङ्गाच्चपलैः पलाशैर्ज्वालाश्रियं सातिशयं दधन्ति।
सधूमदीप्ताग्निरुचीनि रेजुस्ताम्रोत्पलान्याकुलष्ट्पदानि।।
बिम्बागतैस्तीरवनैः समृद्धिं निजां विलोक्यापहृतां पयोभिः।
कूलानि साऽमर्षतयैव तेनुः सरोजलक्ष्मीं स्थलपद्महासैः।।
निशानुषारैर्नयनाबु-कल्पैः; पत्रान्तपर्य्यालदच्छविन्दुः।
उपारुरोदेय नदत्पतङ्गैः कुमुद्वतीतीरतरुर्दिनादौ।।
वनानि तोयानि व नेत्रकल्पैः, पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मीमालोकयाञ्चकुरिवादरेण।।

काव्यकलाऽपि प्रशस्ता। सीतां वर्णयन्नाह-

हिरण्मयी साललतेव जङ्गमा च्युता दिवः स्थास्नुरवेरिव प्रभा।

शशाङ्कान्तेरधिदेवताकृतिः सुता ददे तस्य सुताय मैथिली।।
प्रभातवाताहतकम्पिताकृतिः कुमुद्वतीरेणुपिशङ्गविग्रहम्।
निरासभृङ्गाकुपितेव पद्मिनी न मानिनी संसहतेऽन्यसङ्गविग्रहम्।।

भट्टिकाव्यं[1] [2]व्याकरणप्रधानं महाकाव्यम्। व्याकरण वबोधाधिजिगांसूनां छात्राणामनुग्रहेच्छया सौकर्येणैव व्याकृतिमवगमयितुमिदं विरचितं महाकविना भट्टिमहाभागेन। व्याकारणमार्गप्रदर्शनपुरस्सरं काव्यचषके नयनाभिरामरामकथामृतमपि निकामं सम्भृतमत्र विभृतमिव। उम्त्ञ्च केनाप्यभियुक्तेन :-

व्याकृतिचषकपेयं रामराजकथामृतम्।
शब्द-वाक्य-पदच्छेद-स्थूलाक्षर-विशेषदक्।।
व्याकृत्या कोशछन्दोभ्यामलङ्कृत्या रसेन च।
पञ्चकेनान्वितं काव्यं भट्टिकाव्यं विराजते।।

तदेवं रस-अलङ्कार-पदविन्यासविलाससमन्वितं काव्यमिदमतिसुभगं सम्पन्नमिति।

दीपतुल्यः प्रबन्धोऽय, शब्दलक्षणचक्षुषाम्।
हस्तामर्श इवान्धानां भवेद् व्याकरणादृत्ते।।

किञ्चास्यै काव्यस्य वैशिष्ट्यां द्योतयन्-

व्याख्यागम्यं काव्यं, उत्सवः सुधियामिव।
हता दुर्मेधसश्चास्मिन्, विद्वत्प्रियतया मया।।

यत्रेदं काव्यं कृतं वद्दर्शयन्नपि कविराहः-

---

[1] भट्टिकाव्यमिद द्वाविशतिसर्गै प्रणेबद्ध, तत्रादिमचतुर्षु सर्गेषु प्रकीर्णनियमा, ततो नवमसर्गपर्यन्त विशेषनियमा., तदनु त्रयोदशसनान्तिम् अलङ्कारा, तदनन्तर द्वाविशतिसर्गपर्यन्त लकारप्रयोगाश्च प्रपञ्चिता.। तदिद व्याकरणस्य जीवातुभूत भट्टिकाव्यमिद विदुषा समाजे निरतिशयादरास्पीभूत विलसति।

[2] यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणाम्।
स्वजन श्वजनो माभूत्, सकल शकल, सकृत् शकृत।।

**काव्यमिदं विहितं मया वलभ्यां श्रीधरसेन-नरेन्द्र-पालितायाम्।**
**कीर्त्तिरतो भवतान्नृपस्य तस्य प्रेमकरः क्षितिपो यतः प्रजानाम्।।** इति।

काविचित् पद्यानि तु अस्य निरतिशयरमणीयानि-

**रमोऽपि दाराहरणेन तप्तो, वयं हतैर्बन्धुभिरात्मतुल्यैः।**
**तप्तेन तप्तस्य यथा तथा नःसन्धिः परेणास्तु विगुञ्च सीताम्।।**

अथ कोऽयं भट्टिर्नाम, को वास्य निश्चितः समयः इति किञ्चिदिव, स्थूणानिखनन्यायेन पुनरपि भूयस्तरं विवच्यते। यद्यप्यत्र विषये इदमित्थन्तया न किञ्चिद्वक्तुं शक्यम्, तथाऽपि कालविदामाशयमनुरुध्य प्रस्तूयते तावत्-केचन तर्कयन्ति यद् वत्सभट्टिरेव भट्टिनाम्ना प्रसिद्धिं गतः, न कश्चिदन्यः। अपरे भर्तहरिरेवायम्, भर्तृशब्द एवापभ्रष्ट 'भट्टिः' सञ्जातः। परं सूक्ष्मेक्षिकयां निरीक्षणेन एतत्कल्पद्वयमपि शशशृङ्गायते वत्सभट्टेः महावैय्याकरणेन भट्टिना सहैकात्म्यं वत्सभट्टेः कृतौ आपतितानि व्याकृतिस्खलितानि एव स्वयं निराकुर्वन्ति। नहि तेजस्तिमिरयोरभेदं चक्षुष्मन्तः सोढुमर्हन्ति। इत्थमेव भर्तृहरिरेवापभ्रष्ट भट्टिः संवृत्त इत्यपि क्लिष्टकल्पना मात्रयाऽपि नावतरति बुद्धिपद्धतिम्। तदेवं मन्यामहे, एतद्द्वयाद् भिन्नः कश्चिदन्य एव स्वनामधन्योऽयं भट्टिः भवेदिति निर्णय एव रोचिष्णुः। कालविषयेऽपि, श्रीधरसेननृपतेः समये भट्टिरभूद् इत्युक्तपूर्वम्। तत्र विवेचनीयं भवति यत् श्रीधराख्या नृपास्तु चत्वारोऽभूवन् तेषु। यश्चरमः सः 641 तमे खैस्ताब्दे दिवङ्गतः। तेनानुमातुं शक्यते यत् खैस्ताब्द षट्शतमितदेशीय एव कविरेष सम्भवेत्। किञ्च- "व्याख्यागम्यमिदं काव्यम्, उत्सवः सुधियामलम्। हता दुर्मेधनश्चास्मिन् विद्वत्प्रियतया मया।।' इति भट्टिकाव्यदुद्धृतेन पद्येन सुतरा व्यज्यते यद् भामहात्पूर्वकालभव एव भट्टिरासीत्। प्रसिद्धालङ्कारिकयोर्दण्डिभामहयोरपि भट्टिप्रणीतालङ्कारे नामस्मरणमपि न दृश्वते। तदेतदपि व्यञ्जयति भट्टिमहाभागस्य दण्डिभामहमहाभागात्पूर्वतनकालभवत्वम् इति दिक्।

संस्कृतवाङ्मयमहोदधेस्तत्रभवान् महाकविमघिः खल्वत्यन्तभासुरं रत्नम्। अस्य हि नवभिनवपदविन्यासविलासः नितरां प्रौढः लोकविश्रुतश्च। एनमु द्दिश्य जनश्रुतिरियं प्रसिद्धा- 'नवसर्गगते माघे नवशब्दो न विद्यते।' सेयमुक्तिः खलु बहुष्वंशेषु तथ्यतां बिभर्त्ति। एतद्विरचितं शिशुपालबधं नाम महाकाव्यं, 'माघकाव्य' मिति तन्नाम्नाऽपि

प्रथितम्। अस्मिन् काव्ये वर्णनशैली अतीव प्रौढा, वर्णनमलङ्कारपूर्ण भावगाम्भीर्यसम्भृतञ्च सम्पन्नम्। तद्यथा:-

**'उदयति वितोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारिवारणेन्द्रलीलाम्।।'[1]**

अस्मिन् पद्यं कवि: 'रैवतकन्नाम पर्वतमुभयत: सूर्येन्दुरूपविलम्बि घण्टाद्वयपरिवारिवारणेन्द्रलीलामावहन्तमिवाकलयति। मन्येऽस्य कवे: 'घण्टामाघ' इति नाम्न: प्रसिद्धौ इतिनिर्दिष्टकल्पनैव बीजम्। एतादृशविचित्रोक्तिमुपजीव्यैव कदाचित् कविरेष समजनि विद्वज्जनानां परमप्रशंसाभाजनम। तथाहि :-

**'उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**नैषधे पदलालित्यं माघे सन्ति त्रयो गुणा:।।**

परं वस्तुतत्तवेषु विमृश्यमानेषु विदितं भवति यत्प्रशस्तिरियमस्य प्रशंसकानामतिशयोक्तिमेव व्यक्तीकरोति। यत: यथा उपमाया: कालिदास्य, यथा वा अर्थगौरवे भारवे:, नैषधस्य च पुनर्यथा लालित्ये पदं न तथा माघस्य। माघस्तु एषां महाकवीनां कलयाऽपि तुलां नाऽधिरोहति इति बहव आशेरते। वस्तुत: कवित्वचारुत्वापेक्षयाऽस्य रचनायां पाण्डित्यप्रौढ़िमा एवावभाति प्रशस्ततर:। पदविन्यासप्रवाहोऽपि न निसर्गसुलभ: प्रत्युत हठादाकृष्ट इवाभाति। प्रकाण्डपाण्डित्यन्तु तस्य स्फुटं पदे-पदे व्यक्तीभवति।

माघविरचितं शिशुपालवधं नाम महाकाव्यं विंशतिसर्गसंग्रथितं पञ्चाशदुत्तरषोडशशतमितै: पद्यै: परिगुम्फितं गीर्बाणवाग्वाङमयप्रसरे सुभृशं भासुरत्वेन विराजते कामप्युच्चतमां कोटिमाटीकमानम्। अस्य कथावस्तु तु महाभारतादेव सङ्कलितम। काव्येऽस्मिन् कवे: प्रौढिमा, दृढ़बन्ध:, प्रागल्भ्यं प्रतिपदं समुच्छलतीव प्रतिभाति :-

**उदयशिखरिशृङ्गं प्राङ्गणेष्वेव रिङ्गन्,**

[1] शिशुपालवधम्, 14/15।

**सकमलमुखहासं वीक्षितः पद्मिनीभिः।**
**विततमृदुकराग्रः शब्दयनृ यो वयोभिः,**
**परिपतति दिवोऽङ्के हेलया बालसूर्यः।।**

उत्प्रेक्षाप्यस्य प्रेक्षावतां श्लाघनीया भवतिं रैवतकं पर्वतं कियच्चारुतया वर्णयति:-

**अपशङ्कमङ्कपरिवर्त्तनोचिताश्चलिताः पुरः पतिमुपेतुमात्मजाः।**
**अनुरोदितीव करुणेन पत्त्रिणां विरुतेन वत्सलतयैष निम्नगाः।।**

अनुप्रासोल्लसोऽप्यस्य चित्तप्रसादकः-

**मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुनादध्वरनिभृता निभृताक्षरमुज्जगे।।**

माघस्य शृङ्गारिकपदावलिस्निग्धताऽपि वितरां मुग्धीकरोति विदग्धान् :-

**यां यां प्रियां प्रैक्षत कातराक्षीं सा सा ह्रिया नम्रमुखी बभूव।**
**निःशङ्कमन्या सममाहितेर्ष्यास्तत्रान्तरे जघ्नुरमुं कटाक्षैः।।**

माघप्रणीतकाव्येषु विषयवैविध्यनिवेशेनानुमीयते यदसौ कविरासीदनेकशास्त्रनिपुणः। सङ्गीत-नाट्य-व्याकरणालङ्कार-राजनीतिविशेषज्ञश्च। अतएव कविराजेन राजशेखरेण अस्याप्रतिमप्रतिभाप्रभावितेन भावातिरेकवशतिंनेत्थमभणिः-

**कृत्स्नप्रबोधकृद्वाणी भा त्वेरिव भारवेः।**
**माघेन च माघेन कम्पः कस्य न जायते।।** इति।।

एवमन्यत्रापि :-

**माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे।**
**स्मरन्तः भा रवेरिव कवयः कपयो यथा।।**

माघस्य समयविषये मतानि बहुधा भिद्यन्ते। यद्यपि नाणावधि कोऽपि हृदयङ्गमो निर्णय उपालम्भि तथापि यशस्तिलकचम्पूनाम्नि प्रबन्धे तत्प्रणेत्रा सूरिवरेण सोमदेवेन माघस्योल्लेखः कृतः। एवभानन्दवर्द्धनाचार्येण स्वकीये ध्वन्यालोकाख्ये सन्दर्भे शिशुपालवधस्य यद् द्वौ श्लोकौ समुद्धृतौ तेनैतत्प्रतिपत्तुं न दुष्करं यदेताभ्यामसौ पूर्वतन एवासीत्। श्रीमता नृपतुङ्गाधिपेन राष्ट्रकूटजनपदाधिपेन स्वकीये कन्नडभाषामये कविराजमार्गाभिधेये माघस्य कालिदाससमकालिकत्वं वर्णितम्। तेन स्पष्टमेतद् विदितं भवति यन्नवशताब्द्याः पूर्वार्द्धभागे नृपतितुङ्गकाल एव माघोऽयं साहित्यविदां समाजे सुतरां प्रसिद्धो लब्धप्रतिष्ठश्चाभवत्। तेन माघस्याविर्भावकालः कैस्रतेयाष्टशताब्दीतः पूर्वतन एव भवितुमर्हति। किञ्च माघस्य पितामहस्य सुप्रभदेवमहाभागस्याश्रयदातुः गुर्जराधिपस्य वर्मलातदेवस्य शिलालेखेषु सुप्रभदेवसमयः पञ्चविंशत्यु तरष्ट्शतमित (625) शताब्दीः प्रागेव निरूपितः। एतर्हि सुप्रभदेवपौत्रस्य माघस्य कालः सुतरां कैस्तीयसप्तशतवर्षमितकालान्निकषैव क्वचित्सम्भवेम्। न कर्हिचित्तद्भिन्नः। अपि च माघस्य कालनिर्णये एकमन्यदतिमहत्त्वपूर्णमन्तरङ्गमपि प्रमाणमुपलभ्यते तच्चेदम् :-

**'अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपस्पशा।।**[1]

अत्र हि काशिकावृत्ति-न्यासग्रन्थयोः स्पष्टमुल्लेखः वृत्तिकारोऽत्र वामनः जयादित्यश्च तयोश्च कालः कैस्तीयपञ्चाशदुत्तरषट्शतवर्षाभ्यन्तर एव क्वचिन्निश्चीयते। तन्माघस्यापि कालः एतत्कालोत्तरभव एवेति कस्य न बुद्धिपद्धितिमवतरेत्। एवञ्च बाणभट्टेन हर्षचरिते न्यासग्रन्थस्योल्लेखो व्यवायि, 'कृतगरूपन्यासलोक इव व्याकरणेऽपि।'' बाणवत् माघेनापि त्वास्थ निर्देशः कृतः। सोऽयंन्यासो जिनेन्द्रबुद्धिप्रणीत एवेति वक्तुं न सुशकम्। यतस्तत्पूर्वकाल एव न्यासस्य सन्दर्भान्तरस्य रचनाऽपि लब्धावकाशाऽऽसीत्। अतः एवंविधर्हेतुभिर्निश्चिनुमः यन्माघस्य कालः सप्तमशताबद्या अन्तिमचरण एवेलि तर्कसङ्गतम्। यद्यपि माघस्यामरकृतिं शिशुपालवधं विहाय नान्या काचिद्रचना दृक्पथं प्रयाति, तथाऽपि सूक्तिसंग्रहग्रन्थेषु औचित्यविचारचर्चादिग्रन्थेषु माघनाम्नोपगुम्फितानि प्रकीर्णानि पद्यानि समासाद्यन्ते,

---

[1] शिशुपालवधम् 2/112

यानि प्रत्याययन्ति यदन्यान्यपि ग्रन्थरत्नानि माघप्रणीतानि सम्भवेयुरिति। तद्यथा तद्यथा 'औचित्यविचारचर्चाभिधे सन्दर्भे सन्दर्भे अधोऽङ्कितं पद्यं माघनाम्ना समुद्धृतम् :-

**बुभुक्षितैर्व्याकरणन्न भुज्यते, न पीयते काव्यरसः पिपासितैः।**
**न विद्यया केनचिदुद्धृतं कुलं, हिरण्यमेवार्जय निष्फला गुणाः।।**

चेन्नाम नापि भवेयुरस्यान्याः कृतयः, एकमात्रं शिशुपालवधमेव महाकाव्यमस्य यशश्चन्द्रिकां भुवनमण्डले प्रसारयितुमलमतुलं किमपि भासुरं रत्नम्।

स एष माघःन केवलमुद्दामवाक्कविरेवासीत् प्रत्युत सर्वशास्त्रागारङ्गतः प्रकाण्डपण्डितोऽप्यससीत्।

अस्य सर्वाङ्गीणवाण्डित्यपरिचायकं शिशुपालवधमेव पर्याप्तन्। तदपि किञ्चिदत्रोदाह्रियते :-

वेदार्थप्रसरे स्वरभेदावर्थभेद[1] उपजायते, एकस्मिन् पदे परिणत उदात्तस्वरः स्वरान्तराणि घटयति अनुदात्तानि। सति एकस्मितन् स्वरे उदात्ते अन्यानि निघात[2] स्वराणि सञ्जायन्ते। इत्यावयोऽनुशासनविधयः स्वकाव्यबन्धेऽतिसौन्दर्येण संग्रथिताः।

एवमेव नाट्यशास्त्रस्य प्रावीण्यमपि काव्यबन्धेऽस्य व्यकतीभवति :-
'पूर्वरंगः प्रसङ्गाय नाटकीयस्य वस्तुनः।' इति।

सङ्गीतशास्त्रस्यापि माघः तलस्पर्शी विद्धान् आसीत् :-

**श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः।**
**सततमृषभहीनं भिन्नकीकृत्य शब्दम्।।**

---

[1] सशयाय दवतो सरूपता दूरभिन्नफलयो किया प्रति।
शब्दशासनविदर समासयोर्विग्रह व्यवसु स्वरेण ते।। (शिशुपालवधम् 14। 24।)

[2] निहन्त्यरीनेकपदे या उदात्तस्वरानिव।

अलङ्कारशास्त्रेऽप्यस्य वैचक्षण्यम्। यथा :-

**स्थायिनोऽथ प्रवर्त्तन्ते भावाः सञ्चारिणो यथा।**
**रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः।।**[1]

माघस्य नयेन शब्दार्थयोः सामञ्जस्यमेव काव्यम् एतन्नयमाश्रित्य कियच्चारुत्वेन-पद्यमुपनिबध्नाति :-

**शब्दर्थौ सत्कविरिव विद्वान द्वयमपेक्षते।।**[2]

एतादृग्वैदुषीवैभवादेवास्य महीयसी प्रतिष्ठा आसीद् विद्वन्मण्डले :-

**"तावद् भा भारवेर्भाति यावन्माघस्य[3] नोदयः।"** इति

**देवः पतिर्विदुषि ! नैषधराजगत्या निर्णीयते न किमु न व्रियते भवत्या।**
**नायं नलः खलु तवातिमहानलाभो यद्येनमुज्झति वरः कतरः पुनस्ते।।**

तथापि तदुप्रासस‌चिवपदलालित्यबाहुल्यमन्तर्धत्ते तदखिलपदालिजालताटिल्यम्। नूनं हर्षस्य पदविन्यसचातुरी सर्वोत्कर्षत्वेन वरीवर्त्ति इत्यत्र तु नास्त्येव काचित् संशोतिः। अस्य काव्यावलीमनुवाचतः फस्य सहृदवस्य न जायते हृदयममन्दानन्दतुन्दिलम्। दमयन्त्याः विरहोन्मादं कीर्तयन् कविवरः प्राह :-

**कुरु करे गुरुमेकमयोघनं बहिरितो मुकुरं च कुरुष्व मे।**
**विशति तत्र सदैव विधुस्त्वा सखि सुखादहितं जहि तं द्रुतम्।।**[4]

स्मरज्वरोन्मादप्रलापेन इमायन्त्याः शशांकविगर्हणा कवेः कवित्वचारुताचातुरीं निरतिशयामियाख्यापयति।

---

[1] शिशुपालवधम् 2/87
[2] शिशुपालवधम् 2/86
[3] अस्य जन्मभू श्रीमालपुरी नाम्नी गुर्जरराजधानी।
[4] नैषधचरितम्, 14/59।

'अयि विधुं परिपृच्छ'......इति चतुर्थसर्गगतं अष्टचत्वारिंशत्तमं श्लोक-मारभ्य 'इतिविधोक्वितविगर्हण.....'इत्यन्तं विधुविगर्हणं विधत्ते रसिकानां हृदयं खलु चञ्चच्चमत्कृतिमसम्भृतम्।

भानुं वर्णयन् कविराह :-

**आदाय दण्डं सकलासु दिक्षु, योऽयं परिभ्राम्यति भानुभिक्षुः।**
**अब्धौनिमज्जन्निव तापसोऽयं, सन्ध्याभ्रकाषायमधत्त सायम्।।**

सन्ध्यां कीदृक्चारुतया चित्रयति :-

**कालः किरातस्फुटपद्मकस्य, वधं व्यधाद्यस्य दिनद्विपस्य।**
**तस्यैव संध्या रुधिरास्रधारा, ताराश्च कुम्भस्थितमौक्तिकानि।।**

कियद् हृदयावर्जकं वर्णनम्!

सर्वशास्त्रावगाहिबुद्धिरयं सिद्धहस्तकविस्तर्ककलायामप्यतितरां निष्णात आसीत्। यथा चवस्य खण्डनखण्डखाद्याभिधाद् ग्रन्थरत्नाद् विज्ञायते :- सन्दर्भोऽयं वादिजनविजिगीषूणाम्त्यन्तहितावहितया तर्कप्रबन्धान्तरवैलक्षण्येन च परां ख्यातिंप्राप। ग्रन्थोऽयं खण्डनखण्डखाद्यम्, खण्डनखाद्यम्, खाद्यखण्डनञ्चेत्यादिविविधैरभिधानैः प्रथितः तकपाटवपटीयसि सत्यप्यस्मिन् ग्रन्थे कवेः कवित्वच्छटासम्पुटः सुवर्णे सुरभियोगमिवादधाति। तद्यथा ग्रन्थारम्भ एव शक्तिं संस्तुवन् प्राह :-

**मानापनोदनविनोदनते गिरीशे, भासेव सङ्कुचितयोरुचितं तदिन्दोः।।**
**भेत्तुं भवानिशचितं दुरितं भवानि, नम्रीभवानि घनमङ्घ्रिसरोजयोस्ते।।**

शक्तिं सम्बोध्य आह हे भवानि, तवाङ्घ्रिसरोजयोः घनं निरन्तरं नम्रीभवानि अवनतः स्याम्। किं विशिष्टयोरङ्घ्रिसरोजयोः मानापनोदनविनोदतने गिरीशे, तदिन्दोः तन्मौलिचन्द्रस्य भासेव ज्योत्स्नयेव उचितं यथा स्यादेवं सङ्कुचितयोः उपजातसङ्कोचयोः प्रणिपातायोद्यते भर्त्तरि लज्जया चरणसङ्कोच स्त्तवदुचित एव। तत्र तदिन्दोः भासेवेत्युप्रेक्षा। दवीयस्यपि चन्द्रमसि सरोजसङ्कोचो नेदीयसि सुतरामित्युप्रेक्षोद्दीपनम्। किं कर्त्तुम्? भवानिशचितं दुरितं भेत्तुम्।

संसाराविश्रान्तसञ्चितकल्मषनिरासायेत्यर्थः। अथवाऽर्थान्तरमपि ध्वनितम्भवति। हे ब्रह्माद्वैतोपदेशक! त्वं ममानिशचितं दुरितं भेत्तुं भव-प्रभव। अहं तवाङ्घ्रिसरोजयोर्नम्रीभवानि। गिरीशे-वादिनि, गिरामीशो गिरीश इति व्युत्पत्या गिरीशो वादी। मानापनोदनविनोदनते वादित्वाभिमानखण्डनविनम्रे सति, अहं भवानि=वादिदुरितभेत्ता भवानीत्यर्थः। अर्थात् तथा तत्त्वमुपदिशामि यथा वादिजनानां दुरितं भङ्क्ष्यतीति ग्रन्थकृतः स्वयं कृतां प्रत्याशंसां निर्दिशति।।

अथ वीतरागाणां तात्त्विकसिद्धान्तबुभुत्सूनामेतद्ग्रन्थप्रवृत्त्यौपयिंक माननलक्षणं प्रयोजनमुक्त्वा रागिणामपि वादिविजिगीषूणां विजयलक्षणं प्रयोजनं दर्शयति :-

शब्दार्थनिर्वचनखण्डनया नयन्तः सर्वत्र निर्वचनभावमखर्वगर्वान्।
धीराः यथोक्तमपि कीरवदेतदुक्त्वा, लोकेषु दिग्विजयकौतुकमातनुध्वम्।।

हे धीराः! कीरवदेतदस्मदुक्तं खण्डनमुक्त्वा, लोकेषु दिग्विजयकौतुकमातनुध्वम् विस्तारयत। सर्वत्र विवादपदेषु शब्दार्थनिर्वाचनखण्डनया-शब्दार्थनिरुक्तिं विधाय तत्खण्डनया- तदनुपन्नत्वव्यवस्थापनेन, अखर्वगर्वान् प्रौढाहङ्कारान् वादिजनान् निर्वचनाभावं मूकत्वं नयन्तः प्रापयन्तः सन्त इत्यर्थः। तदेतावता मदुक्तस्य खण्डनस्य सर्ववादिदिग्विजयः फलमिति ध्वनितं भवति। कीदृशी गार्वोक्तिः स्वप्रौढिचिख्यापयिषयेव कवनित्मप्रकाण्डपाण्डित्यप्रकर्ष एव खल्वत्र व्यक्तीकृतः।

श्रीहर्षस्य काव्यप्रवाहे दार्शनिकच्छटाऽपि यत्र तत्र समुच्छलन्तीव विलोक्यते। नैषधीयचरितस्य सप्तमः सर्गः तस्य दार्शनिकविदग्धतयौतःप्रोतश्च दृश्यते। औलूकापरनामधेयस्य वैशेषिकाचार्यस्य कणादमुनेः औलूकेतिसंज्ञान्तरमुपजीव्य यत्समुपश्लोकितं परिहासचुम्बितं किमपि मर्मस्पृग्वर्णनं तत्कं सहृदय न खलु चुलुकयेत्?

**'ध्वान्तस्य कामोरु! विचारणायां वैशेषिकं चारु मतम्मतं मे।**
**औलूकमाहुः खलु दर्शनं तत् क्षमं तमस्तत्त्वनिरूपणाय।।** इति।।

महाकवेरस्य किलाशुकवित्वशक्तिमुद्दिश्यापि प्रचरन्ति नैके जनप्रवादाः। तेष्वेक एवाऽत्र रसिकानां विरोदनार्थ पुरस्क्रियते :-

एकदा कश्चिदनूचानोऽस्याशुकवित्वशक्तिं परीक्षितुकाम काममासाद्य कवरोवासस्थानं, विलोक्य च तं खण्डनखण्डखाद्यं प्रणयन्तं श्लोकमुखेनैव प्रकामं व्याजहार :-

**तर्ककर्कशविचारचातुरी किन्तुरीयवयसा विभाव्यते।**

आतुरीभवति यत्र मानस-

इति प्रश्नात्मकस्य पद्यस्यास्य समाकर्ण्य चरणत्रयं, तदुत्तररूपेण चतुर्थपदं स्वयमुदाजहार :-

**धातुरीप्सितमपाकरोति कः?** इति।।

अहो कीदृशं हृदयह्लादकमाशुकवित्वशक्तिनिदर्शकं प्रतिवचनम्?
किञ्चिदस्य कवेस्तर्ककौशल विषयप्रतिपादनपाटवञ्चापि प्रणिभालनीयम्:-

खण्डनखाद्यकृता हर्षेण वितण्डाकथां लक्ष्यीकृत्य तद्दुर्निरूपोद्देशः कियच्चारुत्वेन प्रदर्शितः- "अथसर्वासत्त्वे, सदसत्पक्षदोषाणामप्यसत्त्वाद् अनिर्वचनीयताऽप्यसती स्यादिति चेत्, न वयं पर्यनुयोज्याः, साऽपि कृत्स्नप्रपञ्चपरतर्वशब्दाभिधेयमध्यविनिविष्टैव। परस्यैव तु व्यवस्थाया एवं पर्यवस्यति निर्वचनप्रतिक्षेपादनिर्वचनीयत्वम्। विधिनिषेधयोरेकतरनिरासस्येतरपर्यवसितायास्ते-नाऽभ्युपेतत्वात्। ततः परकीयरीत्येदमच्यते- अनिर्वचनीयत्वं विश्वस्य पर्यवस्यतीति। वस्तुतस्तु वयं प्रपञ्चसत्यत्वव्यस्थापनविनिवृत्ताः स्वतःसिद्धे चिदात्मनि ब्रह्मातत्वे केवलं भरमवलम्ब्य चरितार्थाः सुखमास्महे। ये तु स्वपरिकल्पितसाधनं दूषणव्यवस्थया विचारमवतार्य तत्वं निर्णेतुमिच्छन्ति तान् प्रति ब्रूमः कृपया तेषां भ्रांतिमपनेतुं तेऽपि कृतार्था भवन्त्विति न साध्वी भवतां विचारव्यवस्था। भवत्कल्पितव्यवस्थयैव व्याहतत्वादिति। अतएव अस्मदुपन्यस्यमानदूषणस्थितिविषयाः पर्यनुयोगाः निरवकाशाः त्वदृव्यवस्थयव तद्व्यवस्थाया व्याहतत्वोपन्यासात्।" इति अनेन सन्दर्शेण

स्वपक्षस्थापनाहीनां परपक्षविदलनमात्रावसानां वितण्डामाश्रित्यानिर्वचनीयताया उद्देश: परानुग्रह इति ध्वनितं भवति।

महाकवि: शिवस्वामी कविकलाकारेषु किमपि महनीयं पदमलङ्करोति। कविरयं जन्मना काश्मीरान् विभुषयामास। जनकोऽस्य भट्टारक: स्वामी। राजतरङ्गिण्या: पर्यालोवनेनावगतं भवति यत् काश्मीराधिपते: अवन्तिवर्मण: साम्राज्यकालेऽस्याविर्भावोऽभयत्। यद्यपि स्वयमयं शैवमतावलम्बी आसीत् परं पश्चात् चन्द्रामंत्राख्यस्य बौद्धाचार्यस्य प्रभावात् प्रेरणया चानेन बौद्धसाहित्यस्य अध्ययनं प्रसारश्च कृत:।

कैस्त 1893 तमेऽब्दे अस्य कपिफणाभ्युदयस्य' प्रसिद्धकाव्यस्य प्रकाशनं सर्वत: प्राग् विद्वद्वरगौरीशङ्करमहोदयेन पाञ्चालीयविश्वविद्यालयद्वारा व्यधायि।

अस्य काव्यशैली अतिरमणीया। प्रौढोक्ति:, गाढपदबन्ध:, चित्रकाव्यरचना चास्य वैशिष्ट्याम्। तथा चोक्तं केनचित्कविना :-

**प्रौढोक्त्या गाढबन्धेन चित्रकाव्यचमत्कृतै:।**
**ध्रुवं कविमदं धुन्वन् शिवस्वामी स्वयं बभौ।।**

राज्ञोऽवन्तिवर्मण: काल एवास्य कालोऽवधार्यते। शिवस्वामी, आनन्दवर्धन:, रत्नाकरश्च सर्वेऽगी कवय: समसामयिका एव।

**मुक्ताकण: शिवस्वामी कविरानन्दवर्धन:।**
**प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मण:।।**

वस्तुत: काश्मीरस्येतिहासे कालोऽयं साहित्यकलादृशा स्वर्णयुग एव प्रख्यायते।

यद्यपि मध्यकाले शिवस्वामिनोऽस्य काव्यनिचयो विस्मृतिपथं गतोऽभवत् परन्तु यत्र-तत्र सुभाषितग्रन्थेषु अस्योद्धरणदर्शनम् कवेरस्य प्रसिद्धिं, गौरवं, प्रतिष्ठाञ्च सूचयति।

मम्मटाचार्येण ध्वनिं व्यावृण्वता तदुदाहरणत्वेन शिवस्वामिन एव श्लोकांश उद्धृत:- 'उल्लासकालकरवालमहाम्बुवाहम्' इति।

कपिफणाभ्युदयाख्यं महाकाव्यं विंशतिसर्गैरुपनिबद्धम्। अत्र हि दक्षिणजनपदाधिपतिना कपिफणाख्यनृपेण श्रावस्तीनृपो युद्धे पराजित:। पराजितेन प्रसेनजिता भगवतो बुद्धदेवस्याराधना कृता। तद्भक्तिप्रसन्नेन बुद्धेन स्वयमाविर्भूय स कपिफण: पराजित:। इत्येवमात्रं कथावस्तु। परन्तु काव्यालङ्करणार्थं मलयपर्वतषड्ऋतु-कुसुमावचय-जलक्रीडा-सूर्यास्त चन्द्रोदयादिवर्णनममतिनैपुण्येन कृतम्। तत्र अष्टादशतमे सर्गे चित्रकाव्यं विरचितम्। एकोनविंशतितमे च भगवतो बुद्धस्योपदेशा अतीव मार्मिकै: शान्तरससंप्लुतै: विविधपद्यैर्निबद्धा। प्रत्येकस्य सर्गस्यान्ते च 'शिव'पद सन्निवेशितम्। तावता काव्यमिदं 'शिवाङ्ककाव्य' नाम्ना प्रथितम्।

नाऽत्र मात्रयाऽपि सन्देहलेश: पदनेन कविपुङ्गवेन स्वप्रतिभाप्रभावेण बौद्धसाहित्यमनुप्राणितमिवाकारि। अनेन कालिदास-भर्तृ मेण्ठ-दण्डिप्रभृतिमहाकवि-काव्यानामनुशीलनं गाढतया कृतमवभाति। यथा चायं स्वयमेव ब्याजहार :-

**विदितबहुकथार्थश्चित्रकाव्योदेष्टा,**
**यमककविरगम्यश्चारुसन्दानमानी।**
**अनुकृतरघुकारोऽभ्यस्तमेण्ठप्रचारो,**
**जयति कविरुदारो दण्डिदण्ड: शिवाङ्क:।।**[1]

अस्य कमनीयकाव्यकलाऽपि प्रणिभालनीया। सूर्यास्तं वर्णयन्नाह:-

**प्रणतिपरायणा परिकलय्य दिनापचये,**
**परिणतिमीयिवांसमभिसन्ध्यमशीतकरम्।**
**करपुटकुड्मलानि नियमेन दधे जनता,**

[1] कविफणाभ्युदयस्य, 20/47।

**नहि महतां क्षयेऽपि गुणगौरवमेति हतिम्।।**[1]

ऋतुवर्णनमपि खल्वस्य हृदयावर्जकम् :-

**'नवकदम्बकदम्बकसन्तत-प्रसवनीयवनीयकषट्पदः।**
**अकृततोयततो यशसे नगो भुवि भुजङ्गभुजङ्गलितापदम्।।**[2]

**शिशिररश्मिमुखेन शरत् प्रिया विलसदंशुसदंशुकशोभिना।।**[3]

पद्मगुप्तनामोऽयं महाकविः परिमलनाम्नाऽपि स्मर्यते। केचिदमुमभिनवकालिदास इत्यादि वदन्ति। कविरेष धारानगर्यां महाराजभोजराजस्य पितृव्यचरणवाक्पतिराजदेवस्य सभापण्डित आसीत्। पञ्चत्वं गते हि वाक्पतिराजदेवे भोजराजस्य जनकः सिन्धुराजो धारानगर्यां राज्यपदेऽभिषिक्तः। सिन्धुराजोऽयं कुमारनारायण इत्यपरनाम्ना प्रसिद्धः, 'नवसाहसाङ्क' इत्युपाधिना विभूषितः।

कविवरेण पद्मगुप्तेन सिन्धुराजमुद्दिश्य नवसाहसा चरिताख्यं महाकाव्यं प्राणायि। एतत्काव्यपर्यालोचनेन अस्य कवेः काव्यकलाकौशलं, प्रौढ़ा च रचनाचातुरी व्यक्तीभवति।। पद्मगुप्तोऽयं एकादशशताब्द्यां जतः सम्भाव्यते। सुभाषितादिग्रन्थेषु बहवस्तादृशाः श्लोकाः पद्मगुप्तकृतित्वेनोपलभ्यन्ते यं 'नवसाहसाङ्क' काव्ये न दृग्गोचरीभवन्ति। तेनानुमीयते यदन्येऽपि केचन सन्दर्भा अनेन विरचिताः स्युरिति। परन्त्वद्यत्वे ते नोपलभ्यन्ते।

काव्यमिदं अष्टादशसर्गैरुपनिबद्धं विभिन्नछन्दोभिर्गुम्फितैः 1500 मितैः श्लोकैः संवलितम्। पद्मगुप्तस्य काव्यशैली वैदर्भीविभुषिताऽतीव मनोहरा। कविरयं कविकुलगुरोः कालिदासस्य सरणिमनुहरित भूम्ना।

नवसाहसाङ्कचरितस्य रचना ख्रैस्ते 1005 तमे शतके सम्पन्ना राजा सिन्धुराजो नागानां महारिपुं वज्राङ्कुशनामानं नृपं पराजित्य नागराजशङ्खपालस्य

---
[1] कविफणाभ्युदयस्य, 11/18।
[2] कविफणाभ्युदयस्य, 18/36।
[3] कविफणाभ्युदयस्य, 18/25।

राजकुमारीं शशिप्रभामुपयेमे। तद्वर्णनं कवित्वपूर्णं विधाय राजो विशदं चरित्रं समुट्टङ्कितम्। अस्य काव्यरसोऽपि रसिकैरास्वादनीय :-

**एवं निसर्गमधुरेण सुधारसैकनिष्यन्दिना फणिवधूरथता हसन्ती।**
**चन्द्रांसुना कुमुदिनीव दिनोष्मतप्ता हीनक्लमा नरपतर्वचसा बभूव।।**
**परस्परस्पर्द्धि विलाससम्पदा त्रयं भवत्स्वामितया विकल्प्यते।**
**मरुत्वतो वा रमणी रमाऽथवा कलत्रमर्द्धेन्दुविभूषणस्य वा।।**

नूनमस्य काव्यकला प्रशंसनीया भवति अलङ्कारपूर्णा च। विषमालङ्कारं कियत्सौन्दयणोपनिबध्नाति :-

**सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा।**
**तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते।।**

भोजराजस्य सरस्वतीकण्ठाभरणे, क्षेमेन्द्रस्यौचित्यचर्चायां, मम्मटस्य काव्यप्रकाशे, वर्धमान्स्य गणरत्नमहोदधौ च पद्मगुप्तस्य पद्यानामुल्लेख एवास्य कविपुङ्गवत्वं ग्राहयति।

कविवरोऽयं कुत्रत्यः कदा चाऽभूदिति सर्वमविदितमेवाद्यावधि। परमस्य काव्यकलाऽतीव मनोज्ञा हृदयङ्गमा चेति बहुत्र सुभाशितग्रन्थोद्धृतैरस्य पद्यैः सुतरामवगतं भवति। कविवरोऽयमन्योक्तिकुशलः वकोक्तिपण्डितश्च। तद्यथा -

**कथं स दन्तरहितः सूर्यः सूरिभिरुच्यते।**
**यो मीनराशिं भुक्तैव मेषं भोक्तु समुद्यतः।।**

**क्व क्रीडति क्व चरति क्व करोति वृत्तिं,**
**वारि क्व नाम पिबति स्वपिति क्व नाम।**
**इत्थं मृगं पिराधमबाधमानं,**
**व्याधोऽनुधावति वधाय धनुर्दधातः।।**

हेमकार! सुधिये नमोऽस्तु ते, दुस्तरेषु बहुशः परीक्षितुम्।
काञ्चनाभरणमश्मता सम। यत्त्वयैतदधिरोप्यते तुलाम्।।

सब्धिविग्रहकालज्ञः कृतकृत्योऽपि पाणिनिः।
परप्रत्ययकारीति भवता नोपमीयते।।
उपसर्गाः क्रियायोगे पाणिनेरिति सम्मतम्।
निष्क्रियोऽपि तवारातिः सोपसर्गः सतां कथम्।।
तव शत्रुश्च भवाँश्चैव द्वयं व्याकरणायते।
स निपातोपसर्गाभ्यां त्वं गुणगमवृद्धिभिः।।
असत्कविप्रणीतानां श्लोकानामिव ते द्विषाम्।
क्लिष्टार्थसन्धिवृत्तीनां निपाताः स्युः पदे पदे।।
प्रायेण सर्व पश्यन्ति विपरीतं विनश्वराः।
यत्त्वं काञ्चनगौरोऽपि काल एवासि विद्विषाम्।
त्वया सह विरुद्धानां कुतः कुशलता कुले।
वासो हि नियतं तेषां वने कुश-लताऽऽकुले।।
विरोधात्तव शत्रूणां ज्ञातं सौगत-दर्शनम्।
विग्रहेण क्षणभङ्गित्वं सर्वाङ्गेषु च शून्यता।।
वाराणस्यामसीवारा नीवाराशनसुस्थितेः।
नवाऽऽरामनिषण्णस्य वाराः स्नातस्य यान्तु मे।।

लक्ष्मीपङ्ककलङ्किताः परिमितक्ष्माखण्डपिण्डीभुजो,
गर्वग्रन्थिविसंस्थुलैरवयवैर्नेपथ्यकन्थाभृतैः।
एते कीदृश ईश्वराः कुपतयः किं वाऽनया चार्चया,
यस्त्रैलोक्यविलक्षणः फलतु नः सत्यं स एवेश्वरः।।
स्वजनवसतेर्निःसृत्याराच्छलेन बलेन वा,

लघु विरचयन् गेहूं भूमेस्तलेन वलेन वा।
विदधदतुलं प्राणत्राणं फलेन जलेन वा,
वनभुवि कदा स्यां शून्योऽहं मलेन खलेन वा।।
पूजापद्मपरम्परापुलकितौ पाष्र्ण्यो: परं पेलवौ,
पुण्यौ पातीकापपाटनपटू पृथ्वीं प्रपन्नो प्रथाम्।
प्राय: पर्वतपुत्रिकापृथुपटै: पस्त्ये पुरा पूरितौ,
पदौ पण्डितराजक: पशुपते: प्रीत्या पुर: पश्यतु।।

अयं कविकुलमणि: पण्डितराजो जगन्नाथ: कालिदासं विहाय अखिलानितरान् कवीश्वरानतिशेते इति ऐकमत्येनाभिमनयन्ते मार्मिका: सर्वेऽपि काव्यरसिका:। स कदाऽभूत कतमञ्च भूभागं स्वजनुषा विभूषयामास, इत्यत्र यद्यपि मतानि भूम्ना भिद्यन्ते तथाऽपि पण्डितराज: कैस्तीयसप्तदशतमाब्द्यां विराजते स्मेत्यपेतशङ्कम्। तद्विषये एतावन्त: प्रवादा: प्रचरन्ति यत्तेषु सत्यासत्यनिर्णयोऽतिदुष्कर:, तदुपपत्तिसाधनामऽसौलभ्यात्। केचन व्यवतिष्ठन्ते यज्जगन्नाथ: तैलङ्गदेशादागत: जयपुरे च तेन काचित् पाठशाला संस्थापिता। एकदा कश्चित् काजी जयपूरे जयपुरनिवासिनोऽखिलान् पण्डितांश्च शास्त्रार्थमाहूतवान्। काजीमहोदयस्याह्वानमूरीकर्त्तुं न कोऽप्यन्य: शशाक पण्डितराजं विहाय। जगन्नाथेनैव मुस्लिमधर्मपुस्तकान्यधीत्य स काजी चतुरस्रतया पराजित:। निशम्य वृत्तान्तमिदं दिल्लनृप: जगन्नाथसाहूय तस्मै राज्याश्रयं प्रदत्तवान्। दिल्ल्यां निवसन्। स कस्याश्चिन्मुस्लिमकन्याया:[1] प्रणयपाशें

---

[1] प्रचरति च अस्मिन् विषये एका दत्नकथा यदेकदा पण्डितराज शहजहानेने सह शतरञ्जनमाक्रीडन्नासीत् तदा पिपसार्त्तो जल ययाचे। काचिल्लवङ्गीनाम्नी कन्या सल्लिपूर्ण स्वर्णकलश शिरसि न्यस्य तत्रायता। तस्या सौन्दर्यमनुपम लावण्यञ्च ससङ्केतमुद्दिश्य नृपति. पण्डितराजमुवाच, कवे ! वर्णय तावदस्या लावण्यलुलिता रूपसम्पत्तिम्। सोऽपि सस्मेर ता वर्णयन्नाह -

इय सुस्तनी मस्तकन्यस्तकुम्भा कुसुम्भारुण चारु चेल वसाना।
समस्तस्य लोकस्य चेत प्रवृति गृहीत्वा घटन्यस्य यातीव भाति।

पद्यमिदमाकर्ण्य शाहजहान अतितरा प्रसीदन्नाह, कवे ! वर्णन नितरा हृदयाह्लादि तावद्, वृणु यथेच्छ पुरस्कारम्। पण्डितराजोऽपि पुरस्काररूपेण वृणान आह -

न याचे गजालि न वा वाजिराजि, न वित्तेषु सक्तिर्मदीया कदाचित्।
इय सुस्तनी मस्तकन्यस्तकुम्भा लवङ्गी कुरङ्गीदृगङ्गीकरोतु।।

अपि च -

यवनी नवनीतकोमलाङ्गी शयनीये यदि लभ्यते कदाचित्।
अवनीतलमेव साधु मन्ये न वनी माधवनी विलासहेतु ।।

इति निशम्य निर्वर्ण्य च निपुण कन्या सा दिल्लीश्वरेण शाहजहानेन पण्डितराजाय सहर्ष पुरस्कृता।

यदा लवङ्गिका दुर्दैववशादतर्कोपनतात् सहसा रुग्णता गता सती पण्डितराजाय परित्यज्य यमराजमालिलिङ्ग, तदा स वराक अनभ्रवज्रपातममुमसहिष्णुर्वाष्पगद्‌गर विललाप -

निपतितः। परिणीता च सातेन, तया सह विहरता च नवीनं वयस्तत्रैय व्यतिवाहितम्- "दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः!' इति। वार्द्धक्ये च पुनः स वाराणसीङ्गतः यत्र पण्डितैः स खलु सापमानं जातिबहिष्कृतः तिरस्कृतश्च बहुशः तस्य यवनजासम्पर्कपरिभ्रष्टत्वात्। ततोऽतीव विषण्णखिन्नमनाः स गङ्गातटं गतः, गङ्गाप्रशस्तिमुपश्लोकयितुञ्चारेभे, सोपान आसन्नो निर्विण्णः । प्रशस्तिप्रपञ्चेनास्य भगवती भागीरथी अपि प्रसवतां गता। प्रतिश्लोकमेकैकं सोपानं प्रवाहपूरेणाप्लावयन्ती द्विपञ्चाशन्मितां सोपानपरम्परामाप्लाव्यान्ततः पण्डितराजमपि निजाङ्कमग्नञ्चकारेति। सेयमनवद्यपद्यावली 'गङ्गालहरी'ति नाम्ना प्रसिद्धिं गता द्विपञ्चाशच्छन्दोभिर्निबद्धेति।

अपरेऽत्र किञ्चिद्विप्रतिपद्यन्ते। ते कथयन्ति यत् स गङ्गरोधसि गङ्गामाराधमानः प्रावृषेण्यवारां प्रपूराप्रवाहपतितो निममज्जेति।

पण्डितराजो जगन्नाथः स्वयमेयात्मानं परिचाययति प्राणभरणे-

**तैलङ्गान्वयमङ्गलालय-महालक्ष्मीदयालालितः,**
**श्रीमत्पेरमभट्टसूनुरनिशं विद्वल्ललाटन्तपः।।**
**सन्तुष्टः कमलाधिपस्य कवितामाकर्ण्य तद्वर्णनम्,**
**श्रीमत्पण्डितराजपण्डितजगन्नाथो व्यधासीदिद्म।।**[1]

पण्डितराजपदवी चानेन दिल्ल्यधिपतेः शाहजहानप्रसादल्लब्धेति तल्लेखेनेव विज्ञाप्यते। तथाहि :-

"मर्त्तिमतेव नवाबसफखानस्य प्रसादेन द्विजकुलसेवाहेवाकिवाङ्मनः कायेन माथुरकुलसमुद्रेन्दुना रायमुकुन्देनादिष्टेन सार्वभौमश्रीशाहजहानप्रसादाधिगतपण्डित-

---

लून मत्तमतङ्गजै कियदपि च्छिन्न तुषारार्दितै.,
शिष्ट ग्रीष्मजभानुतीक्ष्णकिरणैर्भस्मीकृत काननम्।।
एषा कोणगता मुहु परिमलैरामोदयन्ती दिशो,
हा कष्ट ललिता लवङ्गलतिका दावग्निना दह्यते।
स्वर्गगता लवङ्गीमुपालम्भयति ममभेदिभि पद्यविन्यासै -
निर्वाणमङ्गलपद त्वरया विशन्त्या मुक्ता दयावति! दयापि किल त्वयाऽसौ।
यन्मा न भमिनि! निभालयसि प्रभातनीलारविन्दमदभङ्गिमदै कटाक्षै ।

[1] प्राणाभरणे 82।

राजादवीविराजितेन तैलङ्गकुलावतंसेन पण्डितजगन्नाथेनासफविलासाख्येयमाख्यायिका निरमीयत।''

पण्डितराजेन वर्णितो दाराशहोऽस्यैव शाहजहानमहीभुजी ज्येष्ठः सूनुरासीदिति तु सुविदितमेव।

अलङ्कारालङ्कारभूते स्वविरचिते रसगङ्गाधरे च सा स्वकीयगुरुगणमपि गणयति:-

**श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्यापप्रपञ्चः,**
**काणदीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।**
**देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयम्,**
**शेषाङ्कप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः।।**
**पाषापादपि पीयूषं स्यन्दन्ते यस्य लीलयां**
**तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम्।।**

पेरुभट्टोऽस्य जनकः जननी च लक्ष्मी देवीति।

वाग्देवताराधनप्रसादाद् यो वरो लब्धः सोऽधोऽङ्कितपद्ये निबद्धः :-

**आकरुदेशं विचरेर्मा करु परवादनिर्जये शङ्काम।**
**स्वीकरु वरमेकं मे व्याकुरु भो वत्स शास्त्राणि।।** इति।।

एतद्वरप्रसादेन जगन्नाथः अतितरां प्रसिद्धिं गतः। एकदा तस्य ख्यातिं श्रवणविषयीकृत्य दिल्लीश्वरस्तं निमन्त्रितवान् दिल्लीमलङ्कर्त्तुं निजायमनेन। परं स तदुत्तरे निम्नाङ्कितं पद्यं प्रेषितवान् स्वयं न गतवान् :-

**शीतार्ता इव संकुचन्ति दिवसा नैवाम्बरं शर्वरी,**
**शीघ्रं भज्जति किञ्च हुतभुक्कोणङ्गतो भास्करः।**
**त्वञ्चानङ्कहुताशभाजि हृदये सीमान्तनीनां गतः,**
**नास्माकं वसनं न वा युवतयः कुत्र व्रजामो वयम्।।**

अनेन पद्येनैतत्त्वनुमीयते यदा जगन्नाथः दिल्लीङ्गतः तदाऽविवाहितोऽभूदिति। शाहजहानशासनकाले च स विराजते स्म राजसंसदि। शाहजहानसाम्राज्यसमयश्च ख्रैतसप्तदशशतकदेशीयः। एष एव समय5 पण्डितराजयापीति निश्चतम्।

## पण्डितराजस्य ग्रन्थाः

1. पीयूषलहरी-गङ्गालहरीति वा, द्विपञ्चाशत्पद्यैर्निबद्धा अतिमाधुर्यसंभृता मनोहरा च गङ्गिप्रशस्तिमभिलक्ष्य प्रणीता।

2. सुधालहरी- द्वाविंशत्पद्यैरलङ्कृता सूर्यप्रशस्तिमालम्ब्य रचिता।

3. अमृतलहरी-यमुनाप्रशस्तिमुद्दिश्य केवलमेकादशश्लोकैर्गुम्फिता लघुनिकाया।

4. करुणालहरी-चतुःषष्टिपद्यैरलङ्कृता विष्णुदवेवप्रशस्तौ विरचिता।

5. लक्ष्मीलहरी-एकचत्वारिंशत्पद्यबद्धा लक्ष्मीप्रशंसायां प्रणीता।

6. यमुना (गद्यात्मिका)- न सम्प्रति लब्धप्रचारा। रसगङ्गाधरेऽस्या उद्धरणद्वयमुपलभ्यते केवलम् :-

तनयमैनाकगवेषणालम्बीकृतजलधि-जठरप्रविष्ट हिमगिरिभुजाय-मानाया भगवत्या भारत्याः सखो'' इति।

7. आसफविलासः-आसफखानस्य प्रशंसायमुपनिबद्धः।

8. प्राणाभरणम्-कामरूपाधिपतेः प्रशंसायां त्रिपञ्चाशत्पद्यात्मको निबन्धः।

9. जगदाभरणम्- उदयपुरमहाराजस्य राणाकर्णसिंहस्य सूनोः राजकुमारजगत्सिहस्य प्रशंसायां विरचितम्, इति तदन्तिमश्लोक[1] पर्यालोचनादवगम्यते।

10. चित्रमीमांसाखण्डनम्-श्रीअप्यदीक्षितविरचितसय चित्र मीमांसाख्यग्रन्थस्य खण्डनरूपम्।

11. मनोरमाकुचमर्दनम्- सिद्धान्तकौमुदीटीकात्मकस्य स्वयं भट्टोजिदीक्षितल-विरचितरय मनोरमाख्यव्याकरणग्रन्थस्य खण्डनरूपम्।

12. रसगङ्गाधरः- श्रीजगन्नाथवरिचितोऽपूर्णो ग्रन्थः, पण्डितराजस्य साहित्यमार्मिकतायाः, तर्ककौशलस्य, विचारचारुतायाः, अलङ्कारशास्त्रप्रावीण्यस्य च

---

1 श्रीराणाकलिकर्णनन्दनजगत्सिहप्रभो र्वर्णनम्,
श्रीमत्पण्डितराजसत्कविजगन्नाथो व्यतानीदिदम्।।
इति महामहोपाध्यायपदवाक्यप्रमाणपारावारीणतैलङ्कृकुलावतसश्रीपेर- मभट्टसूरेस्त नयेन विनिर्मित जगदाभरणाख्य जगत्सिहवर्णनम्।

परिद्योतकोऽपूर्वो ग्रन्थः। यत्र कवितल्लजेनामुनोदाहरणान्यपि स्वरचितान्येव प्रदत्तानि। उक्तञ्च तत्रैव रसगङ्गाधरेः-

निर्माय नूतनमुदाहरणानुरूपं काव्यं मयाऽत्र निहितं न परस्य किञ्चित्।
किं सेव्यते सुमनसां मनसाऽपि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण।।

13. भामिनी-विलासः- एतदन्तर्गता विषयाः खलु, प्रस्तावविलासः, शृङ्गारविलासः, करुणाविलासः, शान्तविलास, अन्योक्तिमुक्तालता चेति।

इमे चास्य प्रसिद्धा ग्रन्थाः, ये ह्यस्यालङ्कारोदाहरणानां महारत्नखनिरूपा एव विभाव्यन्ते। प्रायशः रसगङ्गाधरे उदाहरणत्वेन समुद्धृता श्लोका एभ्य एव ग्रन्थेभ्यो गृहीताः।

पण्डितराजस्यान्योक्तयः गर्वोक्तयश्चातीव प्रसिद्धाः सहृदयहृदयाह्लाविकाश्च काव्यकलाविलासपुरस्सरं भाववैचित्र्यचितित्रतत्वाद् विद्वज्जनानां कण्टाभरणतां याताः श्रवणयोः पीयूषरसनिष्यन्दिन्योऽनन्यसामान्यरूपेण समुल्लसन्ति। तद्यथा :-

**धुर्यैरपि माधुर्यैर्द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम्।**
**वन्द्यैव माधुरीयं पण्डितराजस्य कवितायाः।।**

**कमलिनी मलिनीकरोति चेतः, किमिति बकैरवहेलिताऽनभिज्ञैः।**
**परिणतमकरन्दमार्मिकास्ते जगति भवन्तु चिरायुषो मिलिन्दाः।।**[1]

हे कवे विद्वन! यदि अरसिकास्तवानादरं कुर्वन्तितर्हि विषादो न विधेयः। कुर्वन्तु नाम ते मूर्खाः। मर्मज्ञा रसिका चिरायुषो भवन्तु, ये तवादरफरिष्यन्ति सर्वदा। मुर्खाणामादरेणापि किमिति भावः, मूर्खजनकृत आदरो निरादरादपि निकृष्टतर इति भावः।

**पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्त्तुम।**

[1] भामिनी विलास , पृ 8

यत्पिषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम्।।

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।
विश्ववस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्यति कः।।

आपेदिरेऽम्बरपथं परितः पतङ्गाः,
भृङ्गा रसालमुकुलानि समाश्रयन्ति।
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो,
मीनो नु हन्त कतमां गतिमभ्युपैतु।।

क्षीणवित्ते राजनि उपसेवका तं परित्यज्य गच्छन्ति। तन्मात्रालम्बिनस्तदनुरक्ता जनाः क्व यान्तु नामेति भावः।

किं खलु रत्नैरेतै किं पुनरभ्रायितेन वपुषा ते।
सलिलमपि यन्न तावकमर्णव! वदनं प्रयाति तृषितानाम्।।

हालाहलं खलु पिपासति कौतुकेन,
कालानलं परिचुचुम्बिणति प्रकामम्।
व्यालाधिपं च यतते परिरब्धुमद्धा,
यो दुर्जनं वशयितुं तनुते मनीषाम्।।

लीलीलुण्डितशारदा पुरमहासंपद्भराणां पुरो,
विद्यासद्मविनिर्गलत्कणमुषो वल्गन्ति चेत्पामराः।
अद्यश्वः फणिनां शुकुन्तशिशवो दन्तावलानां शशाः,
सिंहानां द सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः।।

किञ्च-

कस्मादिन्दुरसौ धिनोति जगतीं पीयूशगर्भैः करैः,
कस्माद्वा जलधारयैष धरणी धाराधरैः सिञ्चति।
भ्रामं भ्राममयं च नन्दयति वा कस्मात् त्रिलोकीं रविः,
सादूनां हि परोपकारकरणे नोपाध्यपेक्षं मनः।

येन शैशवपदे मदेभराड्गण्डसीमा नखरैर्विखञिउतम्।
यौवनोत्सवमवाप्य केसरी केषु दर्शयतु सोऽद्य पौरुषम्।।
येनाप्तः कमलाविलासकमले किञ्जल्कपानोत्सवो,
यो लीलां वितनोति नाभिनलिनोत्सङ्गे तथा शार्ङ्गिणः।
तस्य स्यात्कुसुमान्तरे मधुलिहः कुत्राऽप्यहो न स्थिति-
न प्रीतिर्न रतिर्न केलिसमयो नो विस्मयो न स्मयः।।

मद्वाणि ! मा कुरु विषादमनादरेण,
मात्सर्यमानमनसां[1] सहसा खलानाम्।
काव्यारविन्द-मकरन्द-मधुव्रताना-
मास्येषु धस्यसितमां कियतो विलासान्।।

अपि चः-

मधु द्राक्षा साक्षदमृतमथ वामाधरसुधा,
कदाचित्केषाञ्चिया खलु विदधीरन्नपि मुदम्।
ध्रुव ते जीवन्तोऽप्यहह मृतका मन्दमतयो,
न येषामानन्दं जनयति जगन्नाथभणितिः।

‘अन्या जगद्धितमयी मनसः प्रवत्ति-
रन्यैव कापि रचना वचनावलीनाम्।

[1] पद्येऽस्मिन् वहव पाश्भेदा। यथा ‘मात्सर्यमन्दमनसाम् मात्सर्य- भुग्नमनसाम्, धास्यतितमाम् यास्पतितमाम्, विपुल, विलासम्, तरसा, सहसा, कियतो, कति नो।

लोकोत्तरा च कृतिराकृतिरार्त्तहृद्या,

विद्यावतां सकलमेव गिरां टवीय:।

स्थितिं तो रे दध्या: क्षणमपि मदान्धेक्षण सखे !

गजश्रेणीनाथ! त्वमिह जटिलायां वनभुवि।

असौ कुम्भिभ्रान्त्या खरनखरविद्रावितमहा-

गुरुग्रावग्राम: स्वपिति गिरिगर्भे हरिपति:।।

प्रारम्भे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी-

पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान्।

तस्मिन्नद्य रसालशाखिनि कृशां दैवाद्दशामञ्जरी-

पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवाद्।

तस्मिन्नद्य रसालशाखिनि कृशां दैवाद्दशामञ्चति,

त्वञ्चेत्मुञ्चतिस चञ्चरीक! विनयं नीचस्त्तदन्योऽस्ति क:।।

पुरा सरसि मानसे विकचसारसालिस्खल-

त्वरागसुरभीकृते पयसि यस्य यातं वय:।

सं पल्वलजले मिलदनेकभेकाकुले

मरालकुलनायक: कथय रे कथं वर्त्तताम्।।

दिगन्ते श्रूयन्ते मदमलिनगण्डा: करटिन:,

करिण्य: कारुण्यास्पदमसमशीला: खलु मृगा:।

इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं,

नखानां पाण्डित्यं प्रकटयतु कस्मिन्मृगपति:।।

गर्वोक्तिरप्यस्य प्रणिभालनीया -

गिरां देवी वीणागुणरणनहीनादरकरा,

**यदीयानां वाचाममृतमयमाचामति रसम्।**
**वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपते-**
**रधुन्वन्मूर्धानं नृपशुरथवायं पशुपतिः।।**

**शास्त्राण्याकलितानि त्यिविधयः सर्वेऽपि सम्भविता,**
**दिल्लीवल्लनपाणिपल्लवतले नीतं नवीनं वयः।**
**सम्प्रत्युज्झितवासनं मधुपुरीमध्ये हरिः सेव्यते,**
**सर्वं पण्डितराजराजितिलकेनाकारि लोकाधिकम्।।** इति।।

गीतिकाव्यप्रणेतृषु कविवरजयदेवादनु[1] पण्डितराजस्यैवाभिधानं श्रवणपथमवतरति। यद्यपि बहुशोऽनेन स्वरचनासु गीतिरेवोपलालिता, तथाऽपि तासु भामिनीविलासः शेखरायते। अत्र मुक्तकाव्यानां गीतिपद्यानांचारुतरः सन्निवेशः। ग्रन्थोऽयं प्रास्ताविकशृङ्गारकरुणशान्तेति चतुर्भिः प्रकरणैः प्रणिबद्धो लोकानां निरतिशयां प्रीतिमुपजनयति। भर्तृहरिवत् पण्डितराजस्यापि शैली अतीव मनोज्ञा, भाषा। प्राञ्जला, प्रौढ़ पदविन्यासः, चमत्कारी च भावभङ्गिमा।

**तीरे तरुण वदनं सहासं**
**नीरे सरोजञ्च मिलद्विकासम्।**
**आलोक्य धावन्त्युभयत्र मुग्धा**
**मरन्दलुब्धालिकिशोरमालाः।।**[2]

पण्डितरागस्य व्यञ्जना अतीव मार्गिकी, अनुप्रासश्चाऽपि नितरामुल्लासकर :-

**कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी।**
**मदीयमतिचुम्बिनी भवतु काऽपि कादम्बिनी।।**

किञ्चास्य पदविन्यासोऽपि खलु लाकोत्तरः-

[1] अस्य स्थितिकाल कैस्त 1650 तमाब्दात् 1680 तमाब्दस्य मध्यघटितो विभाव्यते कालविद्भि।
[2] शृङ्गार विलास 22

आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालसत्-
स्वर्वामाऽधरमाधुरीं विधुरयन् वाचां विलासो मम।।

तथा च-

'चुलुकयति मदीयां चेतनां चञ्चरीकः।'

नूनमस्य रचनाचातुरी तत्तद्रसानुगुण्येनापूर्वरसभरी इत्येतत्तु सुतरां करुणालहरीतोऽवबुध्यते :-

विषीदता नाथ विषानलोपस-
विषादभूमौ भवसागरे विभौ।
परं प्रतीकारमपश्यताऽधुना
मयाऽयमात्मा भवते समर्प्यते।।

भवानल्ज्वालविलुप्तचेतनः,
शरण्य ! तेऽङ्घ्रिं शरणं भयादयाम्।।
विभाव्य भूयोऽपि दयासुधाम्बुधे !
विधेहि मे नाथ! तथा यथेच्छसि।।

रमामुखाम्भोजविकासनक्षमो जगत्त्रयोद्बोधविधानदीक्षितः।
कदा मदज्ञानविभावरीं हरे हरिष्यति त्वन्नयनारुणोदयः।।
सुरासुरस्वान्तचकोरचन्द्रिका समस्तसन्तापभयापनोदिनी।
महानिशीथे मम मानसे रुदा स्फुरिष्यति त्वन्मुखचन्द्रचन्द्रिका।

अपि चः-

अयि दीनतरं दयानिधे, दुरवस्थं सकलैः समुज्झितम्।
अधुनापि न मां निभालयन् भजसे हा कथमश्मचित्तताम्।।
सुमहान्ति जगन्ति बिभ्रतस्तव ये नाविरभून्मनागपि।

स कथं परमाप्तदेहिनां परगाणोर्मम धारणे श्रमः ।।
नितरां विनयेन पृच्छ्यते सुविचार्योत्तरमत्र यच्छ मे।
करितो गिरितोऽप्यहं गुरुस्त्वरितो नोद्धररो यदद्य माम्।।
न धनं न चा राज्यसम्पदं न हि विद्यामिदमेकमर्थये
मयि धेहि मनागपि प्रभो करुणाभङ्गितरङ्गिता दृशम्।।
अयमप्यधमोऽपि निर्गुणो दयनीयो भवता दयानिधे !
वमतां फणिनां विषानलं किमु नानन्दयिता हि चन्दनः।।

विद्यालविषपाटवीवलयलग्नदावानल-
प्रसृत्वरशिखावलीविकलितं मदीय मनः।
अमन्दमिलंदिन्दिरे निखिलमाधुरीमन्दिरे
मुकुन्दमुखचन्दिरे चिरमिदं चकोरायताम्।।

अस्य गङ्गालहरीनाम्नी सुप्रख्यता रचना तु सुमधुरातिललितपदाऽलङ्कृतत्वेन सर्वानितरान् गीतिसन्दर्भानतिशेते, इत्यत्र तु कः सन्देहावस्वरः किल।

तद्यथा:-

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्,
महैश्वर्य लीलाजनितजगतः खण्डपरशोः।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्त्त सुमंनसां,
सुधासौन्दर्यन्ते सलिलमशिवं नः शमयतु।।

अपि प्राज्यं तृणामिव परित्यज्य सहसा,
विलोललद्वानीरं तव जननि तीरं श्रितवताम्।
सुयातः स्वादीयः सलिलभरमातृप्ति पिबतां,
जनानामानन्दः परिहराति निर्वाणपदवीम्।।

**निधानं धर्माणां किमपि च विधानं नवमुदाम्।**
**प्रधानं तीर्थानाममलापरिधानं त्रिजगताम्।।**
**समाधानं बुद्धेरथ खलु तिरोधानभधियाम,**
**श्रियामाधानं नः परिहरतु तापं तव वपुः।।**

अहो कीदृशो मनोहरः पद्यबन्ध?

सकलशास्त्रावगाहिधिषणस्यास्य पण्डितराजस्य प्रकाण्डपाण्डित्यं स्वकीये चित्रमीमांसाखण्डनाख्ये ग्रन्थ श्रीअप्पयदीक्षितप्रणीतायाः चित्रमामांसायाः कृतेन प्रचण्डखण्डनेनावबुध्यते। पण्डितराजोऽयं सदुन्दुभिनिध्वानं समुद्घोषयतिः-

**सूक्ष्मं विभाव्य मयका समुदीरितानाम्**
**अप्पय्यदीक्षितकृता विह दूषणानाम्।**
**निर्मत्सरो यदि समुद्धरणं विदध्यात्,**
**तस्याहमुज्ज्वलमतेश्चरणौ वहामि।।**

पण्डितराजोऽयं न केवलं साहित्य-धुरन्धरः अपितु व्याकारणशास्त्रस्यापि पारदृश्वाऽनूचान आसीत्। तच्चैतद् भट्टोजिदीक्षितविरचितमनोरमाया मनोरमाकुचमर्दनाख्यखण्डनग्रन्थपर्यालोचनेन ज्ञायते, तच्च शाब्दिकैस्तत्रवानुसन्धेयम्।

अस्य तार्किकवक्रवर्त्तिनः तर्कशैली खलु लोकोत्तरा। तदुदाहरणमप्येकमत्रदीयतेतार्किकानां मनःप्रसादाय। प्रखरतार्किकोऽयं प्राचां काव्यप्रकाशकारादीनां काव्यलक्षण दूषयन्नाह :-

"यत्तु प्राञ्चः 'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्' इत्याहुस्तत्र विचार्यते शब्दार्थयुगलं न काव्यशब्दवाच्यम्, मानाभावात्। काव्यमुच्चैः पठ्यते काव्यार्थोऽवगम्येत् काव्यं प्रतुम्, अर्थो न ज्ञातः इत्यादिविश्वजनीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थप्रतिपत्तेश्च। व्यवहारः शब्दमात्रे लक्षणया उपपादनीयः इति

चेत्, स्यादपि एवं, यदि काव्यपदार्थतया पराभिमते शब्दार्थयुगले काव्यशब्दशक्तेः प्रमापकं दृढ़तरं किमपि प्रमाणं स्यात्। तदेव तु न पश्याम विगतवाक्यन्तु अश्रद्धेवमेव। इत्थञ्च असति काव्यशब्दस्य शब्दार्थयुगलशक्ति-ग्रहके प्रमाणे प्रागुक्ताद् व्यवहारतः शब्दविशेषे सिद्ध्यन्तीं शक्तिं को नाम निवारयितुमीष्टे। एतने विनिगमनाभावाद् उभयत्र शक्तिरिति प्रत्युक्तम्। तदेवं शब्दविशेषस्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तम्, न तु स्वकल्पितस्यैव काव्यपदार्थस्य।''

श्रीहरिचन्द्रस्य स्थितिकालः अद्यापि न निश्चितो यद्यपि तथापि एतत्तु निर्विवादं यदेष प्राचीनकविषु अन्यतम आसीत्। वाक्यपतिराजेन स्वीये 'गौडवहोऽभिधे काव्ये भासकालिदाससुबन्धुभिः सार्द्ध हरिचन्द्रस्यापि नामग्राहमुल्लेखो विहितः-

**'आसस्मि जलणभित्ते कन्तीदेवे अजस्स रहु आरे।**
**सोबन्धये च बन्धम्मि हरिचन्ते च आणन्दः।**

अस्यैकस्य हस्तलेखबद्धस्य ग्रन्थस्य समयः 1287 मिविक्रमसम्वत्सरे उल्लिखितः समुपलभ्यते। अतस्ततः पूर्वतन एवास्य स्थितिकालो भवेत्। किञ्च वाग्भटप्रणीते नेमिनिर्वाणकाव्ये 'धर्मशर्माभ्युदस्य' प्रभावः प्रभूततयोपलभ्यते। तदेवमुम्तग्रन्थगततन्नामस्मरणात्सुतरां प्रतिपत्तुं पार्यते यद् हरिचन्द्रस्य कालः ख्रिस्तीयैकादशतमशतकमध्यगत एव सम्भवेत्। 'सदुक्तिकर्णामृत' कारः कविवरममुं महाकवीनां श्रेणीषु प्रतिष्ठापयामास :-

**'सुबन्धौ भक्तिर्नः क इह रघुकारे न रमते,**
**धृतिर्दाक्षीपुत्रे हरति हरिचन्द्रोऽपि हृदयम्।**
**विशुद्धोक्तिः सूरः प्रकृतिमधुरा भारविगिरः,**
**तथाप्यन्तर्मोदं कमपि भवभूतिर्वितनुते।।**

तदेतावतेदं स्फुटीभवति यदेष कववरः अतीव मेधावी लब्धप्रतिष्ठश्चाभूत् कवीन्द्रनण्डले। असौ एकं 'धर्मशर्माऽभ्युदय'न्नाम महाकाव्यमपरञ्च 'जीवनचम्पू'

समाख्यं काव्यद्रयं प्राणैषत्। धर्मशर्माभ्युदये महाकाव्ये पञ्चादशतमतीर्थङ्करस्य धर्मनाथनामधेयस्य जन्मत आरभ्य निर्वाणपर्यन्तं कथानकमुपश्लोकितम्। नूवमस्य काव्यं वैदर्भीरीतिसमन्वितं माधुर्यप्रसादगुणग्रथितं चित्रालङ्कारसमलङ्कृतं रसिकानामतीवानन्दजनकं सम्पन्नम्। तद्यथा :-

**स कर्णपीयूषरसप्रवाहं, रसध्वनेरध्वनि सार्थवाहः।**
**श्रीधर्मशर्माभ्युदयाभिधानं, महाकविः काव्यमिदं व्यधत्त।।**

महाकविमाघभारविवदसावपि चिन्त्रालङ्कारप्रणयनप्रिय आसीदिति विभाव्यते यतोऽयमपि एकोनविंशतितमे सर्गे चित्रकाव्यात्मकानां पद्यानामेव महान्तं सम्भारं समुच्चयीकरोति। यथा भारविणा चित्रकाव्यात्मके सर्गे एकः नकारात्मकः एकाक्षरीश्लोको विरचितः तथैव हरिचन्द्रेणापि चतुर्वर्णात्मकः एकः श्लोकः चित्रितः। तद्यथा :-

**रैरोऽरी रोरुररुत्काकुकं केकि कङ्किः।**
**चन्वच्चन्वूच्चोंचेतत्ततातीति तं ततः।।** इति।।

काव्यमिदं वैदर्भीरीतिमालम्बते, कल्पनाचारुतां बिभर्ति, शब्दसौष्टवञ्च चिनुने, द्योतयति किमपि विचित्रचरित्रचित्रणनमत्कृतिम् :-

**"श्रव्यऽपि काव्ये रचिते विराश्चित्, कश्चित्सचेता परितोषमेति।**
**उत्कोरकः स्यात्तिलकः कटाक्ष्याः, कटाक्षभावैरितरे न वृक्षाः।।**

निजकोडानुगतमात्मजं विभाव्य जनकस्य हृदि समुद्वेल्लितमपूर्वानन्दं कीदृगुपवर्णयति निसर्गतया गिरा :-

**न चन्दनेन्दीवरहारयष्टयो न चन्द्ररोचीषि न चामृतच्छटाः।**
**सुताङ्गसंस्पर्शसुखस्य निस्तुलां कलामयन्ते खलु षोडशीमपि।।**

प्रावृड्वर्णनञ्चापि दर्शनीयम् :-

**खल इव द्विजराजमपि क्षिपन् दलितमित्रगणो नवकन्दल:।**
**अजनि कामकुतूहलिनां पुना रसमय: समय: स घनागम:।।**[1]

**इह घनैर्मलिनैरपपहस्तिता कुटजपुष्पवशादुडुरान्तति:।**
**गिरिवने भ्रमरारवफूत्कृतैरवततार ततो रतिरम्बरात्।।**[2]

एष च हरिचन्द्रो भट्टारहरिचन्द्रतो भिन्न एव। भट्टारहरिचन्द्रो गद्यकवि:, न खलु स महाकाव्यप्रणेता हरिचन्द्र:। बाणभट्टेन भट्टारहरिचन्द्रस्योल्लेख: गद्यबन्धप्रणेतृत्वे कृत:-

**पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थिति:।**
**भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते।।** इति।।

हरिचन्द्रश्चायं जैनमतावलम्बी। जैनसाहित्ये च काव्यमिदं तदेव महनीयं पदमलङ्करोति, यत्संस्कृतसाहित्ये माघकाव्यं, नैषधकाव्यं वा। हरिचन्द्रोयं जात्या कायस्थ: नोमकाख्यवंशोत्पन्न:। जनकोऽस्यार्द्रदेवो जननी च रथयादेवीनाम्नी विदुषी। स्वकाव्यप्रशंसायामसौ स्थान एवोपन्यस्यति :-

**स कर्णपीयूषरसप्रवाहं रसध्वनेरध्वनि सार्थवाह:।**
**श्रीवर्मशर्माभ्युदयाभिधानं महाकवि: काव्यमिदं व्यधत्त।।**

प्रातराराध्यो महामुनि: पुण्यशीलस्तत्रभावनृ पाणिनि: न केवलं व्याकरणोपश: एव, अपितु महाकविरप्यासीत्। अस्य विशिष्टं वर्णन व्याकरणप्रकरणे मृग्यम् नात्र पिष्टपेषणभिया प्रकम्यते। अत्र तु केवलं तस्य काव्यकलाविषय एव किञ्चिन्निरूप्यते। कविरेष 'जाम्बवतीविजया' परनामकं 'पातालविजया'ख्यं काव्यं प्रणिनाय। अस्य काव्यसरणिरतिरमणीया हृदयङ्गमा च।

---

[1] सदुक्ति कर्णामृत 11/32।
[2] सदुक्ति कर्णामृत 21/32।

सरोरुहाक्षीणि निमीलयन्त्या, रवौ गते साधुकृतं नलिन्या।
अक्ष्णां हि दृष्ट्वापि जगत्समग्रं फलं प्रियालोकनमेकमेव।।
शुद्धस्वभावान्यपि संहतानि निनाय भेदं कुमुदानि चन्द्रः।
अवाप्य वृद्धिं मलिनात्मनात्मा जडो भवेत्कस्य गुणाय वकः।।
उपोढरागेप विलोलतारकं तथा गृहीतं शशिना निशामुखन्।
यथा समस्तं तिमिरांशुकं तया पुरोनुरागाद् गलितं न लक्षितम्।।
प्रकाश्य लोकान् भगवान् स्वतेजसा प्रभादरिद्रः सवितापि जायते।
अहो चला श्री र्बलमानदाऽप्यहो, स्पृशन्ति सर्वा हि दशा विपर्यये।।

क्षपाः क्षामीकृत्य प्रसभमपहृत्याम्बु सरितां
प्रताप्योर्वीं कृत्स्नां तरुगहनमुच्छोष्य सकलम्।
क्व सम्प्रत्युष्णांशुर्गत इति समालोकनपरा-
स्तडिद्दीपालोकैर्दिशि दिशि चरन्तीह जलदाः।।

पाणी शोणतले तनूदरिदरक्षामा कपोलस्थली,
विन्यस्याञ्जनदिग्धेलोचनजलैः किं म्लानिमानीयते।।
मुग्धे चुम्बतु नाम चञ्चलतया भृङ्गि क्वचित्कन्दली
मुन्दमीलन्नवमालतीपरिमलः किन्तेन विस्मर्यते।।

कल्हारस्पर्शगर्भैः शिशिरपरिचयात् कान्तिमद्भिः कराग्रै-
श्चन्द्रेणालिङ्गितायास्तिमिरनिवसने स्रंसयाने रजन्याः।
अन्योन्यालोकिनीभिः परिचयजनितप्रेमनित्यनन्दिनीभि-
र्दूरारूढे प्रमोदे हसितमिव परिस्पष्टमाशा सखीभिः।।

विलोक्य सङ्गमे रागं पश्चिमाया विवस्वतः।
कृतं कृष्णमूखं प्राच्या नहि नार्यो विनेर्ष्यया।। इति।

महाकविः घटकर्परः विक्रमादित्यराजसभायां नवरत्नेष्वेकतमः। ख्रीस्तीयचतुर्थतमे शतके एव कश्चनास्य स्थितिकालः। घटकर्परनामकं द्वाविंशतिपद्यमयमेककाव्यमप्यसौ प्रणिनाय। यत्रासौ प्रतिजानीते :-

**आलम्ब्य वाम्बुतृषितः करकोशपेयं,**
**भावानुरक्तवनितासुन्तैः शपेयम्।**
**जीयेम पेन कविता यमकैः परेण**
**तस्मै वहेयमुदकं घटकर्परेण।।**

अस्मिन् काव्ये मेघदूतस्य कथानकमेव विपर्यासेन वर्णितम्। प्रावृडारम्भे काचिद् विरहिणी पत्नी दूरस्थस्वामिनः समीपे प्रणयसन्देशं प्रहिणोति। अस्य पद्येषु वस्तुतो यमकालङ्कारबाहुल्यमतिशेतेऽखिलानि पद्यान्तराणि। तद्यथा :-

किं कृपापि मयि नास्ति कान्तया पाण्डुगण्डयतितालकान्तया।
शोकसागरवरेऽद्य पातिताम् त्वद्गुणस्मरणमेव पाति ताम्।। इति

महाकविः भर्तृहरिः संस्कृतसाहित्ये विशिष्टं पदमलङ्करोति। सुप्रसिद्धेन जनरवानुरोधन एतद्वक्तुं शक्यते यत्कविरयं राजाधिराजस्य विक्रमादित्यस्याग्रजः आसीत्। यद्यपि नास्ति तत्र किमपि बलवत्प्रमाणम् तथापि यदि नामासीद् भर्तृहरिःतस्यैव विक्रमादित्यस्य ज्येष्ठो भ्राता येन किल चतुश्चत्वारिंशदुत्तरषट्शततमे (644) कैस्तेऽब्दे कहरूरमहारणे हूणाः पराजिताः तदा त्वस्य स्थितिकालोऽपि क्वचित् षट्शताब्द्या उत्तरचरणे एव निर्धारयितुं पार्यते। ये तु केचन भृर्त्तहरिं बौद्धमतावलम्बिनं मन्यते, मन्यामहे व ते खलु भ्रान्तिरहिताः। यतोऽस्य रचनासु क्वचिदपि तादृशबौद्धगन्धि पद्यमेकसपि न नयनपथमवतरति, येन तस्य बौद्धमतावलम्बित्वमभिद्योत्येत। तत्प्रतीपत्वेन च भारतीयपरम्परानुगृहीतानि नैकानि लक्षणानि समुपलभ्यन्तें।

भर्तृहरेः कृतित्वेन विख्यातानि नीतिशतक-वैराग्यशतक-शृङ्गारशतकाख्यानि त्रीणि निरतिशयकाव्यकलालङ्कृतानि प्रसादगुणगुम्फितानि काव्यानि विलसन्ति। तत्र:-

**नीतिशतके:-** नीति रीति-सदाचारपद्धति-धैर्य-शौर्य-साहसौदार्य-परोपकाराद्यनंकसदुपदेशसम्भृतानि पद्यानि कयापि सुललितमधुरभाषया विभूषितानि देदीप्यन्ते।

**वैराग्यशतके:-** वैराग्योपोद्वलकानि- भोगविलासादीन्द्रियसुखानां नश्वरताप्रदर्शकानि अनन्यसामान्यरूपेण छलछद्मगर्भितस्यास्य जगतो क्षणभङ्गुरस्य स्वरूपप्रतिपादकानि विविधच्छन्दोनिबद्धानि पद्यानि समुल्लसन्ति।

भर्तृहरेः शैली तु प्रासादिकी, भाषा सुपरिष्कृता, भावभङ्गी च गम्भीरा। प्रायशो वैदर्भीमेवाऽसौ समुपलालयति। अस्य रचनासु वर्ण्यविषयाणं रोचिष्णुता, छन्दसां वैविध्यं, सूक्तीनामदुपमं सौन्दर्यम् हृदयग्राहिणी च वाणी एव मन्येऽस्य लोकप्रियत्वे हेतुः। नूनमस्य रचना संस्कृतसाहित्ये साजात्यं न बिभर्त्ति। तद्यथा नीतिशतके :-

**साहित्यसङ्गीतकलाविहीनः साक्षत्पशुः पुच्छाविषाणहीनः।**
**तृणान्न खादन्नपि जीवमानरतद्भागधेयं परमं पशनाम्।।**

**मनसि वचसि काये पुण्यपीयूषपूर्णाः,**
**त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं,**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।**

नीतिशतकस्य सूक्तयो हृदयङ्गमत्वात् प्रायशः सर्वत्र आभाणितिरूपेण प्रचलिता विभाव्यन्ते। तद्यथा:-

'विभूषणं मौनमपण्डितानाम्।', 'मूर्खस्यनास्त्यौषधम्।', 'सत्सङ्गतिः कथय किन्न करोति पुसाम्।', 'प्रारब्धुमत्तमजना न परित्यजन्ति।', 'सर्वेगुणाःकाञ्चनमाश्रयन्ति।', 'सेवाधर्मः परमगहनो योगिनामप्यगम्यः।', 'न

निश्चितार्थाद्विरमन्ति धीरा:।', 'मनस्वी कार्यार्थी न गणयति दु:खं न च सुखम्।', 'शीलं परं भूषणम्।', न्याय्यात्पथ: प्रविचलन्ति पदं न धीरा:।', 'विधिरहो बलवानिति मे मति:।' इत्याद्या: सूक्तय: अद्याप्यनुश्रूयन्ते विबुधकण्ठकिङ्किणीतोऽभित: झङ्क्रियमाणा:।

शृङ्गारशतकेऽपि कविना शृङ्गारकलायां लीलावत्य: किं किं न आरचयन्ति इति अतीव चारुतया सुमधुरपदालङ्कृतै: ललितललितै: पद्यै: निरूपितम्। तद्यथा :-

संसार तव निस्तारपदवी न दवीयसी।
अन्तरा दुस्तरा न स्युर्यदरि मदिरेक्षणा:।।

किञ्च:-

मात्सर्यमुत्सार्य विचार्य कार्यमार्या: समर्यादमुदाहरन्तु ।
सेव्या नितम्बा: किमु भुधराणामुत स्मरस्मेरावेलासिनीनाम्।।

अपि च:-

कुङ्कमपङ्ककलङ्कितदेहा गौरपयोधरकम्पितहारा।
नूपुरहंसरणत्पदपद्मा कं न वशं कुरुते भुवि रामा।।

अग्रे:-

मत्तेभुकुम्भदलने भुवि सन्ति शूरा:,
केचित्प्रचण्डमृगराजवधेऽपि दक्षा:।
किन्तु ब्रवीमि बलिनां पुरत: प्रसह्य,
कन्दर्पदर्पदलने विरला मनुष्या: ।।

वस्तुत: कविरयं यं यं रसमाददाति चित्रयितुं तन्तमुपलम्भयति समुत्कर्षस्य पराकाष्ठामित्यत्र नास्ति सन्देहलवोऽपि इति। तथाहि :-

रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं न चिश्चितार्थाद् विरमन्ति धीरा:।।

वैराग्यरागोऽप्यस्यानुरागकृत:-

यत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवी,
निस्तीर्ण: सरितां पति: नृपतयो यत्नेन सन्तोषिता:।
मन्त्राराधनतत्परेण मनसा नीता: श्मशाने निशा:,
प्राप्त: काणवराटकोऽपि न मया तृष्णेऽधुना मुञ्च माम्।

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये,
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जित:।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितम्,
मातु: केवलमेव यौवनवनच्छेदे कुठारा वयम्।।
अजानन्माहात्म्यं पततु शलभस्तीवदहने,
स मीनोप्यज्ञानाद्बडिशायुतमशनातु पिशितम्।
विजानन्तोऽप्येते वयमिह विपज्जालजटिलान्
न मुञ्चाम: कामानहह गहनो मोहमहिमा।।

वैराग्यशतकञ्चास्य तृतीया रचना। यं कमपि विषयमसौ उट्टङ्कयति चित्राङ्कितमिव विचित्रतया आरचयति चा वार्द्धक्यं निरूपयति:-

बलिभिर्मुखमाकान्तं पलितैरङ्कितं शिर:।
गात्राणि शिथिलायन्ते, तृष्णैका तरुणायते।।

किञ्च :-

व्याघ्रीव तिष्ठति जरा परेतर्जयन्ती,
रोगाश्च शत्रव इव प्रहरन्ति देहम्।
आयु: परिस्रवति भिन्नघटादिवाम्भो,
लोकस्तथाप्यहितमाचरतीति चित्रम्।।

अग्रे च :-

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा,

मणौ वा लोष्ठे वा कुसुमशयने वर दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः,
क्वचित्पुण्यारण्ये शिव शिवेति प्रलपतः।।

संसारस्य विषमतां विभवयन् वर्णयति:-

'क्वचिद्वीणावाद्यं क्वचिदपि चा होहेति रुदितम्,
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः।
क्वचिद्रामा रम्याः क्वचिपि गलत्कुष्ठवपुषो,
न जाने संसारः किममृतमयः किं विषमयः।।

काव्यप्रतिभाया दार्शनिकताना सह वादृशोऽनन्यः प्रसोंऽत्र लक्ष्यते न तादृशः क्वचिदन्यत्र साहित्ये लभ्यतें वैरागयशतकस्य सूक्तयोऽपि नितरां चेतोहराः। प्रणिभाल्यताम् तावत् :-

पीत्वा मोहमयीं प्रमादमदिशमुन्मत्तभतं जगत्।
तृष्णा न जीवर्णा व्यमेव जीर्णाः।
सर्वयस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः।
विवेकभ्रष्टानां भवति विनिपातः शतमुखः।
मनिसि च परितुष्टे कोऽर्थवान् को दरिद्रः।
सन्दीप्ते भुवने तु कूपखननं प्रत्युद्यमः कीदृशः।
किं नाम वामनयान न समाचरन्ति।
वनं वा गेहं वा सदृशमुपशान्तैकमनासाम्। इत्याद्याः।

वैराग्यशतं भर्तृहरे सर्वस्वभूतमिव प्रतीयते। स खलु 'सन्तोषं परमं सुखं वैराग्यं तदेकमात्रसाधनम्' इति प्रतिपादयन्निवास्ते।

सांसारिकभोगविलासेष्वास्क्तव्यक्तेरुक्तिरियं कियच्चमत्काराधायिकेति सुधियो विभावयन्तुः-

'धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं धायता-
मानन्दाश्रुकणान् पिबन्ति शकुन निःश म `शयाः।
अस्माकन्तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते।।

भर्तृहरिदृशा तपस्विजीवनमेव परमश्रेयस्करम्ः-

मही रम्या विपुलमुपधानं भुजलता,
वितानं चाकशं व्यजनमनुकूलोऽयमानिलः।
शरच्चन्द्रो दीपो विरतिवनितासमिंदितः,
सुखी शान्तः होते मुनिरतनुभूतिर्नृपप इव।।

अनेकशः सुभगाः सूक्तयो लोकानां कण्ठाभरणतां गताः विलसन्तिः-

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्ध गतम्,
वस्यार्द्धस्य परस्य चार्द्धसपरं बालत्ववृद्धत्वयोः।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते,
जीवे वारितरङ्गबुद्बुदसमे सौख्यं कुतः प्राणिनाम्।।
क्षणो बालो भूत्वा क्षणमपि युवा कामरसिकः,
क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्णविभवः।
जराजीर्वैरङ्गैर्नत इव बलीमन्दितततनुः,
नरः संसारन्ते विशति यमधानी यवनिकाम्।।
आक्रांत मरणेन जन्म जरसा वात्युत्तगं यौवनम्,
सन्तोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालर्नृपा दुर्जरैः,
अस्थैर्पेण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा।।
इति विश्वविभूतेः क्षणस्थायित्वं कीदृकृचारुतया वर्णितम्।

किञ्च:-

अज्ञ: सुखमाराध्य: सुखतरमाराध्यते विशेष:।
अज्ञानलवदुर्विदग्धं ब्रह्मापि चतंनरं न रञ्जयति।।

व्यालं बालमृणालतन्तुभिरसौ रोद्धं समुज्जृम्भते,
छेत्तुं वज्रमणीन् शिरीषकुसुमप्रान्तेन सन्नह्यते।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते,
नेतुं वाञ्छति य: खलान् पथि सतां सूक्तै: सुधास्यन्दिभि:।।

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधी प्रसिद्धा,
वैदग्ध्यकीर्त्तिमपहर्त्तुंभसौ समर्थ:।।

जयन्ति ते सुकृतिन: रससिद्धा: कवीश्वरा:।
येषां नास्ति यश: काये जरामरणजं भयग्।।

राजन् दुधुक्षमि यदि क्षितिधेनुमेतां,
तेनाद्य वत्समिव लोकममुं पुषाण।
तस्मिंञ्च सम्यगनिशं परिपोष्यमागे,
नानाफलै: फलति कल्पलतेव भूमि:।।

यद्यपि कविवरप्रकाशवर्षविषये न किञ्चिदप्यद्यावधि श्रुतं दृष्टं वा, कोऽयमासीत् कुत्रत्यो वा किन्नाम वा काव्यमसौ निबबन्ध, इत्यादि सर्वावास्य विषयेऽन्धतमसि लीनभिव प्रतीयतें तथाप्यस्य श्लोका: सुभाषितग्रन्थेषु प्रकीर्णरूमण यत्रतत्रोपलभ्यमाना ग्राहयन्ति कवेरस्य कवित्वनैपुणीम्। शिशुपालवधस्य टीकाकृता बल्लभदेवेन प्रकाशवर्षविषये समुल्लिखित्म:-

श्रुत्वा प्रकाशवर्षात्त व्याख्यानं तावदीदृशम्।
विशेषस्तु नैवास्ति बोधोऽनुवादादृते ।। इति।

तेन विज्ञायते यत्कविरयं कवित्वकलाप्रकार्षवान् निरतिशयानुभवशाली च। अस्य रचनारसास्वादोऽपि किञ्चित्समास्वाद्य: सहृदयै :-

जगत्सिसृक्षाप्रलयक्रियाविधौ प्रयत्नमुन्मेषनिमेषविभ्रगम्।
वदन्ति यस्येक्षणलोलपक्ष्मणां पराय तस्मै परमेष्ठिने नम:।।
यञ्चापदं मरणदु:खमिवानुभाव्य दत्तेन किं खलु भवत्यतिभूयसाऽपि।
कल्पद्रुमान् परिहसन्त इवेह सन्त: सङ्कल्पितैरतिददत्यकदर्थितं यत्।।
एवमेव नहि जीव्यते खलात् तत्र का नृपतिवल्लभे कथा।
पूर्वमेव हि सुद:सहोऽनल: किं पुन: प्रबलवायुनेरित:।।

वन्द्यान्निन्दति दु:खितानुपहसत्याबाधते बान्धवान्,
शूरान् द्वेष्टि धनच्युतान् परिभवत्याज्ञापयत्याश्रितान्।
गुह्यानि प्रकटीकरोति घटयन् यत्नेन वैराशयम्,
ब्रूते शीघ्रमवाच्युमुज्झति गुणान् गृह्णति दोषानृ खल:।।

कृपणसमृद्धीनामपि भोक्तार: सन्ति केचिदतिनिपुणा:।
जलसम्पदोऽबुराशेर्यान्ति लयं शश्वदौर्वाग्नौ।।
धनबाहुल्यमहेत: कोऽपि निसर्गेण मुक्तकर:।
प्रावृषि कस्याम्बुमुच: सम्पत्ति: किमधिकाऽम्बुनिधे:।।
लक्ष्मीसम्पर्करूपोऽयं दोष: पद्मस्य निश्चितम्।
यदयं गुणसन्दोहो धामनीन्दी पराङ्मुख:।।

कल्पद्रुमान् विगतवाञ्छजने सुमेरौ रत्नान्यगाधसलिले सरितामधीये।

धात्रा श्रियं निदधता प्रखलेषु नित्यं अत्युज्जवल: खलु वटे निहित: प्रदीप:।। इति।

कविकुलाऽलङ्कारभूतोऽयं अमरुक[1] नामा महाकवि: शृङ्गारिक: प्रौढोक्तिकुशल: विद्वत्समाजेलब्धानितरसाधरणसमादरश्च आसीत्। शार्दूलविक्रीडिताख्यचछन्दोबन्ध नेऽसावतीव कुशल: पदविन्यासोल्लासोऽप्यस्य सुरुचिर:। वस्तुत: नायं शब्दकवि:, अपितु रसकवि:। शब्दरसयोर्द्वन्द्वे समुपस्थिते रसमेवासौ समुपलालयति न शब्दम्। तथा हि अस्य मुक्तकानुद्दिश्य ध्वन्यालोककार: श्री आनन्दवर्धनाचार्य: मुक्तकण्ठेनैनं प्रशशंस:-

"भुक्तकेषु हि प्रबन्धेषु इव रसबन्धाभ्भिनिवेशिन: कवयो दृश्यन्ते। तथा ह्यमरुकस्य कवे: मुक्तका: शृङ्गारस्यन्विन: प्रबन्धायमाना: प्रसिद्धा एव।" इत्यनेनानुमातुं शक्यते यद् अमरुकोऽयं महाकवि: कविश्रेणीषु किल अत्युच्चकोटि माटीकमानो व्यलसत्।

कविवरेण अर्जुनदेववर्मणाऽपि भूरिश प्रशंसनमारचितम् अमरुव मुद्दिश्य :-

**अमरुक-कवित्वडमरुकनादेन विविन्हुता न सञ्चरन्ति।**
**शृङ्गारभणितयोऽन्या धन्यानां श्रवणयुगलेषु।।**[2] इति।

नूनं साहित्यनिकषे कषमाणाऽस्य रचना नितरां प्रखरतरा चमत्कारिणी चावतीर्णा। अमरुकत्य शृङ्गाररससम्भृतानासुदात्तवचसां साम्मुख्ये सुतराभितरकविजना वामनायन्तेतरामिति निर्विशङ्कम्। भाषासरणि: सादरम्या, काव्यबन्ध सुदृढ: कोमलकल्पनासम्पन्नश्चं अलङ्कारग्रन्थेषु प्राय: अमरुककृतानि पद्यानि बहुश: समृद्धृतानि। तदस्य सुधानिस्यन्दिमधुरपद्यावलिरसास्वाद: श्रवणपुटकाभ्यायास्त्राद्यतामृ रसिकै :-

**क्व प्रस्थिति करभोरु घने निशीथें?**
**प्राणाविको वसित यत्र निज: प्रियो मे।**

---

[1] यद्यपि कविरय कतम जनपद समलञ्चकार जनुषा, कस्मिनृ काले च जात इदमद्यापि न निश्चितम्। तथाऽपि आनन्दवर्धनाचार्य ध्वन्यालोके कविममु यत्प्रशश तेन खल्वेतुत्त वक्त शक्यते यदेष कवि क्ववितृ खिस्तीयापञ्चाशदुत्तरसप्तशततमेऽब्दे (750 कैस्त) सञ्जातो भवेदिति।

[2] रसिक सजीवनीटीकायाम,

एकाकिनी वद कथन्न बिभेषि बाले?
शूरोऽस्ति पुङ्खितशरो मदनः सहायः।।
अच्छिद्रं नयनाम्बु बन्धषु कृतं तापः सखीष्वाहितो,
न्यस्त दैन्यमशेषतः परिजने चिन्ता गुरुभ्योऽर्पिता।
अद्यम्वाकिल निर्वृतिंवजति साश्वासैः परं खिद्यते,
विस्रब्धी भव विप्रयोपजनितं दुःख विभक्तं तया।।
असद्वृत्तो नायं न व खलु गुणैरव रहितः,
प्रियी मुक्ताहारस्त चरणमूले नियतितः।
गृहाणेमं मुग्धे व्रजतु निजकण्ठप्रणयिता
मुपायो नास्त्यन्यस्तव हृदयसन्तापशमने।।
मुग्धे मुग्धतयैव नेतुमलिखः कालः किमारभ्यते,
मानं धत्स्व धृतिं बधन ऋजुतां दूरीकुरु प्रेयसि।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना,
नीचः शंस हृदि स्थितो हिनुन मे प्राणेश्वरः श्रोष्यति।।
उत्कम्पो हृदये स्खलन्ति वचनान्यावेगलोलं मनो,
गात्रं सीदति चक्षुरश्रुकलुषं चिन्तामुखं शुष्यति।
यस्यैषा सखि ! पूर्वरङ्गरचना मानः स मुक्तो मया,
वन्द्यास्ता अपियोषितः क्षितितले यासामयं सम्मतः।।

वस्तुतः मानवीयप्रकृतिसुलभप्रणयपरिपक्त्रिमोल्लेखो यथा साधुतयाऽमरुककाव्येषु सम्पन्नः तथाऽन्यत्र नावलोक्यते। विदेशं जिगमिषोः प्रियस्य कामिन्या हृदयविह्वलतां कीदृङ मार्मिकतयाऽनुबध्नाति :-

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमास्तिं व्यवसितं चित्तेन गन्तुम्पुरः।
यातुं निश्चितचेतसि प्रियवमे सर्वे समं प्रस्थान,
गन्तव्ये सति जीवित ! प्रियसुहृत्सार्थः किमु त्यज्यते।।

अन्यत्र प्रियशुभागमनप्रयोजकतत्तदङ्गप्रत्यङ्गहर्षोत्कर्षेण मङ्गलमावेदयति :-

**दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः,**
**पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्याविभिः।**
**दत्तस्वेदमुचा पयोधरयुग्नार्घ्यो न कुम्भाम्भा,**
**स्वैरैवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम्।।**

निम्नाङ्किते पद्ये नायकनायिकासंवादोऽपि रसिकानां मनांसि रञ्जयति :-

**बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतम्।**
**खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।**
**तत्किं रोदिषि गद्गदेन वत्तसा कस्याग्रतो रुद्यते,**
**नन्वेतन्मप का तवास्मि दयिता नास्मीत्यतो रुद्यते।।**

ैमबजपवद 1ण्01 भावसौकुमार्यस्य कीदृग् हृदयस्पर्शि चित्रणम् :-

**भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते,**
**रुद्धायामपि वाचि सम्मितमिदं दग्धाननं जायते।**
**कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते,**
**दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने।।**

अहो कीदृशं चेतोहरं वर्णनम्! इति।

महाकवेः बाणभट्टस्य पद्यबन्धोऽपि सुतरां काव्यकलालङ्कृतः।

**नमस्तुङ्गशिरश्चुम्बि-चन्द्रचामरचारवे।**
**त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे।।**

बाणभट्टस्यालौकिकीं काव्यकलाचातुरोमवलोक्य, प्रागल्भ्यधुरीणताञ्च विभाव्य आचार्यो गावेर्धनः स्वीये आर्यसप्तशतीकाव्ये बाणविषये समुपश्लोकयति :-

**जाता शिखण्डिनी प्राग् यथा शिखण्डी तथाऽवगच्छामि।**

प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति।।

नूनमस्य गद्यकाव्यकलावतारस्य बाणस्य पद्यकलाऽपि कापि निरतिशयाद्भुता। तन्माधुर्यमपि सहृदयरसिकैः किञ्चिदास्वाद्यताम् :

एकैकातिशयालवः परशुणज्ञानैकवैज्ञानिकाः
सत्यते धनिकाः कलासु सकलास्वाचार्यचर्याचणाः।
अप्येते सुमनोगिरां निशमनाद् विस्मयत्यहो श्लाघया,
धूते मर्धनि कुण्डले कषणतः क्षीणे भ्वेतामिति।।
प्रीतिं न प्रकटीकरोति सुहृदि द्रव्यव्ययाशङ्कया,
भीतः प्रत्युपकारकारणभयान्नाकृष्यते सेवयां
मिथ्या जल्पति वितमार्गणभयात्स्तुत्यापि न प्रीयते,
कीनाशो विभवव्ययव्यतिकरत्रस्तः कथं प्राणिति।।

न गृह्णाति ग्रासं नवकमलञ्जिल्किनि जले,
न पङ्कैराह्लादं व्रजति विसभङ्कार्धशकलैः।
ललन्तीं प्रेमार्द्रामपि विषहते नान्यकरिणीं,
स्मरन् दावभ्रष्टां हृदयदयितां वारणपतिः।।
नदीवप्रान् भित्त्वा किसलयवदुत्पाट्य च तरून्,
मदोन्मत्तां जित्वा करचरणदन्तैः प्रतिगजम्।
जरां प्राप्यनार्यां तरुणजनविद्वेषजननीम्
स एवायं नागः सहति कलभेभ्यः परिभवम्।।
सर्वाशारुधि दग्धवीरुधि सदा सारङ्गबद्धक्रुधि,
क्षामक्ष्मारुहि मन्दमुन्मधुलिहि स्वच्छन्दकुन्दद्रुहि।
शुष्यत्स्रोतसि भूरितप्तरजसि ज्वालायमानार्णसि,
ग्रीष्मे मासि ततार्कतेजसि कथं पान्थ ! व्रजन् जीवसि।।
स्वेदाम्भःकणिकाञ्चितेन वपुषा शीतानिलस्पर्शनम्,
तर्षोत्कर्षजुषा मुखेन शिशिरस्वच्छाम्बुपानादरः।

दूराध्वक्लमनिःसहैरवयवैश्छायासु विश्रात्य:,
काश्मीरान् परितो निदाघसमये धन्यः परिभ्राम्यति।।

लवणाम्बुनिधेरम्भः कृत्सनमद्‌गीर्य तोयदाः।
दधुर्धवलतां भयः पीतदुग्धार्णवा इव।। इति दिक्।

कविराजो जगद्धरः शान्तरसप्रधानः प्रासादिकः सुकविः काश्मीरान् स्वजनुषाऽलञ्चकार। कविरयं दार्शनिको, दिग्गजो वैयाकरणः, प्रोढ़ो मीमांसकश्चासीत्। अनेकेषु साहित्यिकसन्दर्भेषु चानेन प्रामाणिकाष्टीका विरचिताः। आत्मपरिचयं ददोऽयमुपन्यस्यनि यद् आसीदेको चण्डेश्वरो नाम प्रसिद्धो मीमांसकः। तदात्मजो रामेश्वरोऽपि लब्धप्रतिष्ठो मीमांसकमूर्द्धन्यस्तदात्पजो गदाधरस्तत्सूनुर्विद्याधरस्तत्सुतो रत्नधरस्तदात्मसम्भवश्चाऽयं साहित्यधुरन्धरो जगद्धरः ख्रैस्तचतुर्दशतमशताब्द्यां लब्धस्थितिकः।

कवेरस्य सर्वोत्कृष्टो ग्रन्थः 'स्तुतिकुसुमाञ्जलिः' अष्टभिः स्तोत्रैर्निबद्धः चतुर्दशसहस्रमितैः श्लोकैः श्लोकैः परिगम्फितः। जगद्धरोऽयं भगवतो महामहिमशालिनो महादेवस्यानन्यो भक्तः। अस्य रचनासु श्लेषनुप्रासयमकानामपूर्व मिश्रणम्। रससार्वभौमस्य करुणरस्य च पूर्णः परिपाकः दृग्गोचरीभवति। नूनमस्य सुधास्पर्धि काव्यमाधुर्य वज्रहृदयानरसिकानपि द्रावयति। तद्यथा:-

स्वैरेव यद्यपि गतोऽहमधः कुकुत्यैस्तत्रापि नाथ तव नास्म्यवलेपपात्रम्।
दृप्तः पशुः पतति यः स्वयमन्धकूपे नोपेक्षते तमपि कारुणिको हि लोकः।।
धन्याः शुचीनि सुरभीणि गुणोम्भितानि वाग्वीरुधंः स्ववदनोपवनोद्‌गतायाः।
उच्चित्य सूक्तिकुसुमानि सतां विविक्तवर्णानि कर्णपुलिनेष्ववतंसयन्ति।।
तेऽनन्त-वाङ्मय-महार्णव-दुष्टपाराः सांधात्रिका इव महाकवयो जयन्ति।
यत्सूकितपेलवलवङ्‌गवैरवैमि सन्तः सदस्यु वदनान्यधिवासयन्ति।।
त्रैलोक्यभूषणमणिर्गुणिवर्गबन्धुरेकश्चकास्ति सविता कविताऽद्वितीया।
शंसन्ति यस्य महिमाऽतिशयं शिरोभिः पादग्रहं विदधतः पृथिवीभृतोऽपि।।
शब्दार्थमात्रमपि ये न विदन्तितेऽपि यां मूर्च्छनामिव मृगाःश्रवणैः पिबन्तः।

संरुद्धसर्वकरणप्रसरा भवन्ति त्तित्रस्थिता इव कवीन्द्रगिरं नुमस्ताम्।।

अस्थाने गमिता लयं हतधियों वाग्देवता कल्पते,
धिक्काराय पतभवाय महते तापाय पापाय वा।
स्थाने तु व्ययिता सतां प्रभवति प्रख्यातये भूतये,
चेतोनिर्वृतये परोपकृतये प्रान्ते शिवावाप्तये।।

स्फारेण सौरभभरेण किमेणनाभेः तद्वामसारमपि सारमसारमेव।
स्रक्सौमनस्यमपि न पुष्यति सौमनस्यम् प्रत्यन्दते यदिमधुद्रवसूक्तिदेवी।।

स हेमालङ्कारक्षितिपतनलगनेन रजता,
तथा देन्यं नीतो नापतिशरश्लाव्यविनवः।
यथा लोष्ठाभ्रान्ति र्व्यवहित विवेक व्यतिकारः,
विलोक्यनं लोकः परिहरति पदः क्षतिभयात्।।

आहूतेषु विहङ्गमेषु मषको नायन् पुरो वर्यते,
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां रुचस्।
खद्योतोऽि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनाम्,
धिक्सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम्।।

कवा संसारजालान्तर्बद्धं त्रिगुणरज्जुभिः।
आत्मानं मोचयिष्यानि शिवभक्तिशलाकयाः।।
वाङ्मनःकायकर्माणि विनिवेश्य त्वपि प्रभो।
त्वन्मयीभूय निर्द्वन्द्वः कच्चित्स्यामपि कर्हिचित्।।
मलतैलाक्तसंसार-वासवावर्त्तिदाहिना।
ज्ञानदीपेन देव त्वां कदा नु स्यामुपस्थितः।।
एकाकी निस्पृहः शान्तः पाणिपात्रो दिगम्बरः।

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

कदा शम्भो भविष्यामि संसारोन्मूलनक्षमः।।

सुशान्तशास्त्रार्थ-विचार-चापलम्,
निवृत्त-नानारसकाव्य-कौतुकम्।
निरस्तनिःशेषविकल्पविप्लवं,
प्रपत्तुमन्विच्छति चक्रिणं मनः।।
कृष्ण त्वदङ्घ्रियुगलाम्बुजभक्तिरेणुं,
पुञ्जान्तरालपरिधूसर - विग्रहोऽहम्।
भृङ्गः कदा निजपतत्र वधूनेन
प्रेतेश-दिक्-तिविरपाटपटुर्भवेयम्।

विजृम्भमाणे तममि प्रगल्भे यथा भवासक्तमतिः स्थितोऽहम।
गतेऽपि तस्मिन्नदितावबोधस्तथा भवासक्तमतिर्भवेयम्।।

महाकविः कल्हणोऽयं काशमीरकस्यैकस्य ब्राह्मणकुलावतंसस्य चम्पकानाम्नो भूसुरस्यात्मजः। महाराजहर्षदेवस्यातीव विस्रम्भभाग्, राजनैतिकसविवश्चासीत्। हर्षवर्धनानन्तरमनेने राजनीतिप्रपञ्चः परित्यक्तः। स्वपितृव्यस्य राज्ञो हर्षदेवस्य परमप्रीतिपात्रस्य कनकसंज्ञकस्य देहावसाने विरतो भूत्वा काश्यामागतो वैराग्यमयजीवनं यापयितुं प्रववृते। भारतस्य राजनैतिकेतिवृत्तं लिखितुमुपचकमे। तदितिवृत्तमेव राजतरङ्गिणीनाम्ना प्रसिद्धम्। अस्मिन् ग्रन्थे ऐतिहासिकघटनानां कमबद्ध उल्लेखः पल्लवितः। खैस्त 1151 तमसम्वत्सरं यावत् सर्वेषाम् काशमीरकनृपाणां कालादिनिरूपणपुरस्सरं तत्तद्घटनाचक्रमङ्कितम्।

सेयं राजतरङ्गिणी अष्टखण्डेषु विभक्ता, 7,823 श्लोकैश्च प्रणिवद्धा। एतल्लेखनसण्याऽवगम्यते यत्कादमीरेषु इतिहासीपन्यासप्रणालिरतिप्राचीनकालत एव लब्धप्रचारा आसीत्। इतिवृत्तविषयका नैके ग्रन्थाश्च आसन् यानाश्रित्य कल्हणे राजतरङ्गिणीमुपन्यस्तुं प्रबभूव। अनेकान् शिलालेख-प्रशस्तिपत्र-दानपत्र-हस्तलिखितग्रन्थान् संस्कृतभाषायां शारदालिपिबद्धान् आदाय राजतरङ्गिणी प्रणिनाय। प्राचीनमुद्राविशेषाणामुपयागोऽपि तेन व्यधायि समीचीनतया। एतद्व्यातिरिक्तमस्य ग्रन्थस्य

लेखने तद्देशीय जनश्रुतीनां, पारिवारिककथांशानां, प्रथानां परम्पराणाञ्चावलम्बनं साहाय्यञ्चदारणीकृत्य ग्रन्थोऽयं महता समारम्भेण संग्रथितः। पञ्चदशशतकोपनतवृत्तान्तस्य सतर्कोल्लेखः कवित्वकलासंवलितया ललिततया गिरा गुम्फितः। इतिहासस्य सजीवता, वर्णनस्य मनोज्ञता, काव्यमाधुर्यसम्भृतिश्चात्र सुतरां पम्फुल्यमाना इव प्रतिभाति नूनमसौ यथार्थतया आसीदैतिहासिकः कविः। न्याय्यं सत्यञ्च तत्त्वं निष्पक्षणततपा समुट्टङ्कयति। स्वाश्रयप्रदातू राज्ञो हर्षस्यात्याचारान् निरातङ्कमङ्कितवान्। कविना राज्ञो व्यक्तिगतं राजकीयञ्च जीवनं वैशद्यन चित्रितम्। सत्यपि ऐतिहासिके काव्येऽस्मिन् काव्यकलायाः परिपूर्णः पाकोऽपि दृष्टिगोचरो भवति।

अस्य काव्यशैल्यप्यवलोकनीया :-

**परामृशति सस्पृहं भुहुरपेलवं वीक्ष्यते महत्किमपि रत्नमित्यसमसन्मदं गूहते।**
**कुतोऽपि परिपेलवच्छव्मिवायप्य काचोपले वहत्यतिकदर्थतों बत वराककः पामरः।।**

**अस्याः सर्गविधौ प्रजापतिरहो चन्द्रो नं सभाव्यते,**
**नो देवः कुसुमायुधो न च मधुर्ददे विरञ्चि प्रभुः।।**
**एतन्मे मतमुत्थितं यममृतात्काचित्स्वयं सिन्धुना,**
**या मन्थाचललोडितेन हरये दत्त्वा श्रियं रक्षिता।।**

**यो यं जनापकरणाय सृजत्यपायं तेनैव तस्य नियमेन भवेद् विनाशः।**
**धूमं प्रसौति नयनान्धकरं यमग्निर्भूत्वाम्बुदः स शमयेत्सलिलैस्तमेव।।**

**मौर्ख्यं सर्वापदां निष्ठा का हि नापदजानतः।**
**तस्मिन्नप्यविषण्णो यः क्व सोऽन्यत्र विषत्स्यति।।**
**यदि नाम कुले जन्म तत्किर्थ दरिद्रता।**
**दरिद्रत्वेऽपि मूर्खत्वमहो दुःखपरम्परा।।**
**कः स्वभावगभीरणां जानीयाद् बहिरापदम्।**
**बालापत्येन भृत्येन यदि सा न प्रकाश्यते।।**

**सत्क्षेत्रप्रतिपादितः प्रियवचोबद्धालवालावलिः,**
**निर्दोषेण मनःप्रसादपयसा निष्पन्नसेकक्रियः।**
**दातुस्तत्तदभीप्सितं किल फलं कालेऽपि बालोप्यसौ,**
**राजन् ! दानमहीरुहो विजयते कल्पद्रुमादीनपि।।**

स्वतन्त्ररूपेण प्रत्येकसम्प्रदायस्य मतेन स्वहृदयोद्गारं कोमलललितपदावल्यां व्यक्तं कुर्वता स्वहृदयस्य दीनतायाः कोमलतायाः शक्तिहीनतायास्तथाराध्यस्योदारतायास्तच्छीक्तसामर्थ्यस्य च परिचयो दत्तः। एतेषु स्तोत्रेषु निम्नलिखितानि गीतितथ्यानि विहितानि सन्ति-

1. आत्माभिव्यक्तिः
2. भावसान्द्रता।
3. भावान्वितिः
4. सहजान्तःप्रेरणा।
5. सरला स्वाभाविकी चाभिव्यक्तिः।
6. समर्प्रणप्रवित्तिः।
7. गेयता।

आत्मानुभूतिर्यदा स्वाभाविकगतिमयस्वरलहर्या स्वहर्पविषादयोरभिव्यञ्चनार्थै प्रस्तुता भवति तथाराध्यात् सहाय्यमपेक्षते, तदा स्तुतिगीतीनां प्रादुर्भावो जायते। विषय-विषयिणोरुभयो, प्ररणाया अस्तित्वमेतच्छेण्याः रचनायां तिष्ठति। अतएव स्तोत्रकाव्ये भावनां सघनतमव्यापारो गेयतया लयात्मकतया च सहाभिव्यक्तो भवंति।

कविः स्तोता वा स्वरागात्मिकयानुभूत्या कल्पनया चाराध्यमपि भावात्मकं विदधाति। यथा सांसारिकवस्तूनि स्वयं साध्यानि न तस्ति, प्रत्युत साधनानि

सन्ति। तथैव स्तुतिकाव्येऽपि वस्तुविषयो वानुभूतेः साधमात्रं स्तः। यदा भावः विगलितो भूत्वाराध्यगुणान् स्पृशति, तदानुभूतिः सान्द्रा जायते। एतदेव कारणमस्ति यदनुभूत्यनुसारमेकमेवाराध्यं प्रति विभिन्नास्तोतृणां मानसिकप्रतिक्रियाः विभिन्नाप्रकारा भवन्ति। आराध्यस्नानन्तगुणाः स्तोतृन् भवविह्लान् कुर्वन्ति।

स्तुते स्तोत्रस्य वा विषयस्यात्यल्पत्वात अत्रभिव्यक्तनुभूतिरेकेनैव मूलभावेनानुप्रणिता भवति तथा तत्केन्द्रबिन्दुरपि एष एव मूलाभावो भवति, यस्य विश्लेषणं विस्तारं वा स्तोता स्तुतिकलेवरे करोति। आरम्भेऽसौ कमपि स्वविशेषभावमुपस्थापयति, तदनन्तरं रागविस्तारेण, स्वरेण, तानेन्, आलापेन तथान्यसाधनैः तं व्यापकोत्कर्षपर्यन्तं प्रापयति। आराध्यस्यानेकरूपेषु सत्स्वपि तन्मूलकेन्द्रं कोऽप्येको भावो भवति, यदा सुखदुःखानुभूतिः तीव्रतमा जायते तदा स्तोता स्वभावानुभूत्या ओतप्रोतत्वात् स्वतः पूर्णता गेयता च समाविष्टे भवतः। अतएव भावान्वितिः काव्ये स्वकीयं प्रमुखवैशिष्ट्यम् रक्षति।

काव्यस्य प्रत्येकविधायाः जन्मान्तः प्रेरणायाः समुपजायते। तत्र वस्तुनो विषयस्य वाधारस्तु नाममात्रस्य कृते तिष्ठति। कवितामात्रेऽन्तःप्रेरणा निहिता भवति, परं स्तुतिकाव्येऽस्या अस्तित्वं सर्वाधिकं विद्यमानं भवति। मानवमनसः सांसारिकैश्वर्ये, भौतिकसुखेषु, ऐन्द्रियिकभोगेषु चाकर्षणं तेभ्यो विकर्षण वा स्तोतृणां लक्ष्यमस्ति। यः स्तोताराध्यात्, किमपि प्राप्तुमिच्छति, स स्वसहजान्तः प्रेरणया प्रेरितो भूत्वाराध्यगुणेषु लीनो नवति। इयमेव लीनता वा सहजान्तःप्रेरणायाः प्रतिफलनमस्ति। चित्तस्य चञ्चलता तथानुभूतेः प्रकाढ़ता यद्यपि क्षणपर्यवसायिन्यौ भवेताम्, परं सहजान्तःप्रेरणायाः उच्छ्वसितरूपं गीतिकाव्येऽवश्यं प्राप्यते।

समर्पणप्रवृत्तिः स्तुतिकाव्येषु पूर्णरूपेण प्राप्यते। उपसायस्य लीला महात्तापि च उपसायसदृशे सुखदे जाते। लोककल्याणस्य वैयक्तिकसुखसमृद्धेश्च माध्यमेनादृश्यशक्तिं प्रति समर्पणभावनोत्पादिता। परमात्मनः स्वत्तायाः यानि विविधरूपाणि प्रादुर्भतानि, तेषामसीमसौन्दर्य-वैभवशक्त्योः कल्पना च स्तोतन् आत्मसमर्पणकृते प्रभावयतः। उपसाययाङ्गप्रत्यङ्गानां सौन्दर्यम्, व्यापारस्य, दृष्ट्यादेश्च मनोरमं वर्णनं विहितमस्ति। स्तोता स्वसपस्तचिन्ताभारं तददश्यशक्तौ

समर्प्य निश्चिन्तो जायते। स शान्तेः, सन्तोषस्य, आशायाश्चावलम्बेन जीवनस्यास्पृहणीय क्षणान्नपि स्पृहणीयान् विद्धाति।

गेयता कस्यपि गीतिकाव्यस्य धर्मोऽस्ति। स्तोता भावविह्वलो भूत्वा यमुच्छ्वासं व्यनक्ति, तस्मिन् सङ्गीतात्मकतावश्यं तिञ्चति। नादसौन्दर्यं भावसङ्गीतञ्च स्तुतिप्रवाहे स्वयमेव भवतः। यदा हृदयस्य भावावस्था सहजसंवेदनशीलतायाः रूपमवधार्योपास्योन्मुखमनुधावति, तदा स्तुतिकाव्ये गीतग्पधुर्य सहजमेवायाति। अन्तर्वेगस्य तीव्रता छन्दसः वातावरणं गेयतां प्रदत्ते। एतत् सार्वजनीनं तथ्यमस्ति यत् स्तुतिकाव्यम् छन्दोहीनं न भवति। छन्दसः सरलता स्वयमेव गेयरूपे परिवर्तिता भवति। डॉ॰ एस्. एन. गुप्त महोदयस्याभिमतमस्ति यत् संस्कृतकवितायाः गेयता परिचितकर्णयोरेतादृशं सम्मोहनं किरति, यत् समुचितपद्धत्या कृतः पाठ एव प्रभावानन्दयोः सर्जनं करोति।[1]

स्तोत्रकाव्यस्य स्वतन्त्ररूपेण प्रारम्भः पुष्पदन्तस्य शिवमहिम्नस्तोत्राद् भवति। एतत् 'शिखरिणी' छन्दसि रचितमस्ति। कविमयूरभट्टः 'स्त्रग्धरावृत्तेषु सृशितकं' प्रणीतवान्। एतस्मिन् सूर्यस्य प्रकाशातपादीनां सुन्दरं चित्रणं कृतमस्ति। अनुप्रासदृष्ट्या सूर्यरथस्य चित्रणं सुन्दरमभूत्। महाकविवाणभट्टनाम्नैकं चण्डीशतकप्युपलब्धमस्ति, यस्मिन् भगवत्याः दुर्गायाः स्तुतिः, स्त्रग्धरावृत्तेषु विहिता विद्यते। शङ्कराचार्यरचितानि प्रायः, विंशतिस्तोत्राणि प्राप्यन्ते। आनन्दलहरी, मोहमुद्गरः, आत्म बोधः, अपराधभञ्जनम्, यतिपञ्चकम् प्रसिद्धन्येव सन्ति। एषु सर्वेषु स्तोत्रेषु पदमाधुरी, रसात्मकता, अर्थगाम्भीर्यम्, सहजतागुणश्च विद्यन्ते। कुलशेखरस्य कुन्दमाला स्तोत्रम्, यमुनाचार्यस्यालबन्दारस्तोत्रम्, लीलाशुकस्य कृष्णकर्णमृतस्तोत्रमपि गेयानि सन्ति। एषु सर्वेषु स्तोत्रेषु गीतिकाव्यस्यं लक्षणानि समन्वितानि सन्ति। शाक्तस्तोत्र-वेष्णवस्तोत्रे अपि नाल्पमहत्त्वपूर्णे स्तः। एतेषु मृदुपदशय्यया सह मार्मिकता प्राप्यते।

जैनस्तोत्रेषु आचार्यसमन्तभद्रस्य बृहत्स्वयंभू-स्तोत्रमाप्तमीमांसा, जिनशतकम्, स्तुतिविद्या च प्रसिद्धानि सन्ति। पूज्यपाददेवनन्दिनः, सिद्धप्रियस्तोत्रम्,

---

[1] एस एन. दासगुप्त- सस्कृत साहित्य का इतिहास, भूमिका।

मानतु स्य भक्तामरस्तोत्रम्, कुमुदचन्द्रस्य कल्याणमन्दिरम्, धनञ्चयकवेः विषापहारस्तोत्रम् वादिराजस्यैकीभावस्तोत्रम्, बप्पभट्टेः सरस्वतीस्तोत्रम्, भूपालकवेः जिनचतुर्विशतिकास्तोत्रम्, हेमचन्द्रस्य वीतरागस्तोत्रम् आशाधारस्य सिद्धगुणस्त्रोत्रम् तथा जयानन्दस्य जयतोत्रं गीकाव्यदृष्ट्या महत्वपूर्णानि सन्ति। एतेषु सर्वेषु स्तोत्रेषु गीतिकाव्यस्य गुणाः प्राप्यन्ते।

## कालिदासस्य नाटके नायक-नायिका भेद विमर्शः

गीतिकाव्यस्य विकास-प्रसङ्गे प्रायः प्रमुखगीतिकाव्येषु प्रकाशी दत्तः। परमत्र-कला-भाव-दृष्ट्य। येषां गीतिकाव्यानां विशेषमूल्यमस्ति, तेषामनुशीलनभावश्यकमस्ति। सन्दर्भेऽस्मिन् प्रथमं मेघदूतस्य गीतिकाव्यत्व-विश्लेषणं क्रियते। दूतकाव्येऽस्मिन् प्राकृतिमाधुर्याः, रमणीसौन्दर्यस्य, श्रृङ्गारविलासस्य तथा विभिन्नप्रकाराणां संवेदनानां हृदयावर्जकं चित्रणं कृतमस्ति। अभिशप्तस्य, निर्वासितस्य तथा वियोगिनो यक्षस्य वेदनायाः यथार्थवर्णनं काव्येऽस्मिन् विद्यमानमस्ति।

### मेघदूत-विश्लेषणम्-आलोचनात्मक-विषय-परिचयः

एतत् संस्कृतगीतिकाव्यस्य परमाज्जवलं रत्नमस्ति। कविनैकस्य विरहिणो यक्षस्य मनोव्यथायाः मार्मिकं चित्रणं कृतम्। तस्य द्वौ भागौ स्तः (1) पूर्वमेघः (2) उत्तरमेघश्च। अलकापुर्या अधीश्वरेण कुबेरेण स्वसेवको चक्षः कर्तव्यपालने त्रुटि कारणदेकर्षस्य कृते निर्वासितः। वेदनाविह्वलो यक्षः सर्वर्त्तन् क्रमशः व्यतीतवान्, तदा वर्षगमनं जातं तथा रामगिरिश्रृंङ्गे आगत्यागत्य मेघा आश्लिष्टा अभवन्, तदा यक्षस्य धैर्यच्युतिः प्रारब्धा। स व्याकुलोऽभवत्। स स्वप्रियतमानिकटे सन्देशं प्रेषयितं विकलोऽभवत्। कामार्त्ततया चेतनाचेतनयाः स्वभावतो मूढ़ो यक्षः धूमज्योतिः सलिलमारुता सन्निपातरूपेण मेघेनालकास्थितायाः प्रियायाः समीपे प्रेमसन्देशं प्रेषयितुं नवीनकुटपुष्पैरर्ध्य प्रदाय तस्य स्वागतं व्याजहार तथा सन्देशं नेतुं प्रार्थितवान्। तदनन्तरं रामगिरितोऽलकापुरीपर्यन्तं गन्तुं तन्मार्ग आदर्श्य स्वप्रियाभवनस्यापि सङ्केतमुक्तवान्।

मेघस्य यात्रारम्भो रामगिरेः जायते। मार्गे विरहविधुराः पथिकवनिताः दृष्टिबाधकानुन्मुक्तालकान् निवार्य परमात्कण्ठया नेत्रे प्रसार्य पश्यन्ति। मेघो सर्वे पर्वतेषु विश्रान्तो निर्झराणां जलं पिबन्नाग्रे वर्धते। यक्ष-पथप्रदर्शनानुसारमुत्तरस्यां गत्वा वेतोवनान्युत्तोर्याकाशे व्रजति। सहसा दूरात् रविरश्मयः मेघोपरि पतन्ति। फलतः तत्कान्तिः सप्तरङ्गेन्द्रधनुः सदृशी जायते।

ततो मेघो 'भाल' नामकोच्चभूक्षेत्रान्निःसरति। क्षेत्रेऽस्मिन् मुग्धाः, अनुरागवत्यः, उन्तत्तयौवनाः, गोपबालाः लुब्धनयनाभ्यां तं पश्यन्ति चतुरो मेघः मालक्षेत्रस्य सद्यः कृष्टां भुवं जलवर्षणव्याजेन जिघ्रन् पश्चिमां दिश गत्वा पुनरुत्तरां दिशं गच्छति। ततो गत्वा दक्षिणाम्रकूटपर्वतस्य दावानलै स्वासारौः शान्तं कुर्वन् तच्छृङ्गे क्षणं विश्राम्यति। पक्वाम्रैरावृतपार्श्वदेशस्य पीतत्वान् तथाच्छन्नामेघेनोत्तुङ्गप्रदेशस्य कृष्णत्वात् आम्रकूटपर्वतः पृथिव्याः (नायिकायाः) स्तनवत् प्रतीयते। आम्रकूटस्य वनबालपरिभुक्ताकुञ्वे कञ्चित्कालमुषित्वाग्रे गच्छन् मेघः बिन्ध्याद्रेः आसन्नवर्त्तिनः 'चरणाद्रेः' प्रस्तरोपलमय्यां नतोन्नातभूमौ बहन्तीं नायकचरणयोः पतन्तीं नायिकारदृशीं रेवानदीं पश्यति। वायुनोड्डयनभीत्या मेघः रेवायाः स्वच्छसलिलं स्वच्छन्दं पीत्वा गुरुः भवन्नग्रे वर्धते। मार्गे मृगयूथः हरितश्यमकेसरयुक्तानां कदम्बपुष्पाणां स्ववकं तथा सुगन्धितरायाः, मादकसौरभं प्राप्यात्यन्तंप्रसन्नो भवति।

किञ्चिद्दूरं गतो वेत्रवत्याः तीर्विनो मालवादेशस्य पूर्वाशे स्थितं 'दशार्ण' प्राप्नोति। वेत्रवत्याः जलं पिबन् स तस्या एव विदिशायाः समीपे 'नीचैः' पर्वतोपरि विश्राम्यति। उत्तरदिशः एकान्तपथिको मेघः किञ्चत् वक्रो भूत्वा निर्विन्ध्यायाः पूर्वमनतिदूरे स्थितां, वत्राराजोदयनस्य विशालनगरीमुज्जयिनीं प्राप्नोति। अत्र स स्वविद्युतो दीप्त्या मदमत्ताः युवतीश्चकिताः, विधाय तासां चञ्चलकटाक्षाणामानन्दमनुभवन् शिप्रानदीराम्मुखं व्रजति। शिप्रायाः शीतल-मन्द-सुगन्धितवायोः सेवनं कृत्वा श्रीसम्पन्नायाः उज्जयिन्या अलकेषु व्यापृतागगरुधू पसुगन्धिं गृह्णन् चण्डीश्वरमहादेवस्य महाकालनामकं पवित्रस्थानं प्राप्नोति। रात्रौ महाकालेश्वरमन्दिरे सम्पद्यमानस्य नृत्यस्यानन्दमनुभवन् 'गम्भीरा'

तटे समुपस्थितो भवति। ततश्चलित्वा द्रुतगामी मेघदूतः दक्षिणपश्चिमकोणे स्थितं देवगिरिपर्वतं प्राप्नोति।

तदनन्तरं मेघः गोमेधयज्ञकर्तुः राज्ञो रन्तिदेवस्य कीर्तिरूपां विन्ध्याचलस्य वायुकोणात् निःसृतां चर्मण्वतीं नदीं प्राप्नोति। वत्र तां नदीमुत्तीर्य स राज्ञो रन्तिदेवस्य राधनिका दशपुरं प्राप्तो भवति। पश्चात् सरस्वत्या शुद्धं सलिलं पिबन्, कुरुक्षेत्रात्, कनखलनिकटे गङ्गासमीपं गच्छति तथा निर्मलस्फटिकसदृशं स्वच्छं गङ्गाजलं पिवति। हिमालयपर्वते देवदारुवनेषु चमर्याः यूथेनाष्टापदमृगसमूहेन च संघर्ष कुर्वन् स मेघदूतः शिल तस्य महादेवचरणचिह्नस्य परिक्रमणं कुर्वन् हिमालयस्य दर्शनीयवस्तूनि पश्यन् ततोऽग्रे वर्धते।

ततो मेघदूतो मानससरोवरस्य यात्रिभिः हंसैः सह क्रौञ्चरन्ध्रमुत्ताभिमुखो भवति। ततो निःसृत्य मेघः सुरसुन्दरीणां मुकुरसदृशसमुज्जवलस्य नभोव्यापिनः कुमुदश्वेत-श्रृङ्गैरुत्तुङ्गस्य शिवाट्टाहससदृश्य स्थितस्य कैलासपर्वतस्यातिथिर्जायते। तदनन्तरं कामचारी मेघदूतः कैलासाङ्के समुपविष्टां स्त्रस्तश्वेताञ्चलनायिकासदृशीं गगनचुम्बिभवनवतीमलकापुरीं प्राप्नोति। एवं प्रकारेण सम्पूर्णमेघदूते दक्षिणोत्तरभारतस्य भूगोलस्य सुन्दरं चित्रणमस्ति।

उत्तरमेघे कथितमस्ति यत् स मेघदूतोऽलकाभवनषु सङ्गीतं प्रणयकेल्याः दृश्यानि निःश मवलोकयति। मणिदीपोज्जवले र भवने कामुकनायकः हृदयहारिण्याः नायिकायाः कटिसूत्रबन्धनं मोचयति। तदा सा तान् मणिपान् कुङ्कुमचूर्णपातैर्निर्वातुमिच्छति। प्रसन्नवदनो मेघांऽलङ्कापुर्याः रमणीयदृश्यानि पश्यन्निद्रनीलगणिनिर्मितशिखरप्रयुक्तक्रीड़ापर्वतोपरि व्रजति। तत्रासो यक्षगृहाभ्यत्तरे वियोगिनी यक्षिणी दृष्टिगोचरा भवति। यद्यपि मध्याया नायिकायाः सुवत्याः यक्षिण्याः काञ्चनकायः क्षीणः कृशश्चासीत्, तथापि तस्या अधरोष्ठः पक्वबिम्बफलसदृशः सुलोहितः, सूक्ष्माग्रा परस्परं सम्मिलिता च दन्तपङ्क्तिः आसीत्। एवं सा नितम्बभारेण मन्थरगतिशालिन्यासीत्। मेघदूतः गम्भीरस्वरेण तां कथयितुमारभते-

'हे अविवधे! अहं तव स्वामिनो मेघस्य प्रियमित्रमस्मि। दूतरूपेण संवादं गृहीत्वाहं तव समीपे उपस्थितोऽस्मि। स्वप्रियमानां वेणीमोचननिमित्तमुत्कण्ठितान् कामार्तान् प्रवासिनोऽहमेव गम्भीर-मधुरशब्दैः शीघ्रतिशीघ्रं गृहाभिमुखं प्रयामि।

मेघदूतः सन्देशश्रावणमारभते। संदेशेऽस्मिन् यक्षिण्याः रूपसौन्दर्येण सह यक्षदशाया अपि वर्णनमस्ति। उत्तरमेघः विप्रलम्भश्रृंङ्गारस्य सजीवरूपमस्ति। कविः विराट्प्राकृतिकपदार्थान् मानवरूपान् कल्पयित्वा मानवीयभावानां पूर्णसमावेशं कृतवान्। एतत् रमणीयसुकुमारकल्पनायाः भव्यभाण्डारमस्ति। भाषाशैली परममनोहारिण्यस्ति। शब्दानां चयने कविः विशेषकौशलं प्रदर्शिवान्। माधुर्यवयञ्चिका स्निग्धा मधुरा च पदावली द्रष्टव्यास्ति-

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां**
**वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**

**गर्भाधान क्षणपरिचयान्नूनमाबद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः।**[1]

**काव्यमूल्यम्**

मेघदूते महाकविः कालिदासः बाह्यप्रकृतेरन्तः प्रकृतेश्च परममार्मिकं चित्रणं, चकार। बाह्यप्रकृतिचित्रणे कवरेन्तरात्मा प्रत्येकदृश्येन सहारमत। दृश्यानाभीदृशं व्यवस्थितं संश्लिष्टञ्च चित्रणं कृतमस्ति, यत् अस्माकं नेत्रयोः समक्षं तेषां चित्रमुपस्थितं जायते। समस्तपूर्वमेघः ब्राह्यप्रकृतेः मनोहररूपयोजनात्मकं चित्रणमस्ति। वर्षर्तोः यादृशं स्निग्धं हृदयग्राहि च वर्णनं मेघदूते विहितमस्ति, तादृशमन्यत्र दुर्लभमस्ति। प्रथमवृष्टिकारणात् नवीकृष्टिक्षेत्रेभ्यः सुगन्ध आगच्छन्नस्ति, क्वचित् विकसितकेतकीपरागेनोपवपरिसरः धवलो भवन्नस्ति। क्वचित् मत्तमयूराः नृत्यन्तः सन्ति। क्वचित् गजेन्द्राः करैः ध्वनन्तः मन्दसमीरं

---

[1] पूर्वमेघ 9

पिबन्ति। निश्चयतो मेघदूतस्य प्रकृतिवर्णने एतादृशनि दृश्यानि सन्ति, येषु चित्राण्यङ्कितानि संपत्स्यन्ते।

कालिदासाय प्रकृतिः केवलं सचेतनैव नास्ति, प्रत्युत मानवीयसंवेदनशीलतया, क्रियाव्यापरैः शीलसौन्दर्येण च सम्पन्ना विद्यते। कविकृते ऋतवः सजीवाः प्राणिभ्यः, प्रेम्णा, मित्रतया, सहानुभूत्या च समन्विताः सन्ति। मेघदूते प्रकृतेः प्रत्येकतृणे सर्वत्रान्तरिकस्य बाह्यस्य च सौन्दर्यस्य निरूपणं विद्यते।

उत्तरमेघे विरहिएण्याः शारीरिक-मानसिकक्षीणतायाः, व्यथायाश्च चित्रं प्रस्तुतमस्ति। अन्ते चातिसंक्षेपेण यक्षस्य मर्मस्पर्शिणः सन्देशस्य तीव्रा गम्भीरा चाभिव्यक्तिः कृता विद्यते। अत्रैव काव्यस्य चरमोत्कर्षो विद्यते। एवं प्रतीयते यत् एष सन्देश एव कवेः साध्योऽस्ति तथा क्रमशः भावसघनतोन्मुखमग्रसरं भवत् प्रारम्भिकं समस्तमायोजनं तस्य भावपूर्णपृष्ठभूमिनिर्माण-निमित्तं साधनमस्ति।

मानवीयसौन्दर्यनिरूपणमपि मेघदूते जातमस्ति। कविः 'रमणीयताम्' सौन्दर्यस्य मूलभूतं धर्मं स्वीकृतवान्। कालिदासः नारीसौन्दर्येऽनुपातस्य सन्तुलनस्य च ध्यानं रक्षितवान्। तस्य सर्वेषां नारीपात्राणां शारीरिकं संघटनं सन्तुलितं सामञ्चस्यपूर्णञ्च विद्यते। सौन्दर्यनिरूपणे कविरद्भुतां सफलतां प्राप्तवान्। तस्य दृष्टिः प्रकृतौ, मानवे, दिव्यलोके च सर्वत्रैकामेव सौन्दर्यधारां व्याप्तां पश्यति। निरीक्षणसूक्ष्यमतायाः, दृष्टेः व्यापकतायाः, प्रतिभाया अद्भुतग्राहकताया एवमुर्वरसर्जनशीलतायाः कारणात् मेघदूते कलाया अद्वितीयां सौन्दर्यं प्राप्यते।

रसानुभूतिदृष्ट्यापि मेघदूते द्राक्षापाको विद्यमानोऽस्ति। यतः रसानुभूतेः मृदुलमञ्जुलामधुर-मादकभावाकुला शाब्दिक लिपिमयी अभिव्यञ्जनैव कलामयं काव्यं विद्यते। रस एको योजनाजनित आनन्दोऽस्ति। सुकुमारभावानां चमत्कारपूर्ण शब्दचित्राणां साम्यरूपता काव्यरस्य साकारा प्रतिमास्ति। मेघदूते विप्रलम्भश्रृंङ्गारस्य सजीवरूपं प्राप्यते। प्रवासिनो यक्षस्य वियोगजन्यस्य क्षीणपीतशरीरस्यैकं करुणचित्रं द्रष्टव्यमस्ति-

**तस्मिन्नद्रौ कतिचिदबलविप्रयुक्तः स कामी**
**नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।।**[1]

विरहज्वरसंतप्तस्य विरहिणः शरीरस्य द्रवकच्छायायाः अङ्कनं निम्नाङ्कितमस्ति-

**सन्तापतानां त्वमसि शरणं तत्पयोद प्रियायाः ।**[2]

निःसन्देहं मेघदूते कियन्ति स्थलानीदृशानि सन्ति, येषां श्रवणेन स्मरणमात्रेण चास्माकं हृदयं विगलितं जायते। मानसे चञ्चलता जायते। व्यथितानुभूतेः, भ्रमन्त्याः भावानायाः तथोच्छलन्त्याः प्राणधारायाः सौन्दर्योन्मुखं यथासाध्यं संकेतो विहितो विद्यते। रसभावदृष्ट्या मेघदूतस्य कतिपयानि पद्यान्युत्तमानि सन्ति। अत्रोदाहरणार्थं प्रस्तूयते-

**अङ्केनाङ्गं प्रतनुतनुना गाढतप्तेन तप्तं**
**सास्त्रेणाश्रु द्रुतमविरतोत्कण्ठयोत्कण्ठितेन ।**
**उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती,**
**संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ।**[3]

दूरंगतः त्वदीयोऽयं सहचरः स्वशरीरं तव शरीरेण मैलयित्यैकं कर्त्तुमिच्छति, किन्तु मैरी विधाया तत्परावर्त्तनमार्गमवरुद्धवान्। अतएव सः तैः तैः सङ्कल्पैरेव तवान्तः प्रविशति। सः क्षीणोऽस्ति, त्वमपि क्षीणोऽसि। सविरजज्वालया तप्तोऽस्ति। त्वमपि विरहेण ज्वलन्त्यसि। सोऽश्रुपूर्णोऽस्त, त्वमप्यश्रुभिः गलन्यसि। स वेदनया युक्तोऽस्ति। त्वमपि निरन्तरं वेदनां सहमानासि। स लम्बोच्छ्वासं गह्वन्नस्ति। त्वमपि तीव्रोच्छवासं त्यजन्त्यसि।

---

[1] पूर्वमेघ 2।
[2] पूर्वमेघ 7।
[3] उत्तरमेघ, 39।

पद्येऽस्मिन् पदमाधुर्या सह सानुनासिकाः स्वरविशेषाः कर्णप्रियाः प्रतीयन्ते। पदावृत्तिसौन्दर्यमपि मनो मोहयति। भावगूढ़ता तथा नादमाधुर्य्यमस्मकं मनो मन्त्रमुग्धं कुरुतः। भावतीव्रता स्वविलक्षणसौन्दर्य प्रकटयति। यक्षस्य दाम्पत्यसुखाय विधातेष्यति। यक्षः स्वच्छन्दः कम्प्यबाधयन् सुखेन सुधापानं कुर्वन्नासीत्। परं दैवायैतदसह्यं जातम्। तथा शापग्रस्तो भूत्वा स स्वप्रियतमायाः पृथक् बभूव। सक्षहृदयं सिक्थतुयमस्ति। स विरहाग्निना प्रतिपलं गलन्नस्ति। परवशता, नैराश्यम्, तथा विवशता प्रकटाः भवन्ति। दूरवर्ती प्रियतमः स्वप्रेमिकया सह मिलेत् तु कथम्? शरीरिकमिलनन्तु कठिनमस्ति, अतः मनसिकमिलनं सम्भवं भवति। सम्मिलने एकरूपता, तद्रूपता चोपेक्ष्येते। यथा वीणायाः झंकृतः एकः तारः समानधर्मत्वान् द्वितीयं तारं तथैव प्रिय-प्रेयस्योः मिलनवेलायामेका रागिणी क्वणति। पथक्तागच्छति तथोभायोरैक्यं जायते। तौ शरीरेण द्वौ भवतः, परंतयोः विरहानल एको भवति। यक्षः यक्षिणी च विरहज्वालया सदृशौ क्षीणौ स्तः। द्वयो नेत्रयोरश्रुप्रवाहो निःसृतोऽस्ति। उभावपि दीर्घोच्छ्वासं गृह्णीतः। आश्रययोः द्वयोरपि एकः स्थायिभावः समानमनुभवमुत्पादयति। देह द्वैतं भावयोगेन प्रेम्णोऽद्वैते रूपान्तरितमभवत्। यथा-

**श्यामास्वङ्गं चकितहरिणीप्रेक्षपे दृष्टिपातं**
**वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।**
**उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्**
**हन्तैकस्मिन् क्वचिदपि नते चण्डि सादृश्यमस्ति।।**[1]

हे प्रिये! प्रियङ्गुलतायां तव शरीरं चकितमृगीणां नेत्रयोः कटाक्षं चन्द्रमसि मुखकान्तिं मयूरपङ्खेषु केषं तथा नद्याः उद्दामलहरीषु चञ्चलभ्रवौ पश्यासि। परं हे मानवंति। क्वंापि त्वदृशीं छविमेत्र नप प्राप्नोमि।

पद्येऽस्मिन् "क्वचिदपि न ते चण्डि सादृश्यमस्ति" पदे यक्षहृदयस्य हाहाकारस्य कल्पनायां विह्वलवेदनायाः मनोरगं चित्रणमस्ति। भवभूतिः यत्र वेदनाविवृतौ मुखरतयातिशयतया वा कार्य साधितवान्, तत्र तदावेगः विकीर्णो जातः। यतः करुणायाः तरलता स्पप्रगाढत्वे शोभामाप्नोति। काव्ये वेदनायाः

[1] उत्तरमेघ, 41।

वर्षाकालीना नदी न प्रवहेत्, अपितु मन्दमन्दवेगेन रसविगलिता भवेत्, तदा सुन्दरमस्ति। जीवने कश्चनैव क्षणएतादृशआयाति, यदा वेदना बन्धं त्रोटयित्वा प्रवहति। अन्यसमयेषु तु वेदनया भावाः विगलिता एव भवन्ति। हृदयमार्द्र भवन्ति। पद्ये प्रयुक्ते 'हन्त' शब्दे, यक्षस्य परवशता, विह्वलता, वैक्लव्यञ्च दृश्यते। सम्पूर्णप्रकृतेः समवेतं सौन्दर्यमपि तस्य प्रेयस्याः समकक्षं न स्थितम्। प्रेमी भावावेशे स्वप्रियवस्तु, साधारणे जातेऽसाधारणं कृत्वा पश्यति। कल्पनया स तस्मा अतिरञ्चितं रूपं यच्छिति। सौन्दर्यतर्केण न, अपितु कल्पनयानुभूयते। तत् मानसरसेन रज्यते।

यथार्थजीवनस्य न्यूनतयाः व्यक्तिः कल्पनाङ्गैः पूरयति। कालिदासः मेघदूते विरहव्यञ्जनां कुशलतापूर्वकं कृतवान्। वियोगश्रृङ्गारेण सह संयोगचित्राणमङ्कनमपि सफलतापूर्वकं कृतमस्ति। एषु चित्रेषु यौवनमदिरायाः सहजावेगः परिलक्ष्यतं यथा-

**नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बोधराणां**
**क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु**
**अर्चिस्तुङ्गाभितकरेष्वाक्षिपस्तु प्रियेषु।**
**ह्रीमूढ़नां भवति विफलप्रेरणा चूर्णमुष्टिः।**[1]

तत्रालकायां कामी प्रियतमः स्वचञ्चलकरैः रक्तधराणां स्त्रीणां शिथिलेषु नीवीबन्धनेषु स्त्रस्तानि दुकुलानि यदा कर्षति, तदा ह्रीमूढ़ास्ताः किरणान् विकिरतो रत्नदीपान् सम्मुखस्थानपि कुङ्कुमामुष्टिकया निर्वापयितुं सफला न भवन्ति।

पद्येऽस्मिन् नीवीबन्धनस्य साधारणवर्णने। नागमिष्यत्, परमत्र कवेरनुभूतिः व्यक्ता। अतो रमण्याः श्रृंङ्गारचेष्टा मूत्तरूपेण चित्रिताऽभवत्। शिथिला केवलं नावी विद्यते, न छविः, विम्बाधरायाः प्रेयस्याः नीवीबन्धनं स्त्रस्तं जायते। प्रियतम्बकरश्चञ्चलो भवति। दूकूलं कृष्यते, रत्नप्रदीपः दीव्यति। प्रयरयनावरणश

[1] उत्तरमेघ 5।

या लज्जावशा पीड्यते। सा कुङ्कुमचूर्णैः रत्नीदीपानां निर्वाण प्रयासं विदधाति। परं सर्व व्यर्थं भवति। एवं प्रकारेण श्रृंङ्गाररसस्य सरसं चित्रणमायातमस्ति।

मेघदूतेऽलङ्काराणां यथास्थानमुपयुक्तप्रयोगः नैसर्गिकी चारुतां सञ्चारयति। उपमानामुत्प्रेक्षणाञ्च परममनोहरः प्रयोगे भूतोऽस्ति। कालिदासीयोपमाना सम्बन्धे तु किमपि कथनीयमेव नास्ति। प्राकृतिकदृश्यानां मानवीयसौन्दर्येण सुरुचिपूर्ण सामञ्चस्य स्थापित विद्यते। अत्र कतिपयान्युदाहरणानि प्रस्तूयन्त-

पुनरुक्तवदाभासस्य चित्रं दृश्यताम्-

**उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनामे,**

**सद्यः कृत्तद्विरददर्शनच्छेदगौरस्य तस्य।।**[1]

रददशनस्य पर्यायतया अपातत एकस्यैव दन्तार्थस्य पुनरुक्तवदाभासतया पुनरुक्तवदाभासालङ्कारस्य चमत्कारो विद्यते। लाटानुप्रासः-

**संक्षिप्त्येत क्षण इव कथं दीर्घयामा त्रियामा**

**सर्वावस्थास्वहरति कथ मन्दयन्दातप स्यात्।**[2]

'दीर्घयामा त्रियामा' वाक्यांशे 'याम' पदे सम्बन्धतात्पर्यभेदेन लाटानुप्रासोऽस्ति। यमकः-

**पृच्छन्ती वा मधुरवचनां सारिका पञ्चरस्थां**

**कच्चिद्भर्तुः स्मरसि रसिके त्व हि तस्य प्रियोति।।**[3]

'स्मरसि रसिके' वाक्यांशे 'रसि-रसि' द्वयोः भिन्नार्थकसमानपदयोः प्रयोगः 'यमकं सुस्पष्टं समुद्भासितं करोति।

---

[1] पूर्वमेघ 53।

[2] उत्तरमेघ 45

[3] उत्तरमेघ 22

शब्दालङ्कारैः मेघदूतच्छन्दसां शाब्दिकी शोभा सरसा भव्या च विहिता। आर्थ्युपमा-

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै**

**स्त्वय्याढे शिखरमचलः स्निग्धवेणीसवर्णे।**[1]

'स्निग्धवेणी सवर्णे' वाक्यांशेऽर्थोपमार्थचमत्कारमुत्पाद्य भावाननुभवगम्यान् चकार। समासोक्तिः-

**वेणीभूतप्रतनुसलिला सावतीतस्य सिन्धुः,**

**पाण्डुच्छायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।**

**सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती,**

**कार्श्यं मेने त्यजति विधिना स त्वयेवोपपाद्यः।**[2]

रूपकम्-

**यस्यां यक्षाः सितमविमयान्येत्य हर्म्यस्थलानि,**

**ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः।**[3]

'ज्योतिश्छायाकुसुम' वाक्यांशे रूपकयोजना वर्तते। तुल्ययोगितायाः पर्यायोक्तस्य च रमणीयता-

**हस्ते लीलाकमलमलके बालकुन्दानुविद्धम्,**

**नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।**

**चूडापाशे नवकुरवकं चारु कर्णे शिरीषम्,**

**सीमान्ते च त्वदुपगमजं यत्र नीपं वधूनाम्।**[4]

प्रस्तुतपद्ये 'अस्ति' क्रियापदस्याध्याहारो विद्यते अनयैकया क्रियया सह लीलाकमलादेः कर्त्तातायाः सम्बन्धोऽस्ति। अतस्तुल्ययोगितास्ति। सहैव

[1] पूर्वमेघ 18
[2] पूर्वमेघ 29
[3] उत्तरमेघ 3
[4] उत्तरमेघ 2

कार्यभूतषट्पुष्पाणांवर्णनेन कारणीभूतानुक्तषड्ऋतूनां स्थिति: प्रतीयते। अतएव पर्यायोक्तलङ्कारोऽस्ति।

स्मरणोदात्तालङ्कारयो: संयुक्तरूपम्-

**तस्यास्तीरे रचितशिखर: पेशलैरिन्द्रनीलै:,**
**क्रीडाशैल: कनककदलीवेष्टनप्रेक्षणीय:।**
**मद्गोहिन्या: प्रिय इति सखे चेतस: कातरेण,**
**प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि।**[1]

क्रीडशैलस्मरणेन स्मरणालङ्कारस्तथा लोकातिशयसम्पत्त: वर्णनेनोदस्तालङ्कारोऽप्यस्ति।

अतिशयोक्ति:-

**तां जानीथा: परिमितिकथां जीवितं में द्वितीयम्,**
**दुरोभूते मयि सहचरे चकवाकीमिवैकाम्।**[2]

जायाजीवनयो: सत्यपि भेदे उभयोरभेदव्यवस्थारोपितास्ति। अतएवास्यामतिशयोक्त्यां विरहपीडितयक्षस्य भावना मार्मिकी जाता।

काव्यलिङ्गार्थान्तरन्यासस्य संयोग:-

**त्वालिख्य प्रणयमुपितां धातुरागै: शिलायाम्,**
**आत्मानं ते चरणपतितं यावदिच्छामि कुर्त्तुम्।**
**अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे,**
**कूरस्तस्मिन्नपि न सहते स मं नौ कृतान्त:।**[3]

अत्र दृष्टिलोपरूपकार्यस्यासहनीयतारूपकारणेन समर्थनत्वात् 'अर्यान्तरन्यास:' तथाऽसहनीयतां प्रति कूरपदार्थस्य हेतुता 'काव्यलिङ्गालङ्कार:' स्त:।

---

[1] उत्तरमेघ 14
[2] पूर्वमेघ 20
[3] उत्तरमेघ 42

## गीतिकाव्ये नायक-नायिका भेद विमर्शः

महाकविकालिदासविरचितोऽयं मेघदूतकाव्यं गीतिकाव्यस्य उदाहरणम्। 'मेघदूते रसालङ्कारगणानां सुन्दरः समावेशः कृतो विद्यते', मेघदूतस्य शैली कालिदासस्य स्वाभाविकतायाः प्रासादिकतायाश्चोत्कृष्टमुदाहरणमस्तिः गीतिकाव्येऽस्मिन् रमणीयता, स्वरसैष्ठवं माधुर्यविलासः तथा सङ्गीतलहरी दर्शनीयाः सन्ति।

मेघदूतं खण्डकाव्यं नास्ति, प्रत्युत गीतिकाव्यमस्ति। गणनाऽस्य प्रबन्धगीतिकाव्ये, कृताऽस्ति। अस्मिन् विरहाश्रूणां पावनी गङ्गा प्रवाहिता विद्यते। अश्रुभिः जीवने मधुरतानीता। अश्रुषु शक्तिरेतादृश्यस्ति, यत् तेभ्यो ममतायाः, वात्सल्यस्य, निश्छलप्रम्णश्च प्रम्णो मन्दाकिनी-प्रवाहे पूर्णा सहायता प्राप्यते। अश्रुबाहुल्यकारणात् गीतितत्त्वानां पूर्णः समावेशोऽस्ति। यद्यपि यावत् गेयस्वरं रनरति, तावत् पुनस्तारा आर्द्राः भवन्ति। यथा-

**तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्,**
**भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती।**[1]

वस्तुतो लोकप्रचलितमुक्तसङ्गीतस्य काव्यात्मकरूपस्य विकासः एव गीतिकाव्यधारो विद्यते, यस्मिन् हर्ष-विषादयोरश्रुरोदनस्याभिव्यक्तेरावेशो तत्ति। मेघदूते संगीततत्त्वस्थाने गीतितत्त्वं प्राप्यते। एतत्तत्त्वद्वारेणैव रागात्मकावेशभावसौन्दर्ययोरुद्घाटनं जातम्। गीतिकाव्ये सहजसरसतायास्तल्लीनता तिष्ठति।

संगीतानुबन्धे समागमनेन मेघदूते मार्मिकतायाः निश्छल-स्नेह-पिच्छलतायाश्च प्रवाहः समहितोऽस्ति। मेघदूतपद्येषु सरसार्द्रान्तरात्मनः प्रेमपीडा, भावोन्मादः मिलनातुरता, आत्मसमर्पणम्, आत्मविस्मृतिः विद्यमानाः सन्ति। प्रियतमायमनविश्वासेनाश्वस्ताः पथिकवनिताः वायौ तरतो मेघखण्डान् पश्यन्त्यः सन्ति। सन्दर्भेऽस्मिन् गीतिकाव्यस्य मार्मिकता स्पष्टास्ति-

---

[1] उत्तरमेघ 23।

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पाथिकवनिताः प्रत्ययादाश्वसन्त्यः ।[2]

पीडायाः सहानुभूतेरेतादृशा एव क्षणाः गीतप्राणाः सन्ति। अस्मिन् संयोगवियोगयोः मार्मिकतापूर्ण स्वाभाविकं चित्रणमस्ति। मेघदूते विरहावस्थायाः स्वाभाविकं चित्राङ्कनं जातमस्ति।

वैयक्तिकहर्षशोकयोरभिव्यच्चनायां सत्यपि कथांशे गीतितत्त्वं प्राप्यते। सङ्गीतात्मकतायाः सौन्दकल्पनायाः प्रथमवर्णनस्यार्थमाधुर्यदिश्चगीतिकाव्यस्य प्रधानतत्त्वानां समवायः मेघदूते प्राप्यते। अत्रोक्ततथ्यपुष्टिहेतवे कतिपयान्युदाहरणानि प्रस्तूयन्ते-

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोः,
लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थली देवतानाम्,
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ।[3]

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्,
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ।[4]

वीचिक्षभस्तनितविहगश्रेणिकाञ्चीगुणायाः,
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः।

[2] पूर्वमेघ 8।
[3] उत्तरमेघ 3।
[4] उत्तरमेघ 23।

**निर्विन्ध्यायाः पथि भवरसाभ्यन्तरः सन्निपत्य,**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।**[5]

उल्लिखितपद्येषु विषादस्म गम्भीराभिव्यञ्चना 'मन्दाक्रान्ता' संयोगेन गेयतां प्राप्तवती विद्यते। वेदनवीणायाः मूकताराणां मधुरझङ्कारः आत्मानुभूतेरभिव्यक्तौ मिलित्वा तीव्रतमो जातः। अन्तिमपद्यस्य प्रकृतिचित्रणं भावनाः मञ्चुलाः रसात्मिकाश्च सम्पादयति।

वियोगी यक्षः स्वप्ने स्वप्रियतमायाः निर्दयालिङ्गना शून्ये स्वकरौ विस्तारयति तथा वेदनाभिभूतो भवति। तस्यैतां विरहदशां वीक्ष्य वनदेवताः रूदन्ति। मिलनविरहयोः, हर्षशोकयोः, आन्नद-विषदायोरेतत्समन्वयात्मकं चित्रं महत्या भावुकतया सरसङ्गीतात्मकतया, तद्गेयतया च समुपस्थापितमस्ति।

मेघदूतस्य प्रत्येकपद्ये काव्यत्वसङ्गीतयोरेकस्तरो विद्यते। सर्वत्र सङ्गीतात्मकाराधारेऽन्तर्दर्शनम्, आत्मनिष्ठता, आत्मानुभूतिः, आत्माभिव्यञ्चना भावानुकूलता च विद्यमानाः सन्ति। वियोगश्रृङ्गारपुष्टिकृते मन्दाक्रान्ताछन्दोग्रहणं कवेः सङ्गीतात्नकतायाः सूचकमस्ति। अतएव कविकालिदासः सङ्गीततत्त्वैः सुपरिचितोऽस्ति।

सजीवभाषया वैयक्तिकान्तर्भवानां शक्तिमदभिव्यञ्जना सङ्गीतात्मकतायाः आग्रहेण सह सम्पन्न विद्यते। गीतिकाव्ये सङ्गीतस्य बाह्यारोपो न भवति। तस्यान्तर्निहितः प्रभावस्तिष्ठति। अतएव मेघदूतपद्येषु सक्षेप्तः मनसि एठनकालेऽपि सङ्गीतात्मकताया आवेशस्तिष्ठति। अस्यान्तर्निहितस तस्य समन्वितानुभूतिः मेघदूतेऽस्ति। सङ्गीतत्त्वस्यान्तःस्थित्या लयात्मिकानुभूतिः, समाहिताप्रभावः, तथा भावनाप्रकारस्याद्भुतोपत्तता समागता विद्यते। अतएव कालिदासस्य मेघदूतं गीतिकाव्यस्याधिकमीपेऽस्ति।

---
[5] पूर्वमेघ 28।

मेघदूते आत्माभिव्यञ्जनदृष्ट्या कलाकार: आत्मन: वासनाया:, आशाभिलाषयोरभिव्यक्त्या सह वैयक्तिकास्तित्वं प्रच्छन्नां रक्षितुं यतते। आत्मन: प्रछन्नातायामाम्माभिव्यञ्चनमधिकाधिकं · सफलं जायते। मेघदूते गीतिकाव्यस्याधारनिष्ठता प्राप्यते। कवि:वैयक्तिकभावस्य चेतनायाश्च विश्वजनीनकल्पनायै भवात्मकमादर्शरूपञ्च प्रदत्तवान्। वैदिककालादेव गीतेषु वैयक्तिकभावनाया विकासलक्षणनि प्राप्यन्ते। काव्येऽस्मिन् सगुणश्रृंङ्गारस्योन्नायनं मानवीयसौन्दर्येण सह कृतमस्ति। मानवीयवत्ते: प्रतीकरूपेण यक्षस्य यक्षिण्याश्च चित्रणं कृतं विद्यते। वियोगसन्दर्भेऽर्तवृत्तीनां प्रकाशनं तीव्रतया, गम्भीरतया, मार्मिकतया, विदग्धतया च सह जातमस्ति।

कलाकारनसि पतनशीलकल्पनागतप्रभावस्य सौन्दर्ययुक्तं कलापूर्णञ्च चित्रणं मेघदूते विद्यते। वियोगाशयोश्चैका मधुरा गीतिर्द्रष्टव्यास्ति-

**तां चावश्यं दिवसगणनातत्परामेकपत्नी-**
**मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायम्।**
**आशाबन्ध: कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्य:पाति प्रणयिहृदयं विप्रयोगे रूणद्धि।**[6]

विरहदिनगणनायां संलग्ना स्वप्रियस्य प्रतीक्षां कुर्वती पुष्पवत् कोमलाया: यक्षिण्या: प्रणयाप्लुतं हृदयमाशया बद्धमस्ति। अतएव तत् अकस्मात् त्रुटित्वा विकीर्ण न जायते।

नि:सन्देहंमुर्युक्तपद्ये चित्र-सङ्गीतयो: समन्वितरूपत्वाद् गीतिकाव्यात्मकता प्राप्यास्ति। मेघदूतस्याधार: शब्द:, अर्थ:, चेतना तथा रसात्मकता विद्यन्ते। शब्दा एकत्र, यत्र पाठकानर्थभावभूमौ नयन्ति, तत्रान्यत्र नादेन श्रव्यमूर्त्तिविधानं कुर्वन्ति। मेघदूतशब्दानां महत्त्वं तद्द्वारेण प्रस्तुते मानसिकचित्रे ज्ञापितवस्तुन: सामञ्जस्ये चास्ति।

---

6 पूर्वमेघ 10।

गीतिकाव्ये पदे पदे स्वकीयं नादसौन्दर्य भवति, यत्सङ्गीतबन्धनान्मुक्तं सहजञ्च विद्यते। परं यदा शब्दोऽन्यान्यशब्दमेले समायति, तदासयै समन्वितरूपेण सङ्गीतस्य रूपं ग्रहणाति। महाकविकालिदासः शब्दानां पारस्परिकसङ्घटनेन मेलेन च चामात्कारिकं काव्यविधानं कृतवान् यस्मिन् सङ्गीततत्त्वस्यान्तः स्थित्या लयात्मिकानुभूतेः, समाहितप्रभावस्य भावना प्रसारस्य चाद्भुतोयुक्त समागता विद्यते।

मेघदूतस्य सङ्गीतात्सकता भावनुवर्तिनी विद्यते। शब्देशक्तेः परिचितः कविः गीतानां छान्दसतया सहैव शब्दझंकारध्वनितरागत्मिकाभिव्यक्तिकृतेऽधिकः प्रयत्नशीलो विद्यते।

गीतिकाव्ये कविव्यक्तित्वस्य नीरक्षीरसंयोगस्तिष्ठति। प्रत्यक्षजगति, चेतनकार्येषु च कविव्यक्तित्वस्य मूलोत्सः तदीयं मनोद्वन्द्वमस्ति। यच्चेतनाचेतनयोः निरन्तरं गतिशीलं तिष्ठति। मेघदूते कविरेतस्य द्वन्द्वस्य विश्लेषणं न कृत्वा तस्य सन्तुलितं चित्रमुपस्थिपितवान्। अतएव मेघदूतस्य गीतयः अन्तर्ज्वलिन परिपक्वप्राणानां स्वरगुञ्चनं सन्ति। यतो गीतिकाव्यस्योऽव एवान्तर्ज्वालाद् भवति। काव्येऽस्मिन् गीतेष्वाकुलप्राणानां बना-व्याकुलता स्पष्टास्ति।

स्मृते मन्थनं गीतिकारणमस्ति। गीतिकारः कालिदास आषाढ़स्य नवान् मेघान् पश्यति। कविहृदये पीडोत्पद्यते तत्स्मृतिः गीतिरूपेण विकसिता जायते। यथा-

**तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः,**
**अन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ।**
**मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः,**
**कण्ठाश्लेषप्रणयिनि जने किम्पुनर्दूरसंस्थे।**[7]

गीतेरन्याङ्गस्य प्रकृतिचित्रणस्य सद्भावोऽपि मेघदूते विद्यते।

ऋग्वेदगीतिकाव्यानन्तरप्राप्तेषु गीतिकाव्येषु प्राचीनतमं काव्यं कालिदासस्य मेघदूतमस्ति। एतत्स्त्रोतसां विवेचनं कुर्वद्भिर्विद्वद्भिः ऋग्वेदीयः 'सरसापणि-संवादः',

---

[7] पूर्वमेघ 3।

प्रचीनस्त्रोतारूपेण स्वीकृतोऽस्ति। वाल्मीकिरामायणे सीतान्वेषणप्रसङ्गे हनुमतो दूतरूपेण गगनमपि काव्यस्य प्रेरणास्त्रोत:सु स्थानमलङ्करोति। जैनकविभिरेकं नवीनमुद्देश्यं गृहीत्वा मेघदूतानुकारीणि गीतिकाव्यानि रचितानि। श्रृंगारवातावरणे चलन्त्या: काव्यपरम्परााया: स्वप्रतिभया शान्तरसे प्रेरणमल्पीयो महत्त्वपूर्ण कार्य नास्ति। त्यागे विश्वस्तै: जैनलेखकै: श्रामणसंस्कृतेरुच्चततत्त्वानां विश्लेषणं पार्श्वनाथ नेमिनाथसदृशानां महापुरुषाणां जीवनचरितेष्वकरि। कियञ्चि: कविभि: मेघदूतश्लोकानामन्तिपदानि गृहीत्वा समस्यापूर्तिस्वरूपणि गीतिकाव्यानि प्रणीतानि। एवं गीतिकाव्यानां जैनविकृतानां प्रारम्भ: पार्श्वाभ्युदयादेव जायते। जैनगीतिकाव्येषु साहित्यिकसौन्दर्येण साकं दार्शनिकसिद्धान्तोऽयुपलभ्यते। विषयानुसारं मनश्शीलयोर्दौत्ये नियुक्ति: सर्वथा नवीन: प्रयोगऽस्ति। काव्यभाषायां संयम-सदाचार-परमार्थतत्त्वानां निरूपणं सहृदयजनास्वाद्यं सञ्जातं विद्यते।

मेघदूतपदान्याश्रित्य प्रणीतेषु समस्यापूर्त्यात्मिककाव्येषु पार्श्वाभ्युदयकाव्यं सर्वप्रथमं विद्यते। काव्येऽस्मिन् चत्वार: सर्गा: सन्ति। सर्गेषु श्लोकानां संख्याधोनिर्दिष्टास्ति-

प्रथमसर्गे-118
द्वितीयसर्गे-118
तृतीयसर्गे-57
चतुर्थसर्गे-71

काव्यभाषायां प्रौढिरस्ति। मेघदूतवतदस्मिन्नपि मन्दाकान्ताच्छन्दो व्यवहृतमस्ति। काव्यशैल्या: जटिलतया कथावस्तु सहसा प्रकाशं नायाति पाठक-समक्षम्। समस्यापूर्तिप्रणल्यां काव्यगुम्फनेन मूलङ्क्तीनां भावेषु यत्र-तत्र विपर्यस्तता लक्ष्यते। अस्य प्रणेता जिनसेनो द्वितीयोऽस्ति।

गुरूभ्रातासीत्। तदादेश एवैतत्काव्य- प्रणयने कारणमभूत काव्यस्य प्रत्येकसर्गे जिनसेनोऽमोघवर्षस्य गुरू: कथितो वर्त्तते। अमोघवर्षा राष्ट्रकूटदेशस्य राजासीत्। कर्नाटकमहाराष्ट्रदेशयोरपि तदीयशासनमासीत्। अयं शक् संवत् 736 काले

राज्यसीनोऽभवत्। अस्य राजधानिका मान्यखेटे मलखेड़े वाऽऽसीत्। जिनसेनोपदेशेनायं जैनधर्मे दीक्षितोऽभवत्। प्रश्नोत्तरमालया ज्ञायते यदमोघवर्षः स्वपुत्राय राज्यं दत्वा स्वयं वनं जगाम। पार्श्वाभ्युदयस्योल्लेखो हरिवंशपुराणेऽपि वर्त्तते। पार्श्वाभ्युदयस्य रचनाकालोऽष्टमी शती वर्त्तते। वीरसेनारब्धा जयधवलां टीकां (शक् संवत् 705) काले फपल्गुनशुक्ल दशम्याः पूर्याह्णे समाप्तवान्। अतो जिनसेनरचनाकालनिर्णये पार्श्वाभ्युदयानन्तरं जयधवलाटीकायास्तदनन्नतरं पुराणस्य च कमः निश्चीयते। डॉ. ज्योतिप्रसादोल्लेखानुसारं वीरसेनस्वामिनः पट्टशिष्यः सेनशंकरी आचार्य-जिनसेनस्वामी अमोघवर्षस्य राजगुरूः धर्मगुरूः धर्मगुरूश्चासीत्। अंय विभिन्नभाषाविज्ञो विविधविषयाणां पटुः दिग्गजो विद्वान् आसीत्। वाल्यादेव तेन सह अमोघवर्षस्य सम्बन्धोऽभवत्। जिनसेनाचार्यस्य स्थितिकलः शकसंवत् 680-765 यावत् सम्भाव्यते। स्वर्गीय पण्डितनाथूरामप्रेमिणा स्वविस्तृतनिबन्धे जिनसेनगुरू-परम्परायां समयादी च विचारितम्। प्रस्तुतकाव्यस्य टीकायां पार्श्वाभ्युदयस्य महती प्रशंसा विद्यते।

**कथावस्तु**

पोदनपुरस्यारविन्दनरेशेन बहिष्कृतः कमठः सिन्धुनदीतटे तपश्चरति। अग्रजनिष्कारसनेन दुःख्यनुजो गुरूभूतिः कमठसमीपं गच्छति। मरूमूर्तिं पश्यत् कमठस्य हृदये कोपाऽग्निः प्रज्वलति। स नमस्कुर्वतः मरूभूतेरुपरि पाषाणशिलां पातयति, येन स म्रियते। पश्चादनेकजन्मसु कमठस्य जीवात्मा मरूभूतिजीवनाय कष्टं प्रयच्छिति। अन्ततो गत्वा मरूभूतिजीवो वाराणस्यां महाराजवि सेमस्य महाराज्ञाः ब्राह्मीदेव्याः पुत्रत्वं गृह्णति। अभिनिष्क्रिमणानन्तरमेकस्मिन् दिने पार्श्वनाथस्य (मरूभूतिजीवनाय) उपरि शम्बरस्य (कमठस्य) जीवस्य वृष्टिः पतति। तस्य पूर्वकालीनो वैरभाव उद्दप्तो जायते। स स्वमायाप्रभावेण घोरवृष्टिमुपस्थापयति। स सिंहवद्गर्जति। तञ्च धिक्करोति। एतावतापि यदा युद्धे स्वहस्तमृतं तं स्वर्गलोकस्थितामलकापुरीं गन्तुमुपदिशति। शम्बरस्य (कमठस्य) विभिन्नप्रकाराणि दुर्वचनानि श्रुत्वापि पार्श्वनाथः (मरूभूतिः) मौनमास्ते। शम्बरोऽस्मिन्नवसरे पार्श्वानाथं विभिन्नकथाः श्रावयति पुनर्युद्धाय चाह्वयते। युद्धे पार्श्वनाथस्य मृत्युं सम्भाव्य स्वयं मेघरूपधारणकारणात् शम्बराय पा नाथायापि मेघरूपं दत्वोत्तरदिक्स्थितालकापुरीगमनाय परामर्श ददाति।

काव्येऽस्मिन् शम्बरः (कमठः) यक्षरूपे कल्पितोऽस्ति। तस्य प्रेयसी भ्रातृपत्नी बसुन्धरा यक्षपत्नीरूपे कल्पिता विद्यते। राजारविन्दः कुबेररूपेण वर्णितो विद्यते, येन कमठः नगरनिर्वासनेन दण्डित आसीत्। मेघरूपेण (मरुभूतिः) पार्श्वनाथः विचित्रोऽस्ति। कमठनुसारं जीवनान्ते पार्श्वनाथो मेघरूपेण स्वर्ग गमिष्यति।

प्रसंगतो राममगिरेरलकापुरीं यावत् मार्गो विर्णतो विद्यते। सर्वप्रथमं रामगिरेरुत्तरस्यां प्रस्थिते आम्रकूटगिरेः, तत्पश्चात् पुनरुत्तरस्यां प्रयाते नर्मदायाः, विन्ध्यवनस्य दशार्णदेशस्य तस्याः राजधानिकायाः विदिशायञ्च वर्णनं कृतमस्ति। विदिशायां वेरवत्याः जलग्रहणान्तरं कस्यामप्यट्टालिकायां दिन यापयित्वा रात्रौ नीचैः नामके पर्वत विश्रम्य तदनन्तरं निर्विन्धिया सिन्धोञ्च साम्मुख्यं कुर्वते मेघायोज्ययिनीगमताय परामर्शं ददाति। उज्जयिन्यां जिनमन्दिरं जिनतुल्यनन्तर महाकालनामकने स्थितानां जिनालयानां दर्शनान्तरं नगरीशोभाप्रक्षणाय परामर्श ददाति।

उज्जयिन्यनन्तरं गम्भीरायाः देवगिरपर्वतस्य चर्मण्वत्याः नद्याः दशपुरनगस्य, सीतासरितः, ब्रह्मायतदिशस्य, कुरुक्षेत्रकलखलयोः, हिमालयञ्चरन्ध्रयोरलकापुर्याश्च सामीप्यं प्राप्तमनुमेधः कृतोऽस्ति। कविरलकापुर्याः विविधभावभङ्गिमाभिः सह श्रृङ्गारवर्णनं शम्बरमुखेन कारितवान्। एवं प्रकारेण मेघे (पार्श्वनाथे, मरुभूतौ) अलकापुरीं प्राप्ते तस्य पूर्वजन्मपत्न्या वसुन्धरया सह तस्य मिलनस्य वर्णनं विहितमस्ति। सन्दर्भेऽस्मिन् वसुन्धरायाः वर्णनं मेघदूतयक्षप्रयसीसदृशमेव सरसं भावुकतापूर्णञ्च विद्यते।

शम्बरेणोक्तवर्णने कृते पार्श्वनाथः (मरुभूतिः) शान्त एव तिष्ठति। एतस्मिन् शम्बरः पुनः युद्धाय तं प्रोत्साहयति। युद्धे मृते सति स्वर्ग गत्वा देवा नया सह निवारास्य प्रलोभनं ददाति। यदा पार्श्वनाथः कथमपि युद्धाय तत्परो न भवति, तदा स स्वमायाशक्त्या स्त्रीसमूहसृष्टिं कुर्वन् गानप्रारम्भं करोति, तथा नारीप्रणयचे प्रियवचनैश्च तं विमुग्धं कुर्त्तुमिच्छति। एतावत्यां शठतायां कृतायामपि पार्श्वनाथः ध्यानविचलितो न भवति तदा स पाषाणवर्षभिस्त दन्तं विकीर्षति। एवं घोरमुपसर्गं

वीक्ष्य धरणेन्द: पद्मावती च तत्रागच्छतस्यदुपसर्गञ्चापनयत:। त्रस्त: शम्बर: गायति। नागराज: धरणेन्द्रस्तमभयं दत्वा पलायनाद्विरामयति। दन्द्रादिदेवा: केवलज्ञानपूजायै आगच्छन्ति। शम्बरोऽपि (कमठोऽपि) स्व-कुकृत्येभ्य: पश्चात्तापं तथा तीर्थकरगुणगानञ्च करोति। स क्षमां याचमान: धर्मं गृह्णाति। देवा: आकाशत: पुष्पाणि वर्षन्ति, दुन्दुभिस्वनश्च जायते।

पार्श्वाभ्युदयकाव्यं गीतिकाव्यमस्ति। जनसेनन समग्रमेघदूतं समस्यापूर्त्तावावेयतत् काव्यं प्रणीतम्। एतस्य प्रत्येकश्लोक: मेघदूतक्रमेण श्लोकचतुर्थांशेनार्धांशेन वा वेष्टितो तर्त्तते। समस्यापूर्तेरावेष्टनं प्रकारत्रयेण सम्पन्नमस्ति- 1. पादवेष्टनम्, 2. अर्धपादवेष्टनम्, 3. अन्तरितावेष्टनम्। प्रथमपादावेलने मेघदूतश्लोकस्य कतय एकचरणो गृहीतोऽस्ति। द्वितीयोवेष्टने द्वितीयचरण: तृतीयावेष्टने तृतीययचरणश्च।

**श्रीमन्मूर्त्या मरकतमयस्तभभलक्ष्मीं वहन्त्या,**
**योगैकाग्र्यस्तिमिततरया तस्थिवांसं निदध्यौ।**
**पार्श्नं दैत्यो नभसि विरहन् वद्धवैरेण दग्ध:**
**कश्चित्कान्ताविरहगुरुणा स्वधिकारात्प्रप्तत:।।1।**

**अर्धवेष्टित: श्लोक:**

**वक्रोऽप्यध्वा जगति समतो यत्र लाभोऽस्त्यपूर्वो,**
**भातुं शक्यं ननु वनपथात् कासिकाग्रर्जुनातात्।**
**वक्र पन्था: यदपि भवत: प्रस्थितस्योत्तराशां,**
**सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्या:।।1/103।**

**एकान्तरित: श्लोक:**

**उत्सर्गे वा मलिनवसने सौम्य निक्षिप्य वीणाम्**
**गाढोत्कण्ठं करुणविरुतं विप्रलापायनानम्।**
**मद्गोत्राङ्कं विरचितपद मेयमुद्गातुकामां,**
**त्वामुद्दिश्य प्रचलदलकं मूर्च्छनां भवयन्ती।3/38।**

द्वयन्तरित: श्लोक:

**तन्त्रीमार्द्रां नयनसलिलै: सारयित्वा कथंचित,**
**स्वा ल्यग्रै: ध्यायं कुसुममृदुभिर्वल्लीरीमस्पृशन्ती।**
**ध्यायं ध्यायं त्वदुपगमनं शून्यचिन्तानुकण्ठी,**
**भूयोभूय: स्वयमपि कृतां मूर्च्छना निस्मरन्ती।**3/39।

कविलिनसेनेन मेघदूतोद्धृतांशानां प्रचलितानर्थान् स्वस्वतन्त्रकथानके प्रसृज्य महद्विलक्षणताया: परिचयो दत्त:। कवि: विभिन्नप्राकृतिकदृश्यानां भावपूर्णरम्यस्थानानाञ्च चित्रणेऽपूर्वसहृदयताया: परिचयं दत्तवान्। आम्रकूटपर्वशिखरे संप्राप्ते मेघे पर्वतशोभां वर्णयता कविनोदलेखि-

**कृष्णाहि: किं वलयिततनु: मध्यमस्याधिशेते,**
**किं व नीलोत्पलविरचितं शेखरं भूभृत: स्यात**
**इत्याशङ्कां जनयति पुरा मुग्धविद्याधरीणाम्,**
**त्वय्यारूढे शिखरमचल: स्निग्धवेणीसवर्णे।**1/70।

विद्याधरीणां मनसि पर्वतशिखरे स्थितान् श्यामवर्णमेघान् वीक्ष्य कृष्णसर्पाणां नीलकमलानाञ्च भ्रमो जायते।

कवि: दृश्यचित्रणे पटुरस्ति। एतद्वर्णनाधारे सुन्दररेखाचित्रं रचितमस्ति। रेवां वर्णतया कविना, रेवां पृथव्याश्छिन्नां मालां प्रकल्प्य, मालां प्रकल्प्य, तत्तटे वन्यहस्तिनां दन्तकीडास्तथा पक्षिणां मधुविरावान् वर्णयता, नदीतटश्चित्रमविङ्कित:।

**गत्वोदीचीं भ्रुव इव पृथुं हारयष्टिं विभक्तां**
**वन्यभावानां रदनहतिभिर्भिन्नापर्यन्तवप्राम्।**
**वीनां वृन्दैर्मधुरविरुतैरात्ततीरोपसेवां**
**रेवां प्रेक्ष्यस्युपलविषमे विन्ध्यापादे विशीर्णाम्।**1/75।

कवि: सन्ध्याकाले महाकालवने जिनमन्दिरं प्राप्तो तत्प्राप्ते: चित्रणं कुर्वन् कथयित -'हे मेघ! महाकालवने यदि सन्ध्यायां त्वं जिमन्दिरं प्राप्नुयास्तदा सान्धयापूजानन्तरं स्वेदबिन्दुवन्दिता: मन्दं-मन्दं चलन्ती: स्वचरणानिक्षेपै: सह मेखलाशब्दं कुर्वती: कोमलकण्ठी: गणिका: लीलाविकीर्णै: जलकर्णै: सिक्ता: कुर्या:।

**सायाह्ने चेत्तदुपवगतवान् धाम तत्कालपूजा**
**संगीतान्ते श्रमजलकणैरचिताङ्गी: सुकण्ठी:।**
**मन्दं यान्तीश्चतुरगणिका: शीकरै: सन्नयेस्त्वम्,**
**पादन्यासक्वणितरसनास्तत्र लीलावधूतै:।**

एतदनन्तरं कवि: चित्रयन् वक्ति- 'हे मेघ! यदि त्वं जिनमन्दिरे दिने गमिष्यति, तदा त्व तत्र मणियुक्तानि शब्दायमानानि, नूपुराणि दधानां सुललितपदन्यासै: गायन्ती: भ्रुविलासयुक्ता: रत्नजटितदण्डचामरै: श्रान्तहस्ता: वर्षाग्रबिन्दुभि: सिक्ता: चंचला उपरि पश्यन्ती: गणिका: दक्ष्यसि।''

**तास्तत्रहर्म्मणियरणन्नूपुरा: पण्ययोषा:।**
**प्रोद्गायन्ती: सुललितपदन्यासमुद्भ्रूविलासा:।**
**पश्योत्पश्या नवलजकणद्वित्रसिक्ता विलोला,**
**रत्नच्छायाखचितबलिभि: चामरै: क्लान्तहस्ता:।**

मेघदूतस्य यक्ष: प्रेमरुष्टां स्वप्रियां गैरिकवर्णे पाषाण उल्लिख्य तच्चरणयो: आतमानमर्पयितुमिच्छन्नाश्रपातै: गलिने चित्रेऽपि संयोग न प्राप्नोति। जिनसेन: स्वप्नसंगामाभावस्य चित्रं समुपस्थापयति। कविना रिहिण्या: दीनताया: कृतं चित्रणं भावसौन्दर्यञ्च श्लाघनीयमस्ति-

**तीव्रावस्थे तपति मदने पुष्पबाणैर्मदङ्गं**
**तल्पेनाल्यं दहति च मुहु: पुण्यभेदै: प्रकलृप्ते।**

**तीव्रापायत्वदुपगमनं स्वप्नमात्रेऽपि नायं**
**कूरस्तस्मिन्नापि न सहते संगमं नौ कृतान्तः।4/35।**

शम्बरः (कमठः) पार्श्वनाथं क्रुद्धं विदधातुं पूर्ण प्रयासं करोति। सोऽपशब्दान् व्यवहरति तथापि पार्श्वनाथः ध्यानेऽचलस्तिष्ठति। कविः जिनसेनः द्वितीयतृतीयपङ्क्त्योः समस्यापूर्त्तिं कुर्वन् कथयति-

**भो भो भिक्षो मयि सहरुषि क्व प्रयास्यस्यवश्यं**
**त्वामुद्धेति प्रणिपतनकैः सारयिष्ये तदग्रम्।**
**न प्राणान् स्वान् घटियितुमलं तावको निर्भयो वा,**
**मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या।4/2।**

भो भिक्षो ! मयि क्रुद्धे त्वं क्व गमिष्यसि? अहं त्वां स्वासिलक्ष्यमवश्यं सम्पादयिष्यामि। चिरात् दैववशादभ्यस्तमौक्तिकभूषणानां त्यागनिर्णयोऽपि तव प्राणान् न रक्षिष्यति।

**किं ते वैरिद्विरदनघटां कुम्भसभेदनेषु,**
**प्राप्तस्थेमा समरविजयी धीरलक्ष्म्याः करोऽयम्।**
**नास्मत्खड्गः श्रुतिपथमगात् रक्तपानोत्सवानाम्,**
**सम्भोगान्ते मम समुचितो हस्तसंवाहनानाम्।**

भो भिक्षो ! वैरिहस्तिकुम्भस्थल-विदारणाभ्यस्तो रणविजयी युद्धकार्योपरान्तं (संभोगान्ते) मम हस्तसंवहनयोग्यः वीरलक्ष्याः बाहुस्वरूपः अयं मम खड्गः किं त्वया न श्रुतः।

एवं प्रकारेण कविना नवीनभवयोजना कृता। अनावश्यकवर्णनाधिक्यभारैः कथानके शैथिल्यमायातमस्ति। मार्गवर्णनं वसुन्धरायाः विरहावस्थावर्णनञ्चात्र

मेघदूतसमानमेवास्ति। परन्तु संदेशकथनं मेघदूतवन्नास्ति। शम्बरः (कमठः) पार्श्वनाथस्य (मरुभूतेः) धैर्य्येण, सौजन्येन, सहिष्णुतयाः, च प्रभावितो वैरभावं परित्यज्य तच्छरणमुपैति तथा स्वापराधेभ्यः पश्चात्तापपूर्वकं क्षमाप्रार्थना करोति।

प्रस्तुतकाव्ये जैनधर्मस्य क्वापि कोऽपि सिद्धान्तः प्रतिपादितो नास्ति। कैलाशपर्वते महाकालवने च जिनमन्दिराणां महत्प्रतिमानाञ्च निर्देशोऽवश्यमेव कृतोऽस्ति। "रम्यस्थानं त्यजति न मनो दुर्विधानं प्रतीहि", "पापापाये प्रथममुदितं कारणं भक्तिरेव।"

नात्र संदेहो यद्गीतिकाव्यदृष्ट्या काव्यमेतदद्वितीमस्ति। कविना कालिदासस्य मूलभावः सुन्दररीत्या प्रसारिताः सन्ति। क्वचित् कालिदासभावानां प्रसंगान्तरे कलापूर्णसूक्ष्मतया सन्निवेशप्रयासः सुन्दरः प्रतीयते। प्रकृतिचित्रणे कविना भावुकतायाः कल्पनाशक्तेश्च पूर्णपरिचयो दत्तः। यद्यपि काव्येऽस्मिन् न कालिदासलालित्यमायातं तथाप्येतत्काव्यं संस्कृतकाव्येषु स्ववैशिष्ट्यमावहति।

गीतिकाव्यस्य निम्नाङ्कितानि तत्त्वान्यस्माभिः दृश्यन्ते-

1. **रागात्मकता।**
2. **वैयक्तिकता।**
3. **प्रबन्धसद्भावेऽप्यात्मनिष्ठता।**
4. **गेयता।**
5. **कल्पनावैचित्रयम्।**
6. **सौन्दर्यात्मकता।**
7. **भावसघनता।**
8. **मार्मिकता।**
9. **हृदयद्रावकता।**
10. **प्रकृतिचित्रणम्।**
11. **स्वाभाविकरूपेण मनोरागाणामभिव्यक्तिः।**
12. **स्वपरता।**

**13.सहजतरलता।**

**14.अनुभूतेः प्रतिबद्धता।**

**15.लयात्मकता।**

कविजिनसेनेन पार्श्वाभ्युदये एकां सौन्दर्यचेतनां बोधयित्वा समाजरूचेः परिष्कार एव न विहितः, प्रत्युय एकस्याः नवीनायाः सर्जनप्रेरणायाः सञ्चारो व्यधायि। एका नयीना जीवनदृष्टिः प्रदत्ता। वस्तुतः कविः यथार्थमात्रेण संतुष्टो नास्ति। अतस्तेन जीवनप्रगत्यै सम्भवनानां नवीनं क्षेत्रमुद्घाटितम्। यथा मानवजीवनस्य वास्तविकमहत्ता शारीरिकविशालतायाः, तत्त्वसंघटनायाश्चापेक्षया तस्य चेतनायाः जीवनशक्तेश्चोपरि अधिका निर्भरा विद्यते, तथैव गीतिकाव्यस्योत्कर्षोऽलङ्कारादिबाह्यसौन्दप्रसाधनापेक्षया। कल्पनोर्वरतायाः भावावेगस्य सञ्जीवनशक्तेश्चोपरि अधिकनिर्भरो विद्यते। गीतिकाव्यस्य श्रेञ्चतायै वस्तुविन्यास-नैतिकता-कलागतसन्तुलनापेक्षया कल्पनाया अनुभूतेश्च प्रवणतायाः आवश्यकता वर्त्तते। मानवीयभावानां तत्संवेगानां तदात्मानुभूतेश्च प्रवणतायाः आवश्यकता वर्त्तते। मानवीयभावानां तत्संवेगानां तदात्मानुभूतेश्च सघनयोजना पार्श्वाभ्युदये वर्त्तते।

श्रृंङ्गाररसस्य गीतीनां शान्तरसे परिवर्त्तनं विधाय कविजिनसेनेन प्रभावोत्पादकतोत्पादिता, सहैव मानवीयभावनामनेकरूपताः समन्वितरूपेण प्रकाश्य एकस्या नवीनायाः विधायाः सर्जना विहिता। प्रबन्धसमावेशे कृतेऽपि जिनसेननाधिकाधिकरूपेण स्वीयरूपस्याभिव्यक्तिर्विहिता। कवेर्वैयक्तिकभावधारया गहननुभूत्वा च गीतिकाव्येऽस्मिन् भावात्मिका स्थितिरुत्पादिता। कविना हृदयस्य तद्वक्रोद्देश्यञ्च जातीयजीवनस्य रञ्चनमस्ति। अतएव पार्श्वाभ्युदयकाव्यं मेघदूतवत् गीतिकाव्यस्योज्जवलो मणिः मन्यते।

यदि निष्पक्षालोचना क्रियेत तदा वक्तुं शक्यते यत् जिनसेनस्य कल्पनाशक्तिः कश्मिश्चिदर्थे कालिदासादग्रेऽस्ति। यथा (पृष्ठ 54 पद्य 2/97, 2/98) पद्यद्वयमुदाहरणार्थ विद्यते।

एताभ्यां पद्याभ्यां स्पष्टमस्ति यत् सहजशुद्धभाव:, स्वच्छन्दा कल्पना, भावावेश:, स्वप्तुभूतिमूलकता, प्रेम्णो व्यापकप्रभावश्चाङ्किता: सन्ति। उपदेशादर्शपूर्णचित्रणस्थाने विविधजीवनव्यापारा उद्घाटिता: सन्ति।

कृतेऽपि शान्तरसनिवहि वैयक्तिकताया: आत्मनिज्ञायाश्च निर्वाह: यथास्थानं सम्पन्नो वर्त्तते। मन्दाक्रान्ताच्छन्दसा मेघदूतदेव संगीतात्मकता सृष्टा। गीतिकाव्येऽस्मिन् कवि: विभिन्नाप्राकृतिकदृश्यानां कथानकस्य भावपूर्णरम्यस्थलानाञ्च चित्रणाय पर्याप्तमवसरमधिगतवान्। आम्रकूटपर्वतशिखरे मेघे गते पर्वतशोभवर्णनं कवि: स्वसहृदयताया: कल्पनाशक्तेश्च पूर्णपरिचयं दत्तवान्।

पर्वतशिखरोपरि स्थितं श्यामवर्णं मेघमवलोक्य विद्याधरीणां कृष्णसर्पभ्रिमोऽथवा नीलकमलमालाभ्रम: स्वाभाविको वर्तते।

रेवायाश्चित्रणे कविस्तां पृथ्वाकश्छन्ना गहतीं मालां परिकल्प्य तटे वन्यगजानां दन्तक्रीडाया: पक्षिणां मधुरकलरवस्य च वर्णनं विधान नदीतटस्य चित्राङ्कनं कृतवान्।

अलकापुर्या: वर्णनप्रसङ्गे तत्रत्येन्द्रनीलमणियुक्तलघुपर्वतस्य, सुन्दरबालानां निवासस्थानस्य, चित्रसज्जितप्रासादानाम्, सततवर्त्तमानवर्षतो:, नराणो नारीणाञ्च विविधश्रृंङ्गारचेष्टानां वर्णनमस्ति। नि:सन्देहमत्र कवि: प्रेम मानवीयस्वाभाविकप्रक्रियाया: दिव्यजीवनस्य च स्वाभाविकप्रक्रियाया: रूपेण गृहीतवान्। स प्रकृतौ, मानवेषु दिव्यप्राणिषु च एकमेव मूलं स्पन्दनं श्रुतवान्। फलत: प्रकृतौ स्वच्छन्दप्रेम्ण:, दाम्पत्यप्रेम्ण:, वात्सल्यस्य, श्रद्धाया:, भक्तै: मित्रतायाश्च रूपेण प्रेम्णो विविधानि अङ्गानि चित्रितानि।

नराणां नारीणाञ्च प्रेमनिरूपणे (2/114 पद्ये) कवे: जिनसेनस्य सामञ्चस्यवादिनी दृष्टि: प्राप्यते। तस्या: वासनाया: कामुमतायाश्च मादकचित्रेभ्य आरभ्य आत्मसमर्पणेन एकनिष्ठतया पूर्णप्रेमपर्यन्तं चित्रणमस्ति। सदैव तयो: जन्मजन्मान्तरातमीताया: संस्कारै: सुवासितस्यामरालौकिप्रेम्ण: चित्राण्यपि दृयन्ते।

जन्मान्तसंस्कारा: पुनर्जन्मकारणात् सन्ति। अस्मिन् जन्यनि विहिता: प्रेम विरोधी वात्सत्यञ्चानेकजन्मान्तरेषु चलन्ति।

कवि: प्रेगिणां प्रेमिकाणाञ्च रागपूर्णाभि: हृदयस्थितिभि: पूर्णपरिचितोऽस्ति। पर तद्विश्वास: संस्कानार् प्रति पूर्णो विद्यते। कमठ्यरुभूत्यो: कुसंस्कार: कतिपयजन्मपर्यन्तं चलति। यत: वैरविरोधशमनं पूर्णज्ञान-केवलज्ञानप्राप्त्यनन्रमेव जायते। एवं प्रकारेण कविना समाजगतभावना: आत्मीयरूपाणि प्रदाय पार्श्वाभ्युदयस्य समुच्चगीतिकाव्यरूपेण निर्माणाय पूर्ण: प्रयायो विहित:।

## अमरुकशतकम्

संस्कृतगीतिकाव्ये 'अमरुकशतकम्' सहृदयानां हृदयहारोऽस्ति। एतत् सुभाषितानां सुन्दरमागारमस्ति। अस्य प्रत्येकगीतौ राप्रवणता प्राप्यते। रस-भावयोरर्थस्य च यावान् सन्निवेश: एकस्मिन् पूर्णे प्रबन्धे शक्यो भवति, तावानमरुकस्य प्रत्येपद्ये प्राप्यते। एतत् श्रृंङ्गारस्य ललितलीलाभङ्गीनां भावमयं स्वरूपमस्ति। अस्मिन् कामिनां कामिनीनाञ्च विभिन्नामनोत्तयश्चित्रिता: सन्ति।

शतकस्यास्य रचयिता 'अमरु:' अथवा 'अमरुक:' कश्चन नृपो बभूव। अस्य जन्मस्थानविषये, जन्मसमयविषये च काचिदपि निश्चिता ज्ञातव्यता नास्ति। एका किंवदन्ती प्रचलिता विद्यते यत् मण्डनमिश्रस्य पत्न्या शारदया कृतानां कामशारत्रविषयकप्रनानामुत्तरदानाय स्वयं शङ्कराचार्योऽमरुकनाम्नो नृपस्य मृतशरीरे प्रविश्यामरुकशतकम् प्रणीतवान्।

अमरुकशतकस्याध्ययनेनेयं किंवदन्ती कपोलकल्पिता प्रतीयते। यतोऽस्य ग्रन्थस्य रचना कस्यापि प्रश्नस्योत्तरूपेण नाभवत्। एतत् पूर्वमेवोल्लिखितमस्ति यत् अमरुकशतकस्य पद्यानि आनन्दवर्द्धनेन (750 खीष्टाब्दी) तथा वामनेन (880 खीष्टाब्दी) उद्धृतानि। अतएवामरुकसमय: 750 खीष्टाब्दात् पूर्वकालीनोऽवश्यं विद्यते। रचनासरण्या प्रतीयते यत् कालिदासात् पश्चादेवा मरुकशतकस्य रचनाभूत्।

अमरुकशत के विप्ररम्भश्रृङ्गारस्य वर्णनमस्ति। विप्रलम्भेऽपि मानविप्रलम्भस्य। मानस्यानेकरूपाणि दृश्यन्ते। मुग्धाया: मानं मध्याया: मानं प्रौढाया: मानं गायकेन नायिकामानहारचेष्टा, नायकस्य निराशस्य निवृत्ति:, नायिकाया: पश्चात्ताप:, सख्या उपालम्भ: इत्यादीनि मानविषयकवर्णनामनि कृतानि सन्ति। क्वचित् नायिका दूतीं प्रययति, क्वचित् सखी नायिकां मानविद्यां शिक्षते। नायिका वैदग्ध्यपूर्णमुत्तरं ददाति। सखी नायिकायै मानशिक्षा ददती कथयति- अरे मुग्धं, किं त्वया बाल्येऽस्मिन्नेव शेषसमययापनं निर्णीतम्।

दृढ़तापूर्वकं मानं धारयन्ती तिष्ठ, स्वसरलताया: परिमार्जनं कुरु। अस्योपरि नायिका व्याकुला जायते। वैदग्ध्येन सह सखीं प्रतिवक्ति- शनै: शनै: कथय, कदाचिदेवं न भवेत् यत् मम हृदयस्यो मम प्रियतम: वार्त्ता न श्रुणुयात्?

सखीवार्त्ता स्वीकृत्या नायिका प्रयत्नपूर्वकं मानं कुरुते, परं सा निकला भवति। सा मानवशा स्वभृकुटीं वक्रां कृतवती, परं दृष्टौ तदीयोत्कण्ठा दृश्यते। सा चित्तं कठोरं कलयति, परं शरीरमत्यधिक रोमाञ्चितं जायते। सा कथयित- मया स्ववाणी नियमिता, परं दग्धमुखे स्मितोंगमो जायत एव। यदा प्रियतमायी परोक्षतिथतायामेषा दश विद्यते, तदा सन्मुखमुपस्थितायां तस्यां का स्थितिमोविष्यानि। नायको नायिका च मिथ: मान कुरुत:। उभावेकस्यामेव शय्यायां मिथ: पार्श्वपरिवर्त्तितं विधाय स्थितौ। मिश्र: भाषणं त्यक्तवन्तौ तथा रोषप्रदर्शनमममिनयत। सत्यमेतदस्ति यत् तौ स्वयं परस्परमनुननयं कुत्तुं प्रस्तुतौ स्त:। परं गौरवरक्षाकाङ्क्षा तौ कथाकरणात् निवारयति। अस्मिन्नेव समये ततोर्मानकलहभङ्गे जायते तथोभावपि हात्तेनोत्तेजनया वेगेन सह मिथ: ग्रीवायां श्लिष्यत:। एषाऽभवत् प्रणयमानस्य वार्ता।

ईर्ष्यामानस्यापि चित्रणं कविना विस्तारपूर्वकं कृतम्। नायिका प्रियमस्यापराधकारणात् क्षीणा जायमानास्ति। आश या, भयेन, कोपेन च तस्या: शरीरे कम्पनमुत्पन्नां जायते। प्रियतम: प्रेमपूर्वक पृच्छति- 'तव शरीरे कृशतेयती कथ मुत्पन्ना? एतत्कम्पनं कथमुत्पद्यते?' एवं प्रकारेण पृच्छति प्रियतमे नायिकाया

सरलतयोत्तरितं यदेतत्स्वाभाविकमस्ति। एवमुक्त्वो मुखं परावर्त्य स्वपक्ष्मसु लग्नान्यश्रूणि गम्भीरेणोच्छ्वासेन सह पातितवती। नायिकामानहारकालस्योत्तरेऽपि कित्सुन्दरे स्त:। नायक:- "बाले'' नायिका- "नाथ'' नायक:- 'हे मानिनि ! त्यज रोषम्'' नायिका- "रोषं कृत्वा मया किं कृतम्?'' नायक: "त्वया रोषंकृत्वा मय हृदये खेद: सामुत्पादित:।''

नायिका- "तव हृदये खेद: कथं समुत्पन्न:? त्वया कोऽपराध: कृत:?''

नायक:- "पुनस्त्वं गद्गदस्वरेण कथं रोदिषि?'' "अहं कस्मै रोदिमि?'' नायक:- "पश्य, मम सम्मुखे रोदिषि?, नायिका- "अहं तवाग्रे कथं रोदिष्यमि? अहं तव कास्मि?'' नायक:- "त्वं मम प्रियतमासि?'' नायिका- "प्रियतमैव तु नास्मि, अतएव तु रोदिभि।'' मानस्य पराकाष्ठापि दृष्टव्या- नायिका मानं कृतवती। सखी मानहरं कृत्वा श्रान्ता। सान्ते कथयति- "तव प्राणप्रियतमो नीचै: शिर:कृत्वा स्वनखेन भूमि कर्षाति। सख्य आहरं पानीयञ्च त्यक्तावत्य:। निरन्तरं रुदतीनां तासां नयने सशोथे जाते। पञ्चरस्थै: शुकै: हसनपठनादिकं त्यक्तम्। तवेयं दशा विद्यते, अरे कठोरहृदये। सम्प्रत्यपि मानं त्यज।

प्रवासकारणात् नायिकावस्थाया: चित्रणं कुर्वन् कवि: लिखितवान्। नायिका कथयति-प्रियतमस्य प्रस्थानसमाचारे प्राप्ते मम वलयौ नि:सृत्य मणिबन्धं त्यक्तवन्ती। मम प्रियमित्रमश्रवपि निरन्तरं गच्छति। धैर्यमपि स्थातुं न समीहते। चित्तं प्रथममेव गन्तुं प्रवृत्तम्। प्रियतमेन गन्तु निश्ये कृते, सर्वैरपि सहैव गन्तुं प्रवृत्तम्। हे जीवन! एतेषां सङ्गं कथं त्यजसि? त्वमपि एभि: सहैव कथं न गच्छसि?

संयोगश्रृङ्गारस्योदाहरणानि न्यूनान्येवागतानि सन्ति। कक्ष एकलोऽस्तिनायक: निद्राव्याजमुपेत्य शयानोऽस्ति। नायिका वासगृहं शून्यं नायकञ्च सुप्तं कालं यावत् तन्मुखं पश्यति। यदा विश्चसिति यन्नायक: वस्तुत: शेते, तदा स्वच्छन्दतापूर्वकं तन्मुखं चुम्बति तदा यदा पश्यति यत् तच्चुम्बनै: नायकमुखं विकसति, कपोलो रोमाञ्चितौ जायेते तदा लज्जया स्वशिरो नमयति, प्रियतम उत्तिञ्चति तथा हसन् तस्या: बालाया: मुखं चिरकालं यावत् चुम्बन् तिष्ठति।

एकस्मिन्नान्यस्मिन् चित्रेऽङ्कितमस्ति यत् "दम्पती रात्रिपर्यन्तं वार्त्ताकुर्वन्तावतिञ्चताम्। तत्रैव गृहस्य शुकं सारिका च पञ्चरस्थे आस्ताम्। ताभ्यां दम्पत्योः वार्त्ता श्रुता तथा स्मृतिमानीता। प्रातः काले नायकस्य, नायिकायाः समस्तगुरुजनपरिवारसदस्यस्य चोपस्थितौ शुकः रात्रिवार्त्तायाः आवृत्त्यारम्भं करोति। नायिका चतुरतापूर्वकं स्वाभूषणेभ्यः पद्मरागस्यैकखण्डं शुकचञ्चो रक्षति। शुकस्तं दाडिमखण्डं मत्वा कृत्तितुं प्रारभते। एवं शुकमुखं पिहितं जायते।

अमरुकस्य वर्ण्यविषयो रससम्पृक्तोऽस्ति। तस्य प्रत्येकपद्यं ध्वनेरुत्कृष्टमुदाहरणं विद्यते। श्रृङ्गाररसपूर्णाः गीतयः प्रत्येकसहृदयमाकर्षन्ति। शतकेऽस्मिन् दाम्पत्यजीवनस्य प्रणवव्यापारस्य सरसचित्रणमस्ति। श्रृङ्गारस्य विविधाः स्थितयोऽपि वर्णिताः सन्ति। अमरुकस्य भावाः स्वतः वाण्यां परिणताः भूत्वा बहिरागाः सन्ति। मानस्यैतावद्विस्तृतं गम्भीरञ्च चित्रणं नान्यत्रोपलब्धमस्ति।

**काव्यमूल्याङ्कनम्**

काव्यमूल्यदृष्ट्या अमरुकशतकमनुपममस्ति। रसगुणाल ररीत्यादीनां समुचितसमावेशेन सह जीवनमूलस्य प्रतिज विहिता विद्यते। व्यञ्चनावृत्त्याः आश्रयः प्रायः सर्वत्र गृहीतोऽस्ति। अत्रोदाहरणस्वरूपं व्यञ्चनावृत्तिसम्बन्धि पद्यमेकं समुपस्थाप्यते-

**निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमानञ्चने पुलकिता तन्वी तवेयं तनुः।**
**मिथ्यावादिनि दूति! बान्धवजनस्याज्ञातपीडागमे,**
**वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्वान्तिकम्।।**[8]

पद्येऽस्मिन् 'अधम' पदेन "अत्र तदन्तिकमेव रन्तुं गताऽस्मीति प्राधान्येनाधमपदेनव्यज्यते।'' व्यङ्ग्यार्थः प्रतीयते यद् दूती नायक-समीपे रन्तु गतासीत्। संयोगश्रृङ्गारस्यापि चित्रणं कविना कृतम्। यथा-

[8] अमरुशतकम् 106।

गाढिल नवायनीकृतकुचप्रोद्भिन्नारोमोद्मा,
सान्द्रस्नेहरसातिरेकविगलच्छीमान्नितम्बाम्बरा।
मा मा मानद मति मामलमिति क्षमाक्षरोल्लापिनी,
सुप्ता किं नु मृता नु किं मनसि किं लीना विलीना नु किम्?[9]

कश्चन नायक: रत्यानन्दे मग्नाया: नायिकाया अवस्थां वर्णयति। अस्या: नायिकाया: गाढालिङ्गनेनास्या: स्तनौ दमितौ, गाढालिङ्गनसुखेनास्या: रोमाञ्चोद्बोधनं जातम्, अत्यधिकस्नेहरसेनास्या अधोवस्त्रं नितम्बात् वारं-वारं स्त्रस्तं जायते, आलिङ्गनजनितपीडामसहमानेयं छिन्नभिन्नशब्देषु- 'हे प्रिय, न, न, मामधिकं नेति कथयन्ती निश्चेष्टा जाता। किं मा सुप्ता, यदीयं निद्रामग्नाऽमभिविष्यत्, तदा श्वासाश्चलन्तोऽभविष्यन्, परमस्या: श्वासा अपि न चलन्त: सन्ति, तत्किमियं मृता किमियं मम मनसि प्रच्छन्नात्र? तस्मिन्मिलितां वा?

रति: वर्णिता। पद्येऽस्मिन् नायिकाया: रोमाञ्चस्य तथा प्रलयनामकयातित्त्वकभावस्य, छिन्नभिशब्दानां कथनस्य, नितम्बवस्त्रस्त्रंसनस्याद्दीपनविभावस्य तथा नायकस्य वितर्कनामसञ्चारिभावस्य व्यञ्चना विहिता विद्यते। "माम माम ानद माति मष्मलमिति" अंशे रतिसुखं प्राप्ताया: नायिकाया: अपूर्णवचनेषु औचित्यपालनं कृतं विद्यते। प्रथमरतिकालस्य एवावत्सुन्दरं वाणीमयं चित्रणं अन्यत्र दुर्लमस्ति। आचार्यरुय्यकइमं प्रयोऽलङ्कारमुवाच।

मुग्धाया: नायिकाया: स्वाभाविकचित्रण कुर्वता कथितम्-
पटालग्ने पत्या नमयति मुखं जातविनया,
हठाश्चेषं वाश्लेषं वाञछत्यवहरति गात्राणि निभृतम्।
न शक्नोम्याख्यातुं स्मितमुखसखीदत्तवचना,
ह्रिया ताम्यत्यन्त: प्रथमपरिहासे नववधू:।[10]

---

[9] अमरुशतकम् 9।
[10] अमरुशतकम् 41।

पतिगृहमागतायाः मुग्धायाः नायिकायाः लज्जाशीलतायाश्चित्रणेऽमरुको दक्षोऽस्ति। पतिस्तस्याः अञ्चलोपान्तं धृत्वा गमनाद्रुणद्धि तथा पत्युरिमां चेष्टां न वाञ्छन्त्यपि सा जज्जया मुखं न पयति। यदा पतिः बालपूर्वकामालिङ्गनं समीहते तदा सा स्वाङ्गानि पृथक् करोति। हसन्तीः सखीः वीक्ष्य सा माम्यो मानसा तूत्तरं दातुं सनीहते, परं मुखेन न किमपि कथयति। प्रथमागता नववधूः लज्जया हासपरिहासोक्तं वक्तुं समर्था न भवति।

पद्येऽस्मिन् मनोमुखाद्यनुभावैः नायिकागत 'व्रीडा' नामकसञ्चारिभावस्य पुष्टिः, कृता विद्यते। तथेमे मिलित्वा संयोगाश्रृङ्गारस्य व्यञ्जना कुर्वन्ति।

एका प्रवत्स्यत्पतिका यदा प्रियविदेशगमनं निश्चितम् वेत्ति तदा सा कथयति यन्मयापि मरणत्य निश्चयः कृताः। प्रियवियोगे तस्यां मरणमवश्यंभाव्यस्ति। नायिकाया अस्मिन् निश्चये नायको बोधयन् कथयति-

**याताः किं न मिलन्ति सुन्दरि। पुनश्चिन्ता त्वया मत्कृते**
**नो कार्या नितरां कृशसि कथयत्येवं सवाष्पे मयि।**
**लज्जामन्थरताकेण निपतत्पीताश्रुणा चक्षुषा,**
**दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः।**[11]

प्रिये विदेशं गताः किं निवृत्य पुनर्न मिलन्ति? विदेश गत्वा जनाय निवृत्य पुनरागच्छन्ति। अत एव मद्विषये त्वया चिन्ता न विधेया, तथा च स्वं परमदुर्बलासि, चिन्तया कष्टं भविष्यति। अतः त्वया स्वशरीरे ध्यान देयम्।

एवमाश्वास्य नायकः विदेशाय यदा चलितः तदा नायिकाया अक्ष्णोरश्रूण्यायातानि परं तयावरोधितानि। नायकेन सान्त्वनायां दत्तायां नायिकया लज्जानिश्चल तारकनेत्राभ्यां तं वीक्ष्य हसितवती। नायिकाया हसनं प्रियविदेशगमनायानुमतिसूचकं नास्ति, अपितु भाविगरणाय प्रसन्नतापूर्वकं तत्परतायाः सूचना विद्यते।

---
[11] अमरुशतकम् 10।

एवं प्रकारेणामरुकशतके संयोगवियोगश्रृङ्गारयोरनेकान्युदाहरणानि लभ्यन्ते। धृष्टनायकस्य धृष्टता कां पराकाष्ठां प्राप्नोति, एतत्निम्नाङ्किपद्ये द्रष्टव्यम्।-

**दृष्ट्वैकासनसंस्थिते प्रियतमे पाश्चादुपेत्यादरा**
**देकस्याः नयने पिधाय विहितक्रीडानुबन्धच्छलः।**
**ईषद्वक्रितकन्धरः सपुलकः प्रमोल्लसन्मानसा-**
**मन्तहसिलसत्कपोलफलकां धूर्तोऽपरां चुम्बति।**[12]

ज्येष्ठा कनिष्ठा चैकासन एवोपविष्टे स्तः। अतः आदरपूर्वकं शनैः शनैः पृष्ठतः प्राप्नोति तथा तत्र गत्वा क्रीडाच्छलेन ज्येष्ठायाः, नायिकायाः नेत्रे हस्ताभ्यां पिधाय धूर्तो नायकः स्वग्रीवां मनाक् वक्रां विधाय रोमाञ्चितेक भूत्वा कनिष्ठां नायिकां चुम्बति, यस्याः मनः प्रेम्णोल्लसितं जातम्, यस्याश्च फपोलफलके हासेन सुशोभिते स्तः।

अलङ्कारयोजनादृष्ट्यास्मिन् शतके रसवत् (2) अनुमानम् (4, 5, 17) पिषभः (6), सहोक्तिः (7, 35), परिवृत्तिः (8) उत्तरम् (17), जातिः (12), भ्रान्तिमान् (18), मीलितम् (18), विशेषः (19), सूक्ष्मम् (21), रूपकम् (25), पिहितम् (26) आक्षेपः (28) उपमा (33), असंगतिः (34), अवसरः (38) लेशः (47) व्याजोक्तिः (50), परिकरः (56), प्रश्नोत्तरम् (57), परभवः (61), अहेतुः (60), असत्समुच्चयः (67), विरोधः (68), अपह्नुतिः (81), कर्तृदीपकम् (85), नाट्यालङ्कारः (89) समाधिः (105), युक्तिः (106), एवं वाक्योत्तरम् (113) अलङ्काराः परिलक्षिताः भवन्ति।

इह नाट्यालङ्कारस्योदाहरणं प्रस्तूय तद्भावसौन्दर्योपरि प्रकाशः दास्यते-

**मुग्धे मुग्धतयैव नेतुमाखिल कालः किमारभ्यते,**
**मानं धत्स्व धृतिं वधान ऋजुतां दूरे कुरु प्रेयसि।**

---

[12] अमरुशतकम् 19।

**सख्यैवं प्रतिबोधिता प्रतिवत्तस्तामह भीतानन:**
**नीचै: शंस हृदि स्थितो हि ननु मे प्राणेश्वर: श्रोष्यति।**[13]

भो सरले ! त्वाया सम्पूर्णसमय: सरलतायामेव यापित:। मानं धारय। कदाचित् पर्ति प्रति कृत्रिम: कोपोऽपि विधेय:। धीरतां धर। सरलतामपनय। सख्या: वचनं श्रुत्या तस्या: सुन्दर्या: मुखमण्डले भयरेखा अङ्किता:, तथा तया कथितम्-

शनै: शनैरेतादृशं वच: कथय, यतो मम प्राणवल्लभो नित्यं मम हृदये निवसति, स इमा: वार्त्ता: श्रोष्यति।

उत्तमनायिकाया: एतादृशं मनोज्ञं चित्रणं क्व प्राप्स्यते? एतादृशै: चित्रैरनेककवय आन्दोलिता:। अमरुक: श्रृङ्गारनिरूपणमत्यन्तसूक्ष्मतापूर्वकं कृतवान्।

अमरुकशतके पद्यानां संख्या नवत्यारभ्य पञ्चदशोत्तरशतात्मिका प्राप्यते। विभिन्नासंस्करणानामबलोकनेन ज्ञायते यत् एकापञ्चाशत्पद्यानि समानानि सन्ति। शेषपद्यानि विभिन्नारूपेषु मिलन्ति। कविना तत्कालीनविलासिदाम्पत्यजीवनस्य सुन्दरं चित्रणं कृतम्। अमरुकस्य भाषात्यन्तप्रसादपूर्णा प्रवाहयुक्ता प्राञ्जला च विद्यते।

अर्जुनवर्मदेवेन स्वस्या: रसिकमञजीवन्या: टीकाया प्रारम्भेऽमरुककवित्वस्योपमाडमरुणा दत्ता। एतेन स्पष्टमस्ति यत् अमरुकस्य सर्वाणि पद्यानि गेयनि सन्ति तथा तेषु गीतिकाव्यत्वं पूर्णतया प्राप्यते। यथा-

**अमरुककवित्वडमरुकनादेन विनिह्नुता न सञ्चरति,**
**श्रृङ्गारभणितिरन्या धन्यानां श्रवणयुगलेषु।**

वसन्ततिलका-शिखरिणी-शार्दुलविक्रिडितसदृशविशालच्छन्सां प्रयोगऽपि शुद्ध-वैदर्भीरीति-कारणात् नादसौन्दर्य विचद्यमानमस्ति। श्रृङ्गारस्य ललितलीलाया: वर्णनं माधुर्यपूर्णमस्ति। नादानुकृतिमुत्पादयति, येन प्रत्येकवाक्यं गीतिकाव्त्वं प्राप्नोति। मानवस्य रागात्मकास्तित्वे निहितत्वान् प्रेमवृत्ति: सार्वयुगीना सार्वभौमा चास्ति। इयं

---

[13] अमरुशतकम् 70।

जीवनस्य सञ्जीवनी शक्तिरस्ति तथास्यामेका स्थयिनी प्रेरिका भावसत्तास्ते। संयोगविगयो: विविधरूपाणां चित्रणे भावात्मकता निहिता विद्यते। रसराज: श्रङ्गार एवामरुककविताया: मूलरसो विद्यते।

अमरुकगीतय: स्वच्छन्दा: स्क्तनत्रा: वा सन्ति। तासु वैज्ञानिकताया: पूर्णसमावेशोऽस्ति। अबाधकल्पनाया: असीमभवुमताया: विशुद्धभावात्मकताया:, कर्मकोलाहलमुक्तचिन्ताधाराया: समवाय: प्राप्तोऽस्ति। कविरमरुक: वैयक्तिकभावधारायै अनुभूतिकृते च तदनुरूपां लयात्मिकानुभूतिं दातुं चेष्टितवान्। प्रयासेऽस्मिन्नसौ पूर्ण: सफलो विद्यते।

क्षणानां महत्ताभिव्यक्तास्ति तथा ते क्षणा: स्वस्थितिकाले समग्रजीवनभूता: प्रतीयन्ते। अत्रेन्दं स्परणीयतस्ति यत् :अभिव्यक्ते: सार्थकतास्मित्रस्ति यत् तेषां एको समग्रक्षणानां समग्रता कृतेखण्डितं प्रभावान्वित द्गाभिनिवेशं दातु प्रयतेत। अमरुके एको विचार:, एकानुभूति:, एका संक्षिप्ता स्थिति: भावविटरूपेणभिव्यक्ता: सन्ति:। हेमन्तकालीनपवनस्य चित्रणं कियत् भावात्मकमात्मनिष्ठञ्चास्ति द्रष्टव्यमेतत्-

**एते ते कुङ्कुमाक्तनकलशभरास्फलनादुच्छलन्त:,**
**पीत्वा सीत्कारिवक्त्रं शिशुहरिणदृशां हैमना वान्ति वाता:।**[14]

भ्रमरनन्ददायिकुन्दकुसुममरन्दमुपरि नीत्वा परित: प्रक्षिपन्त: शिशुहरिणदृशां सुन्दरीणां कुङ्कुमलेपयुक्तोच्चस्तनाहता: उच्छलन्त: तथा तासां सीत्करिमुखमदिरां निपीय हेमन्तकालीना: पवना: चलन्त: सन्ति।

प्रकृतेरस्मिन् संश्लिष्टचित्रे सान्द्रभावनाया: समावेशो विद्यते तथा सरचर्वणा स्वमूलरूये स्थितास्ति। नायिका विदेशागतपते: बाह्यसाधनै: स्वागतं विस्मृत्य स्वयं द्वारे गत्वा स्वाङ्गोपाङ्गैरेव स्वागतार्थ मङ्गलद्रव्याणां रचनां करोति। तया वन्दनमालाया: रूपेन स्वनीकमलनेत्र एव मार्गे विकीर्णे। सा प्रियागमनहर्षे कुन्दजात्यादिकुसुमान्यविकीर्य स्वहास्यपुष्पाण्येव परित: विकीय मार्गं ससुरभिं कृतवती।

---

[14] अमरुशतकम् 54।

प्रियायार्घ्यदानार्थ तया घटः जलपात्रं वा न गृहीतम्, अपितु शुभ्रसीक साहिताभ्यां स्वस्तनाभ्यामेव प्रियायार्घ्य दत्तम्। एवं प्रकारेण प्रियागमनसमयेऽनया नायिकया बाह्यसाधनानां प्रयोगमकृत्वा स्वान्तर्भावैरेव मङ्गलस्वागतं विहितम्। यथा-

**दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः**
**पुष्पाणां प्रकरस्मितेन रचितो नो कुन्दजात्यादिभिः।**
**दत्तः स्वेदमुचा पयोधरयुगेनार्घ्यो न कुम्भाम्भसा,**
**स्वैरेवावयवैः प्रियस्य विशतस्तन्व्याः कृतं मङ्गलम्।**[15]

सत्यप्यालम्बनविभाववर्णने स्वेदसात्त्विकभावस्यापि चित्रणं विहितमस्ति। रसचर्वणया सह गेयता विद्यते। अस्मिन् गीतलक्षणानि-सुरागता, सुस्वरता, मधुरता, अलङ्कारता च घटिता भवन्ति।

संक्षेपेणा मरुके गीतिकाव्यस्य निम्नलिखितगुणतत्त्वान्युपलभ्यन्ते-

1. **वैयक्तिकता।**
2- **संक्षिप्तता।**
3- **भावसान्द्रता**
4- **तरलता।**
5- **आत्मनिष्ठता।**
6- **अनुभूतिः।**
7- **आवेगपूर्णता।**
8- **शब्दानां ध्वनिषु निहिता तालबद्धता।**
9- **कल्पनात्मकता।**
10- **प्रम्णो व्यापकता।**
11- **आन्तरिकी सुन्दरता।**
12- **रागात्मकता।**

[15] अमरुशतकम् 45।

**13- गेयता।**

**14- संवेदनानां सघनता।**

काव्यमूल्यदृष्टया 'गीतिगोविन्दम्' एकाऽपमोऽद्भुतश्च ग्रन्थो वर्त्तते। तस्योद्दामश्रृङ्गारप्रवाहान्तस्तले रहस्यमय्याः माधुर्यभावनायाः निगूढधारा प्रवाहिता विद्यते। समग्रसंस्कृत-साहित्ये नैतत्कोट्याः मधुरान्या रचना विद्यते। संस्कृतभारत्याः सौन्दर्यमाधुर्ययोः पराकाष्ठाया अवलोकनमपेक्षितञ्चेत् गीतगोविन्दस्यानुशीलनमावश्यकंमस्ति। तस्य शब्दचित्रेषु सौन्दर्यपुपर्युपरिपरिवहति। गीतानां पदलालित्यमलौकिकमाधुर्यसञ्चारं करुते। शब्दार्थयोः सामञ्चस्यमेतादृशं मनोमुग्धकारि वर्ततियत् संस्कृतादपरिचितोऽपि जनोऽस्य रसास्वादनं करोति। ईदृशीकोमलकान्त पदावली संसारसाहित्ये दुर्लभास्ति।

गीतगोविन्दे ऋङ्गारिकीं धार्मिकीञ्च काव्यधारां सम्मेल्य विचित्रपानकं प्रस्तुतमस्ति। अग्यां नवीनकाव्यधारायां काव्यशास्त्रीयनायिकाभेदस्यापि सम्मिश्रणं विहितं यस्य स्त्रोतोऽन्तः सलिलासदृशमन्तः प्रवाहितं दृश्यते। जयदेवेन सर्वप्रथमं तेषां सर्वेषां तत्त्वानां भक्तिक्षेत्रे एकत्र सन्निवेशो विहितः यानि विशेषतया गौडीयवैष्णवानां परम्परायां पृथक्नायिकाभेदसृष्टेः कारणानि सञ्जातानि ताः सायान्यतयोत्तरकालीनभक्ति साहित्यं प्रभावयन्त्यन्ते क्रमशः क्षीणशक्तीनिभूत्वा रीतिकालीनकवीनां राधाकृष्णविषयकोक्तिषु विलीनानि भूतानि। जयदेवः विविधप्रसङ्गानां परिस्थितीनाञ्च कल्पनां विधायसः राधां विभिन्नाप्रकाराणां नायिकानांभूमिकायां प्रस्तुतवान्।

श्रृङ्गाररसस्यामनुपमः कोशो विद्यते। अस्मिन् उत्कण्ठितायाः, प्रोषितपतिकायाः, वाराकसज्जायाः, खण्डितायाः, अभिसारिकायाः, एवं स्वाधीनपतिकायाः रूपेण राधां समुपस्थापितवान्।

उत्कण्ठितायाः रूपेण राधां वर्णयन् लिखितवान्-

**सखि हे केशीमथनमुदारम्।**

रमय या सह मदनमनोरथभाविताया सविकारम् ! गीतिगोविन्दम-5, खण्डितारूपेण राधा-

**रजनिजनितगुरुजागरराकगकपायितमासनिवेशम्**

**वहति नयनमनुरागमिव स्फुटमुदितसाभिनिवेशम्।**

**हरि हरि याहि माधव ! याहि केशव ! मा वद कैतववादम्।**

**तामनुसर सरसीरुहलोचन या तव हरति विषादम्।**[16]

श्रृङ्गारस्य संयोगविप्रलम्भयोरुभयोः पक्षयोः विविधावान्तर्दशानां व्यापाराणाञ्च चित्रणं गीतगोविन्दे प्राप्यते। गीतगोविन्दस्य प्रारम्भ एव वसन्तर्तोः जातः। एकत्र वासन्तीकुसूमसुकुमारावयवा राधा कन्र्पत्वरजनितचिन्ताकुला विद्यतेऽन्यत्र ललितलवङ्गलतास्पर्शकमन्दमलयपवनयुक्ते तथा मधुकरनिकरयुते कोकिलकजितकुटीरे कृष्णस्य व्रजयुवतिभिः सह विहारश्चलन्नस्ति। श्रृङ्गारस्योद्दीपनकृतेऽयमृतुः परमसरसोऽस्ति।

विहरति हरिरिह सरसवसन्ते

**नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते।**

माधव्या मल्लिकायाश्च परिमलेन ललतो वसन्तः मुनीनामपि मनांसि प्रभावयति। अयं तरुणजनानामकारणबन्धुरस्ति। काव्यदृष्ट्यैष सन्दर्भो विशेषमहत्त्वपूर्णोऽस्ति-

**मञ्जुतरकुञ्जतलकेलिसदने,**

**विलस रतिभसहसितवदने।**

जयदेवोलिखत्- "मधुरकोमलकान्तपदावलीं श्रृणु तदा जयदेवसरस्वतीन्" अर्थात् जयदेवस्य कविना मधुरा, कोमलकान्पदावल्या युक्ता वर्त्तते। गीतिगोविन्दं रसिकस्य भक्तसमाजरन कण्ठहारोऽस्ति। एतत् कलेवरदृष्ट्या, विस्तारदृष्ट्या च परं महत्काव्यं

[16] गीतिगोविन्दम् 17।

नास्ति, परं गुणदृष्ट्यैतावन्मूल्यवत् काव्यमस्ति। यदस्य यावान् प्रभाव: वैष्णवसाहित्योपर्यस्ति, तावानन्यस्य कस्यपि काव्यस्य न वर्त्तते।

**विषय-वस्तु**

अस्मिन् द्वादशसर्गा: पञ्चविंशतिप्रबन्धाश्च सन्ति। सर्वप्रथमं मङ्गलाचणस्य, प्रस्तावनाया: तथा कविपिरचयस्य चत्वारि पद्यानि दत्तानि वर्त्तानि वर्त्तन्ते। अनन्तरमेकया पद्या तथैकेन पद्येन भगवत: दशावताराणां वर्णनमस्ति। अत एकयाष्टपद्या भगवत: स्तुति: कृता विद्यते। एतावानंश: प्राक्कथनं भवितुमर्हति। एतत्पश्चात् वास्तिविकग्रन्थस्य प्रारम्भो भवति। विरहोत्कण्ठिताया: राधाया: समक्षमुद्यानभ्रमणवसरे गोप्येका वसन्तवर्णनं करोति तथा दूरतो भगवत: कृष्णस्य रासलीलां दर्शयति, यस्यामनेकगोपिका: स्वप्रेमचेष्टाभि: सह भगवता भगवता कृष्णेन सह विहरन्ति। दृष्ट्वेदं राधेर्ष्यति तथा रुष्टा सती सा व्रजति। एतज्ज्ञात्वा कृष्णोऽपि वियोगव्यथापीडितो भूत्वा अन्यगोपिकानां संगं परित्यज्य यमुनातटे कुञ्जे राधाविषये चिन्ता कुर्वन्नास्ते। तदनन्तरं दूतीप्रयोगो विधीयते, या राधां प्रति कृष्णस्य विरहव्यथां निवेदयति।

राधापि दूतीप्रयोगं विदधाति, या कृष्णसमक्षं राधाया: विरहव्यथां निवेदयति। अत्र वयं प्रोषितपतिकाया: साधु चित्रण प्राप्नुम:। सखी राधाया: वियोगव्यथया पीडिता भूत्वा कृष्णं राधासमक्षमानेतुं चेष्टते। इदानीमेव चन्द्रोदयो जायते। कविरस्मिन् प्रसङ्गे वासकसज्जाया:, विप्रलब्धाया:, कलहान्तरितायाश्च सम्यक् चित्रणं कृतवान्। कृष्णागमने विलम्बं वीक्ष्य राधा व्याकुला जायते। तस्या: हृदयं मदनव्यश्रया छिन्नं जायते।

राधा मानिन्यस्ति। कृष्ण आगत्य तस्या: मानहारं कुर्त्तु चेष्टते। राधाकलहान्तरितास्ति। सख्यस्तां बोधयन्ति। कृष्ण: राधाया: मानहारं कृत्वा गच्छति: रात्रिप्रारम्भो जायते। सखी राधामभिसाराय प्रेरयति। पश्चात् राधाया: प्रसाधनरम्भो भवति। राधाभिलाषाणां वर्णनमागतमस्ति। सखीकृष्णोत्कण्ठा: वर्णयित्वा राधामभिसारशीघ्रतायै प्रेरयति। अभिसारो भवति।

एतत्पश्चात् स्वाधीनपतिकाया: वर्णनमायात मस्ति। रतिश्रान्तापि राधा कृष्णं प्रति स्वप्रसाधनायाभ्यर्थनां करोति। एतत्पश्चात् संयोगश्रृङ्गारवर्णनं प्रारभ्यते। वियोगान्ते संयोगस्वादोऽधिक: वर्द्धते।

काव्यप्रशंसानन्तरं गीतगोविन्दं समाप्तं जायते। काव्येऽस्मिन् वियोग-संयोगयोरुभयोरपि प्रकारयो: श्रृङ्गारस्याद्भुतं वर्णनमस्ति। काव्येऽस्मिन् परम्परामुक्तरचनाप्रणाल्या अनुसरणं नास्ति। श्लोकागद्यगीतानां त्रयाणां मिश्रितप्रयोगेण काव्येऽनुपमरचनामापधुर्यस्य समावेशो विद्यते। श्लोकोऽथवा पाठ्यपद्यं प्रायो वर्णनात्मकप्रसङ्गं यावदेव सीमिमस्ति, यस्योपयोग: कस्याप्यवस्थाविशेषस्य चित्रणे दृश्यवर्णनेऽथवा कथासूत्रनिवहि कृतोऽस्ति। येषु पात्राणां मनोदशा सूचितास्ति। तथा गीतेषु भावनुभूतेरभिव्यञ्जना कृता विद्यते। अस्मिन् वर्णनं गीतं संवाद: सर्वे परस्परं ग्रथिता: सन्ति। गीतगोविन्दस्य वसन्तवर्णनं सयोगश्रृङ्गारस्य क्रीडानां चित्रणस्य पृष्ठभूमिरस्ति। एवं तु गीतगोविन्दस्य समस्य प्रकृविवर्णनुद्दीपनरूपेणै चित्रितमभूत्। परं श्रृङ्गारस्योद्दीपनदृष्ट्या वसन्तवर्णनं विशिष्टमस्ति। विरहस्यानेकदाशानां श्रृङ्गारान्तर्गतानेकसञ्चारिणाम्, कामशास्त्रीयशैल्यां प्रतिपादितरतिकेलीनाम्, कचग्रहस्य, चुम्बनस्य, नखच्छदस्य, रदच्छदादेश्च सरसचित्रणं प्राप्यते: अभिलाषा-चिन्ता-स्मरण-मरण-व्याधि-विकविगासूर्यादिसञ्चारिभि: सह पुलकवेपथुस्वेदादिसात्विकभावानां मिश्रां श्रृङ्गाररसस्य पानकं प्रस्तौति।

अलङ्कारयोजनानिशायां गीतगोविन्दकारोऽनुप्रासप्रयोगे विलक्षणतां प्रदर्शितवान्। ललितच्छन्दसां कोमलकान्तपदावल्याश्चैतादृश: कान्तसंयोग: स्थापितोऽस्ति, यद्गीतानां पाठमात्रेण सहृयेयानां हृदये तदनुरूपरसस्य प्रादुर्भावो जायते। पदमाधुर्यमनुप्रासस्य सुभगसौन्दर्यकारणात् साहित्यिकसौन्दर्यस्य सर्जकमस्ति। प्रभावपवणकवित्वस्य प्रणयभावानाञ्च सुकुमारव्यञ्जनया काव्यमूल्यानां कतिधा वृद्धि: कृता:। यथा-

**मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिषु लोलम्।**
**चल सखि कुञ्जं सतिरिमपुञ्जं शिथिलय शीलनिचोलम्।।**[17]

---

[17] गीतिगोविन्दम् पञ्चमोसर्ग. 4।

अप्रस्तुयोजनाकृतेऽपि जयदेवः क्वचिद्दूरं न धवति। प्रस्तुतवातावरणादेवाप्रस्तुतं गृहीत्वा भावतीव्रतामुत्पदयति। कविप्रौढोक्त्या। कविप्रौढोक्या सहापह्नुतिचमत्कारः दर्शनीयोऽस्ति-

**हृदि विसलताहारो नायं भुज मनायकः,**
**कुवलयदलश्रेणी नायं कण्ठे न सा गरलद्युतिः।**
**मलयजरजो नेदं भस्म प्रियारहिते मयि,**
**प्रहर न हर भ्रान्त्यानङ्ग कुधा किमु धवसि?**[18]

कृष्णदेवः यथयति यदरे कामदेव। त्वं मां शङ्करं ज्ञात्वा प्रतिशोधभावनया क्रोधपूर्वकं कथं धावसि? मम हृदये शान्तिकामनया रक्षितं मृणालं सर्प मावगच्छ, मम ग्रीवायां नीलकमलङ्क्तिं विषचिह्नं मागवच्छ। इदानीमहं विरह्यस्मि। विरहसन्तापशान्त्यर्थ लग्नं चन्दनं शङ्करविभूतिं मावगच्छ।

उल्लिखितपद्ये सत्यानुभूतेरभावोऽस्ति। कृष्णः शिवाभावस्य यत् स्पष्टीकरणं कृतवान्, तत कविप्रौढोक्तिस्त्वस्त्येव, तत्कल्पनाधार एव मिथ्या वर्त्तते।

गीतगोविन्दस्य काव्यमूल्यं पदलालित्यस्य गीतशैल्याश्च नवरूपप्रतिष्ठादृष्ट्याधिकमस्ति। ललितच्छन्दराः कोमलकान्त पदावल्याश्चेदृशः कान्तसंयोगः स्थापितोऽस्ति, यद्गीतानां पाठमात्रेणैव सहृदयहृदयेषु तदनुरूपरसस्याविर्भाव उदेति। अस्मिन्नोकत्र संस्कृतस्य वार्णिकच्छदांसि प्रयुक्तानि, अन्यत्र च, संगीतस्य मात्रिकपदानि। एतयोः समवायेनापूर्वः काव्यामृतसञ्चारो विहितः।

सर्गबद्धतां प्रदाय जयदेवेनेदं महाकाव्यलक्षणैः समन्वितं कुर्त्तुं चेष्टितम्, परमस्मिन् महाकाव्यलक्षणानि घटितानि न भवन्ति। परं सर्वप्रथमं संस्कृतभाषायाः काव्ये सङ्गीतबद्धतायाश्चेष्टा गीतगोविन्द एव प्राप्यते। अभिव्यञ्जनायाः सफलतादृष्ट्या गीतगोविन्दं विशेषप्रसिद्धं विद्यते।

---

[18] गीतिगोविन्दम् 3 2।

संस्कृते गीतिकाव्यस्य वास्तविकरूपं जयदेवस्य गीतगोविन्दे दृश्यते। गीतिगोविन्दस्य कोमलकान्तपदावल्या युक्तानि गीतानि स्वसौन्दर्ये गेयतायाञ्चानुपमानि सन्ति। तादृशी मधुरतान्त्रसम्भवास्ति। राधाकृष्णयो: केलिक्रीडा:, तद्हास-विलासौ, राग-रागिणीषु बद्धा: भूत्वा मुखरिता: जाता:। जयदेवो गातिकाव्यक्षेत्रे एकां नवां कान्तिं कृतवान्। गीतगोविन्दस्य रचना आत्माभिव्यक्तिदृष्ट्या कृता विद्यते। अस्मिन् विचारणामेकरूपतास्ति। आराध्यायात्मनिवेदनस्योल्लासे गेयतायाति। गीतगोविन्दे राधाकृष्णस्य केलिक्रीडासु भावनाया: वनीभूतत्वात् संक्षिप्ततापयागता वर्त्तते। अतएव सफलगीतिकाव्यस्य चत्वारोऽपि धर्मा:- आत्माभिव्यक्ति:, विचाराणामेकरूपता, गेयता संक्षिप्तता च प्राप्यन्ते।

गीतगोविन्दस्य प्रत्येकाक्षरे संगीतमस्ति तथा सा शक्तिविद्यते, या स्व 'शिव' 'सुन्दर'- प्रेरणया हृत्तन्त्रीं निनादयितुं समर्थस्ति। भावप्रवणता-भाक्तरलताकारणात् प्रत्येकगीत गेयता विद्यते।

राधाया: सखी कृष्णं प्रति राधाया अनुरक्ते: विरहजन्यपीडायाश्च वर्णन करोति। कमनीयगीतै: सा राधां कृष्णं चोभावपि मिलितुं प्रेरयति। तथापि कृष्ण: राधासमीपं नागच्छति- "कथितसमयेऽपि हरिरहह न ययौ वनम्"। चन्द्रोदने जाते राधा प्रणयव्यथयाधीरा भूत्वा स्वोद्दीप्तानुरागस्याभिव्यञ्जनां परममधुरगीतेषु करोति। नि:सन्देहं गीतगोविन्दस्य गीतानां पदलालित्यलौकिकमाधुर्यस्य सञ्चारं करोति। दन्दसां नादसौन्दर्य त्वद्वितीयमस्ति-

**हरिरभिसरति वहति मधुपवने।**
**किमपरमधिकसुखं सखि भुवने।।1।।**
**माधवे मा कुरु मानमये।।ध्रुवपदम्।।**
**तालफलादपि गुरुतिसरसम्।**
**किं विफलीकुरुषे कुचकलशम्।।2।।**
**कति न कथितमिदमनुपदमचिरम्।**
**मा परिहर हरितमतिशयरुचिरम्।।3।।**

**किमिति विषीदसि रोदिषि विकला।**

**विहसति युवतिसभा तव सकला।।4।।**

**सजल-नलिनदल-शीतल-शयने।**

**हरिमवलोकय सफलय नयने।।5।।**

**श्रृणु मम वचनमनीहितभेदम्।**

**हरिरुपयातु वदतु बहु मधुरम्।**

**किमिति करोषि हृदयमतिविधुरम्।।7।।**

**श्रीजयदेवभणिमतिललितम्,**

**सुखयतु रसिकजनं हरिचरितम्।।8।।**

एवं प्रकारेण गीतगोविन्दस्य प्रत्येकाष्टकं संगीतरागैः तालैश्च गीयते। एतङ्गीतं गुर्जरी रागे यतियाले गीतमस्ति।

गीतगोविन्दस्य प्रथमसर्गस्य प्रथमाष्टकं मालवारागस्यैकताले निबद्धमस्ति। अस्मिन्नेव सर्गे द्वितीयाष्टकं गुर्जरीरागे यतिताले, तृतीयाष्टकं वसन्तरागे रूपकताले, चतुर्थाष्टकञ्च रामगिरिरागे यतिताले निबद्धानि सन्ति। द्वितीयसर्गस्य प्रथमाष्टकं गुर्जरीरागे यतिताले तथा द्वितीयाष्टकं मालवरागे, एकतालीताले निबद्धेस्तः। तृतीयसर्गस्याष्टकं गुर्जरीरागे यतिताले लिखितमस्ति। चतुर्थसर्गस्य प्रथमाष्टकं कानडरागे, एकतालीताले तथा तृतीयाष्टकं देखाख्यरागे, एकतालीताले निबद्धे स्तः। पञ्चमसर्गस्य पञ्चमाष्टकं देशवराडी रागे, पडिमताले तथा द्वितीयगीतं गुर्जरीरागे, एकतालीताले निबद्धे स्तः। षष्ठसर्गस्य गीतं 'गुणकारी'-रागे रूपकताले लिखितमस्ति। सप्तमसर्गस्य प्रथमगीतं मालवरागे परिमठताले द्वितीयगीतं वसन्तरागे, एकतालीताले, तृतीयगीतं गुर्जरीरागे, एकतालीताले, चतुर्थगीतं देशारवरागे गौडी वामठरागे, लिखितानि सन्ति। अष्टमसर्गस्य गीतं भैरवरागे यतिताले निबद्धमस्ति। नवमसर्गे गुर्जरी रागः, दशमसर्गे देशीभावडरागः, एकादशसर्गे वसन्तरागः, वैराडीरागश्चैवं द्वादशसर्गे विभासरागः प्रयुक्ताः सन्ति।

एतेषां रागतालानां व्यवहारेण गीतगोविन्द सङ्गीतात्मकतायाः पूर्ण सर्जनं कृतम्। एतद्रागरागिणीनामाधारे काव्यस्यैतस्य गीतानि गीयन्ते।

गीतगोविन्दे मनोमुग्धकारिण्याः शक्त्याः समावेशेन गेयता वर्तमानास्ति। अस्मिन् स्वानुभूतिपरकाण्ड्नेकचित्राङ्कितानि सन्ति। गेपतायाः सङ्गीतात्मकतायाश्चातिरिक्ता गीतिकाव्यस्यानेकगुणाः अस्मिन् समविष्टाः सन्ति-

**1. श्रृङ्गारभावनायाः अनुभूतिपूर्णाभिव्यक्ति।**

**2- रागविशेषयुक्तात्मनि ता।**

**3- वैयक्तिक्यनुभूतिः।**

**4- संवेदनशीलता।**

**5- भावातिरेकता।**

**6- पदलालित्यं चित्रात्मकता च।**

**7- समाहितप्रभावः।**

**8- संक्षिप्तता।**

**9- मार्मिकता।**

**10- अन्तवृत्तेः प्रधानता।**

**11- मधुरता**

## रामगीतगोविन्दम्

रामगीतगोविन्दस्य रचयिता कविर्जयदेवोऽस्ति। कित्वयं जयदेवः गीतगोविन्दस्य रचयितुः जयदेवाभिन्नो वर्त्तते। ऐतिहासिकानां गतमस्ति यदद्ययावत् त्रयाणां जयदेवानां सूचता विद्यते। प्रथमो जयदेव उत्कलीयो विद्यते, येन गीतगोविन्दं प्रणीतम्, द्वितीयो जयदेवः चन्द्रालोकस्य प्रसन्नराघवस्य च रचयिता दाक्षिणात्यब्राह्मणोऽस्ति। अस्य मातु नाम सुमित्रा तथा पितुः नाम महादेवः आस्ताम्। अयं विदर्भस्य कुण्डिनपुरवास्तव्य आसीत्। द्वितीय जयदेवः नाटककारः अलङ्कारशस्त्रप्रणेता तथा दार्शनिकः आसीत्। अस्य महाकविजयदेवस्योपाधिः 'पीयूषवर्षः' अस्ति।

चन्द्रलोके कथितमस्ति-

**चन्द्रलोकमयं स्वयं वितनुते पीयूषवर्षः कृती।**

एकोऽन्यः तार्किकप्रवरपक्षधरः वङ्गीयविद्वानभवत्, अस्य रामस्य षोडशी शताब्दी विद्यते। प्रस्तुतरामगीतगोविन्दस्य रचयिता जयदेवः मिथिलानिवासी आसीत्। स स्वयं स्वरचनाविषये लिखितवान्-

**श्रीमद्विदेहनृपदेशविशेषवासो निःशेषभूमिपतिमण्डलमाननीयः,**
**एतच्चकार वरगानरसप्रधानं काव्यं कविप्रकारमैलिविभूषणं सत्।।**[19]

**श्रीमद्रामायणक्षीरसागरान्मन्दरोपमः,**
**जयदेवो रामगीतगोविन्दं रत्नमाकरोत्।**[20]

उपर्युक्ताभ्यां पदाभ्यां स्पष्टमस्ति यतृ रामगीतगोविनदस्य रचनां मिथिलानिवासी जयदेवकविः रसप्रधानां रामकथां गृहीत्वा कृतवान्।

यद्यपि कविः स्वयसमयसम्बन्धे न क्वापि कमपि निर्देशं कृतवान्, तथापि ग्रन्थस्य भाषाशैल्याः पूर्वापरसम्बन्धस्य चाध्ययनेनानुमीयते यदस्य रचना वि. सं. 1400 निकटे जाताऽभविष्यत्।

रामगीतगोविन्दस्य संक्षिप्तं कथावस्तु-

गीतिकाव्येऽस्मिन् रामकथाङ्ता विद्यते। कविः कथावस्तु षट्सर्गेषु चतुर्विंशतिप्रबन्धेषु च विभाजितवान्। आरम्भे मङ्गलाचरणानन्तरं कविः कथितवान् यत् यदि रामचरणयोः प्रेम भवेत् अथ काव्यकलाज्ञानाय कौतुकं स्यात् तदा जयदेवकविनिर्मितं गीतगोविन्दमिदं पठेत्-

**यदि रामपदाम्बुजे रतिर्यदि वा काव्यकलासु कौतुकम्।**

---

[19] रामगीतगोविन्दम् पृ. 89, 24/4।
[20] रामगीतगोविन्दम् पृ 90, 24/5, वेंकटेश्वर प्रेस, मुबई।

SHRI HANSA MEHTA LIBRARY M. S. University of Baroda

**पठनीयमिदं तदौजसा रुचिर श्रीजयदेवनिर्मितम्।**[21]

प्रथमगीते मीन-कूर्म-वराह-नरहरि-वामन-परशुराम-राम-कृष्ण-बुद्ध-कल्क्यवता-राणां स्तुतिः वर्त्तति। द्वितीयगीते आराध्यस्य रामस्य स्तुतिर्वर्तति। स्तवनेऽस्मिन् रामस्य प्रमुखकार्याणां निर्देशो विद्यते। तृतीयगीते रामावतारस्य कथनं कुर्वता रामस्य रम्यबालरूपस्य चित्रणं निहितम्। कविः कथयति-

**इन्द्रनीलाभनुमतनुशतकोटिरुचिमिन्दुमुखचन्द्रमुरुहारम्।**
**कौस्तुभामुक्तकन्धर मरुणफणिपदम्बुरुहनयनमलितारम्।।**[22]

**कम्बुनिभकण्ठमतिनीलचिकुरावलीविजितलवाहसङ्घातम्।**
**गूढ़तरजत्रुमाजानुभुजदण्डधरमुरसि भृगुचरणजलजातम्।।**[23]

**कनकमयपट्टमण्डिललाटस्थलं कुन्दकुंकुमाभरदभासम्,**
**रुचिरमखसूत्रभृतमिन्दिरासङ्कुलं पीतकौशेयशुभवासम्।**[24]

एवं प्रकारेण तृतीयगीते रामस्य रम्यरूपं चित्रितमस्ति। तथास्मिन्नोवगीतेऽग्रेऽवतारभेदेन रामलक्ष्मणभरतशत्रुघ्नानमपि वर्णनं विद्यते। चतुर्थगीते रामोऽध्यायाः प्रतोलीषु वित्तरति तथा ते नानाप्रकारेण नागरिकाणां मनांसि मोहयन्ति। रामस्य रम्यरूपं वीक्ष्य नागरिकाः प्रसन्नाः भवन्ति तथा स्वभाग्यं प्रशंसन्ति। गीतेऽस्मिन् कविः रामस्य वेशभूषां तथा तद्रूपलावण्यं प्रशंसितवान्। कविः कथयति-

**नागलतारसरापधत्पल्लवमयहृदि हासम्।**
**कीरमुखाकृतिधीरसुगन्धसमीरणनावासम्।।**[25]

---

21 रामगीतगोविन्दम् 4।
22 रामगीतगोविन्दम् 3/2।
23 रामगीतगोविन्दम् 3/3।
24 रामगीतगोविन्दम् 3/5।
25 रामगीतगोविन्दम् 4/14।

महाराजो दशरथश्चतुरोऽवाप्य सुतान् परं प्रसीदति। विश्वत्रिः एकस्मिन् दिनेऽयोध्यामागच्छति।

पञ्चमगीते कथितमस्ति यत् विश्वमित्रः रामस्य कोमलं करं स्पृष्ट्वा कथयति यत् जीवनं सफलयितुं रामेण सर्वतोभावेनात्मा समर्पयितथ्यः। गीतेऽस्मिन्नापि कविना रामस्य मनोहरवेशभूषायाः चित्रणं कृतम्। रामो विश्वामित्रस्य यज्ञरक्षायै तेन सह चलति। मार्गे रामः जनकष्टदायिनीं ताटिकां हन्ति। रामो यदा विश्वामित्राश्रमं प्राप्नोति तदा सर्वे मुनयः तद्रूपसौन्दर्यं निभाल्य मुग्धाः भवन्ति।

षष्ठगीतेन द्वितीयसर्गारम्भो जायते। असिमन् गीते सर्वर्षयः रामं स्तुवन्ति। वाराहपरशुरामादिरूपेषु रामं स्तुवन्ति। यज्ञकालेऽनेके राक्षसा आगत्य विघ्नमुत्पाद यन्ति। परं रामः ताः समस्तविघ्नाधाः विनाश्य राक्षसान् हन्ति। समाप्ते यज्ञे रामः विश्वामित्रेण सह जनकस्य धनुर्यज्ञस्य दर्शनार्थं मिथिलां व्रजति। मार्गेऽसावहल्योद्वारं करोति ततः गङ्गामुत्तीर्य मिथिलां प्राप्नोति।

सप्तमगीतेन रामः लक्ष्मणं प्रति मिथिलाया महाराजजनकस्य समृद्धि-चित्रणं करोति। जनकः रामलक्ष्मणविषये विश्वामित्रं पृच्छति। विश्वामित्रश्च तत्परिचयं प्रस्तौति। रामः शिवपिनाकमवलोकयति तथा सरलया धनुर्भङ्गं करोति। धनुर्भङ्गेन सर्वत्र रामस्य जयघोषः श्रूयते।

अष्टममगीते धनुर्भङ्गं ज्ञात्वा परशुराम आगच्छति। गीतस्य प्रारम्भो कविः परशुरामस्य वेशभूषां वर्णितवान्। परशुरामः क्रुध्यति तथा रामस्य शक्तिपरीक्षां विधाय प्रसीदति।

नवमगोते रामावतारं ज्ञात्वा परशुरामः रामं स्तौति। गीतिरियं परममधुरा ललिता च विद्यते। कविना लिखितम्-

**जय रामचन्द्र कमला-विहार।**
**जय कोशलेश करुणावतार।।**

-ध्रुवपदम्।

**रघुवंशकमलकान-दिनेश।**
**कन्दर्पकोटिकमनीयवेश।।2।।**

**कालाग्निसदृशकोपातिरेक,**
**गन्धर्वगीतपूरितविवेक।।3।।**

-नवमगीत।

परशुरामः रामस्य गुणान् गीत्वा स्वाश्रमं निवर्त्तते।

दशमगीतेन तृतीयसर्गः प्रारभ्यते। अस्मिन् दशमगीते जनकपुरोधाः सतानन्द रामस्य रूपगुणान् प्रशंसति तथा तद्वेषभूषां वर्णयति। एतत्पश्चात्, जनकः कुलपति वशिष्ठं प्रार्थयते यत् हे कुलगुरो ! भवान् मम हितेच्छुकोऽस्ति। सम्प्रति मया किं विधेयम्? आज्ञापयतु। वशिष्ठः जनकं रामचरणारविन्दयोः पूजार्थमादिशति।

एकादशगीते जनकः रामचरणयोः महत्वं प्रतिपादयन् स्तौति। स रामस्य पादौ प्रक्षालयति। विधिः विवाहस्य सम्पाद्यते। जनक युतके गाः, महिषीः तुरंगान्, गजान्, शिविकाः, नानावस्त्राभूषणानि, दास-दासीश्च ददाति। विवाहे सम्पन्ने राम अयोध्यामायाति।

द्वादशगीते रामस्य सरयूतीरविहारस्य वर्णनमस्ति। प्रसङ्गेऽस्मिन् जलस्य, तटस्य, जलविहारणशीलहंराचक्रवाकादिपक्षिणामापि चित्रणमस्ति। कविजयदेवेन सरय्वाः वर्णनं सरसं साङ्गोपाङ्गं च विहितम्। रामः प्रत्यहं विचारगोष्ठ्या, शीलेन, यज्ञेन चित्रेण, वाद्येन, कलया, अश्वारोहणादिभिः महाराजदशरथस्य मनोरञ्जनं करोति स्म। एकदिने महाराजदशरथेन दर्पणे कर्णमूले श्वेतकेशाः विलोकिताः, येन तन्मनसि व्याकुलताऽजायत तथा तेन कुलगुरुवशिष्ठेन सह रामस्य राज्याभिषेकपरामर्शो विहितः।

त्रयोदशगीते कैकेय्याः वरयाञ्चायाः निरूपणमस्ति। कैकेयी नृपं दशरथं रामस्य वनगमनं भरतस्य च राज्याभिषेकं याचते। दशरथो वरं ददाति। रामः लक्ष्मणेन सीतया सह वनं प्रयाति।

चतुर्दशगीते लक्ष्मणो रामं प्रति प्रयागमत्त्व वर्णयति-

**पश्य, पश्य रघुवीर प्रयागम्,**

**मज्जदखिलमुनिगणमतिरागम्।**

**सीतया सह सन्ततमेतत्।**

-ध्रुवपदम्।

पञ्चदशगीतेन चतुर्थसर्गारम्भो भवति। गीतेऽस्मिन् रामः सीतां चित्रकूटशोभां दर्शयति। चित्रकूटस्य पशुपक्षिणां मणिमणिक्यानाम्, प्राकृतिकरम्यप्रदेशानाञ्च चित्रणं करोति। कविरस्मिन् सन्दर्भे निर्भरसलिलशीकराणां कोकविरावादेश्च सजीवं निरूपणम् विहितवान्। रामचन्द्रः दण्डकवनं प्राप्नोति।

षोडशगीते दण्डकवनचारुता चर्चितास्ति। दण्डकवने सर्वे मुनयः निर्भयाः भूत्वा निवसन्ति। अत्रत्याः पशुपक्षिणोऽपि प्रेमपूर्वकं निवसन्ति। ऋष्यमूकपर्वते रामस्य हनुमता सुग्रीवेण च सह मित्रता जायते।

सप्तदशगीते सुग्रीवः स्वमनसि रामनामहत्त्वं स्मरति तथा तस्योदारतायाः स्नेहस्य शीलस्य च चिन्तनं विधाय मनसि आह्लादितो भवति। सीताहरणकारणात् रामः चिन्तितो विद्यते तथा सुग्रीवः सीतान्विषणार्थं वानरसेनामादिशति।

अष्टादशसर्गे हनुमान् लङ्कां गत्वा तत्रत्यभीषतामबलोकयति तथा निःशङ्को भूत्वा लङ्कायां सीताया अन्वेषणं करोति। हनुमान सीतामशोकवाटिकायां प्राप्य रामस्य मुद्रिकां समर्पयति तथा सीतायै धैर्यं दत्वा तस्याश्चूड़ामणिं गृहीत्वा पुनः निवर्तते।

एकोनविंशगीते हनुमान् रामस्य सम्मुखे सीतायाः दशायाः वर्णनं करोति। अतः पञ्चसर्गः प्रारभ्यते। गीतेऽस्मिन् सीतायाः दयनीयदशायाश्चित्रणमस्ति।

विंशगीते लक्ष्मण: रामाय समुद्रोत्तरणाय सेतुनिर्माणपरामर्श ददाति। वानरसेना सेतुं निर्माति। नीलनीलाभ्यां निर्माणकार्यविधि: सञ्चाल्यते। सेतुनिर्माणानन्तरं रामसेना समुद्रमुत्तीर्य लङ्कां प्राप्नोति तथा परिवेष्ट्यति। राक्षससेनावानरसेनयोर्मध्ये महद्युद्धं भवति।

एकविंशगीते रामरावणयुद्धवर्णनं वर्त्तते। राम: कुम्भकर्णरावणवधं करोति।

द्वाविंशे देवा: रामं स्तुवन्ति तथा नभस: प्रसूनं वर्षन्ति।

त्रयोविंशगीतेन षष्ठसर्गारम्भो भवति। गीतेऽस्मिन् राम अयोध्यामायाति तथा तत्र नागरिका: रामस्य दर्शनं कृत्वाऽत्यन्तं प्रसीदन्ति तथा तं स्तुवन्ति।

चतुर्विंशगीते वैतालिका: प्रात: काले रामं शयनात् प्रबोधयितुं गुणान् गायन्ति। ते मधुरालापेन गायन्ति।

**उदयति भानुरयं विधुना सममेति समस्ततमिस्त्रम्।**
**दधति नभोऽरुणतामरुणेन बभूव सरोजसमिश्रम्।।**[26]

**विकसति पद्मवनं सकलं विहगावलिदातिनिदानम्,**
**हंसविरावविबोधितचक्रनिचगतसर्वविषादम्।**[27]

रामस्तवनमहात्म्येन सह गीतिकाव्यं समाप्यते।

## रामगीतगोविन्दम्

तालबद्धं गीतिकाव्यमस्ति। प्रथमजयदेवस्य गीतगोविन्दानुकरणोपरि तृतीयजयदेवेवेदं रामगीतगोविन्दं व्यरति। गीतगोविन्दस्य वर्ण्यविषय: कृष्णेन सम्बद्ध आसीत् तथा कृतमस्ति। एवमेवास्मिन् गीतिकाव्ये रामेण सम्बद्धाया: अयोध्याया:,

---
[26] रामगीतगोविन्दम् 24/2।
[27] रामगीतगोविन्दम् 24/3।

सरय्वा:, चित्रकूटस्य, दण्डारण्यादीनां स्थानानां मधुरचित्रणमस्ति। निश्चयत एतत् गीतगोविन्दस्यानुकरणमस्ति तथा कतिपयललितपदानि गीतगोविन्दात् गृहीतानि सन्ति।

अलङ्कारयोजनादृष्ट्या गीतिकाव्येऽस्मिन् रूपकोपमोपमोत्प्रक्षाद्यर्थालङ्कारा अनुप्रासथमकादिशब्दालङ्काराश्च समाविष्टा: सन्ति। ललितमधुरपदयो: योजनां विधायैतद्गीतिकाव्यरमणीयतासम्पादने कविना चेष्टितम्। मानव: कवितायां ललितपदै: स्वसहजकलात्मकप्रवृत्ते: परिवयं ददाति: यदास्माकं भावनोद्दप्ता जायते, तदास्माकं वाण्यपि स्वमेवोद्दीप्ता जायते। मानस: ओजस: मान्यममावेगोऽस्ति, वाण्या ओजस सहजामाध्यमस्ति 'अतिशयोक्ति:'। यत: आत्मदशनप्रदर्शनयोरतिशयतत्वमनिवार्यतो भवति। अतिशयोक्तेरर्थोऽस्तिअसाधारण्युक्ति:।

उपमालङ्कार: समस्तसादृश्यमूलकालङ्काराणां मूलं मन्यते। सादृश्याभावेऽस्यालङ्कारस्य स्थिति: न सम्भाव्यते। एवं तु कवितात्मा भाव: विचार: कल्पना च विद्यते। एतैरेव कवितायां स्थायित्वमयाति। सादृश्यं कविता-कामिनीं सुन्दरीमधिका निर्गाय स्थायित्ववृद्धिं करोति। ललितपदशय्या अलंकृतायामपि चमत्कारमुत्पादयति। अत्र प्रस्तुतगीतिकाव्यम् कानिचनोदाहरणानि प्रस्तूयन्ते। उपमाया: योजना निम्नलिखितपद्येषु विद्यते-

**रामवदनमितञ्चु विलोकय।**

**शारदकोटिशिनमिव निर्मलमक्षिचकोरं रोपय।।**[28]

पद्येऽस्मिन् 'शारदकोटिशिनमिव' वाक्यांशे उपमस्ति। रामस्य मुखं शतशरत्कालीनविधूनां निर्मलतासदृशं स्वच्छं मनोज्ञं तथाकर्षकं विद्यते। अस्य मुखस्यावलोकनाय अक्षिचकोरो नियोजनीय। अक्षिचकोरे रूपकस्यापि सम्भावना विद्यते। यतोऽक्षिणि चकोरारोप: कृतोऽस्ति। प्रकारान्तरेण समस्तपद्यस्य सहैव ग्रहणेऽतिशयोक्तिरपि सम्भाव्यते।

रामस्य रूपचित्रणे उपमाया: अन्यमपि द्रष्टव्यमुदाहरणाम्-

**क्षीरपयोनिधिवीचिविनिन्दकविशमनोहरहासम्,**

---

[28] रामगीतगोविन्दम् 4/1, पृ 16।

**कुन्दकुसुमकमनीयलसदृशनावलिकिरणविकाशम्।।**[29]

क्षीरसमुद्रस्य तरङ्गसदृशे मनोहरहास्ये सुन्दरकुन्दकुसुमसदृशायां दशनावल्यामप्युपमास्ति। उपमायाः (राम. 2/4, पृ. 10) (2/1 पृ. 10) (5/20, पृ. 24) प्रयोगे उपलब्धोऽस्ति। रूपकस्य सुन्दरमुदाहरणं निम्नप्रकारमस्ति-

**रघुवंशकमलकाननदिनेश।**
**कन्दर्पकोटिवरसीगवेश।।**[30]

अत्र 'रघुवंशकमलकाननदिनेशे' रूपकमस्ति। रामः रघुवंशरूपकमलकाननविकासाय सूर्योऽस्ति। रामभावनादृष्ट्या गीतिकाव्येऽस्मिन् वीर-श्रृङ्गार-भयानक-रसानां सुन्दरपरिपाकोऽस्ति। एकविंशगीते रामरावणयुद्धप्रसङ्गे वीररसस्य सुन्दरं चित्रणमायातमस्ति। वीरसम्बन्धि-विभावनुभावसञ्चारिभावानां पूर्णा सामग्री विद्यते। रामः रावणः भर्त्सयन् कथयति-

**तिष्ठ विमूढमते समरे दशकण्ठमिति प्रवदन्तम्,**
**प्रस्फुरिताधरपल्लवयुगप्रविभासिमनोहरदन्तम्।।**[31]

रामस्स वीरवेषं चित्रवेषं चित्रयन् लिखितवान्-
**करकोदण्डशरप्रभया लसमानसमस्तशरीरम्,**
**शकसमर्पितवर्मभूतं समराब्दिविलङ्घनधीरम्।।**[32]

श्रृङ्गाररसस्य चित्रणसन्दर्भे संयोगवियोगावुभावपि पक्षौ लभ्येते। संयोगश्रृङ्गाररूपेण सरयूतटे रामविहारस्य चित्रणं कृतमस्ति। यथा-

**विहरति हरिरिह सरयूकूले,**

[29] रामगीतगोविन्दम् पृ 16, 4/3।
[30] रामगीतगोविन्दम् पृ 39, 9, 2।
[31] रामगीतगोविन्दम् पृ 69, 21/7।
[32] रामगीतगोविन्दम् पृ 68, 21/3।

**पद्मरागचामीकरमकरतबद्धविविधतरुमले।।**[33]

**सादरमज्जदमितयुवतीकुचकुङ्कुमपिङ्गलनीरे।**
**शमदमादिसाधनविवेकवशमुनिजनसंकुलतीरे।।**[34]

अशोकवने स्थितायाः विरहाग्निपीडितायाः सीतायाः दयनीयावस्थायाः चित्रणं हनुमता कृतम्। यद्यप्यस्मिन् प्रसङ्गे विभावादेरुत्पर्त्तिर्न जातास्ति, तथा वियोगावस्था मूर्त्तिमती वभूव। यथा-

**विरहतया विदधाति न हासम्।**
**जनयति वङ्तिविषमनिसम्।।**[35]
**कृशशरीगमिरकमशयदीना।**
**भूमिशयासनसलिलविहीना।।**[36]

एवमेव प्रसाद-माधुर्य्यौजसां समावेशोऽपि काव्येऽस्मिन् निहितोऽस्तिः। युद्धवर्णनप्रसङ्गे समुद्रसेतुबन्धनप्रसङ्गे चौजोगुणोऽस्ति। प्रसादमाधुर्य्ययोस्तु स्थितिः सर्वत्र विद्यते।

सङ्गीततत्त्वदृष्ट्यापि गीतिकाव्यमेतत् समृद्धमस्ति। अस्मिन् वसन्तरागः (राम गी. 2), मालवरागः (गीत 15), गुर्जरीरागः (गीत 3, 12, 20), रामकरी (गीत 6, 10), आशावरीरागः (गीत 4, 7, 8, 15, 16), देशबराडीरागः (गीत 11), देशरागः (गीत 19), तथा भैरवीरागः प्रयुक्ताः सन्ति। रूपकतालः (गीत 1, 3, 6, 5, 7, 8, 12, 15, 16, 18) प्रतिमण्ठतालः (गीत 5), अष्टतालितालः (गीत 11), यतितालः (गीत 13) प्रयुक्ताः सन्ति। वसन्तरागे उभयोः मध्यमयोः ललिताङ्गेन गृह्येते। उत्तराङ्गप्रधानत्वात् अस्मिन् तारषड्जे विशेषं बलंद ीयते। अस्य परजरागस्य च स्वराः सादृशाः सन्ति। अतः मे ध रें सां और रें नि ध पमे ग मे ग प्रयोगणायं रागः शीघ्रमेव स्पष्टो जायते। मालवरागस्य गणना प्रातः

33 रामगीतगोविन्दम् पृ 51, 21/1।
34 रामगीतगोविन्दम् पृ. 51, 12/2।
35 रामगीतगोविन्दम् पृ 73, 19/6।
36 रामगीतगोविन्दम् पृ 72, 19/2।

सान्ध्याकाले च गीयमानरागेषु विधीयते। सांध्यकालीनरागेषु विशेषरूपेणास्य स्थानं विद्यते। अस्य विचित्रता 'रे ग ध' स्वरेषु निर्भरास्ति। उत्तरभारते 'आशवरी'-रागे कोमलर्षभं संयोज्य गानप्रचारोऽस्ति। तं च कोमलर्षभस्याशावरीं कथयन्ति। परं दाक्षिणात्या इमं तीव्रर्षभेण गायन्ति। रागस्यास्य वैचित्र्यं ग, प, ध स्वरेषु निर्भरमस्ति। अवरोहेऽयं रागः विशेषरूपेण विकसति।

रामकरीरागस्य साधारणरूपं भैवररगसदृशमस्ति। अस्य रास्य प्रथमप्रकारे 'म नि' स्वरावरोहे वर्जितौ स्तः। द्वितीयप्रकारे आरोहावरोहयोः सप्तपि स्वराः प्रयुज्यन्ते। परमयं प्रकारः भैरवरागेण सह मिलति। पार्थक्यमेतावदेवास्ति यत् अस्य मध्य-तार-स्थानयोः विस्तारो भवति। अस्य तृतीयप्रकारे उभौ मकारौ तथौभौ 'नि' स्वरौ प्रयुज्येते। एवं तीव्र 'म' स्य कोमल 'ने' श्च प्रयोगः विचित्रप्रकारेण भवति। म, प, ध, नि, ध, प, म, ग, रे, सा एवं त्रय स्वराः रामकरीरागस्यास्मिन् प्रकारे मिलन्ति।

भैरवः परं प्राचीनः गम्भीररागो वर्त्तते। रागेऽस्मिन् रे-ध स्वरावत्यन्तमहत्त्व पूर्णौ विद्येते। भैरवस्यारोहे ऋषभस्याल्पत्वं तिष्ठति तथा मध्यममात् ऋषभोपरि वक्रतया गमनं माधुर्यमस्य वर्द्धते।

देशरागस्य स्वरूपं सोरठारागेण मिलति। रागेऽस्मिन् गान्धारस्वरः स्पष्टरूपेण गृह्यते। अस्यारोहे 'ग-ध' स्वरौ वर्जितौ स्तः। आरोहे- सा रे म प नि सां तथावरोहे सां नि ध प म ग रे सा स्वराणां व्यवहारो भवति।

गुर्जररागे आरोहे सा रे ग म ध नि सां तथावरोहे सां नि ध प म ग सा स्वराः प्रयुज्यन्ते। अयं प्रातः कालीनो रागोऽस्ति। एवं रामगीतगोविन्दं गीतितत्त्वैः पूर्णमस्ति।

**गीतिगिरीशम्**

यद्यपि गीतिगिरीशं प्रकाशितं विद्यते परं तस्यानुपलब्धेः तस्योपरि प्रकाशः सम्भवो नास्ति। अस्योपलब्धैः कैश्च पद्यैरस्य मौलिकता सिद्ध्यति।

**गीतवीतराग:**

गीतवीतरागस्य रचना गीतगोविन्दाधारे श्रीमद्भिनवपण्डिताचार्ययारुकीर्त्तिमहोदयेन कृता। अयं दक्षिणभारतस्थितश्रवणबेलगोलानामजैनमठस्य भट्टारक आसीत्। इदं स्थानं 'मैसूर' राज्येऽवस्थितमस्ति। श्रवणबेलगोलाया: समस्तभट्टारकाणां नाम वारुकीर्ति: प्राप्यते। अस्य यठस्य भट्टारके जातमात्र एव नाम परिवर्त्तितमभवत् तथा 'चारुकीर्त्ति' नामकरणमभूत्। एतत् तत्सिहासनस्यभट्टारणामुपाधिनाम वर्तते। संस्कृत प्राकृत भाषयो: मूर्धन्यविद्वान् डा. ए. एन. उपाध्ये महोदय: शिवाजी विश्वविद्यालयस्य पत्रे (जनरले) कियतीनां पाण्डुलिपीनामाधारे गीतवीतरागस्य रचयितरि तद्विषयवस्तुनि च परम: प्रकाशो दत्त:। निबन्धेऽस्मिन् डॉ. उपाध्ये महोदयेन काव्यस्यास्य कन्नड-टीकाया अपि निर्देश: कृत:। अस्य ग्रन्थस्य प्रशस्तेराधारे रचयितु: पण्डिताचार्यस्य जन्म सिहंपुरऽभवत्। यदायं श्रवणबेलगोलायां भट्टारकपदमधिगतवान्, तदास्योपाधि: चारुकीर्तिरभूत्। असौ ग्रन्थस्यास्य प्रणयनं श्रवणबेलगोलयां परमपूज्यगोम्मटस्वामिन: चरणसमीपे कृतवान्। काव्यान्ते प्रशस्तिरङ्किकतास्ति, या निम्नप्रकारा विद्यते-

**गाङ्गेयवंशाम्बधिपूर्णचन्द्र: यो देवराजोञ्जनि राजपुत्र:,**
**तस्यानुरोधेन च गीवीतरागप्रबन्धं मुनिपश्चचकार।।**
**द्राविड़देशविशिष्टे सिहंपुरे लब्धशस्तजन्मासौ,**
**बेलुनोलपण्डितवर्यश्चके श्रीवृषभनाथवरचरितम्।।**
**स्वस्ति श्रीबेलगोले दोर्बलिजिननिकटे कुन्दकुन्दावयेनोऽ-**
**भूत् स्तुत्य: पुस्तकाङ्कश्रुततुणभरण: ख्यातदेशीगणार्य:,**
**विस्तीर्णशेषरीतिप्रिगुणरसभृतं गीतयुग्वीतरागम्**
**शस्ताधीशप्रबन्धं बुधनुतमतनोत् पण्डिताचार्यवर्य:।**

**इति श्रीमद्रायराजगुरुभूरामण्डलाचार्यवर्यमहावादवादीश्चराय-वादिपितामहसकलविद्वज्जनचकवर्त्तिबल्लाड्रायजीवरक्षापालकृत्याद्यनेकविरुदावली**

**वराजित श्रीमद्बेलु गुलसिद्धसिंहासनाधीश्वरश्रीमदभिन- वचारुकीर्त्तिपण्डिताचार्यवर्यप्र णोतगीतवीत- रागागिधानष्टपदी समाप्ता।**

-श्री जैनसिद्धान्तभवन, आराकी पाण्डुलिपि।

काव्यरचयित्रा स्वमयस्य परिचयो न दत्तः। वोम्भरस्रस्य टीका (1842-44) मध्ये लिखितास्ति। तथा प्राप्त पाण्डुलिपिभ्य एका पाण्डुलिपिः (1758) खीष्टाब्दस्योपलब्धास्ति। अतएवास्य काव्यस्य रचना 1758 खीष्टाब्दात् पूर्वमभूत्। पार्श्वाभ्युदयस्य टीका चतुर्दशरखीष्टाब्देरभूत्। अत एव गीतवीतरागस्य कर्तुः समयः 1400-1758 खीष्टाब्दस्य मध्येऽस्ति।

**वर्ण्यविषयः**

गीतवीतरागः गीतवीतरागप्रबन्धोऽपि कथितः। अस्मिन् कविना स्वाराध्यस्यषभदेवस्य दशजन्मानामाख्यानं गीतेषु निबद्धवान्। सूक्ष्मकथावस्तु चतुर्विंशतिप्रबन्धो विभक्तमस्ति। प्रथमप्रबन्धे महाबलस्य धर्मप्रशंसा, द्वितीये महाकाव्य वैराग्योत्पादनम्, तृतीये ललिताङ्गस्य वनविहारः, चतुर्थे श्रीमत्याः जातिस्मरणम् पञ्चमे वज्रजंधस्य पट्ठकार्थविरणम्, षष्ठे वज्रजङ्घस्य श्रीमत्याश्च सौन्दर्यवर्णनम्, सप्तमे श्रीमत्या विरहवर्णनम्, अष्टमे भोगभूमिवर्णनम्, नवमे आर्यस्य गुरुगुणस्मरणम्, दशमे शरीरवर्णनम्, त्रयोदशे वज्रनाथेः सौन्दर्यवार्यनम्, चतुर्दशे सर्वार्थिसिद्धिविमानस्य, पञ्चदशे महादेव्याः, षोडशे मरुदेव्याः स्वप्नानां, सप्तदशे प्रभातस्य, अष्टादशे जिनजन्माभिषेकस्य, एकोनविंशतितमे परमौदारिदेहस्य, विंशतितमे ऋषभदेववैराग्यस्य, एकविंशमिततमे भगवत ऋषभदेवस्य तपसः, द्वाविंशतिमे समवशरणवेद्याः, त्रयोविंशतितमे समवशरणभूमेः, चतुर्विंशतितमे अष्टप्रतिहार्याणां वर्णनानि विद्यन्ते।

गीतिकाव्येऽस्मिन् दशावतारवत् राज्ञो जयवर्मणः, महाबल विद्याधरस्य, ललिताङ्गदेवस्य, वज्रजङ्घस्य, आर्यस्य, श्रीधरस्य, सुविधेः, वज्रनाभेः, सर्वार्थसिद्धेः, ऋषभदेवस्य च गीतात्मकनिरूपणं कृत विद्यते।

अलकापुर्यां महाबलनामको राजा स्वयंबुद्ध-महामति-सम्भिन्नमति-शतमति- नामकमन्त्रिभिः सह राज्यमकरोत्। राजा मन्त्रिषु शासनभारं परित्यज्य

भोगोपभोगसेवनासक्तो बभूव। एषु मन्त्रिषु स्वयंबुद्धः, एकान्तवाद-शून्यवादस्य समर्थकः। उक्तसिद्धान्तस्य निःसारतामुपदिष्टवान्। एकस्मिन् दिने राजा महाबलः निशान्ते स्वप्नं दृष्टवान् यद् दीपकस्य प्रकाशः क्षीणः जायमानोऽस्ति। स्वायुषोऽन्तं विज्ञाय राजा महाबलः सल्लेखनां धृतवान् तथा मृत्वैशानस्वर्गे ललिता नामकः महर्द्धिदेवो बभूत।

ललिताङ्ग स्वदेव्या स्वयंप्रभवा सह सांसारिकभोगे मग्नो जातः। यदायुषः षड्मासाः शेषा अभवन्, तदा तस्य ग्रीवयाः मन्दारमाला मलिनाभवत् यतो ललिताङ्गः मानसिकवेदना अनुभूतवान्। स धैर्य घृत्वा चैत्यवृक्षाधः समाधिद्वारेण स्वर्गायुः पूर्ण कृतवान् तथा ततश्च्युतो भूत्वापूर्वविदेहस्य पुष्कलावती देशस्योत्पलखेटनगरस्य राज्ञौ। वज्रबाहोः राज्ञाः वसुन्धरायाः गर्भाद् वज्रजङ्घनामको नृपपुत्रोऽभूत्, तथा स्वयम्प्रना 'पुण्डरीकिणी' नगर्याः राज्ञः वज्रदन्तस्य गृहे 'श्रीमती' नाम्नी पुत्री बभूव। यशोधरगुरोः कैवल्यमहोत्सवकृते देवानाकाशमार्गेण गच्छतो निरीक्ष्य श्रीमती पूर्वभवं स्मृतवती तथा सा स्वप्रियं ललिताङ्गं प्राप्तं विकला कृतसंकल्पा च जाता। पण्डितया धत्र्या तस्याः साहाय्यं कृतम्। सा श्रीमतीनिर्मितः प्रतीकैः युक्तं चित्रपटं गृहीत्वोत्पलखेटनगरस्य महादूतजिनालयं प्राप्तवती। अत्र चित्रपटं प्रसारितवती तथा दर्शकाः तं वीक्ष्य चकिताः जाताः। परं तस्या यथार्थरहस्यात्रार्वेऽनभिज्ञा अतिष्ठन्।

ललिताऽङ्गजीवः वज्रजङ्घः महापूतजिनालये समागच्छति तथा तं चित्रपटं वीक्ष्यैव पूर्वजन्म स्मरति। फलतोऽसौ स्वप्रियायाः स्वयंप्रभायाः जीवं प्राप्तुं व्येग्रो भवति। पण्डितायै धात्रै सोऽपि चित्रपटमुपहरति, यस्मिन् स्वयंप्रभायाः जीवनरहस्यमङ्कितं करोति। वज्रजङ्घः पुण्डरीकिण्यां नगर्यां समागच्छति तथा श्रीमत्या सह तस्य विनाहः सम्पन्नो भवति। एकस्मिन् दिने शरत्काले वज्रजङ्घस्तथा श्रीमती शयनागारे शयनं कुर्वतावास्ताम् तथा सुगन्धितद्रव्यस्य धूमो व्याप्त आसीत्। गवाक्षे पिहिते श्वासावरोधेन तयोः निधनं जातम् तथा तौ पात्रदानप्रभावात् उत्तरकुरौः "आर्य आर्या च" बभूवतुः। प्रीतिकरमुनिराजस्य सम्पर्कात् आर्यो मृत्वेशानस्वर्गे श्रीधरनामो देवो बभूव। आर्यापि तस्मिन् स्वर्गे देवी बभूव।

स्वर्गच्युत: श्रीधरदेवजीव: पूर्वविदेहस्य 'सुसीमा'नगर्यां सुदृष्टिराजगृहे सुविधानामक: पुत्रो जात:। सुविधपुत्रस्यानुरागकारणात् दिगम्बरीं दीक्षामधृत्वा गृह एव श्रावकव्रतान् पालयन् अच्युतेन्द्रो जातस्तथा ततश्च्युतो भूत्वा बज्रनाभिश्चक्रवर्ती वभूव। एतत्पश्चात् अत्र षोडशकारणभावनानां चिन्तनं कृत्वा तीर्थकर: प्रकृतिबन्धो बभूव। अत्र प्रायोपगमनसंन्यासं धृत्वा सर्वार्थसिद्धिविमाने समुत्पन्नो जात:।

सर्वार्थसिद्धे: च्युतोभूत्वा साकेतनगर्या: महाराजनमिरायस्य अरुदेव्याश्च गृहे पुत्ररूपेण जन्म लेभे। ऋषभदेवस्य सुमेरुपर्वतोपरि मघवता जन्माभिषेकोत्सव: सम्पादित:। बहुकालं यावत् राज्यंसुख-सम्पत्तिञ्चोपभुज्य तत्पश्चात् एका मामिकीं घटनामनुभूतवान्। नीलाञ्चानां नाम्नी नर्त्तकी नृत्यन्ती सहसा विलीना जाता। ऋषभदेव इमामघटितघटनां पश्यन्नेव विरक्तोऽभवत्। स्वर्गात् लौकिकान्तिकदेवैरागत्य तस्य वैरागस्य पुष्टि: कृता। स साकेत-पट्टे भरतभिषेकं विधायान्यपुत्रान् यथायोग्यं राज्यं दत्वा दीक्षितो जात:। ऋषभदेव: घोरं तपश्चरणं कृवा केवलज्ञानं प्राप्तवान् तथा समवशरणसभायां जानतायै सुखशान्त्युपदेशं दत्तवान्। अन्तेऽसौ निर्वाणपदं प्राप्तवान्।

कस्या अपि कृते: काव्यशास्त्रीयमूल्यनिर्धारणाय तस्यां प्रतिपादितजीवनस्य स्थायिमूल्येषु, तथ्येषु, सिद्धान्तेषु च विचार: परमावश्यको भवति। गीतवीतरागस्यामृतवाण्यां काव्यकलाया उचितसमवाय: प्राप्यते। अस्मिन् प्रेम्णो ज्ञानस्यसौन्दर्यस्य, भक्तेश्च समन्वयात्मकं रूपं विद्यते। अस्मिन् प्रबन्धकाव्योचितं स्वाभाविकं सौन्दर्य गीतगोविन्दसदृश्यां सत्यां शृङ्गाररशान्तरसधारा प्राप्यास्ति। कवि: स्वकल्पना-वैभवेन नित्यं नवीनां सृष्टिं करोति तथा जीवनस्य वास्तविकर्माविगत्यै प्रयतते। मानवस्यान्त: प्रदेशो चेतनायाएको गूढ: प्रबलश्चावेगोऽस्ति। अनुभूतिस्तस्यावेगस्य सत्या सजीवा साकारा च प्रतिभास्ति। एतस्यै अनुभूत्यै व्यक्ति-धर्म-समाज-देशकालानाञ्च बन्धनं नापेक्षितमस्ति। कवि: स्वविचाराणां हृदयगताभवनानाञ्चाभिव्यक्तिं काव्यशास्त्रस्य माध्यमेनैव करोति। प्रेम, विवाह:, हर्ष-विनोदौ, रस-माधुर्यप्रभृतिजीवनमूल्ययानि काव्यपरिवेशे अभिव्यज्यन्ते।

ज्ञानेन्द्रियाणं माध्यमेन यासां भावनानां संवेदनानञ्च प्रभावो मनस उपरिपतित, तासां संस्काराः अङ्किताः भवन्ति। कविरन्यः सहृदयो वा संस्कारानिमान् स्वप्रेषणीयक्रियया पाठकानां चित्तेषु प्रेषयति। एषा प्रेषणकुशलतैव काव्यशास्त्रीयं मूल्यमस्ति। अन्यशब्देषुकथयितुं शक्यते यत् कविकल्पना शब्दानामवलम्बेन बिम्बनिर्माणं करोति, येषां दर्शनं चर्मचक्षुर्भिर्न जायते। मूर्तिविधायनी कल्पना सुन्दरातिसुन्दराणां विम्बानां प्रतिमानाञ्च निर्माणं विदधाति। यतः सौन्दर्यानुभूतिजन्यतयानन्दस्य प्राप्तिजतिते। कोऽपि कलाकारः स्वकृत्या जनमानसे यवदधिकं भावोद्रेकमुत्पादयितुं समर्थोभवत्ति, सा कृतिः काव्य तत्त्वदृष्ट्या तावती मूल्यवती ज्ञायते। वस्तुतः कस्यापि ग्रन्थस्य काव्य-शास्त्रीयं मूल्यं जीवनयोग्यामानन्दानुभूतिं तथा जीवनसंस्कृतेरुदात्तप्रेरणांप्राप्यानन्दसरोवरे चित्तं समाहितं कुर्त्त प्राप्तायां क्षमतायामेव निर्भरं भवति।

प्रस्तुतकाव्ये गीतवीतरागे जीवनमूल्यानां विवेचनप्रसङ्गे रसचर्वणापि परभोत्तमरूपेण घटितामस्ति। श्रीमती स्वपूर्वजन्मनः पतिं ललिताङ्गं स्मरति। सा स्वसंकल्पितपतिवियोगे व्यथिता जायते। कविः पण्डिताचार्योऽस्मिन्नवसरे यद्गीतं प्रस्तुतवान्, तत् केवलं श्रीमत्या एव हृदयाभिव्यक्तिं न करोति, प्रत्युत चेतनात्मकसमस्तप्राणिनां हृदयस्याभिव्यञ्चनां करोति-

**चन्दनलिप्तसुवर्णशरीरसुधौतवसनवरधीरम्,**
**मन्दरशिखरनिभामलमणियुतसन्नुतमुकुटमुदारम्।**
**कथमिह लप्स्ये दिविजवरं मानिनिमन्मथकेलिपरम्** ।।ध्रुवपदम्।।
**इन्दुरविद्वायनिभममणिकुण्डमण्डितगण्युगेशम्,**
**चन्दिरलरामनिटिलविराजितसुन्दर जिलकसुकेशम्**
**शारदशशधरवदखिलह्लादनकारकवदनसुकान्तम्,**
**भूरिमनोहरनर्म्मकथरसस्यन्दिलपनवरशान्तम्** ।।कथमिह।।
**केलिरणन्मणिगणघृणिरञ्चितहारकदम्बकमानम्,**
**बालदिवाकरकाशविभूषणाशोभितवत्सधरेनाम्** ।।कथमिह।।
**विविधमणिरचितभूषण भूषित कोमलतरभुजदण्डम्,**

**सुविशदसदभलसरसगुणनिकरनिधिनिक्षेपकरण्डम्** ।।कथमिह।।
**स्फुरदन्त्यकाञ्चनविरचितरसनाविलसितमध्यशरीरम्।**
**वरवज्रसारशिरीषसुकोमलवामजङ्घोरुगेरम्** ।।कथमिह।।
**मृदुलसरलतलचलनविलोलितविमलकमलसमापादम्।**
**सदमलचेलसदञ्चलचञ्चलमञ्जुलकेलिविनोदम्** ।।कथमिह।।
**योजनपरिमितदिक्सुरभीकृतदेहभृदभिनवकायम्।**
**ब्याजरहितनवरसभरितामरभोगपयोनिधिरोमम्** ।।कथमिह।।
**इन्दुर्घकरायते प्रियतमे वायुश्च हीरायते,**
**लेपोऽपि ज्वलनायते कुसुमसन्मालाहि जालायते।**
**आवातो गहनायते स्मरवशद्देहोऽपि कारायते**
**हा कष्टं पतिविप्रयोगसमयः संवर्त्तवेलायते।।**[37]

उपर्युक्तगीते श्रीमती ललिताङ्गस्यवेशभूषामाहारविहारौ, क्रियाकलापम् अङ्गप्रत्यङ्गानि, तथान्यजीवन-मूल्यानि चिन्तयन्ती स्वमनोव्यथाः व्यनक्ति। अस्यै चन्द्रः धर्मवत्, शीतवायुः वज्रावर्त्तसदृशः, चन्दनलेपोऽग्निज्वालरामः, पुष्पमाला सर्पसमूहवत् भवनमातङ्कपूर्णदरीवत् शरीरम् कारारतुल्यञ्च प्रतीयन्ते।

स्पष्टमस्ति यदुपयुक्तगीते विप्रलम्भश्रृङ्गारस्य सम्यक् परिपाको जातः। पदशय्यायाः, पदविन्यासस्य तथा सङ्गीतस्य प्रभावेण विप्रलम्भगतिः परिवर्द्धिता। अनुभावानां वर्णमपि वर्त्तते। सन्दर्भेऽस्मिन्नृविभिन्नासञ्चारिणां व्यञ्जनापि प्राप्यते।

सप्तमप्रबन्धे श्रीमत्याः विरहस्य सरसचित्रणं प्राप्यते। अस्मिन् विप्रलम्भस्य करुणरसस्य चापूर्वं सम्मिश्रणमस्ति।

संयोगश्रृङ्गारस्य चित्रणप्रसङ्गे मरुदेव्याः अङ्गप्रत्यङ्गानामाभूषणानाञ्च सरसं सजीवञ्च वर्णनमस्ति। सञ्चारिभावा अप्येकत्र जाताः संयोगश्रृङ्गारं गतिशीलं कुर्वन्ति। अत्रोदाहणार्थं काश्चन पंक्तय उद्‌ध्रियन्ते-

---

[37] गीतवीतराग, चतुर्थप्रबन्ध, प्रथमाष्टकम्।

**अलिकुलकुन्तलभरनिटिलेन विलसितशशिदलसमकुटिलेन,**
**सा वनिता सुविराजिता सुभगा वनितासुविराजिता।**[38]

**केयूरकालादिविभूषिताङ्गा पीयूषसारस्तववस्त्रसङ्गा,**
**पतिव्रताशुद्धगुणौघसङ्घा विभासिता कान्तिपयस्तरङ्गा।।**[39]

शान्तरसप्रसङ्गः ऋषभदेवस्य दीक्षावसरे समुपस्थितोऽस्ति। नीलाञ्जनानाम्नी नर्त्तकी नृत्यति। ऋषभदेवः तन्नृत्यदर्शने तल्लीनो वर्त्तते। अस्मिन् समये सहसा तस्याः देवनर्तक्याः आयुः समाप्तं जायते। तथा तत्स्थानेऽन्या देवनर्त्तकी नृत्यारम्भं करोति। ऋषभदेवः एतत्कारुणिकदृश्यं दृष्ट्वा विह्वलो जायते। स सांसारिकपदार्थान् क्षणिकानवतच्छति। सोऽनित्यतासम्बन्धे विचारमग्नो भवति। तन्मनः भोगोपभोगेभ्यो विरक्तो भवति। स द्वादशभावनानां चिन्दने मग्नो जायते। ऋषभदेवस्यास्याः निर्वेदस्थित्याः कविपण्डिताचार्यः साकारं चित्रणं कृतवान्। यथा-

**नीलाञ्जन्मत्यल्पनिजोप्सितासु विद्युल्लताद्विलसार सद्यः।**
**दृष्टावधिज्ञानविलोचनोऽसौ निनिन्द संसारशरीरभोगान्।**[40]

**तनयपरिजननिचयबन्धनमूले इह कष्टधनदुरिताघोरजाले।**

**चर्मकुलभरितपृथुपूतिसदने इह कष्टधर्महतधूर्तमदने।**[41]

अलङ्कारैः भावोद्रेकेसफलता प्राप्यते तथा भावानां व्यञ्चना चित्ररूपेण संपद्यते, यात्यन्तप्रभावपूर्णा तथाकर्षिका भवति। कविकल्पनायाः तूलिका यथार्थधारे आकर्षकभावनाचाश्चित्रमंकितं करोति तथा सुन्दरतमसत्याभासं मूर्त्तरूपेण दातुं चेष्टते। निरीक्षणद्वारेणालङ्कारप्रयोगे सफलता प्राप्यते तथा

[38] गीतवीतराग, दशमप्रबन्ध, प्रथमाष्टकम्, 10/8।
[39] गीतवीतराग, 10/6।
[40] गीतवीतराग, 20/4।
[41] गीतवीतराग, 21/1।

भावानामालंकारिकचित्रणमपि सरलं जायते। निश्चयतोऽलङ्कार: तदानीमतमेवाकर्षका: प्रभावोत्पादका: सौन्दर्यसाधकाश्च भवन्ति, यदा तेषां प्रयोग उन्नततराण्यां सहजरूपेण क्रियते। अलङ्कारप्रयोग: यदा भावान् स्पष्टान् रमणीयान् च विधाय रसात्मकतायां वृद्धिं कुर्यात्, तदावश्यमेवाभिनन्दनीयोऽस्ति। यतो यदालङ्कार: कवितां कमनीयां कृत्वा तस्या: स्थायित्वस्य वृद्धिं करोति तथा कविताया आत्मानं-भावं विचारं कल्पनाञ्च चमत्कारोति, तदैव तस्य यथार्थोपयोगिता विद्यते। अन्यथा स आडम्बर भूत एव भवति।

गीतवीतरागे कल्पनाचमत्कारेण सह उपमाया:, उत्प्रेक्षाया: रूपकस्य, अतिशयोक्ते:, अर्थान्तरन्यासस्य, अनुमान-काव्यलिंगयोश्च समावेश: प्राप्यते। उपमोत्प्रेक्षयोस्तु प्रयोग: एतावान् अधिको जातोऽस्ति यत् सर्वत्र भावावेशस्थितिरुत्पद्यते। पण्डिताचार्य: यया कोमलकान्तपदावल्या काव्यं रचितवान्, तथा प्रस्तुतभावा: उद्‌बुद्धा: सन्ति। रससिद्धकविना पण्डिताचार्येण अस्यां लघुकायायां कृतौ विम्बग्रहणं क्षमतायां प्रकाशो दीयते-

**अलिकुलकुन्तलभरनिटिलेन, विलसितशशिदलसमकुटिलेन।**[42]

**सुललितवाणी कीडाचलनिभमिलितसुषमनिटिलेरम्।**
**अलियुतकमलजदनिभताराकलितनयनयुगधारम्।।**

**चण्डकिराविधिमडलवियदिव कुण्डलश्रवायुगभासम्।**
**पीडितशशिसरसिजसमशुभगुणमण्डितवदनविलासम्।।**[43]

केशानां सौन्दर्य-बिम्बं प्रस्तुवता वार्ताद्वयं कथितमस्ति (1) केशा: भ्रमरसमूहवत् कृष्णा सन्ति (2) तथा केशा: खण्डितचन्द्रवत् कुटिला: सन्ति। केशानां दृश्यरूपकस्य प्रस्तोतायं चाक्षुषो बिम्बोऽस्ति। रूपस्य भावसौन्दर्यस्य च तरङ्गैबिम्ब आर्द्रोभवन्नस्ति। केशानां कुटिलतायां क्षीयमाणकुटिलचन्द्रस्य चाक्षुषप्रत्यक्षं

---
[42] गीतवीतराग, 15/1।
[43] गीतवीतराग, 21/1।

साकारं जायते। एवमेव सघनकृष्णकेशेषु भ्रमरकुलस्य चाक्षुषप्रत्यक्षमस्ति। अन्यथा प्रस्तुता: केशा एव सन्ति। एतेषां सौन्दर्यबोधोऽलिकुलेन वक्रचन्द्रेण न प्रदर्शितोऽस्ति।

द्वितीयोदाहरणे ललितवाण्या:, नयनद्वयस्य, श्रवणयुगलस्य, वन्दनस्य च चित्राङ्कनं कृतमस्ति। उपमया चाक्षुषविम्वानामेव विधानं कृतमस्ति। भ्रमरयुक्तकमलवतया मेघ्युततारासदृशं नेत्रद्वयं सुशोभितमासीत्। भ्रमरयुक्तकमलतुल्यनेत्रद्वयकथनेन त्रीणि तथ्यान्युपस्थितानि भवन्ति-

1. **नेत्रे कृष्णवर्णे स्त:।**
2. **नेत्रे कमवलवत् दीर्घायते विद्येते।**
3. **भ्रमरयुक्तकमलवदाह्लादके सुन्दरे च वर्तेते।**

'जलदनिभा तारा' -कथनेनापि कथितसौन्दर्यबोधो भवति। भावनाया: विचारणायाश्च विविधतत्वानि स्वविधिता: परित्यज्य बिम्बपूर्णतायां परिणतानि जायन्ते। उक्तावुभावपि बिम्बौ कल्पनानयनाभ्यामस्मभ्यं नवोत्सवं दत्त:।

कर्णयो: शोभिते कुण्डले नभ: स्थितचन्द्रमण्डसमाहितरविकिरणतुल्ये प्रतीयेते। कविपण्डिताचार्य: तथ्येनानेन प्रभावित आसीत् यत् चन्द्रमसि स्वत:प्रकाशो नास्ति। अस्मिन् प्रकाश: रविरश्मिभ्य एवायाति। अतएव कर्णकुण्डलयो: मूर्तरूपोपस्थापनायोक्त: चाक्षुषबिम्बो व्यवहृतोऽभवत्। मनुष्य: स्वप्राणभावना मन्यपदार्थेष्वारोप्यात्मानं तेषु प्रवेशयति। सहितेषु स्वचेतना स्वभावं व्यवहारश्च समर्पति। काव्यमूलकबिम्बेषु सौन्दर्यानुभूते: सहजभावना प्राप्यते।

मुखार्थ प्रस्तुतद्वयमङ्कितमस्ति- (1) पूर्णचन्द्र: (2) सरसिजम्।

यद्यपि उपमानद्वमपि परम्पराभुक्तत्वात् नवीन मौलिकञ्च नास्ति। परं कविप्रयोग-शैलीदृशी प्रभाविकास्ति यत् तयो: रूपमाधुर्य साक्षात् जायते तथा मौलिकताप्रतीति: सम्पद्यते। साधारणत: प्रत्येककाव्यबिम्बं कियदंशेषु रूपात्मकं भवति।

बिम्बेष्वर्थगर्भत्वप्राप्तिरावश्यकी भवति। एषु सर्जनात्मकता निहितास्ति। यावदन्तः प्रविश्यते, तावदानन्दोऽधिको जायते। एवं पण्डिताचार्यस्य प्रायः समस्तकाव्ये रूपकोमालङ्कारयोः विम्बयोजना प्राप्यास्ति। रूपकोदाहरणं द्रष्टव्यमस्ति-

**कमलमुखीकरधूतचमरीरुहनिकरम्**
**विमलचरित्र सुपुत्रकविसरः भूमिपतौ ।।**

-प्रथमः प्रबन्धः।

**परिजन-पुरजन-सेवनं निजपावनं**
**निरुपमसुखतरुलापम् ।।**

-द्वितीयः प्रबन्धः।

**रतिपति-भूपति-चामर नतिनिभ विदलितकुसुमरसाले,**
**अतिसुरभीकृत दिग्वनितामुखलयजपङ्क्तिविशाले ।।**

-तृतीयः प्रबन्धः।

उपर्युक्तोदाहरणेषु कमलमुख्याः, सुखतरोः, दिग्वनितायाश्च रूपकाणि सन्ति। कविनात्र चाक्षुषाणां घ्राणमूलकानाञ्च विम्वानां योजना कृता। उक्तात्रिषूदाहरणेषु गातिमय्ता रूपायितास्ति। अतएवेमे आवयविकाः बिम्बा अपि भवितुमर्हन्ति। एषु शरीरस्नायूनिमुत्तेजनापूर्वकं मंथनभूत्। मुनतैरप्यलंकारैरत्रौचित्यस्य व्यवहारत्वात् सरसतोत्पादिता। कमलमुख्या चमरीरुहकम्पनं कियाशीलतां प्रदर्शयति। महाबलविद्याधरसेवायै कमलमुख्योऽङ्गना उपस्थिताः सन्ति। ताः स्वहावभावान् प्रदर्शयन्त्यश्चमरं वहन्ति।

मङ्गलाचरणपद्ये कविः 'सद्ध्यानरत्नाकरे' तथा 'संसारविषाब्धौ' रूपकयोजनां विधाय संसारस्वरूपमुपस्थापितवान्। पद्यस्य समस्तविशेषणानि संसारोच्छेदकर्षभनाथपक्षे घटयित्वानुभूतिपरकबिम्बस्य संघटना समुपस्थापिता। यथा-

**विद्याव्याप्तसमस्तवस्तुविसरो विश्वैगुणैभसुरो,**

**दिव्यश्राव्यवचः प्रतुष्ट नृसुरः सद्ध्यानरत्नाकरः।**
**यः संसारविषब्धिपारसुतरो निर्वाणसौख्यादरः,**
**स श्रीमान् वृषभेश्वरो जिनवरो भक्त्यादरान्पातु नः।**[44]

ललितपदस्यार्थसौन्दर्यस्य च दृष्ट्योक्तपद्यं प्रभावकमाकर्षकञ्चास्ति कवेश्छनदसि भाषायाञ्चापूर्वमाधिपत्यमस्ति।

पण्डिताचार्यस्यास्मिन् गीतिकाव्ये पात्राणां मानसिकप्रक्रियायां कल्पनानुभूत्योरपूर्वं सामञ्जस्यं घटितमस्ति। अस्मिन् दृश्यजगतः रूपसौन्दर्यमन्तर्जगतश्च प्रेममाधुर्य भावात्मिकयैकतया। सहभिव्यक्ते स्तः वाह्यान्तर्जगतोरीदृशी रागत्मिकान्वितिः प्रत्येकपाठकं वशीकरोति।

शैली-दृष्ट्या समस्यन्तत्वात् गौडीशैली वर्त्तते, कोमलकान्तपदावल्याः प्रयोगत्वात् गौडोसदृशी विकटता नास्ति। अतएवात्र वैदर्भीरीतिजन्यप्रसादगुणस्य माधुर्यस्य लालित्यस्य च सद्भावसहितस्य श्रृङ्गारस्य शन्तरसस्य चोदात्तामनोहर परिपाकः विद्यमानोऽस्ति। अस्मिन् भवभूतेरोजस्तथानादसौन्दर्यतयदेवस्य ललित पदावली च प्रचुरता समाहिताः सन्ति।

प्रबन्धात्मकता गीतगोविन्द-सदृश्येवास्ति। कविः तालबद्धगीतानां सर्जनं कोमलकान्तपदावल्या आश्रये कृतवान्। तस्य ध्यानं प्रबन्धसंघटनायां तथा नास्ति, यथा गीतिपरम्परायाः पुष्टावस्ति। वस्तुतः गीतिवीतरागस्य काव्यसौन्दर्य संस्कृतस्य ललितपदावल्यामाश्रितमस्ति, यत् कर्णयोः रसं वर्षति।

काव्येऽस्मिन् श्रृङ्गारस्य मादकमदिरास्थाने शान्तरसस्यामृतमस्ति, यस्य पानं कृत्वा काऽप्यमरत्वं प्राप्तुं शक्नोति। यथा क्षेमेन्द्रः दशावतारचरितं प्रणीय सहजालङ्कृतपदविन्यासशैलीमङ्गीकृतवान्, तथैवाराध्यर्षभदेवस्य दशभवान् वर्णयित्वा पण्डिताचार्योऽपि। सत्यपि जयदेवप्रभावे काव्येऽस्मिन् क्षेमेन्द्रसदृशी कल्पना, दृश्यं पदमाधुर्यञ्च सन्ति।

---

[44] गीतवीतराग, 1/1।

एतत्सत्यमस्ति यत् गीतवीतरागे संगीतं पदललित्यञ्चापूर्वे स्त:। परन्तु, संसार-सागरतणाय तीर्थङ्करर्षभदेवगुणानां स्मरणं मननं चिन्तनञ्च उपादेगानि सन्ति। आरध्ये आराधके चोभयोरपि योग्यतादृष्ट्या समाना शक्तिरस्ति। पार्थक्य तु शक्तेरभिव्यक्तावस्ति। अतएव काव्यमूल्यदृष्ट्या काव्यमेतत् समृद्धिमस्ति।

गीतवीतरागे गीतगोविन्दसदृशमेव गीतितत्त्वं प्राप्यते। अस्मिन् गुर्जरीरागे[45], देशीरागे[46], वसन्तरागे[47], रामक्रियायाम्[48], माणवगौडीरागे[49], कन्नडरागे[50], आसावरीरागे[51], देशवरलिरागे[52], गुण्डक्रियारागे[53], पञ्चमरागे[54], तथा सौराष्ट्रारागे[55], गीतानि निबदधानि सन्ति। तालेषु-अष्टताल:[56], यतिलाल[57], तालत्रिउड:[58] प्रतिभनृताल:[59] एकताल:[60] यतियतितालश्च[61] प्रमुखा: सन्ति। एवं प्रकारेणास्मिन् गीतिकाव्ये रागतालयोजनां विधाय कविपण्डिताचार्य: इमं प्रबन्धं पूर्ण गेयं रचितवान्।

प्रकृति-विकृति-भेदाभ्यां षड्जाद्येकोनविंशति-स्वरै: वर्णेश्चालङ्कृतो यो ध्वनिविशेषो मानवानां चित्तानुरञ्जनं करोति, स एव रागोऽस्ति। रागाणामुत्पत्ति: स्वरसंयोगेन भवति। स्वरसयूहानां यथाविधिगानस्य नाम वर्णोऽस्ति। वर्षाश्चत्वार: सन्ति (1) स्थायी, (2) आरोही, (3) अवरोही, (4) सञ्चारी।

षङ्जादिस्वरेषु य:कोऽपि स्वरो भूयोभूयो बिलम्बन रागादावुच्चरितो भवति, सोऽथवा यतिस्मन् स्वरे राग: कियत्कालं यावत् तिष्ठति, स स्थायी कथ्यते। स्वराणां

---

[45] गीतवीतराग, द्वितीय प्रबन्ध और एकादश।
[46] वही प्रथम प्रबन्ध।
[47] वही तृतीय प्रबन्ध और एकोनविशतितम प्रबन्ध।
[48] वही चतुर्थ प्रबन्ध।
[49] वही षष्ठ प्रबन्ध।
[50] वही अष्टम् प्रबन्ध।
[51] वही नवम् प्रबन्ध।
[52] वही दशम् प्रबन्ध।
[53] वही द्वादश प्रबन्ध।
[54] वही त्रयोदश प्रबन्ध।
[55] वही षष्ठ प्रबन्ध।
[56] वही तृतीय प्रबन्ध।
[57] वही चतुर्थ प्रबन्ध।
[58] वही षष्ठ प्रन्ध।
[59] वही दशम प्रबन्ध।
[60] वही दशम प्रबन्ध।
[61] वही द्वादश प्रबन्ध।

क्रमेणोर्ध्वगतिरर्थात् षडज-ऋषभ-गन्धार-मध्यम-पञ्चम-धैवत-निषाद-स्वराणां क्रमोच्चारणमारोही कथ्यते। स्वराणां क्रमशोऽधोगतिः- अर्थात् निषाद-धैवत-पञ्चममध्यम-गन्धार-ऋषभ षड्ज क्रमेणोच्चैर्नीचैरवरोहः- 'अवरोही' कथ्यते। स्थाय्यारोह्यवरोहिणां त्रयाणां सम्मिश्रणेन स्वर-सञ्चारः सञ्चारी कथ्यते।

रागाणां चत्वरि कथ्यन्तेऽङ्गानि- (1) रागाङ्गम् (2) भाषाङ्गम् (3) क्रियाङ्गन् (4) उपाङ्गम्। रागस्यच्छायामात्रानुकरणं रागाङ्गम्, भाषायाश्छायामात्राश्रया भाषांगम्, रागादिगाने उत्साहः क्रियागं रागाङ्गञ्च, रागाङ्गस्य, क्रियाङ्गस्य भाषाङ्गस्य च सामान्यमात्रमनुकरणमुपाङ्गं कथ्यन्ते।

उपर्युक्तसङ्गीतस्य सामान्यविवेचनेनैतत्स्पष्टमस्ति यत् गीतवीतरागे येषां रागाणं प्रयोगो विहितः, ते सर्वे मङ्गलमयाः सन्ति तथा तेषां गानेन भावावल्याः विस्तारः सरलतया भवति। गुर्जरी-रागं कतपिये विद्धांसः भैरवरागान्र्गतमेव मन्वते। गुर्जरीरागे सम्पूर्णाः जातयः सन्ति, तथास्व स्वरः ऋषभोऽस्ति। मूर्च्छनास्य पूर्वी वर्त्तते। तस्मिन् कश्चनाभासः 'बंगाली'संज्ञस्य वर्त्तते। अस्य रूपं निम्नप्रकारमस्ति-

"रि ग म प ध नि स रि"

गुर्जरीरागः श्रोतृणां विशेषप्रियोऽस्ति। रागेऽस्मिन् प्रेम्णः मन्मथस्य च भावः प्रकटः क्रियते। द्वितीय-सप्तमैकादश-प्रबन्धानां गीतये रागेऽस्मिन् विबद्धाः सन्ति। सप्तमप्रबन्धे श्रीमत्याः विरहवर्णनमपि गुर्जरीराग एव सम्पन्नमस्ति। रतेः करुणायाश्चाभिव्यञ्चजाकृते रागोऽयमधिक उपयुक्तो वर्त्तते। यथा-

**श्रितरमणीस्तनमण्डलं नवकुण्डलम्,**
**विततललितनवामालम्।**

-गीत, द्वितीयप्रबन्धः।

देशीरागः प्रसिद्धरागोऽस्ति। सङ्गीतरत्नाकरे देशिरागे रागाङ्ग-भाषाङ्ग क्रियाङ्गोपङ्गानां चतुर्णामपि समावेशः स्वीकृतोऽस्ति। रागपद्धतिः भारतीयसङ्गीतस्य स्वकीया विशेषता विद्यते। देशिरागाणां संख्या सार देवानुसारं 264 वर्त्तते।

गीतवीतरागे यस्य देशिरागस्य निबन्धनमस्ति, तस्मिन् ऋषभवर्जितषाडवजातीयाया: देशाख्याया: ग्रहांशन्यासस्वारो गान्धारोऽस्ति। अस्मिन् हरिणाश्चाया: मूर्च्छनाया:, प्रयोगो भवति-

**ग म प ध नि स ग।**

**अथवा**

**ग म प ध नि स रि ग।**

गीतवीतरागस्य प्रथमप्रबन्धे रागस्यास्य प्रयोगे जायते। रागेणानेन गीतेषु मृदुलकठोरकार्याणां स्वरानुबन्धनं कृतमस्ति। यथा-

**भरितपयोधितटप्रमितावविभाग: सरसचरित्रकलत्रसुभोग:,**
**भूमिपतौ कर्मफलेन जय वरणीशपते खेचरभूप जय वरणीशपते।**

-प्रथम: प्रबन्ध:

वसन्तराग: प्रसिद्धोस्ति। रागेऽस्मिन् श्रृङ्गार-विलास-वैभवानन्दानां चित्रणं कृतमस्ति। नारसंहितायां प्रमुखषड्रागेषु वसन्तरागस्थानमस्ति। वसन्तरागोमङ्गलरूपो मन्यते। तृतीयपर्वणि ललिताङ्गवनविहारस्य मनोरमचित्रणं प्राप्यते।

रामक्रिया मन्दमध्यमरूपयो: गीयते। गीतवीतरागप्रणोतास्य रागस्य प्रयोगं चतुर्थप्रबन्धे कृतवान्। अस्य रागस्य रूपं निम्नप्रकारमस्ति-

**रि स ध स म रि प ध पम रि प म रि सा**

अनेन रागेण श्रोतृषु चेतनोत्पाद्यते। कस्यापि दृश्यविशेषयैतादृशं चित्रणञ्च क्रियते, यत्पात्रान्त: प्रदेशेऽनुरागमुत्पादयति।

कन्नडरागस्य प्रयोगेऽपि श्रंङ्गाररसे भवति, अपवादरूपेण शान्तसोऽपि गीयते। अस्य ग्रहाशन्यास-स्वर: निषादोऽस्ति। स्वरूपं निम्नप्रकारमस्ति-

**नि स स रि ग म प ध**

कन्नडरागस्य व्यवहार: भोगभूमे: वर्णने कृतो विद्यते। गीतवीतरागे अस्यरागस्य संयुक्तभेदा अपि मिलन्ति। आशावरी-रागे करुणरसो निबध्यते। इयमृषभगान्धारहीना मौडवजातीयास्ति। अस्य ग्रहांशन्यासस्वरो धैवतोऽस्ति। यथा-

**ध नि स म प ध**

**अथवा**

**म ध नि स रि ग म**

गीतवीतरागआशावर्या: व्यवहार: नवमप्रबन्धे कृतोऽस्ति। अस्यामार्येण गुरुगुणाना स्मरणं क्रियते। आशावरी-रागे हृदयममताया:, हृदयव्यथायाश्च सुन्दरं चित्रणं कृतमस्ति।

देशवरलिरागे देशकार्याया: वैराट्या: रागिन्याश्च मिश्रणं प्राप्यते। अस्मिन् उत्तरमन्द्रमूर्च्छनानां प्रयोग आवश्यकोऽस्ति। अस्य न्यासस्वर: षड्जोऽस्ति। स्वरूपं निम्नप्रकारमस्ति-

**स रि ग म प ध नि स**

रागेऽस्मिन् वैभव-विभूति-समृद्धि-चित्रणे: सह वीररसस्यापि चित्रणं क्रियते। गीतवीतरागे वैभवचित्रणायस्य व्यवहारो भवति।

पञ्चमराग: पञ्चमहीन: षाडवजातीय: श्रृंगाररसपूर्णश्चास्ति। अस्य ग्रहांशन्यासस्वर: षड्जोऽस्ति। रागेऽस्मिन् उत्तरमन्द्राया: मूर्च्छनाया: प्रयोगो भवति। मतान्तरेणायं सम्पूर्ण: जातीयो मन्यते। स्वरूपव्यवस्था निम्नाङ्किताास्ति-

**स रि ग म प ध नि स**

**अथवा**

**स रि ग म प ध नि स**

एव प्रकारेण गीतवीतरागस्य गीतानि रागेषु निबद्धानि सन्ति। रागैः सह तालस्यापि प्रयोगे विहितोऽस्ति। सङ्गीते समयः तालो विद्यते। गीतस्य शोभा तालेन भवति। तालं विना गानं वादनं नर्त्तनं वा व्यर्थमस्ति। कासाञ्चन विशेषमात्राणामवकाशो नियमिताभयोः करयोः संयोगेनाथवा तालवाद्यद्वरेण समय-मापनं तालः कथ्यते। सङ्गीतकलायां स्वररागलक्षणातिरिक्तंताललयमावाज्ञानमावश्यकमस्ति। गीतवीतरागेऽ तालस्यैकतालस्य यतितालादेश्च प्रयोगः प्राप्यते। कविकञ्चर्यां कथितमस्ति-

**कालः क्रियापरिच्छिन्नस्तालशब्देन भण्यते।**
**ततः प्रतिष्ठितं सर्वं ताले काले प्रतिष्ठम्।**

-अभिनवतालगञ्जर्यां

तालस्य दश प्राणा कथिताः सन्ति-

**कालो मार्गः क्रियाङ्गानि ग्रहो जातिः कलालयः,**
**यतिः प्रस्तारकथ्येति ताल-प्राणाः दश स्मृताः।**

-तदेव

काल-मार्ग-क्रियाङ्ग-ग्रह-जातिकला-लय-यति-प्रस्ताराः इमे दश प्राणाः सन्ति। तालस्यैकावर्तस्य समयः पूर्णस्थायिनोऽन्तरायाः वा समयोऽथवा विभिन्नभ गानां मात्राणां वा समय-इमे सर्वे कलान्तर्गताः सन्ति। तालपथः मार्गं कथ्यते। कन्नडरागे पञ्चत्रिंशत्तालानां पद्धति प्रचलितास्ति।

चतुरन्तरकालसमैका मात्रा भवति। पञ्चत्रिंशत्तालीयरचनायां लघुमात्रां परिवर्तन्ते। करे ताल-प्रदर्शन-विधिः क्रिया कथ्यते। तालस्यानुद्रुत-द्रुत-लघु-गुरू-प्लुत-काकपदाः षडङ्गानि मतानि। उत्तरापेक्षया दक्षिणभारतस्य सङ्गीते तालस्य विशेषध्यानं रक्ष्यते। रागाणां तालेन सह निबन्धनेन श्रुतिमधुरता विशेषरूपेणायाति। गीतवीतरागे कृतमेतदेवास्ति। अतः ललितपदावल्या सह रागतालसंयोगेन गीतवीतरागे संगीततत्त्वमुत्पन्नं कृतम्।

प्रबन्धगीतस्यान्यगुणा अपि काव्येऽस्मिन् समाहिताः सन्ति। भावसन्द्रतादृष्ट्या काव्यमिदं गीतगोविन्दादप्ययग्रेऽस्ति। यद्यपि गीतगोविन्दस्य पदावल्याः स्पष्टानुकरणमस्मिन् प्रतीयते, परं भावक्षेत्रे कविपण्डिताचार्यः जयदेवादग्रेऽस्ति। अमरुककविसदृशी भावसघनता जयदेवे नास्ति, परं गीतवीतरागकाव्यं विविधवैविध्यकारणात् अधिकं भावपूर्णं मार्मिकञ्चास्ति-

**सुललितचन्दनपल्लवसङ्गमकोमलकमसलसमीरे,**

**अलिकुलगुंजितकोकिलकूजितमेरुनिकुञ्जकुटीरे।**

**व्यवहरदतिसुरभिभरितवसन्ते नर्त्तनसकलजनेन समं निजविरहिसुरस्य दुरन्ते।।**

-गीतवीत, तृतीयः, प्रबन्धः।

गम्भीरानुभूतेः मधुमयचषकं काव्येऽस्मिन् प्राप्तमस्ति। कविपण्डिताचार्यः श्रृङ्गारिकगीतिपरम्परां शान्तरसोन्मुखं वीरागतोन्मुखं च विधाय एकां नवीनां, शैलीं स्थापितवान्। कविः लोकनुकरणं कुर्वन् श्रृङ्गारं प्रति नानादरभावमभिव्यज्योदारचारित्रिकधारणायाः, विषयभोगत्यागस्य निरभिलाषजीवनयापनादेश्च सिद्धान्तानां स्थापनां कृतवान्। सत्यामपि विषयपरकातायां रचना विषयि-प्रधाना विद्यते। जागतिकभावानां वैयक्तिकनिर्माणप्रयासः श्लाध्योऽस्ति। कल्पना, लयान्वितः आत्मानुभूतेः गम्भीरता, मार्मिकादिगुणश्च काव्येऽस्मिन् समवेताः सन्ति।

एवमेव रामगीतकाव्यमपि लिखितमस्ति। द्वादश्याः शताब्द्याः पश्चात् लिखितानि सर्वाणि गीतकाव्यानि जयदेवस्य गीतगोविन्दस्यानुकरणानि सन्ति।

कविपण्डिताचार्य आत्मानं परीक्षे विधाय स्वमनोनीतएत्रैः स्वभवानां प्रकाशनं कृतवान्। अतएव गृहीतेऽपि कथावस्तुनि काव्ये निजभावनानामभिव्यक्तिचेष्टा कृता विद्यते।

# नाटकेषु नायक-नायिका भेद विमर्शः

नारीपात्रेषु वेदवती-यज्ञवत्यौ द्वे मुनिकन्ये सीतासखीत्वेन निर्दिष्टं वर्तते। वाल्मीक्याश्रमवासिन्योरेतयोर्नाम वेद-यज्ञ-सम्बद्धम् प्रदत्तम् मुनिजनोचितम् वेदमन्त्रः यज्ञानुष्ठानसम्पृक्तस्याश्रमस्यानुरूपं कवेः परं नैपुण्यमभिव्यनक्ति। मायावतीति वनदेवतानाम तदेवदिव्यशक्तिवैशिष्ट्य-द्योतकम् वर्तते।

उत्तररामचरिते कल्पितनामसु पुरुषपात्रेषु मुनिशिष्यतया व्यपदिष्टानाम् अष्टावक्रः प्राथम्येनोपतिष्ठति। पौराणिकऋषिसम्प्रदायेऽष्टावक्रस्य ख्यातत्वात् तादृशनामकरणं समञ्जसमेव। यौ च वाल्मीकिशिष्यौ दाण्डायन-सौधातकिशब्दाभिहितौ, तावपि अपत्यपरकनाम्नामृषिपरम्परा-सिद्धतया नासंगतौ। गृष्टिरिति कञ्चुकिनो नाम किमाधारं किमुद्दिश्य वा प्रयुक्तमिति न विस्पष्टं प्रतीयते। कञ्चुकि-नाम-प्रकारनिर्देशिका इयमभियुक्तोक्तिः-

विनयन्धर - वाभ्रव्य-युगन्धर - जयादिकम्।
कार्यं कञ्चुकिनां नाम, प्रायो विश्वाससूचकम्।।[1]

गृष्टिनाम्नि न किमपि कञ्चुकिगतं वैशिष्ट्यम् पश्यामः, यथा जाजलिवातायनप्रभृतिनामसु विलोक्यते। पुरुषनामसु अस्त्येकं नाम भवभूतिना सुप्रयुक्तं, सुतरां सार्थकम्। तद् दुर्मुख इति नाम। पौरजानपदेषु राज्ञाऽपसर्परूपेण प्रहितस्य सीतापवादरूपदुर्वृत्तनिवेदकस्य 'भद्र' इति नाम वाल्मीकिना कालिदासेन च निर्दिष्टम्। भवभूतिना तादृशवतनिवेदकस्य औचित्यवलाद् दुर्मुखइति नाम प्रयुञ्जता महत्कौशलमाविष्कृतम् इति विलसति कापि वैदग्धी तस्य कवेः।

नारीपात्रस्य नाम प्रकल्पने वासन्ती, आत्रेयी इति नामद्वयमपि परं सामञ्जस्यमावहति। वनदेवताया वासन्तीति नामकरणं सर्वथा विदग्धजनरञ्जनकरम्। वनदेवतायाः प्रकृतिशोभासम्बद्धतया तन्नामौचित्यं सुस्पष्टमेव। एतदग्रे

---

[1] वा रा अयोध्या 3/324-325।

दिङ्नागप्रयुक्तं मायावतीतिनाम न तावन्मनोज्ञम्। एवमेव आत्रेयीति नामापि तस्याः ज्ञानप्रवणव्यक्तित्वस्यानुरूपमेव। एवं वासन्ती–दुर्मुखेतिनामयुगलप्रकल्पने भवभूतेरतिशयत्वं स्फुटमिति ज्ञेयम्।

**पात्रविमर्शः–**

विविधपात्राणां चरित्रचित्राङ्कनं नाट्यानां मुख्यं वैशिष्ट्यम्। चारित्र्यविश्लेषणं हि समस्तवस्तुविस्तारस्य साररूपम्। 'वस्तु नेता, रसस्तेषां भेदकः'[1] इति रूपककारोक्तौ 'नेतृ' पदेन नाट्यप्रयोज्यपात्राणामेव संकेत कृतः अतएव शास्त्रीयदृष्ट्या वस्तुविमर्शानन्तरं पात्रसमीक्षा प्रस्तूयते।

**श्रीरामचन्द्रः–**

प्रकृतनाट्ययोः कुन्दमालोत्तररामचरितयोर्नायकः श्रीरामचन्द्रः। स भुवनमहिते इक्ष्वाकुकुले समुत्पन्नो राजा। जगतः समस्तोच्चादर्शानां पुञ्जीभूतविग्रहः स महापुरुषः। स निखिलगुणगणानामनुपमो निधिः। शास्त्रीयदृशाऽयं धीरोदात्तनायकः स्वीक्रियते। परं समस्तगुणसमवायाधिष्ठानतया धीरोदात्तनायकेष्वपि सर्वोत्तमः। तथाहि सुधाकरे।

**'उक्तैर्गुणैश्च सकलैर्युक्तः स्यादुत्तमोनेता'**[2] इति।।1।71।।

यद्यप्युभयोर्नाट्ययोर्मूलवृत्तं प्रायशः समानमेवेति तदाधृतं नेतुश्चरित्रमपि नं वैषम्यर्पयवसायि, तथापि कविप्रवरयोः शैलीवैशिष्ट्यात् स्वीयकल्पनामाहात्म्यच्च तत्र तत्र प्रसङ्गेषु अभिव्यज्यमानश्चरित्रगतो विशेषः सूक्ष्मेक्षिकया निर्देष्टुं शक्यऐवेति तदर्थ मेवायमुपक्रमः।

**परं ब्रह्म परमात्मा**

परं ब्रह्मैव श्रीरामरूपेणावतीर्ण इत्युभयोरेव नाट्यकृत्तोरास्था। यथाश्रीरामतापनीये प्रतिपादितम्–

---

[1] द रू 1/11।
[2] र. सु 1/71

**चिन्मयेऽस्मिन् महाविष्णौ, जाते दशरथे हरौ।**
**राघोः कुलेऽखिलं राति, राजते यो महीस्थितः।।**
**स राम इति लोकेषु, विद्वद्भिः प्रकटीकृतः।।**[1]
**रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि।**
**इति रामपदेनासौ, परं ब्रह्माभिधीयते। इति।।**

अतएव कुन्दमालायां विष्णुरूपत्वेनैव तत्र तत्र श्रीरामनिर्देशः संगच्छते। यथा-

1. वने परित्यागानन्तरं सीतारक्षायै लोकपालानुद्दिश्य लक्ष्मणोक्तिः-

**एषा वधूर्दशरथस्य महारथस्य, रामाह्वयस्य गृहिणी मधुसूदनस्य।।**[2]

2. तृतीयेऽङ्के रामं निर्वर्ण्य तत्प्रभावमाविष्कुर्वद् ऋषिः-

**मन्दं वाति समीरणो न परुषा भासो निदाघार्चिषो,**
**मध्यान्हेऽपि न याति गुल्मनिकटं छाया तदध्यासिता,**
**व्यक्तं सोऽयमुपागतो वनमिदं रामाभिधानो हरिः।।**[3]

3. पञ्चमे नेपथ्यगत उपाध्यायदूतः कुशलवौ त्वरयन् प्राह-

**वाल्मीकिना मुनिवरेण महारथस्य,**
**याऽसौ पुराणपुरुषस्य कथा निबद्धा।।**[4]

अग्रे च तत्रैव-

**कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं,**
**पुनाति श्रोतारं रमयति च सोऽयं परिकरः।।**[5]

---

[1] श्रीरामपूर्वतापिन्युपनिषद् 1/1, 2, 6।
[2] कुन्द, 1/21।
[3] कुन्द 3/14।
[4] कुन्द 5/16।
[5] कुन्द. 5/17।

उपर्युद्धृतेषु सन्दर्भेषु 'रामाभिधाना' हरिः, रामाह्वयो मधुसूदनः पुराणपुरुषः, सरसिरुहनाभ इत्यादयः शब्दाः श्रीरामस्य विष्णुरूपतां सुस्पष्टं प्रख्यापयन्ति।

भवभूतिना यद्यपि विष्णुवाचिनः शब्दा न प्रयुक्तास्तथापि कतिपयप्रसङ्गपर्यालोचनया तस्य श्रीरामभद्रे भगवद्विषयिणी आस्था भक्तिश्च अभिव्यक्तिं भजते। शम्बूकोद्धारप्रसङ्गः समग्रएव तादृशमेवाभिप्रायं प्रकाशीकरोति, विशेषतश्च दिव्यपुरुषरूपेण प्रविष्टस्य शम्बूकस्येयमुक्तिः-

5. अन्वेष्टव्यो यदसि भुवने लोकनाथः शरण्यो-

**मामन्विष्यन्निह वृषलकं योजनानां शतानि।**
**कान्त्वा प्राप्तः स इह तपसां संप्रसादोऽन्यथा तु,**
**क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः।।**[1]

अत्र अन्वेष्टव्यः इत्यस्य श्रुतिस्मृत्युपायैर्गवेषणीयः इति व्याख्याकृता प्रेक्षावद्भिः। लोकनाथः, शरण्यः, इति शब्दावपि तादृशमेव भावं जनयतः।

2. एवमेव वारद्वय श्रीरामस्य कृते "जगत्पति" पदप्रयोगोऽपि तामेव भावनां द्रढयति। यथा-

द्वितीयविष्कम्भके-आत्रेयी-जगत्पतिः सञ्चारं समारब्धवान्।[2] इति सप्तमे-अरुन्धती- जगत्पते[3] रामभद्र! - इति।

3. भरतवाक्ये कविः श्रीरामकथाया असामान्यमेव माहात्म्यमभिव्यनक्ति-

**"पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा,**
**मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च।।**[4] इति ।।

4. महावीरचरित प्रस्तावनायामयं भक्तिभावः कविना स्वयमूरीकृतः-

---

[1] उ. च. 2/13 (चन्द्रकला व्याख्या)
[2] उ च अ 2, पृ 99।
[3] उ च अ 7, पृ 377।
[4] उ च 7/21।

**प्राचेतसो मुनिवृषा प्रथमः कवीनां**
**यत् पावनं रघुपतेः प्राणिनाय वृत्तम्।**
**भक्तस्य तत्र समरंसत मेपि वाचस्-**
**तत् सुप्रसन्नमनसः कृतिनो भजन्ताम्।।**[1] इति ।।

अतएव पूर्वोक्तमुपनिषत् प्रतिपादितं स्वरूपमेव श्रीरामभद्रस्य भवभूत्यभिमतं मन्यन्ते विपश्चितः।[2]

एवं विवेचनेन सिद्धान्ततस्तथा स्वीकारेऽपि उभयोरपि नाट्ययोः श्रीरामस्य चरित्राङ्कनं मानवीयधरातले एव विहितम्। इदन्तु सुवचम्- यन्मानवीयकक्षामवतीर्णोऽपि भवभूतिकृतौ श्रीरामभद्रे विविधदिव्यशक्तिभिः परीतो न सर्वथा दिव्यभावं परिहरति। कुन्दमालायां तु विशुद्धमानवीयभाव एव श्रीरामचरित्राङ्कने विशदीकृतः। न तत्र मनामपि दिव्यतायाः साङ्कर्यमभिलक्ष्यते इति विशेषः।

उभयोरपि नाट्ययोः श्रीरामो दिव्यादिव्यो धीरोदात्तोऽनुकूलश्च नायकः। उभयत्रापि स आदर्शनृपतिः, आदर्शपतिश्चेत्यादर्शद्वय- निकषे परीक्षितोऽङ्कितश्च। रामेण सीतापरित्यागः, हृदयपरिष्कारपूर्वकं पुनस्तस्याः स्वीकारश्च इत्येतावन्मात्रमेव मुख्य वृत्तम्। अस्यैव मुख्यवृत्तस्य सभायोजनं सुकविद्वयेनापि क्वापि स्व-स्वकल्पनाविशेषशालिन्या शैल्या संस्कृत्य विहितम्। अतोऽङ्कितवृत्तपरीक्षणेनैव नायकस्य तत्तत्पात्राणां च चरित्रगतं वैशिष्ट्यमपि निर्देष्टुं शक्यते।

कुन्दमालाया वाल्मीकि-कालिदासानुवृत्तं वृत्तमेव प्रायशेऽङ्गीकृतम् न तत्परिष्काराय कविना कोऽपि प्रयासो विहितः। रामकृतसीतापरित्यागस्य कापि भूमिका तत्र नोपन्यस्ता। नाटकस्य प्रस्तावनायां निर्विचिकित्समुक्तम्-

**"लङ्केश्वरस्य भवने सुचिरं स्थितेति,**

---

[1] म च 1/7।
[2] महाकवि भवभूति (राय) पृ. 96।

**रामेण लोकपरिवादभयाकुलेन।**
**निर्वासितां जनपदादपि गर्भगुर्वीं,**
**सीतां वनाय परिकर्षति लक्ष्मणोऽयम्।।**[1]

अत्र "लोकपरिवादभयस्यैव" रामेण तथाविधसीतानिर्वासने हेतुत्वम् प्रतिपादितम्। परित्यागात् पूर्वं लक्ष्मणो रामप्रदत्तमादेशं विमृशन्नाह-

"समादिष्टोऽहमार्येण, [2] अथवा स्वामिना-वत्स लक्ष्मण, देव्याःकिल सीतायाः रावणभवनसंस्थानाच्चारित्रं प्रति समुत्पन्नविमर्शानां पौराणामन्यादृशाः प्रलापाः प्रवर्त्तन्ते, तन्न शक्नोति सीतामात्रस्य कृते शरच्चन्द्रनिर्मलस्येक्ष्वाकुकुलस्य कलङ्कमुत्पादयितुम्। सीतया चाहं गर्भिणी भावसुलभेन दोहदेन भागीरथीदर्शनं प्रार्थितः। तस्मात् त्वमेनां गङ्गागमनव्याजेन सुमन्त्राधिष्ठितं रथमारोप्य कस्मिश्चिद् वनोद्देशे परित्यज्य निवर्तस्व-इति"।

अत्र रामादेशेऽपि स एव हेतुः परित्यागस्य निर्दिष्टः। किञ्च-

"सीतामात्रस्य कृते" इत्यनेन सीतां प्रति रामस्य लघुत्वभावोऽप्याविष्कृतः। "गङ्गागमनव्याजेन इत्यादिना" क्षुद्रछलप्रयोगः प्रकाश्यं नीतः।

रामेण सीतां प्रति प्रेषितसन्देशेऽपि- "जनवादभीत्या सीते त्यजामि भवतीम्" इत्युक्तेः स एव परित्यागहेतुर्निर्दिष्टः।

सीतापरित्यागस्यायमेव हेतुर्वाल्मीकिना कालिदासेन चोपनिबद्धः। यथा-
**अप्यहं जीवितं जह्याम्, युष्मान् वा पुरुषर्षभाः।**
**अपवादभयाद् भीतः, किं पुनर्जनकात्मजाम्।।**[3]

**अपि स्वदेहातु किमुतेन्द्रियार्थाद्,**

---
[1] कुन्द. 1/3।
[2] कुन्द. अ 1, पृ 5-6।
[3] वा रा उत्तर 45/14।

**यशोधनानां हि यशो गरीय:।।**[1]

वाल्मीकीयेऽपि "किं पुनर्जनकात्मजाम्'' इति सीतां प्रति स एवोपेक्षाध्वनि:। कालिदासेन च सीताया: मूल्यमिन्द्रियार्थमात्रङ्गितम्। आभिरेव रेखाभि र्दिङ्नागेनापि सीतानिर्वासनप्रवणं श्रीरामचारित्रचित्रमारचितम्। यद्यपि-

**त्यजेदेकं कुलस्यार्थे, गामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे, आत्मार्थ पृथिवी त्यजेत्।।**[2]

इति वचनानुसारं कुलकलङ्कनिवृत्तये एकस्या: सीताया: परित्यागो न नीतिविरुद्धं इति वक्तुम् शक्यम्। तथैव लोकापवादाद्[3] भयमपि सत्पुरुषगुणश्रेणीषु गण्यते इति तदपि न दोषायेत्यपि सुवचम्। परं नीतिसंमतमिदं समाधानं न सहृदयहृदयाश्वासजनकम्। वस्तुतोऽत्र लोकापवादभयमात्रेण सच्छलं तथाविधां सीतां परित्यजतो रामस्य आत्मविश्वासदौर्बल्यमेव प्रकाशतामेति। अस्मिन्नेव दौर्बल्ये "रघुवंशे परित्यक्ता सीता रामं प्रति सन्देशं प्रयच्छन्तो व्यङ्ग्यमकरोत्-

**वाच्यस्त्वया मद्वचनात् स राजा,**
**बह्नौ विशुद्धामपि यत्समक्षम्।**
**मां लोकवादश्रवणादहासी:,**
**श्रुतस्य तत् किं सदृशं कुलस्य।।**[4]

सीताया कृतोऽयं प्रश्नोऽद्यावधि प्रत्युत्तरमनाप्नुवन् लोकापवाद्रूपहेतो नि:सारतामपर्याप्ततां चाविष्करोति। लोकापवादमात्रस्य तथाविधाया: सीताया: परित्यागे हेतुत्वमपर्याप्तमितिकुन्दमालाकारेणापि प्रतिपादितमेव। तद्यथा षष्ठेऽङ्के वाल्मीकि: प्रश्नमिमं स्वयं समुत्थापयन्नाह-

---

[1] रघु 14/35।
[2] पचतन्त्र-काकोलूकीयम् श्लो 82-84।
[3] विद्याया व्यसन स्वयोषितिरतिर्लोकापवादाद्भयम्।। नीतिशतक-श्लोक।
[4] रघुवश 14/61।

"वाल्मीकि:[1]- (सकोपम्) हे राजन्, धृतसौहार्द, महाकुलीन, समीक्ष्यकारिन्, किं युक्तं तव प्रतिपादितां जनकेन, गृहीतां दशरथेन, कृतमङ्गलामरुन्धत्या, विशुद्धचारित्रां वाल्मीकिना, भावितशुद्धिं विभावसुना, मातरं कुशलवयो:, दुहितरं भवत्या विश्वम्भरायाः, देवीं सीतां जनापवादमात्रश्रवणेन निराकर्तुम्?

एवं कृते प्रश्ने रामस्य निरुत्तरत्वं वैक्लव्यं च त्यागहेतोरनौचित्यम पर्याप्ततां च संपुष्णाति। विवेचनेनानेन लभ्यते यत् कुन्दमालाया कर्ता परम्पराऽतिक्रमं परिहरन् रामं लोकोत्तरपदादवतार्य एतादृशमानवीयधरातलेऽङ्कितुं वाञ्छति, यो लोकमर्यादाबद्ध: कुलसंस्कारग्रथित: पारिस्थितिविवशस्तादृशं साहसिकमपि कार्यमनुतिष्ठति, येन सुहृदां मान्यानां च समुपालम्भपात्रत्वभापद्यते। स्वयं च तदनुचिन्त्य पश्चात्तापतुषाग्निना दन्दह्यते। मानवस्येवमेव स्वाभाविकं रुपम्, यत् स मोहादकार्यमपि करोति, पश्चात् तप्यते, कृत्तस्या प्रायश्चितं करोति, तस्य प्रतीकाराय चेष्टते च। यस्मिन् दोषस्य मोहस्य च सभावनापि नास्ति, स देवो दूरतरोऽस्माकं वन्दनीय एव केवलम्। न तस्मिन्नात्मीयताया भाव: समुन्मिषति। न तच्चरिते स्वकीयभावानां तादात्म्यं प्रतिबिम्बं वा वयं पश्याम:। लोकोत्तरो हि स:। कुन्दमालायां रामो मानवीयभावेन पूर्णतया सज्जोऽङ्कित:। अत: सोऽस्मदीयभावानां सहजालम्बनतां भजते। स्वाभाविकी हि तत्र साधारणीकृति:।

कुन्दमालागतेन रामेण परिस्थितिविवशतया सीता परित्यक्ता। परित्यागकाले सीतां प्रति प्रेषितेन सन्देशद्वयेन स स्वपरिस्थितिपारवश्यं, भावशुद्धिं च साधु प्रकाशितवान्-

**"तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति,**
**दु:खे सुखे च सुचिरं सहवासिनीति।**
**जानामि केवलमहं जनवादभीत्या,**
**सीते त्यजामि भवतीं न तु भावदोषात्।।**[2]

---

[1] कुन्द. अ 6, पृ 145।
[2] कुन्द 1/12।

**त्वं देवि चित्तनिहिता गृहदेवता मे,**

**स्वप्नान्तरे शयामध्यसखी त्यमेव।**

**छारान्तराहणानि:स्पृहमानसस्य,**

**यागे तव प्रतिकृतिर्मम धर्मपत्नी।।**[1]

प्रथमसन्देशे-जनापवादभयपारवश्यमङ्गीकृतम्, भावदोषपरिहारश्चकृत:। द्वितीयसन्देशे-जाग्रति स्वप्ने च सीताऽतिरिक्तनारीचिन्तनाभावस्तथा यज्ञादिधर्मकार्ये सीताप्रतिकृतेरेव धर्मपत्नीत्वाङ्गीकारसंकल्प: प्रकटीकृत:। सन्देशद्वयेऽस्मिन् आर्जवस्य सत्यस्य च सा कापि शीतला सुधादीप्तिरुन्मिषिता यथा प्रत्यग्रपरित्यागतप्रहृदया सीताऽप्येकवारं सिक्तेव शान्तिमाप्नोति। तथाहि तदानीं तस्या अन्त:स्वीकृति:-

एवं [2] सन्दिशताऽऽर्यपुत्रेण परित्यागदु:खं मयि निरवशेषमपनीतम्। इति। सन्देशयुगलेऽत्र रामस्य समग्रमेव "रामत्वं" समाहितम्। रामेण जनापवादभीतिरूपं दौर्बल्यं स्वयमङ्गीकृतम्। अतएव छायासीतादर्शनेन ज्याकुलितमानसं तं प्रति सीतायाउपालम्भमर्यायमुक्ति:-

**"अयि [3] जनन्वादभीरुक: अत्र सन्निहिते जने सन्तपसि?"** इति।

आत्मनोऽस्यैव दौर्बल्यस्य हेतो: स वाल्मीकिना उपालब्धो निरुत्तरं मौनमालम्बते, निराकृताया: सीताया अपि सहानुभ्सूतिपात्रतां भजते। परित्यक्ता सीता तं "निरनुक्रोश" इत्यभिधानेनालङ्कृतं करोति। पञ्चमाङ्के कुशलवयो: परिचयप्रश्ने यदा रामस्तत्पितुर्जिज्ञासया पृच्छति, निभालनीयस्तत्रत्योऽयं सन्दर्भ:-

राम:[4] - अहमत्र भवतो: शरीरस्य धातारं पितरं वेदितुमिच्छामि।

लव: - नहि जानाम्यस्य नामधेयम, न कश्चिदस्मिस्तपोवने तस्य नाम व्यवहरति।

---

[1] कुन्द 1/14।

[2] कुन्द अ, 1, पृ 16।

[3] कुन्द. अ: 4, पृ. 89।

[4] कुन्द. अ 5, पृ 127-128।

रामः - अहो माहात्म्यम्।

कुशः - जानाम्यस्य नामधेयम्।

रामः - कथ्यताम्।

कुशः - निरनुक्रोशोनाम।

रामः - (विदूषकमवलोक्य) अपूर्वं खलु नामधेयम्!

विदूषकः - (विचिन्त्य) एवं तावत् पृच्छामि-निरनुक्रोश इति क एवं भणति।

कुशः - अम्बा।

विदूषकः - किं कुपिता एवं भणति उत प्रकृतिस्था?

कुशः - यद्यावयोर्बालभावजनितं कश्चिदविनयं पश्यति, तदैवमधिक्षिपति- निरनुक्रोशस्य पुत्रौ मा चापलम्- इति।

विदूषकः - एतयोर्यदि पितुः "निरनुक्रोश" इति नामधेयम्, एतयोः जननी तेना वमानिता निर्वासितः तस्याप्रभवन्ती एतेन वचनेन दारकं निर्भर्त्सयति।

रामः - सम्यगुपलक्षितं कौशिकेन (निःश्वस्य) धिङ्मामेवभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भत्सयति।

प्रसङ्गेऽस्मिन् सानुशयं रामेण स्वापराधस्वीकृतिः सुस्पष्टा। एवमेव छायादृश्येऽपि भावाकुलः स सीतां सम्बोध्य-

"निर्वासितासि विषयादस्मिन् दोषे क्षमस्व मे" इति स्वदोषक्षमापनं प्रार्थयते।

एवं कुन्दमालायां श्रीरामः सहजमानवीयभावोपेतोऽङ्कितः। स सीताया गुणान् निर्दोषतां च जानन्नपि परिस्थितिविवशस्तां परित्यजते। अत एव पश्चाद् विहितस्तरयानुतापो नितरां स्वाभाविकः। यथा स सनिर्वेदं प्राह-

**नीतस्तावन्मकरवसतौ बन्ध्यतां शैलसेतु-**
**र्दैवो वन्हिर्न च विगणितः शुद्धिसाक्ष्ये नियुक्तः।**
**इक्ष्वाकूणां भुवनमहिता सन्ततिर्नेक्षिता मे,**

**किं किं मोहादहमकरवं मैथिलीं तां निरस्य।।**[1]

अत्र मोहात् कृतस्य कर्मणो दुष्परिणतीरवेक्ष्य रामस्यानुतापोऽयं नितरां स्वाभाविकः। कुन्दमालायां परित्यागकाले रामस्य परितापो नोपवर्णितः। पश्चादनुस्मृत्य मोहकृतकर्मणो विपाकं तदनुतापव्यञ्जनं कृतम्। रामस्यायमनुतापस्तदा तीव्रतायाः परां काष्ठामाटीकते, यदा स सीताया अतिशयनिरालम्बतामनुस्मरन् स्वोद्वेगमभिव्यनक्ति। यथा-

**भो भोः कष्टम्? अतिनिरालम्बस्तपस्विन्याः प्रवासः?**[2]
**पातयति सा क्व दृष्टिं, कस्मिन्नासाद्य दृष्टिंमाश्वसिति।**
**जीवति कथं निराशा, श्वापदभवने वने सीता।।**

एवं सीतापरित्यागजन्यो रामस्य शोकाऽऽवेगः क्रमशो गम्भीरतां गाहमानस्तं नितरामेव अधैर्यीग्नमनसं विधत्ते। यथा तद्भावव्यञ्जिकेयमुक्तिः-

**पूर्वं वनप्रवासः पश्चाल्लङ्का, ततः प्रवासोऽयम्।**
**आसाद्य माप्रधन्यं, दुःखाद् दुःखं गता सीता।।**[3]

कुन्दमालायाश्चरितनायको रामः स्वकृतमनुलक्ष्य संतपति। स सीता परित्यागदोषं स्वात्पन्येवारोपयति न लोके। किञ्च रामस्य सर्वोऽपि दुःखोद्गारः सीता दुःखनिमित्ततयैव प्रकाश्यं नीतः। न तत्र रामेण मनागपि स्वदुःखस्य चर्चा व्यधायि। एतत् सर्वमेव धीरोदात्तनायकचारित्र्यानुरूपम्। रामस्येदं धीरोदात्तरूपन्तदानीमत्यन्तमेव स्फुटतामुपगतं, यदा स स्ववालसखस्य वाल्मीकिशिष्यस्य- "राजन्" इति सम्बोधनेन संकोचमाप्नोति। तथाहि कण्वेन प्रयुक्तं भो राजन् इति सम्बोधनं निशम्य रामस्योक्तिः- यथा-

---

[1] कुन्द 3/3।
[2] कुन्द 3/4।
[3] कुन्द. 3/13।

"हन्त[1] वयस्य, तापसविरुद्धमामन्त्रणम्। अथवा- वयसः परिणामेनेदमपराद्धं न भगवता।

**अहं रामस्तवाभूवं, त्वं मे कण्वश्च शैशवे।**
**यूयमार्या वयं चाद्य, राजानो वयसा कृताः।।** इति ।

धीरोदात्ततेयं- "अहो धीरोदात्तोऽयमुपालम्भः'' इति कण्वस्योत्तरोक्त्या प्रतिप्रमाणितेव।

कुन्दमालायां श्रीरामो िततरों धार्मिकरूपेणाङ्कितः। सीताशोकाक्षिप्तहृदयं तं यद्यपि नैमिषस्य प्राकृतिकी सुषमा न संस्पृशति, तथापि धार्मिकी निष्ठातस्य सुतरां जागरूका। यथा-

**दावाग्निं क्रतुहोम-पावकधिया, यूपास्थया पादपान्,**
**अव्यक्तं मुनि-गीत-साम-गतया भक्त्या शकुन्तस्वनम्।**
**वन्यांस्तापस-गौरवेण हरिणान् सम्भावयन्नैमिषे,**
**सोऽहं यन्त्रणया कथं कथमपि न्यस्यामि पादौ भूवि।।**[2]

रामेण क्रियमाणो नित्यकर्मणामनुष्ठानसंकेतोऽपि तदीया धर्मनिष्ठा विशदीकरोति। यथा-

**सवनमवसितं हुतं कुशाना-**
**वुदयगतः समुपासितो विवस्वान्।**
**इति विधिमवसाय्य वासरादौ,**
**नियमधनानहमागतः प्रणन्तुम्।।**[3]

---

[1] कुन्द 4/2।
[2] कुन्द 4/4।
[3] कुन्द. 5/1।

परस्त्री-सम्बद्धा चर्चापि रामस्य श्रवणानर्हा। तिलोत्तमा-रहस्यसमुद्घाटनोत्सुको विदूषको यदा वस्तुमुपक्रमते-

**"भोः[1] किं न जानासि तत्रभवतीम्"**- इति,

तदा रामः- (कर्णौपिधाय) स्त्रीसम्बद्धमेव तद्रहस्यम्। तदलमनेन श्रुतेन। इति व्याहरन् स्ववैमुख्यमाविष्करोति। सीतां प्रति रामस्य प्रेम नितरां पवित्रम्। त्यागकालेऽपि तेन सीताया गुणान् प्रति समादरभावः तां प्रति कृतज्ञताभावश्चाविष्कृतः। लोकापवादात् निष्कलङ्ककुलरक्षायै सीतां परित्यजन्नपि स भावदोषकलुषो नाभूत्। सीतं प्रति रामस्य दोषगुणानपेक्षो निर्व्याजसिद्धः प्रेमभावः। विदूषकं प्रति स्वयमेव तस्यान्तरभिव्यञ्जिकैयमुक्तिः-

"अन्यदम्पतीविषय एव कारणानुरोधी प्रेमावेशः। सीतारामयोस्तु न तथा।

**दुःखे सुखेष्वप्यरिच्छदत्वा-**
**दसूच्यमासीच्चिरमात्मनीव।**
**तस्यां स्थितो दोषगुणानपेक्षो,**
**निर्वाजसिद्धो मम भावबन्धः।।**[2]

त्याग-कर्कशेऽपि तस्मिन् आन्तरिकोऽनुरागप्रवाहोऽविच्छिन्नतया प्रवर्तमान एवाभूत्। यथा-

**अन्तरिता अनुरागा, भावा मम कर्कशस्य वाह्येन।**
**तन्तव इव सुकुमाराः प्रच्छन्नाः पद्मनालस्य।।**[3]

सीता रामहृदये तथा गम्भीरतयाऽनुप्रविष्टा, यथाऽविच्छिन्नानुस्मृतिवशात् तद्विषायेणी रामस्य संवेदनाऽतीव सूक्ष्मतामुपगता। अतएव स कुन्दमालां विलोक्य

---

[1] कुन्द अं, 4, पृ 96।
[2] कुन्द 5/5।
[3] कुन्द 5/6।

तत्र सीताग्रन्थनकौशलं परिचिनोति, सैकते पुलिनेऽङ्कितां सीतावदपंक्तिमप्यभिजानाति। किं बहुना स तत्स्पर्शसंसृष्टं वायुमपि विभावयन् निर्वृत्तिमाप्नोति-

**अद्याकस्मात् सुखयति मनो गोमतीतीरवायुर्**
**नूनं तस्यां दिशि निवसति प्रोषिता सा वराकी।।**[1]

मुनीन् प्रति रामस्यार्जवभावो नितरां हृदयावर्जकः। वाल्मीकिना निर्भत्सितोऽपि स तूष्णीम्भावमेवालम्बते। रामस्य प्रजापालकरूपम् कुन्दमालायां यद्यपि विशद्य नोपस्थापितन्तथापि तत्तत्प्रसङ्गोपात्तसंकेतैस्तदुपलब्धिः संजायत एव। यथा वने विसर्जितां रुदतीं सीतामवलोक्यं महर्षेरुक्तिः-

**धर्मेण जितसंग्रामे, रामे शासति मेदिनीम्।**
**कथ्यतां कथ्यतां वत्से, विपदेषा कुतस्तव।।**[2]

एतेन रामस्य धर्मशासने कस्याश्चिद् विपत्संभावनाप्यश्चर्यकरीति महर्षेरभिप्रायोव्यज्यते। नैमिषं प्रति समभिव्यक्तबहुमानन् श्रीरामं वाल्मीकिशिष्यः कण्वो विशेषणद्वयेन विशिनष्टि-

"युक्तरूपोऽयं'[3] धर्मैकपरायणस्य महाराजस्य सकलजगदभ्युदयनिःश्रेय सहेतौ। नैमिषे वहुमानः।'' इति।

अत्र निर्दिष्टविशेषणद्वयेन रामशासनं प्रजानां निबाधमभ्युदय- निःश्रेयससिद्धिः सुलभति प्रकाश्यते। एवं श्रीरामस्य प्रजापालकरूपं संकेतैरेव समूह्यते।

रामस्यौदार्यं मर्यादापालकत्वं तु सुप्रकाशमेव। सीतास्वीकरणानन्तरं स लक्ष्मणस्य राज्याभिषेकं कर्तुं वाञ्छति। यथा- वाल्मीकिं प्रति तदुक्तिः-

---

[1] कुन्द 5/6।
[2] कुन्द 1/28।
[3] कुन्द अ 4, पृ 79।

"रामः- भगवताऽहमप्यनुज्ञातो लक्ष्मणमभिषेक्तुमिच्छामि'' इति। लक्ष्मणप्रार्थनया कुशेऽभिषिक्ते मर्यादापालकः श्रीरामः-

"(कुशमुद्दिश्य) [1] राजन्! त्वयाऽहमभ्यनुज्ञातो यौवराज्ये लवमभिषेक्तुमिच्छामि'' इति राज्ञो गौरवमावहन् तमेवाभ्यनुज्ञामभिचायते।

उत्तरचरिते रामस्य चारित्र्योत्कर्षाय सुमहदायोजनं कृतम्। सीतानिर्वासनस्यौचित्यसिद्धये तत्र भूयान् प्रयासो विहितः।

1. गुरुजनस्तदानीम् ऋष्यश्रृङ्गाश्रमे द्वादशवार्षिके सत्रे समवेत आसीत्।
2. सीतादोहदपूर्तये मातृणां सविशेषमाग्रहः।
3. प्रजानुरञ्जनार्थं रामं प्रति गुरुवशिष्ठस्य सन्देशः।

अष्टावक्रमुखात् प्रजानुरञ्जनरूपं कुलगुरोरादेशं निशम्य रामः स्वोदात्तघोषणां करोति-

**स्नेहं दयां च सौख्यं च, यदि वा जानकीमपि।**
**आराधनाय, लोकस्य, मुञ्चतो नास्ति मे व्यथा।।**[2]

स्वत्यागसंकल्पगर्भामपीमां रामस्योदात्तघोषणां निशम्य सीतापि गौरवोत्तानहृदया- "अत एव राघवकुलधुरन्धर आर्यपुत्रः'' इति वदन्ती तदनुमोदनं विधत्ते। भवभूतिकृतौ सीतापरित्यागस्य कारणं लोकापवादभयं नास्ति, प्रत्युत लोकाराधनरूपं नृपस्य परमं कर्तव्यमेव तत्र हेतुः। अत एव परित्यागप्रसङ्गे रामः स्वकर्तव्यं विमृशन्नाह-

**सतां केनापि कार्येण, लोकस्याराधनं परम्।**

---

[1] कुन्द अं. 4, पृ 161।
[2] उ. च. 1/12।

**तत्प्रतीतं हि तातेन, मां च प्राणांश्च मुञ्चता।।**[1]

एवमेव सप्तमे गर्भाङ्के यदा भगवती विश्वम्भरा स्वात्मजापरित्यागव्यथितहृदया सामर्ष सव्यङ्ग्यं च गङ्गामेवं प्राह-

**"युक्तमेतत् सर्वं वो रामभद्रस्य?** [2]

न प्रमाणीकृत: पाणिर्वाल्ये वालेन पीडित:।
नाहं न जनको नाग्नि, र्न वृत्ति र्नच सन्तति:।।

तदा गङ्गा प्राह-

"भगवति वसुन्धरे! शरीरमसि संसारस्य, तत् किमसंविदानैव जामात्रे कुप्यसि।"[3]

**घोरं लोके विततमयशो, या च वह्नौ विशुद्धि-**
**र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्धातु।**
**इक्ष्वाकूणां कुलधनमिदं यत् समाराधनीय:,**
**कृत्सनोलोकस्तदिह विषमे किं स वत्स: करोतु।।**

एवमत्रापि "इक्ष्वाकूणां कुलधनं लोकाराधनम्" एव परित्यागहेतुत्वेनोपन्यस्तम्। लोकाराधनरूपोऽयमादर्श एतावान् महनीय:, यदत्र प्रतिविम्बितं रामस्य चारित्रं नितरां समुज्जवलमुदात्ततरं च संजातम्। यशोलोभेन, लोकापवादभयेन वा सीतापरित्यागाङ्गीकारे सा चारित्रदीप्ति: सुदुर्लभैव। शूद्रक-बध प्रसङ्गेऽपि सहजदयाया: बलिदानं विधाय लोकाराधनरूपकर्तव्यानुष्ठानं साधितम्। समस्तासक्ती: कमस्तमानवीयभावांश्च विजित्य कर्तव्यपालनस्य या भूमिका भवभूतिनाऽत्र प्रतिष्ठापिता साऽन्यत्र अदृष्टपूर्वा। विश्वसाहित्येऽपि नैतावानुच्चादर्शो

---

[1] उ च 1/41।
[2] उ च 7/5।
[3] उ. च. 7/6।

नृपतेरुलभ्यते। कुन्दमालाकृत् तु नेतावतीमतिभूमिं श्रीरामचारित्र्योत्कर्षं प्रापयितुमशक्नोदिति तु निर्विवादमेव।

भवभूतिना यथैव लोकाराधनरूपकर्तव्यपालने रामस्य लोकोत्तरत्वं निर्व्यूढं, तथैव प्रेमोत्कर्षप्रकर्षेऽपि तस्योत्तरत्वं सम्यगाविष्कृतम्। त्यागे यः परमनिष्ठुरः प्रतिभाति, स एव प्रेमातिरेकान्नितरां द्रुतचितो जायते। तत्स्वभावस्यानिर्वचनीयविशेषतामिमामभिलक्ष्य वासन्ती साधु निर्वक्ति-

**वज्रादपि कठोराणि, मृदूनि कुसुमादपि।**
**लोकोत्तराणां चेतांसि, को हि विज्ञातुमर्हति।।** [1] इति।।

संयोगे विप्रयोगे च रामस्य प्रेममयी अनुभूतिः सामान्य भावभूमिमप्यतिशेते। सीताया अमृतस्पर्शमोहितः स स्वमनोदशामाविष्कुर्वन्नाह-

**विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा,**
**प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।**
**तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो,**
**विकारश्चैतन्यं भ्रमयति च सम्मीलयति च।।**[2]

एवमेव पञ्चवट्यामदृश्यसीतास्पर्शलब्धचेतनः स आनन्दातिरेकजन्यां मूर्च्छां मुहुरप्यधिरोहति। यथा-

**स्पर्शः पुरा परिचितो नियतं स एव,**
**संजीवनश्च मनसः परितोषणश्च।**
**सन्तापजां सपदि यः परिहृत्य मूर्च्छा-**
**मानन्दनेन जडतां मुहुरातनोति।।**[1]

---

[1] उ च 1/7।
[2] उ च. 1/35।

तत्र द्वितीयसीतास्पर्शेऽपि अधिरूढभूमिकस्य योगिन इव सैवातीति सामान्यभावा भावानुभूतिराविष्कृता-

**आलिम्पन्नमृतमयैरिव प्रलेपै-**
**रन्तर्वा वहिरपि वा शरीरधातून्।**
**संस्पर्शः पुनरपि जीवयन्नकस्मा-**
**दानन्दादपरमिवादधाति मोहम्।।**[2]

यथैव संयोगे तथैव विप्रयोगेऽपि स दुःखातिरेकमयीं कामप्यतिभूमिं स्पृशति। सीतात्यागसंकल्पमात्रेण स व्याकुलतायाः परां काष्ठामतिक्रामति। आत्मानं पातकीदारुण-चाण्डाल प्रभृतिविशेषणैः धिक्करोति। द्वादषवर्षानन्तरं यदा शम्बूकवधप्रसङ्गेन पञ्चवटीमधिगच्छति, तदा विरपरिचितान् सीतासह निर्वासिस्रम्भसाक्षिणः प्रदेशान् विलोकयन्नेव पुनः परां व्याकुलतां भजते। वारद्वयं सीतास्मृतिजन्युदुःखोद्वेगान्मूर्च्छामप्याप्नोति। अदृश्यसीतास्पर्श एव च पुनस्तस्य संजीवनोपायः। अभिव्यञ्जितश्च तदानीन्तनस्सस्य दुःखोद्गारः-

**दलित हृदयं दुःखोद्वेगाद् द्विधा तु न भिद्यते,**
**वहति विपुलं कायो मोहं न मुञ्चति चेतनाम्।**
**ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्,**
**प्रहरति विधिर्मर्मच्छेदी न कृतन्ति जीवितम्।।**[3]

श्रामस्येमां दुःखदशां विलोक्य तादृशपरित्यागभग्नहृदयापि सीता प्रमृष्टात्मदुःखातं प्रति सहानुभूतिमयी तत्पक्षपातिनी च जायते।

---

[1] उ च 3/12।
[2] उ च 3/39।
[3] उ च 3/31।

एवं भवभूतिना संयोगे विप्रयोगे च रामस्यानुभूतिः सामान्यजनानुभूत्यपेक्षया सातिशयामेव कामपि गम्भीरतां गाहमानाऽङ्किता। उभयत्रापि स स्वां लोकोत्तरतां न मुञ्चति।

रामस्यासामान्यं वपुः सौन्दर्यमपि भवभूतिनाऽङ्कितं सर्वथा सद्वैशिष्ट्यबोधकम्। स्थलद्वये तत्सङ्केतः सुतरां सहृदयहृदयावर्जकः। तथाहि- चित्र दर्शनप्रसङ्गे सीताया दृष्टि-निकषे स्वयम्बरगतस्य श्रीरामभद्रस्य वपुः सौभाग्यसीमाङ्कनम् निभालयन्तु-

"अहो दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलदेहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरत्रुटितशङ्करशरासनः शिखण्डमुग्धमुखमण्डल आर्यपुत्र आलिखितः।।"[1] इति।

रामस्य द्वितीयं सौन्दर्यचित्राङ्कनं पञ्चवट्यां वासन्तीमुखेनोपनिबद्धम्- यथा-

**नवकुलयस्निग्धैरङ्गै र्ददन्नयनोत्सवं,**
**सततमपि नः स्वेच्छादृश्यो नवो नव एव सः।**[2]

सततं स्वेच्छादृश्येऽपि श्रीरामभद्रेऽनुक्षणं नवनवामेव कामपि कमनीयतां वासन्ती समनुभवति। नैतादृशी रूप-सौन्दर्यकलना श्रीरामभद्रस्य कुन्दमालायां क्वचिदपि समुपलभ्यते इति भवभूतेरतिरेकिणी रूपाङ्कनदृष्टिः सुस्पष्टा।

**विनयः उदात्तता च-**

भवभूतिना श्रीरामचन्द्रस्य विनयालङ्कृतमौदात्यम् तत्तत्प्रसङ्गेषु बहुशः समभिव्यञ्जितम्। चित्रदर्शनप्रसङ्गे यदा लक्ष्मणः- "आर्ये! [3] दृश्यतां तष्टव्यमेतत्। अयं च भगवान् भार्गवः" इति भार्गववृत्तं प्रस्तौति, तदा रामः सार्जवं, ऋषे

---

[1] उ च अ 1, पृ 29।
[2] उ च. 3/22।
[3] उ च अ. 1, पृ 33।

नमस्ते इति तं नमस्करोति। अग्रे च लक्ष्मणेन "आर्ये पश्य। अयमार्येण- इति रामकृतभार्गवपराभववृत्ते उपक्रोन्ते रामः साक्षेपम्- अयि! बहुतरं द्रष्टव्यम्, अन्यतो दर्शयेति स्वमाहात्म्याविष्कृतिं वारयन्नपूर्वमेवौदात्त्यं व्यनक्ति। प्रतिफलितोऽयं भावस्तत्र सीतोक्तौ- "सुष्ठु[1] शोभसे आर्यपुत्र! एतेन विनयमहात्म्येन।'' इति। एवमेव कैकयीवृत्तं यदा परिहरति रामस्तदा तदभिप्रायमवेत्य लक्ष्मणो- "विहस्य[2] (स्वगतम्)'' अये मध्यमाम्बावृत्तान्तोऽन्तरित आर्येण'' इति तच्चरित्रोदात्ततां प्रकाश्यं नयति। जटायुषश्चरित्रोपन्यासे, हनूमच्चित्रदशने च साधूपन्यस्ता गुणज्ञता कृतज्ञता च रागभद्रस्य। सीतादुर्बादपरेष्वपि पौरजानपदेषु दुर्मुखप्रयुक्तं 'दुर्जन' इति विशेषणं नैव सह्यं रामस्य। तत्प्रमापिका च तत्रत्या तदुक्तिः- शान्तं[3] पापम्, शान्तं पापम्। दुर्जनानाम पौरजानपदाः! ठति। राज्याभिषेके वृत्ते पूर्वाभ्यासरभसेन कञ्चुकिना रामभद्रइति सम्बोधने प्रयुक्ते, स्वस्खलितमालक्ष्य लज्जावरुद्धवचसं विलोक्य सस्मितो रामस्तं वक्ति - आर्य![4] ननु रामभद्र इत्येय मां प्रत्युपचारः शोभते तातपरिजयस्य! तद्यथाभ्यस्तमभिधीयताम्।। इति।।

सकलगुणगणाधिष्ठानस्य श्रीरामभद्रस्यानुभावोऽपि लोकोत्तरतामेवावगाहतेतराम्। तदादेशेन दिव्यानि जृम्भकास्त्राणि सीतापत्ययोरुपतिष्ठन्ति। देवी भागीरथी भगवती वसुन्धरा च तद्वचनमनुपालयन्त्यौ सदैव निर्वासितायाः सीतादेव्याः संरक्षणे सावहिते तिष्ठतः। शम्बूकबधप्रसङ्गेन सीतासहनिवाससाक्षि पञ्चवटीवनं प्रविष्टे रामभद्रे तत्र समाशङ्कितानिष्टनिवारणाय भगवती लोपामुद्रा, तत्प्रयुक्ता गोदावरी, मुरला, देवी भागीरथी, तमसा सर्वा एव ससंरम्भं समुद्युक्ताः। एवं सर्वत्र स सहायव्यापृतदेवशक्तिभिः परीत एव संलक्ष्यते। महापुरुषस्यास्य प्रभावोऽपि निरतिशय एव। युद्धसंरम्भक्रोधसमुद्धतोऽपि लवो रघुपतिं विलोक्य परवानिव विनम्रतां सम्प्रपन्नः। निमालनीयश्च तदानीन्तनस्तस्यायं मनोभावः।

**विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघनम्-**
**तदौद्धत्यं क्वापि ब्रजति विनयः प्रह्वयति माम्।**

---

[1] उ च अ 1, पृ 33।
[2] उ च अ 1, पृ 36।
[3] उ. च. अ. 1, पृ 71।
[4] उ. च अ. 1, पृ 15।

**झटित्यस्मिन् दृष्टे किमिति परवानस्मि यदि वा,**
**महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः।।**[1]

रामस्य प्रथमसाक्षात्कारे एव चमत्कृतचितः स तदनुभावमेवंनिर्वक्ति-
**आश्वास इव भक्तीनामेकमायतनं महत्।**
**प्रकृष्टस्येव धर्मस्य, प्रसादो मूर्तिसञ्चरः।।**[2]

यदा च युद्धवार्ता निशम्य क्रोधाविष्टः कुशः प्रविशति, तदाऽपि लवो रामम् 'आकारानुभावगाम्भीर्यसम्भाव्यमानविविधलोकोत्तरसुचरितातिशय' इति विशेषणेन विशिनष्टि। प्रभावपराहतस्वभावः- कुशोऽपि तद्विषये स्वानुभवनिष्कर्ष व्यनक्ति-

**अहो प्रासादिकं रूपमनुभावश्च पावनः।**
**स्थाने रामायणकवि र्देवीं वाचमवी वृधत्।।**[3] इति।

एवं भवभूतिना श्रीरामभद्रस्य आकारानुभावगाम्भीर्यौदार्यसुचरितातिशयं लोकोत्तरोदात्तं यद्रूपमुपस्थापितम्, तादृशं भव्यं चित्रोपमनिरूपणं कुन्दमालायां सुदुर्लभमेव।

## उभयोस्तुलना-

तौलनिकविचारे उभयत्र कायदृष्ट्या पर्याप्तसाम्यसत्त्वेऽपि चरित्राङ्कनगतं किमपि वैलक्षण्यं संलक्ष्यत एव। तद्यथा-

1. कुन्दमालायां श्रीरामः सीतापरित्यागकाले न व्याकुलीभावं भजते।

नाप्यात्मानं धिक्करोति। केवलं लक्ष्मणमुखात् सम्प्रषिते सन्देशद्वये सीता-समक्षं स्वान्तः सत्यं प्रकाशयति, स्वीकरोति च परिस्थितिपारवश्यम्। केवलमहं जनवादभित्या, सीते त्यजामि भवतीं न तु भावदोषात्[1]।। इतिं।

---

[1] उ. च 6/11।
[2] उ च 6/10।
[3] उ. च. 6/2।

उत्तरे परित्यागकाले रामभद्रः परां व्याकुलतामवगाहते। आत्मानं चाण्डाल[2] पातकीअस्पृश्य-प्रभृति-निन्द्यविशेषणैर्धिक्करोति च। स प्रसुप्तायाः सीतादेव्याः पादौशिरसि कृत्तवा रोदिति। एतत्कृत्यं धीरोदात्तनायकस्वभावाननुरूपम्।

स्पष्टम्- यत् अत्र प्रसङ्गे कुन्दमालाङ्कितो रामो धैर्य- विवेक- शाली, उत्तरे निरूपितश्च भावुकशिरोमणिः। यदपि उत्तरे व्याकुलतायाः परां कोटिमधिरूढोऽयं लवणत्रासितमुनिजनानामब्रह्मण्यघोषमाकर्णयन्नेव झटित्युद्दीप्ततां[3] प्राप्नोति, तन्नाटक्रियमिवं प्रतिभाति सहसा सस्बृतेऽत्र भावपरिवर्तने नानूभूयते नैसर्गिकी विभा।

2. कुन्दमालायां श्रीरामः सीतापरित्यागकृतं दोषं समस्तमात्मनं एव प्रन्यते, मानवीयस्वभावानुसारं स्वयंकृते दोषे पश्चात्तप्यते च।

**"किं किं मोहादहमकरवं मैथिलीं तों निरस्य"** इति।[4]

उत्तरे- यदा सीतापरित्यागहेतुं जिज्ञासमाना वासन्ती श्रीरामं पृच्छति- तत् किमिदकायमनुष्ठितं देवेन?[5]

रामः- लोको न मृष्यतीति।

वासन्ती- कस्य हेतोः?

रामः- स एव जानाति किमपि।

प्रसङ्गस्यास्य समीक्षया लभ्यते, यद् रामोऽत्र परित्यागदोषभारं निःशेषमेव लोकशिरसि निक्षिपति। स न मनागपि स्वात्म-दौर्बल्यं कर्तव्यबाध्यतां वाङ्गीकुरूते।

3. उभयोर्नाट्ययोः सीनभेदेन सीतापरित्यागनिमित्तो रामस्यानुतापोऽनु वर्णितः कुन्दमालायां नैमिषे लक्ष्मणसन्निधौ, उत्तरे च पञ्चवटीवने वासन्तीसमक्षम्। अनुतापयोरुभयोरपिलक्ष्यते स्वीयं वैशिष्ट्यम्। तथाहि-

---

[1] कुन्द. 1/12।
[2] उ च अ 1, पृ 73-76।
[3] उ च. अ 1, पृ 77-78।
[4] कुन्द 3/31।
[5] उ च अ 1, पृ 167।

कुन्दमालायां रामस्य शोकावेगो मोहात् स्वयं कृतदोषाऽस्मरणपूर्वकः शुद्धपश्चात्तापरूपः। उत्तरे च स्वदुःखावेग प्रकर्षजन्यः प्रलापः।

कुन्दमालायां श्रीरामः सीताया असहायतां दुखस्यां च विभावयन् तद्दुःखदुःखित्वमेवात्मनः प्रार्थयन् प्रलपति। स नाभिव्यनक्ति स्वमुखेन जातु स्वदुःखलेशम्। तथाहि तत्रत्वस्तदुद्गारः-

**"भोः[1] भोः कष्टम्? अतिनिरालम्बस्तपस्विन्याः प्रवासः?**
**पातयति सा क्व दृष्टिं, कस्मिन्नासाद्य चित्तमाश्वसिति।**
**जीवति कथं निराशा, श्वापदभवने वने सीता।**
**यदा लक्ष्मणः सान्त्वयन् प्राह- आर्य अलं शोकेन"** इति।

तदापि सः- कथं[2] न शोचाभि मन्दभाग्यः। पश्य पश्य-
**पूर्वं वनप्रवासः पश्चालङ्का, ततः प्रवासोऽयम्।**
**आसाद्य मामधन्यं, दुखाद् दुःखं गता सीता।।**

इति सीतादुःखनिबन्धनतयैवात्मोद्वेगमाविष्करोति।

उत्तरं श्रीरामभद्रः सीतादुःखोल्लेखमकुर्वन् स्वमुखेन स्वदुःखातिरेकोद्घोषं विद्धानो विलापमकरोत्- तद्यथा-

रामः- कष्टम्[3] भो कष्टम्-
**दलति हृदयं शोकोद्वेगाद्, द्विधा तु न भिद्यते,**
**वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।**
**ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्,**

---
[1] कुन्द 3/4।
[2] कुन्द 3/13।
[3] उ च 3/31।

प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्।।

यथा वा-

**हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः,**
**शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि।।**
**सीदन्नन्धे तमसि विधुरो मज्जतिवान्तरात्मा,**
**विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि।।**[1]

एवं भवभूतिकृतौ धीरोदात्तस्यापि रामभद्रस्य स्वमुखेन पुनः पुनः स्वदुःखप्रकाशनं न नितरां समुचितं प्रतिभाति। यद्यपि भवभूतिना-

**'शोकक्षोभे च हृदयं प्रलापैरेव धार्यते।'**[2]
**'कर्तव्यानि खलु दुःखितैर्दुःखनिर्धारणानि।।**[3]
**तदद्याप्युच्छ्वासो यदि भवति लाभो हि रुदितम्।।**[4]

इत्यादिवचनैर्विलपनस्योचित्यं प्रतिपादितम्। किञ्च सीतासमक्षं राम हृदयावस्थां प्रकाश्य तद्दुःखमार्जनमपि कवेरुद्देश्यभूतम्। अथ च- 'क्रव्यादि्भरङ्गलतिका नियतं विलुप्ता' इत्यादिवचःसाचिव्येन सीतायाः परलोकप्राप्तेरेव संभावना रामभद्रमनसि संरूढाऽभूत्। एवं सति तादृशविलापकलापो न दोषावह इति समाधातुं शक्यम्। तथापि मर्यादापुरुषोत्तमस्य श्रीरामभद्रस्य प्रख्यातं गाम्भीर्यधैर्यशालित्वमनुलक्ष्य नातिसमञ्जसमिवैतत् प्राकृतजनोचितं प्रथनं प्रतीयते। कुश-लवयोः समक्षमपि रामस्य तथा मुक्तकण्ठं प्ररुदितं नातिमनोरमम् प्रतीयते।

अन्यत्र यत्र कुत्रापि कुन्दमालायाम् उत्तरचरिते च श्रीरामस्य पूर्ववृत्तमुपन्यस्तम्, तत्र सर्वत्र भवभूतेरुत्कृष्टतरत्वं निर्विवादमेव प्रतिभाति।

---

[1] उ च 3/38।
[2] उ. च. 3/29।
[3] उ च अ. 3, पृ. 171।
[4] उ. च 3/30।

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

यथा कुन्दमालायाम्-

अविदितमनुसृत्य चित्रकूटे, सुतनु सुमावचयाय निर्गतां त्वाम्।
कुसुमवचितं विकीर्य भूमौ, स्मरसि रसेन मया धृतं पठान्तम्।।[1]
कदा बाहूपधानेन, पटान्तशयने पुनः।
गमयेयं त्वया सार्धं, पूर्णचन्द्रां विभावरीम्।।[2]

उत्तरचरिते यथा-

असललितमुग्धान्यध्वसंपातखेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्वलान्यङ्कानि,
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।।[3]

किमपि किमपि मन्दं मन्दमासक्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्।।[4]

एतैरुदाहरणैः सुस्पष्टं यत् कुन्दमालायतो रामः सामान्यनायकभूमिकासमुञ्चन्नेवाङ्कितः, तत्र उत्तरचरित-निरूपितरामइव प्रेम्णो व्यवहारस्य वा सहृदयहृदयाह्लादि गाम्भीर्यमुदात्तत्वं च नानुभूयते। किमपि लघुत्वमिव संलक्ष्यते तत्र, यन्नोत्फुल्लयति सतां चेतः।

सीताः-

उभयोर्नाट्ययोर्जीवातुभूता सीता नायिका रूपेणाङ्किता।

---

[1] कुन्द 4/21।
[2] कुन्द 4/17।
[3] उ च 1/24।
[4] उ च 1/27।

**कविद्वयेनापि तच्चारित्र्योत्कर्षाधानाय महान् प्रयासो विहितः।**

कथावस्तुरूपाधरस्य ऐक्येऽपि चरित्ररेखाङ्कने कविप्रवरयोर्दुष्टिभेदः स्फुटः।

कुन्दमालायां दिङ्नागेन सीतायाश्चारित्र्यचित्राङ्कनं शुद्धमानवीय धरातले विहितम्। सा दिव्यशक्तिभिः संरक्षिता ऐश्वर्यशालिनी नास्ति, अपितु-भारतीयनारीजन-प्रतिनिधि-भूता भूमिपुत्री करुणावात्सल्यमयी सीता। यदा रामादेशाल्लक्ष्मणेन सा वने परित्यक्ता तदा तस्या मर्मव्यञ्जिकेयमुक्तिः-

"सीताया अपि नाम एवं संभाव्यते"[1] इति सर्वथा अलं महिलात्वेन। एवं परित्यक्ता? ननु परित्यक्तास्मि। किं नु खलु युक्तं ममार्यपुत्रपरित्यक्तम् आत्मानं परित्यक्तुम्। किं नु खलु दस्यैव निरनुक्रोशस्य समान एष प्रसवः प्रेक्षितव्य इति वचनीयकण्टकोपहितं जीवितं परिरक्षामि। इति।

साएवादं निर्वासितायाः सीतायाः आहतं नारीत्वं तां प्राणोत्सर्जनायोत्प्रेरयते, गर्भस्थसन्ततिरक्षापक्षपाति मातृत्वं वचनीयकण्टकोपहितं जीवितं परिरक्षितुं विवशीकरोति। विरूद्धभावोरन्तः संघर्षे मातृत्वमेव विजयं प्राप्नोति। तथाविधनिष्ठुरपरित्यागनिः सहाऽपि सीता स्वकर्तव्यविवेकं न मुञ्चति। स्वसन्देशे सा श्वश्रूजन पादाबन्दनं न विस्मरति। रामं प्रति परित्यक्ता सा एवं विज्ञापयति-

सा तपोवनवासिनी सर्वथा सीमन्तनिहितेनाञ्जलिना विज्ञापयति- "यद्यहं निर्गुणा, चिरपरिचितेति वा, अनाथेति वा सीतेति वा स्मरणमात्रेणा नृगृहीत्व्या[2]।। इति।।

परमसाध्वी सा प्रत्यग्रपरित्यागनिष्ठुरस्यापि पत्युः शरीररक्षार्थं चिन्तिता भवति, सन्दिशति च-

---

[1] कुन्द अ. 1, पृ. 15।
[2] कुन्द अं 1, पृ 19।

1. मन्दभागिनीम्[1] अनुशोचन् वर्णाश्रमपरिपालनम्, अभिघ्नन्, आत्मानं न वाधस्व, सद्धर्मे सशरीरे सावधानो भव।'' इति।

**लक्ष्मणम् प्रत्यपि पत्युः शरीरचिन्तायै तद्विज्ञापना-**
**साम्प्रतं गया विना त्वयैकेन चिन्तयितव्यः।**
**त्वं भ्रातुः शरीरे सावधानो भवेति।।[2]**

सन्दर्भैरेतैः सीताया समुज्ज्वलं पत्नीत्वम्, महनीयतमं मातृत्वं च साधु प्रकाश्यते। परित्यागकालेऽपि लक्ष्मणं प्रेषयन्ती सीता स्वहृदयतां सुव्यनक्ति- यथा- ''वत्स [3] लक्ष्मण! आसन्नास्तमयः सूर्यः। दूरे चेतो मानुषसंपातः। उड्डीनाः पक्षिणः। सञ्चरन्ति श्वापदाः। गच्छ न युक्तं परिलम्बितुम्। अमृतस्वभावा सा विस्मृत्य स्वदुःखं लक्ष्मणकष्टाय चिन्तिता जायते। यदा लक्ष्मणः परित्यागरूपदोषक्षमापनं प्रार्थयते, तदा सा- ''ज्येष्ठवचनानुवर्ती त्वमिति परितोषकाले को दोष आशङ्क्यते''[4] इति वदन्ती महानुभावतां कामपि अभिव्यनक्तिः।

लक्ष्मणे गते यदा दुःखाब्धिमग्नां सीतामनुगृहीतुं महर्षिर्वाल्मीकिरुपैति, तदा सा सती परपुरुषशङ्कया भृशं संविग्ना जायते। शनैः शनैः परिचयोत्सुको वाल्मीकिः पृच्छति- ''किं च सीता? तदा सा नहि[5] सीता, भगवन् मन्दभागिनी'' इति वदन्ती स्वदुरवस्थां मार्मिकतयाऽवगमयति। महर्षेः कृपावलम्बनं प्राप्य सा कृतज्ञतां प्रकाशयन्ती प्राह- ''त्वं[6] लोकस्य वाल्मीकिः, मम पुनस्तात एव इति सरलहृदया विश्वस्ता सा महर्षिमनुसरन्ती तदाश्रमं गच्छति। गच्छन्ती सा अञ्जलिं बद्ध्वा भगवतीं भागीरथीं प्रार्थयते-

---

[1] कुन्द अ 1, पृ 17।
[2] कुन्द अ 1, पृ 20।
[3] कुन्द अ 1, पृ 21।
[4] कुन्द अ 1, पृ 23।
[5] कुन्द अ 1, पृ 31।
[6] कुन्द. अ. 1, पृ. 32।

"भगवति भागीरथि, यद्यहं स्वस्तिगर्भम् अभिनिर्वर्तयामि तदा तव दिने दिने सुष्ठुग्रथितया कुन्दमालयोपहारं करोमि।'' [1] इति। एवं देवतासु विस्रम्भः आस्तिक्यभावश्च तस्या विशदीभवति। अन्यधार्मिककृत्येष्वपि तदास्था प्राकाश्यं नीतैव। यथा तदुक्तिः-

"निर्वर्तितं संवनम्, उपासिता सन्ध्या, हुतो हुतवहः, अवगाहिता भगवती भागीरथी।''[2] इति।

कुन्दमालायाः सीता समस्तपीडितनारीसमाजस्य प्रतिनिधिभूता। नारीजीवने सम्भाविताः समस्ताः पीडाः, पिण्डीभूय इव सीतायाः पीडारूपेण परिणतिं प्राप्ताः। सीतायाः दुःखं व्यष्टिभावं विहाय समष्टिरूपता गतम्। तस्या दुःखं निजदुःख न भूत्वा निखिलनारीजनदुःखमतम्। अयं सामाजिको भावस्तयाऽनेकशोऽभिव्यक्तिं नीतः यथा-

"सीताया अपि नाम एवं सम्भाव्यते'', इति अलं महिलात्वने?
"सीता? नहि भगवन् मन्दभागिनी।''
"अहो अविश्वसनीयता प्रकृतिनिष्ठुरभावानां पुरुषहृदयानाम्......।''
"प्राणान् परित्यजामि इति सर्वथा अलीकं मादृशीभिः स्त्रीभिः।''

"अद्य पुनरेतदवस्थं शोचनीया संवृता'' इति परित्यादुःखतो लज्जा व मामधिकतरं वाधते।

उपयुक्तसन्दर्भाणां समीक्षया निम्नाङ्कितत्थ्यानि व्यक्तिं भजन्ते।

1. सीताया जीवने इयं परिभवपूर्णघटना अतएव घटिता यतः सा नारी अस्ति।
2. सीता इदानीं सीता नास्ति, प्रत्युत मन्दभागिनी "नारी'' संवृत्ता।
3. युग-युगेभ्यो नारी निष्ठुरहृदयैः पुरुषैः प्रवञ्च्यमानाऽभूत्।

---

[1] कुन्द. अं. 1, पृ 32।
[2] कुन्द. अं. 1, पृ 59।

4. बराकी नारी चेत् प्राणपतित्यागमपि कुर्यात्, तदापि तस्य न किमपि मूल्यम्।
5. परित्यागजन्यदु:खापेक्षया नारीजनबिडम्बनामय: सामाजिकोऽपमान एष लज्जाजनकतया सीताया: कृतेऽधिकं दु:खदायी। इति।

एतै संकेतितैस्तथ्यै: सीताया: समष्टिमयी सामाजिकचेतना सुस्पष्टतामेति कुन्दमालाया: सीता यथव सामान्यनारीप्रातिनिध्ये स्थापिता, तथैव व्यावहारिकी रीतिरपि तस्या: नातिक्रामनि सामान्यसीमानम्। तथाहि परित्यक्ता सा सामान्यनायिकेव अत: क्षोभव्यञ्जकैर्निरतुक्रोशादिशब्दैरनेकरा सत्करोति श्रीरामचन्द्रम्।

1. "किन्तु[1] खलु तस्यैव निरनुक्रोशस्य समान एष प्रसव: प्रेक्षितव्य:''?
2. दिष्ट्या[2] सोऽत्र निरनुक्रोश: प्राप्त:।
3. कुश: [3] यद्यावयोर्वालभावजनितं कञ्चिदविनयं पदयति, तदैवमधिक्षिपति, निरनुक्रोशस्य पुत्रौ मा चापलम्।
4. साहसिक! [4] अतएवदूरे परिह्रियसे।
5. अयि [5] जनापवादभीरुक! अत्र सन्निहिते जने सन्तपसि?

श्रीरामं प्रति प्रयुक्तैरेर्विशेषणै: स्पष्टं यत् कुन्दमालाया: सीता न स्पृशति भवभूतिनिरूपितसीताया: महनीयतमामुदात्तताम्, परं तच्चेष्टासु जीवनविषयिणी सहजपरिणता सजीवता कापि जागर्तितराम्। कुन्दमालागता सीता यन्त्रमयी मूर्तिर्नास्ति। प्रतिपलं जीवन्ती स्पन्दनशीलता तत्रानुभूयते। प्रतिघटनाया: प्रतिक्रिया सूक्ष्मरेखाभिरभिव्यञ्जनमाना तत्र द्रष्टुं शक्यते।

**दृढानुरागता:-**

रामेण तथाऽतिनिष्ठुरं परित्यक्ताऽपि सीता स्वानुरागं मनागपि न मुञ्चति। विविधभावाना। घात-प्रतिघाते सत्यपि अन्त:सलिला-प्रवाह इव तस्या: प्रेमनिर्भरो

[1] कुन्द. अ. 1, पृ 15।
[2] कुन्द अ 3, पृ 61।
[3] कुन्द अ 5, पृ 128।
[4] कुन्द अ 4, पृ 94।
[5] कुन्द. अ 4, पृ 89।

निरन्तरं प्रवर्तमान एवाभूत्। द्वितीयेऽङ्के सीतायाः प्रियसखी रामं प्रति तस्या मनोभावं जिज्ञासमाना पृच्छति- सीता च तदुत्तरं ददाति। निभालनीयस्यत्रत्योऽयं संदर्भः-

'वेदवती-[1] अयि अपण्डिते, तथा निरपेक्षस्य निरनुक्रोशरस्य कृते किमिति त्वम् असितपक्षचन्द्रलेखेव दिने दिने परिहीयसे।

सीता- कथं स निरनुक्रोश?
वेदवती- येन परित्यक्ताऽसि।
सीता- किमहं परित्यक्ता?
वेदवती- एवं लोको भणति। सत्यं परित्यक्ता।
सीता- अथ शरीरेण, न पुनर्हृदयेन।
वेदवती- कथं परकीयं हृदयं जानासि?
सीता- कथं तस्य हृदयं सीतायाः परकीयं भविष्यति?
वेदवती- अहो अपरित्यक्ताऽनुरागता।
सन्दर्भेणानेन सीतानुरागस्य निरन्तरता स्पष्टं संलक्ष्यते।

प्रसङ्केस्मिन् अग्रे सीताप्रयुक्तान्यन्यान्यपि कानिचिद् वाक्यानि तस्या दृढानुरागप्रवणतां प्रत्याययन्ति। सीता सगौरवं वक्ति "यत् सा सपत्नीजननिः-श्वासानुपविद्धे रामवक्षःस्थले अतिचिरं संभावितास्ति"। अश्वमेधप्रसङ्गेन यदा वेदवती रामस्यान्यधर्मपत्नीपाणिग्रहणसंभावनामभिव्यनक्ति तदापि सीता- "आर्यपुत्रस्य[2] हृदये प्रभवामि, न पुनर्हस्ते' इति पतिवदन्ती स्वीयां दृढानुरागतां द्रढयति। अयं प्रेमावेगस्तदा जल्लावरणं विस्फार्य स्फुटतामुपगतः यदा सीता- "किं[3] लज्जाऽऽवेशेन एवं भणामि अपि नाम कुशलवयोस्तातस्य दर्शनेन जन्मामोघं भवेदिति श्रीरामदशनस्पृहामभिव्यनक्ति।" तदनुरागविस्मिता वेदवती ब्रूते- "अहो! थ्कमिति तस्य महार्घनृशसत्वं यत् सीता नाम वालतनयेदृशीमवस्थामनु भवतीति।"

---

[1] कुन्द अ 2, पृ 42-43।
[2] कुन्द अ' 2, पृ 44।
[3] कुन्द अ: 2, पृ 45-46।

सीताया अयमनुरागः परोक्षरूपेण वारद्वयं श्रीरामदर्शनात् क्रमशो वृद्धिमाप्नुवन् उभयोः समागमरूपेण परिणमति।

कुन्दमालायां सीतायाश्चरित्रदीप्त्या सह तस्या नारीसुलभः स्वाभिमानभावोऽप्युपवर्णितः। षष्ठेऽङ्के यदा कण्वगीतकथांशेन कुशलवयोरभिज्ञाने वृत्ते चत्वारोऽपि राघवाः प्रेमावेगान्मोहमापद्यन्ते। क्रमशः प्रत्यागतचेतनेषु तेषु तातदर्शनदुर्ललितौ कुशलवौ सीता प्राह- "क एषः, यो युवाभ्यामेवं प्रेक्षितः इति। तदा सीताया निरपेक्षतां विलोक्य रामस्योक्तिः-

"अहो[1] आदासीन्यं वैदेह्या? यदियं चिरकालोपनतमस्मत्सन्निधानंमुखविकासेनापि न संभावयति।''

रामोक्त्याऽनयासीतायाश्चारित्र- स्वाभिमानगर्भो निरपेक्षभावः साधु गम्यते। सीतायाः स्वाभिमानगर्भा चारित्रदीप्तिः, तदा चरमोत्कर्षं प्राप्नोति, यदा सा- "समुद्घुष्यताम्[2] विकारानुरूपः प्रतीकारः'' इति महर्षेरादेशेन उदात्तगिरा स्वचारित्रसत्यापनं समुद्घोषयति। तस्याः सत्यसंकल्पेन समाकृष्टा देवी विश्वम्भराऽपि लोकसमक्षमाविर्भवन्ती तत्प्रभावः- प्रकर्षं प्रत्याययति-

"अहो[3] अनतिक्रमणीयं शासनं प्रतिनिवृत्तानां पतिव्रतानाम्'' इति सीतयाऽभ्यर्थिता देवी विश्वम्भरा लोकसमक्षं सीतायाश्चारित्रशुद्धिं सुप्रकाश्य अन्तर्हिता भवति। वाल्मीके राज्ञया पाणिग्रहणपूर्वकं रामः सीतां स्वीकरोति-

तदा सीता- "उच्छ्वसितो[4] मे आत्मा, प्रत्यागता मे प्राणाः'' इति वदन्ती चिरन्तनकठिनसाधनायाः मङ्गलपरिणतिं समनुभवति।

**उत्तरचरिते सीताः-**

---

[1] कुन्द अ 6, पृ 144।
[2] कुन्द अ 6, पृ. 148।
[3] कुन्द अ' 6, पृ. 155।
[4] कुन्द. अ' 6, पृ. 161।

सीताचरित्राङ्कने भवभूतेर्लेखनी निरतिशयं सशक्ता संसक्ता च। सीताया गौरवान्वितं व्यक्तित्वम् उत्तरचरितेऽतिप्रभावशालिन्या शैल्या निरूपितम्। कुलगुरुर्वशिष्ठः स्वसन्देशे सीताया गौरवम् प्रशंसन् प्राह-

**विश्वम्भरा भगवती भवतीमसूत, राजा प्रलापतिसमो जनकः पिता ते।**
**तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां, येषां कुलेषु सविता च गुरुर्वयं च।।**

सीता देवजनसम्भवा उत्पत्तिपरिपूता देवी। जनकानां रघूणां च यत् कृत्सनं लोकमङ्गलम्, तत् सीतारूपेणाविर्भूतम्। यदा सा नववधुरुपेण अयोध्यामागता, तदा ज्योत्स्नाप्रायैर्ललित- ललितैरकृत्रिमविभ्रमैर्मधुरैरङ्गैः कौशल्याद्यम्बानामपि कुतूहलमकरोत्। महाराजो दशरथः सीतायां समधिकं स्निह्यतिरम्। यथा च कौशल्यायाउक्तिः-

"सर्वदा महाराज एवं भणति- एषा रघुकुलमहत्तराणां वधूरस्माकं तु जनकसुता दुहितैव''।[1]

**पञ्चप्रसूतेरपि तस्य राज्ञः, प्रियो विशेषेण सुवाहुशत्रुः।**
**वधूचतुष्केऽपि तथैव नान्या, प्रिया तनूजाऽऽस्य यथैव सीता।।**[2]

चारित्रिकपवित्रता सीतां जगद्बन्द्यपदवीं समारोपयति। कुलगुरोर्वशिष्ठस्य धर्मपत्नी भगवती अरुन्धती स्ववैयक्तिकसम्बन्धमतिक्रम्य सीतां प्रति स्वं भक्तिभावं प्रकटीकरोति। तद्यथा सीतां प्रति तस्यां मनोभावः-

**शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा,**
**विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।**
**शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां,**
**गुणाः पूजा स्थानं गुणिषु न च लिङ्गं न च वयः।।**[3]

---

[1] उ च अ 4, पृ 228।
[2] उ च 4/16।
[3] उ च 4/21।

अग्निशुद्धिप्रसङ्गोद्भावनेऽपि सीतामनुलक्ष्य तस्या ईदृश्येव प्रतिक्रिया-

**"अग्निरिति वत्सा प्रति लघुयक्षराणि, सीतेत्येव पर्याप्तम्''।**[1]

सीताया महानुभावता उत्तररामचरितस्य विविधप्रसङ्गेषु सुव्यक्ततामवाप्ता। प्रथमेऽङ्के यदा अष्टावक्रमुखात् कुलगुरोः प्रजानुरञ्जनरूपं सन्देशं प्राप्य रामः स्वोदात्तघोषणां करोति-

**स्नेहं दयां च सौख्यं च, यदि वा जानकीमपि।**
**आराधनाय लोकस्य, मुञ्चतो नास्ति मे व्यथा।।** इति।[2]

महानुभावा सीता तथा समक्षमेव रामस्य स्वत्यागसंङ्कल्पं श्रृणवन्ती अपि गौरवोत्तानहृदया ब्रवीति-

**"अतएव राघवधुरन्धर आर्यपुत्रः'' इति।** [3]

सीताऽतिशयकोमलस्वभावा मृदुभाषिणी मितभाषिणी च। चित्राङ्कितमपि रामविरहदृश्यं विलोक्य सा समुद्विना जायते, तद्भावनाक्रान्ता रणरणकरिवद्यमानमानसा स्वप्नेऽपि नोत्कण्ठां मुञ्चति। यदा रामस्तस्याः प्रियवचनानि प्रशंसति, तदा सा- "प्रियम्बद [4] ऐहि संविशावः'' इति मृदु-मित-शब्दैरेव हृदयतस्नेहसर्वस्वमावेदयति।

सीतादेव्याः श्रीरामभद्रे अकृत्रिमं निरतिशय च प्रेम। यद्यपि वाल्मीकि-कालिदासप्रभृतिभिः कविपुङ्गवैः सीतारामयोरनन्यसाधारणः, प्रेमभावः सुतरां समुपवर्णितः, परं भवभूतिना यद्विम्बोपमम् अनुभूतिमयं पावनं च प्रेम्णोरूपमङ्कितम् तदन्यत्र सुदुर्लभमेव। सीतायाः प्रेम सुखदुःखयोरद्वैतम्

---

[1] उ च अ. 4, पृ 222।
[2] उ च 1/12।
[3] उ च अ. 1, पृ.. 23।
[4] उ. च पृ 60, अ 1।

सर्वास्ववस्थास्वनुगतं च। उत्तररामचरिते आऽऽद्योपान्तं विविधप्रसङ्गेषु तदुद्घाटनं कृतम्। प्रथमेऽङ्के संयोगरूपेणाऽऽनन्दमयप्रेम्णोऽतिमधुरं चित्राङ्कनमारचितम्। श्रीराम: सविरम्भं वक्षसि प्रसुप्तां सीतां निर्वर्ण्यं तद्विषयिणीं स्वानुभूतिं प्रकटीकरोति-

**इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-**

**रसावस्या: स्पर्शो वपुषि बहुलश्चन्दनरस:।**

**अयं बाहु: कण्ठे शिशिरमसृणो मौक्तिकसर:,**

**किमस्या न प्रेयो, यदिपरमसह्यस्तु विरह:।।[1]**

यदा दुर्मुखमुखादपवादवृत्तं निशम्य लोकाराधनरूपकर्तव्यस्य अवश्यं करणीयतां विभावयन् राम: सीताया दोहदव्याजेन गङ्गातीरवनेत्यागमादिश्य निष्क्रान्त: तदा सुप्तप्रबुद्धा सीता राममनवलोक्य ब्रूते-

"हा धिक् हा धिक् ! एकाकिनीं प्रसुप्ता मामुज्झित्वा कुत्र गतो नाथ:? भवति अस्मै कोपिष्यामि, यदि तं प्रेक्षमाणा आत्मन:, प्रभविष्यामि।[2] इति।

वाक्येनानेन व्यज्यते, यत् क्षणमपि रामवियोगं सोढुमसमर्थाया: सीताया: रामं प्रति कियान् प्रगाढ़विश्वासमयोऽनुराग: इति।

वियोगकाले श्रीराम: सीताया इममेवानुरागप्रकर्षं स्मारं व्याकुलताया: परं सीमानं संस्पृशति। निभालनीयाऽत्र श्रीरामभद्रस्येयमुक्ति:-

**क्व तावानानन्दो निरतिशयविस्रम्भबहुल:,**

**क्व वाऽन्योन्यप्रेम क्व च नु गहना: कौतुकरसा:।**

**सुखे वा दु:खे वा क्व नु खलु तदैक्यं हृदययो-**

---

[1] उ च 1/38।

[2] उ. च अं. 1, पृ. 79।

स्तथाप्येष प्राणः स्फुरति न तु पापो विस्मति।।[1]

पूर्ववनवासदुःखं सीता श्रीराम प्रेम प्रकर्षेणैव सहर्ष सोढवती। रामस्योक्तिरिय तत्प्रत्यायिका-

**त्वया सह तिवत्स्यामि, तनेषु मधुन्धिषु।**
**छूतीवारमतेहासौ, स्नेहस्तस्याः स तादृश।।**
**न किञ्चिदपि कुर्वाणः, सौख्यैदुःखान्यपोहति।**
**तत्तस्य किमपि द्रव्यं, यो हि यस्य प्रियो जनः।।[2]**

अथ रामेण राज्ञा लोकाराधनाय देहदसंपूर्तिव्याजेन निर्भरगर्भखिन्नापि सीता वने परित्यक्ता। वाल्मीकितपोवनोपकण्ठात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेवी प्राप्तप्रसववेदनम् अतिदुःखसंवेदात्मानं गङ्गाप्रवाहे निक्षिप्तवती। तदैव तत्र द्वारकद्वयं प्रसूता, भगवतीम्यां पृथ्वीभागीरथीभ्यामप्युभाभ्यामभ्युपन्ना रसातलं च नीता। स्तन्यत्यागात् परेण द्वारकद्वयं च तस्य प्राचेतसस्य महर्षेर्गङ्गादेव्या समर्पितम् स्वयम्। द्वादशवर्षानन्तरं च सा जानकी तत्सयोर्द्वादशस्य जन्मतत्सरस्य माङ्गलिककृत्यानुष्ठाानाथ तमसाद्वितीया धरापृष्ठमवतीर्णा। तदानीं तस्या या आकृतिः कविना समुपवर्णिता, सा एव तदीयहृदयावस्थामनुमापयन्ती, भृशं समुन्मन्नाति सतां चेतांसि। यथा-

**परिपाण्डुदुर्बलकपोलसुन्दरं,**
**दधती विलोलकबरीकमाननम्।**
**करुणस्य मूर्तिरथवा शरीरिणी,**
**विरहव्यथेव वनमेति जानकी।।[3]**

---

[1] उ च. अं. 1, 6/33।
[2] उ च 3/4।
[3] उ. च अ. 3 पृ 137-138।

एतम्विधा जानकी भागीरथीप्रभावाददृश्यशरीरा शम्बूकवधप्रसङ्गेन पञ्चवटीवनमागतं श्रीरामभद्रं दृष्टवती। पूर्वं किमपिमन्युगर्भवैमुख्यमादधानापि सा यदा रामस्य परिक्षामदुर्बलमाकारं पश्यति, तदा सन्तहृदया जायते, तस्या हृदये चिरप्रसुप्ता मृतमाया सीता पुनश्चजीवतां प्राप्ता, सा ब्रवीति-

"दिष्ट्या [1] कथं प्रभातचन्द्रमण्डलापाण्डरपरिक्षामदुर्बलेनाकारेण निजसौम्य-गम्भीरानुभावमात्रप्रत्यभिज्ञेय एवार्यपुत्रो भवति। भगवति ! तमसे ! धारय माम्''।

एवं वदन्ती सा तमसामाश्लिष्य मूर्च्छामुपगता। पश्चात्पत्यागता सीताशोकेन मूर्च्छामुपगतं रामभद्रं विलोक्य परां व्याकुलतां भजते। वारद्वयं च मूर्च्छा सम्प्राप्तं रामभद्रं तमसाप्रेरणया स्यामृतमयपाणिस्पर्शेन पुनरुज्जीवयति। पुनः पुनश्च सीतामुद्दिश्य विलपन्तं रामं विलोक्य सा भृशं करुणाविगलिता शेषकालुष्या प्रेमानुषक्तान्तः करणा च जायते। तथा च तमसां प्रति तद्व्याहृतिः-

1. भगवति! [2] किमिति वज्रमयी जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्यैवं वत्सलस्यैवंवादिन आर्यपुत्रस्योपरिनिरनुक्रोशा भविष्यामि। अहमेवैतस्य हृदयं जानामि ममैषः।
2. "निष्कारणपरित्यागिनोऽप्येतस्य दर्शनेनैवम्बिधेन कीदृशी मे हृदयावस्था? [3] इति न जानामि, न जानामि।''

यदा सीतायाः प्रियसखी वनदेवता वासन्ती सीतासम्बद्धविविधमर्मोद्घाटनैः श्रीरामं प्रलपन्तमपि भृशं प्रलापयति, तम् दारुण-कठोर प्रभृतिसम्बोधनैरुपालभते च, तदा सीता साभिनिवेशं रामपक्षपातिनी जायते, विस्मृतनिजदुःखा प्रतिवदति च तथा-तथा वदन्तीं वासन्तीम्-

1. "सखि वासन्ति ! किं त्वमेवं वादिनी भवसि? पूर्जार्हः सर्वस्यार्यपुत्रो, विशेषतो मम प्रियसख्यां।''[1]

---

[1] उ. च. अ. 3 पृ. 137-138।
[2] उ च अ 3 पृ 144-145।
[3] उ. च. अ. 3 पृ 145।

2. सखि ! वासन्ति ! त्वमेव दारुणा, कठोरा च यैवं प्रलपन्तं प्रलापयसि।[2]
3. दारुणासि वासन्ति दारुणासि। या एतैहृदयमर्मोद्धाटितशल्यसंघट्टनैः पुनः पुनरपि मां मन्दभागिनीमार्यपुत्रं च स्मरयसि।[3]

श्रीरामदुःखदर्शनेन सीताया हृदयं तथा प्रेमपरिप्लुतं जायते, यथा सा राममूर्च्छापलयनाय तद्हृदये निहितं स्वहस्तमप्युत्सारयितु विस्मरति स्पर्शमोहितः। यदा रामभद्रः पञ्चवटीवनाद् गन्तुमिच्छति तदा तं सस्पृहमलोकयन्ती सीता विश्लेषभयविह्वला जायते। "नमः सुकृतपुण्यजनदर्शनीयाभ्यामार्यपुत्रचरणकमलाभ्याम्''।[4] इति नमस्यन्ती मूर्च्छामधिगच्छति।

सीतायाः स्पृहणीयो वात्सल्यभावोऽपि सुतरां हृदयावर्जकः। कर्णस्थलवलीपल्लवस्य आकर्षको गजशावकः, करतृततालैः समं नृत्यमण्डलं विदधानो वालमयूरः, हस्तप्रदत्ततृणभोजिनो मृगशावकाः, बालकदम्बवृक्षः, एते सर्वे एव सीताया वात्सल्य-स्नेहभाजनान्यभूवन्। एवं प्रेममयं, वात्सल्यमयं, मधुरमुदात्तं लोकपावनं च सीताया व्यक्तित्वम् भवभूतिना निरुपमकलावैदग्ध्यशालिन्या शैल्या साधूपन्यस्तम्।

**उभयोर्विशेषः-**

1. कुन्दमालायाः सीता प्रासादतलादवतार्य सामान्यमानवीयधरातलेऽङ्किता। उत्तरचरिते सा दिव्योदात्तचारित्रगुणोज्ज्वला देवीं, सर्वदा दिव्यशक्तिभिः परीता संरक्षिता च।
2. कुन्दमालायाः सीता तथाऽतिनिष्ठुरं श्वापदसंकुले वने परित्यक्ताऽपि धैय विवेकं च न मुञ्चति। मातृत्वगौरवेण प्रसवरक्षार्थं दुःखतप्ताऽपि जीवितं न परित्यजति। यथा तस्या विमर्शः-
"किन्तु खलु तस्यैव निरनुक्रोशस्य समान एष प्रसवः प्रेक्षितव्यः- इति वचनीयकण्टकोपहितं जीवितं परिरक्षामि।''

---

[1] उ च अ 3 पृ 165।
[2] उ. च अ 3 पृ 169।
[3] उ च अ 3 पृ 181।
[4] उ. च. अ 3 पृ. 201।

उत्तरचरिते . साऽविगणय्य सन्ततिरक्षाकर्तव्यगौरवम् अतिदु:खसंवेगपराहताऽऽत्मानं गङ्गाप्रवाहे निक्षिप्तवतीति तस्या: सापेक्षिकम् अधैर्यं विवेकाक्षमत्वं च सुस्पष्टम्। /

3. कुन्दमालाया: सीता वने त्यक्ता सर्वथाऽनाथा परदु:खकातरेण मानवमूर्धन्येन महर्षिणा वाल्मीकिना समाश्वास्य स्वाश्रमं नीता दुहितृनिर्विशेषं परिपालिता च। उत्तरचरिते परित्यागात् पूर्वमेव भगवती भागीरथी, वसुन्धरा च रामेण सीतारक्षार्थं प्रार्थिते।
"सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव।''[1]
"भगवति ! वसुन्धरे ! सुश्लाध्यां दुहितरम् अवेक्षस्व जानकीम्।''[2]

गङ्गाप्रवाहनिपतनकाले एव च ताभ्यामभ्युपपन्ना नवप्रसूतिव्यथिता जानकी। किञ्च- "नयतु मामात्मनोऽङ्गेषु विलयमम्बा। न सहिष्यामीदृशं जीवलोकस्य परिभवमनुभवितुम्।''

इति वसुन्धरां प्रति विहितसीताऽभ्यर्थनयाऽपि व्यज्यते, यत् सीता देवलोकनिवासिनी देवी, कञ्चित् कालं लोकमिमं समागता, पुनश्च देवलोकगमनायोद्युक्ता। एवं सीताया दिव्यतैवोपपादितोत्तरचरिते।[3] इति ज्ञेयम्।

4. कुन्दमालायां सीता सामान्यनायिकेवाङ्किता, तत्र सा देवोपममहनीयोदात्तता न लक्ष्यते, या उत्तरचरिते प्रतिपादमनुभूयते। अस्य विशेषस्योपलम्भाय केचिदंशा अधोविन्यस्यन्ते- तथाहि-
चिरकालानन्तरं वियोगविधुरं वीक्ष्य उभयो: सीतयोरभिव्यक्ति:-

5. "किमत्र ज्ञातव्यम्। नावनाह्यति मे शरीरं परपुरुषशब्दो रोमाञ्चग्रहणेत्। सुव्यक्तं सोऽत्र निरनुक्रोश: प्राप्त:।''[1] (कुन्दमाला)

---

[1] उ. च. अ 1 पृ 39।
[2] उ च अ 1 पृ 78।
[3] उ च अ 7 पृ 370।

"भगवति ! किं भणस्यपरिस्फुटात। स्वरसंयोगेन प्रत्यभिजानामि नन्वार्यपुत्रैणैवैतद् व्याहृतम्।''[2] (उत्तररामचरितम्)

उपरितनसन्दर्भयो: प्रयुक्त-निरनुक्रोश-आर्यपुत्रशब्दाभ्याम् व्यक्तित्व वैशिष्ट्यम् स्फुटमुपलभ्यते। अधोविन्यस्तम् पूर्ववृत्तप्रसङ्गद्वयोपन्यास विशेषोपलम्भाय निभालयन्तु-

रामः- **अविदितमनुसृत्य चित्रकूटे,**
**सुतनु समावचयाय निर्गतां त्वाम्।**
**कुसुममवचितं विकीर्य भूमौ**
**स्मरसि रसेन मया धृतं पटान्तम्।।**[3]

सीता- साहसिक ! अतएवदूरे परिह्रियसे? (कुन्दमाला)
वासन्ती- अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः,
**सा हंसैः कृतकौतुका चिरम्भूद् गोदावरीसैकते।**
**आयात्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया,**
**कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः।।**[4]
(उत्तरचरितम्)

एकत्र- "साहसिक अत एव दूरे परिह्रियसे।" अन्यत्र च-
बद्धस्तया कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः।।
इति व्यवहारभेदः उभयो र्व्यक्तित्वभेदं स्फुटमवगमयति।

---

[1] कुन्द अ 3 पृ 61।
[2] उ च अ 3 पृ 136।
[3] कुन्द 4/21, पृ. 94।
[4] उ च 3/37।

इदं तु सुवचम्यत् कुन्दमालायां सीतायाश्चारित्र्यसत्यापनशपथे या चारित्रदीप्तिः, सा उत्तरचरिते गर्भाङ्कदृश्यान्तेनिबद्धायां सीताचारित्र्यघोषणायां नास्ति। देव्या अरुन्धत्या पौरजानपदान् संबोध्यं सीताग्रहणार्थः विहितः प्रस्तावो न तथा प्रभावशाली, यथा कुन्दमालायां सीताप्रभावकृष्ट्या दिव्यरूपधारिण्या विश्वम्भरया साक्षादुद्भूय घोषिते सीताचारित्रसत्यापने। उपरि निर्दिष्टैर्विशेषैः सममेव निष्कर्षोऽयं वक्तुं शक्यते- यत् उत्तरे सीता दिव्योदात्तचारित्र्योज्जवला लोकोत्तरगुणशीलशालिनी देवी। कुन्दमालायान्तु सा मानवी भूमितनया भूलोकवासिनी नारी इति।

**कुश-लवौः-**

कुन्दमालायाम् कुशलवयोः सविशेषवर्णनं नोपलभ्यते। तौ भगवतो वाल्मीकेराश्रमे समुत्पन्नौ यमौ सीतापुत्रौ। तयोः प्रसवानुक्रमेण कुशो ज्यायान्। मुनिजनानामङ्के संचरन्तौ क्रमशो वृद्धिं प्राप्तौ। तयोर्वाल्यचित्रणं यथा-

**धावति हरिणकैर्यथा प्रतिमल्लं किशोरसिंहानाम्।**
**तथा च तपस्विनीहृदयं, हरति प्रियदर्शनं युगलम्।।**[1]

कैशोरे तौ भगवतो वाल्मीकेः शिष्यतां सम्प्राप्य प्रवीणौ वीणाकलाविज्ञाने सञ्जातौ। श्रीरामस्य वाल्यशोभां धारयन्तौ तौ महर्षिविरचितं रामयणं वीणातन्त्रीरसितानुविद्धगीतरूपेण सर्वप्रथमं नैमिषीयाश्वमेघे रामसमक्षम गायताम्। तदा तौ निर्वर्ण्य रामस्येयमभिव्यक्तिः-

"गम्भीरोदारः [2] सन्निवेशः। प्रशान्तमनोहरा वेषरचना। विनयोदात्तम-भिक्रान्तम्। सुव्यक्तमनेन। युगलेन कुलीनेन भवितव्यम्' इति। सीतोपदेशेन, महाप्रभाववशम्बदतया च तौ रामसमक्षं प्रणतावभूताम्। किन्तु रामः'' कष्टं ब्रह्मशिरसा नतोऽस्मीति विप्रशङ्कया मर्यादामङ्गविषण्णस्तयोः प्रणामं तद्गुरवे समर्पयति। क्रमशश्च तयोराकृत्या, वयसा, वनवासित्वेन पितुर्निरनुक्रोशनामतया, मातुः देवी, वधू इत्यभिधानतताया च सीतासुतत्वमाशङ्क्य रामः पर्याकुलो जायते।

---

[1] कुन्द. 2/11।
[2] कुन्द. अ 3 पृ 118।

पश्चात् कुशलवाभ्यः सीतापरित्यागपर्यन्ते रामायचणकथागाने विहिते वाल्मीकिशिष्यः कण्वोऽग्रिमकथामुपस्थाप्य रहस्योद्भेदं करोति। प्राप्ताभिज्ञानास्ते चत्वारोऽपिराघवाः परस्परमाश्लिष्य स्नेहातिरेकेण मूर्च्छामापद्यन्ते। पुनश्च सीताप्रभावाकृष्ट्या देव्या विश्वम्भरया सीताचरित्रशुद्धौ सत्यापितायां लोकानुरोधेन वाल्मीकेरादेशाच्च रामः सीतां स्वीकरोति। लक्ष्मणानुरोधेन वाल्मीकि समर्थितेन कुशः साम्राज्ये लवश्च यौवराज्येऽभिषिच्यते।

उत्तरचरिते कुशलवयोश्चित्रणं निरतिशयप्रभावजनकरीत्या सम्पादितम्। निर्वासिता सीता प्राप्तप्रसववेदनमात्मानं गङ्गाप्रवाहे निक्षिप्तवती तत्रैव च सा कुशलवौ प्रसूतवती। तदानीं तौ गङ्गापृथिवीभ्यां देवताभ्यामभिरक्षितौ। श्रीरामादेशात् तयोर्दिव्यानि जृम्भाकास्त्राणि जन्मसिद्धानि। स्तन्यत्यागात् परं तद् दारकद्वयं देव्या भागीरथ्या महर्षेर्वाल्मीकेरर्पितम्। तौ च भगवता वाल्मीकिना धात्रीकर्मतः परिगृह्य पोषितौ रक्षितौ च। निवृत्तचौलकर्मणोस्तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन परिनिष्ठापिताः। तदनन्तरं भगवता एकादशे वर्षे क्षात्रेण कल्पेनोपनीयत्रयीविद्यामध्यापितौ। अतिदीप्तप्रज्ञाभ्यां ताभ्यां सह सामान्यछात्राणामध्ययनयोगोऽपि असम्भव एवाभूत्। द्वादशवर्षानन्तरं राजर्षिर्जनकः, कौशल्या अरुन्धती च वाल्मीकेराश्रमे रामभद्रस्य कौमारलक्ष्मीं विडम्बयन्तं लवं विलोक्य समाकृष्टा भवन्ति। तदा लवः क्षत्रियब्रह्मचारिवेषेण विराजतेतराम्। चकित-चकिता देवी अरुन्धती तं निभालयन्ती प्राह-

**कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनः,**
**वटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्।**
**पुनरपि शिशुर्भूतो वत्सः स मे रघुनन्दनो**
**झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम्।।**[1]

---

[1] उ च 4/19।

तत्र लवस्य आकृतिं विनयं, रामायणकथाप्रावीण्यं च विलोक्य नितरां सुमुत्सुकान्तःकरणो जायते वृद्धवर्गः। ततश्च अपूर्वाश्वदर्शनकुतूहलिभिर्मुनिवालकैराकृष्यमाणो लवो निर्गत्य अश्वं विलोक्य ब्रूते-

"नूनमाश्वमेधिकोऽयमश्वः''[1] इति। बटुभिश्च' कथं ज्ञायते? इति पृष्टः- "ननु मूर्खाः ! पठितमेव युष्माभिरपि तत्काण्डम्'' इति तानधिक्षिपन् स्वबुद्धिवैभवमाविष्करोति। क्रमशश्च सैनिकानां दृप्तां वाचं निशम्य लवो युद्धोद्धतो जायते। अग्रे लक्ष्मणात्मजेन कुमारचन्द्रकेतुना लवस्य सम्बादः समभूत। तत्रापि शौर्यमदोद्धतो लवो जामदग्न्यस्य, रघुपते रामभद्रस्यापि च शौर्यमधिक्षिपन्नाह-

(1) **"शस्त्रग्राही ब्राह्मणो जामदग्न्यस,**
**तस्मिन् दान्ते स्तुतिस्तस्य राज्ञः।**[2]

(2) **वृद्धास्तेन विचारणीयचरितास्तिष्ठन्तु हुं वर्तते,**
**सुन्दरस्त्रीमथनेऽप्यकुण्ठयशसो लोके महान्तो हि ते।**
**यानि त्रीण्यकुतोमुखान्यपि खरायोधने,**
**यद् वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः।।**[3]

लवचन्द्रकेश्वोवृत्ते दिव्यास्त्रसङ्गरे लवो जृम्भकास्त्रवप्रयोगेण चन्द्रकेतुसैन्यं निस्पन्दं विधत्ते। अत्रान्तरे पुष्पकेण शम्बूकवधाद् विनिवृत्तो रामः प्रविशति। महानुभावप्रभाववशम्बदो लवोऽपि चन्द्रकेतुना सह श्रीरामं प्रणमति, स्वाविनयक्षमापनं च याचते-

"मृष्यन्तां त्विदानीं लवस्य वालिशतां तातपादाः।''[4] इति। प्रसङ्गेष्वेतेषु लवस्य विनयः शास्त्रप्रावीण्यं, शौर्यं, दर्पः, वाक्कौशलं, युद्धकौशलं, चेत्यनेके गुणाः

---

[1] उ. च. अ. 4 पृ 252-253।
[2] उ. च 5/32।
[3] उ च 5/34।
[4] उ च अ 6 पृ 314।

सम्यक् प्राकाश्यं भजन्ते। परं स्पृहणीये गुणसमावाये सत्यपित स्याविनय एव अनेकश उद्ग्रीव इवाभूत्। यद्यपि रामेण-

**"नन्वयमलङ्कार: क्षत्रियस्य-''**
**"न तेजस्तेजस्वी प्रसृतमपरेषां विषहते,**
**स तस्य स्वोभाव: प्रकृतिनियतत्वादककृतक:।''[1]**

इत्यादिवचनैस्तस्य स्वाभाविकत्वं क्षत्रियालङ्कारत्वं च प्रतिपादितम्। तथापि लव-चन्द्रकेत्वोर्व्यवहारतुलनायां लवस्याविनयोऽयं न श्लाघनीयतामर्हति। लवस्य प्रथमदर्शने श्रीरामभद्रस्यायं तद्वैशिष्ट्यावगाही हृदयोद्गार:-

**त्रातुं लोकनिव परिणत: कायवानस्त्रवेदो,**
**क्षात्रो धर्म: श्रित इव तनुं ब्रह्मकोशस्य गुप्त्यै।**
**सामर्थ्यानामिव समुदय: संचयो वा गुणाना,**
**भाविर्भूयस्थित इव जगत्पुण्यनिर्माणराशि:।।[2]**

रामोक्तावत्र लवस्य समग्रमेव व्यक्तित्वं पुञ्जीभूयेव समाहितम्। कुशस्य वैशिष्ट्यम् यद्यपि सविस्तरं नोपनादितम्, तथापि प्राप्तसामग्रीाचिव्येन लवेना भिन्नमेवत्तद्व्यक्तित्वमसेयम्। केवलमिदं वक्तुं शक्यते। यद् यथा कुश: प्रसवानुक्रमेण ज्यायान्, तथैवगुणसंक्रान्तिरपि तत्र लवामेक्षयाऽतिशयतामेव कामप्यादधाति तद्व्यक्तित्वप्रकर्षप्रत्यायिका चेयं श्रीरामोक्ति:-

**दृष्टिस्तृणीकृतजगत्त्र्यसत्वसारा,**
**धीरोद्धता नमयतीव गतिर्धरित्रीम्।**
**कौमारकेऽपि गिरिवद् गुरुतां दधातो**
**वीरो रस: किमयमेत्युत दर्प एव।।[1]**

---

[1] उ च 6/14।
[2] उ च 6/9।

तालनिकदृशा कुन्दमालायां कुशलवयो: शौर्यप्रकर्षप्रकाशिका न कापि वर्णनोपनिबद्धा। अन्यगुणानां ग्रथनेऽपि सा विदग्धता नास्ति, या भवभूतिकृतौ प्रतिपदं समनुभूयते इति कृतं विवेचनेन।

**लक्ष्मण:**

कुन्दमालाया: प्रथम-तृतीय-षष्ठेष्वङ्केषु लक्ष्मणाङ्कनं विहितम्। तत्र प्रथमे षष्ठे चाङ्के सविशेष प्रकाश्यते तच्चरित्रम्। प्रथमेऽङ्के स सूत्रधारप्रस्तावनया सममेव प्रविशति रङ्गमञ्चम्-

**निर्वासितां जनपदादपि गर्भगुर्वीम्,**
**सीतां वनाय परिकर्षतिलक्ष्मणोऽयम्।** इति।[2]

एकतो रामादेशपालनरूपं कठोरकर्त्तव्यम्, अपरत: सीतां प्रति भक्तिभावप्रवणा नैसर्गिकी सहृदयता। भावद्वयसंघर्षनिकषे परीक्ष्यमाणं सौमित्रेश्चरित्रं नूनं सविशेषं प्रकर्षं कमप्यादधाति। सीतया सह गङ्गोपकण्ठं प्राप्य लक्ष्मणो रामेण प्रदत्तमादेशं विमृशन्नाह-

**"समादिष्टोऽहमार्येण, अथवा स्वामिना।**[3]

कस्मिंश्चिद वनोद्देशे परित्यज्य निवर्तस्व- इति। तदहमपि स्वजनविस्रम्भनिर्विशङ्का देवीमादाय गहहरिणीमिव बध्यभूमिं वनमुपनयामि। सन्दर्भेणानेन तस्य स्वामिपारवश्यं सहृदयत्वं च साधु प्रादुष्कतम्। अग्रे यदा स रामादेशविज्ञापनाय वक्तुकामोऽभूत, तदा वाष्पावरुद्धकण्ठतया न प्राभवद् व्याहर्तुम्। अभिव्यञ्जिता चैवं तदीया साऽवस्था कुन्दमालायाम्। यथा-

---

[1] उ च 6/19।
[2] कुन्द 1/3।
[3] कुन्द अ 1 पृ 516। 4/3।

**आर्यस्यादेश इत्येव, वक्तुमिच्छामि यत्नतः।**
**तथापि हृदयं गत्वा, ग्रन्थिं बध्नाति भारती।।**[1]

निर्वासनादेशश्रवणाद् यदा सीता मोहमुपगता, तदा लक्ष्मणस्तां प्रत्यानेतुं सविषादमचेष्टत। महता संयमेन धैर्येण च लक्ष्मणो रामसंदेशं विनिवेद्य संग्रह्णाति च सीतायाः प्रतिसन्देशम्। लक्ष्मणः सीतायारामयोरुभयोरपि परां विश्वसनीयतामाप्नोत्। अतएव श्रीरामः सीतानिर्वासनादेशपालने लक्ष्मणमेव विनियुङ्क्ते। निर्वास्यमानाऽपि सीता स्वस्या असानिनध्ये भर्तुः शरीरावेक्षणाय लक्ष्मणमेवानुरुणद्धि।

सीतात्यागावसरे तस्या असहायतां, व्याकुलतां चाक्लय्यलक्ष्मणो भृंशं निर्विण्णचेता जायते। तथा हि तस्या मर्मस्पर्शिनीयमुक्तिः-

**आर्या स्वहस्तेन वने विमोक्तुं,**
**श्रोतुं च तस्याः परिदेवितानि।**
**सुखेन लङ्कारसमरे हतं मा-**
**मजीवयन् मारुतिरात्तवैरः।।**[2]

सीताया दुःखदशां विलोक्य हरिणा, हंसाः शिखिनेऽपि च दुःखमग्ना जायन्ते, परं मानवाः स्वहृदयनिष्ठरता न त्यजन्ति इतिलक्ष्मणहृदयाभिव्यक्तिस्तदीयां संवेदनशीलतां महानुभावतां च सम्यक् प्रकाश्यं नयति। गच्छन् लक्ष्मणो गर्भस्थसन्ततिरक्षार्थं सीतां प्रार्थयते। अन्ते च स महता गाम्भीर्येण गङ्गां, लोकपालान्, हिंस्रपशून, नदीः, पर्वतांश्च सार्जवं सानुरोधं च सीतारक्षां याचते। यथा-

**सख्यो नद्यः स्वामिनो लोकपाला,**
**मातर्गङ्गे भ्रातरः शैलराजाः।**

---

[1] कुन्द 1/8।
[2] कुन्द 1/17।

**भूयो भूयो याचते लक्ष्मणोऽयं**
**यत्नाद् रक्ष्या राजपुत्री गतोऽहम्।।**[1]

सीतापरित्यागकाले या ग्लानिर्लक्ष्मणमनसि संरूढाऽभूद, वद्धमूला सा द्वादशवर्षानन्तरमपि न विस्मृतिं प्राप्ता। सदैव सीताविरहपर्याकुलस्य श्री रामस्य यमवेक्षणे एव वद्धाऽऽदर:। नैतिषे रामेण सह महर्षेर्वाल्मीकेराश्रमं गच्छन् स स्वीयां मनोदशां साधु निर्वक्ति-

**प्रथममनपराद्धां तां समुत्कृष्य देवी-**
**मगममहमगाधे कानने त्यक्तुकाम:।**
**पुनरपि कुलशेषं राममादाय देवं,**
**स्वजनविपदि दक्ष: क्वाप्यधन्य: प्रयामि।।**[2]

स सदैव रामस्य साहाय्ये समाश्वासने च स्वमन: संयमपूर्वकं तत्परोऽभूत। पथि सीतापदाङ्कितस्थले संचरतस्तस्य ऊरुस्तम्भ समजायत। ऊरुस्तम्हभेतुं विमृशन् स स्वान्त: सत्येन निश्चिनोति-

**"सुव्यक्तं गुरूजनसमाकान्तेन प्रदेशेन भवितव्यम्।"**[3]

चारित्र्यातिशयशालिनी सूक्ष्मतमा च तस्यानुभूतिरियम्, नूनं विस्मकारिणी। अग्रे कण्वस्रोतकथोद्घातेन अपरिचयरहस्योद्भेदे् सति यदा वाल्मीकि: सीतानिर्वासनमनुलक्ष्य राममुपालभते, तदा स लक्ष्मणविषये केवलमेतावदुक्तवैव विरराम-"सौमित्रे! [4] युक्तमिदम्? अथवा कस्तवोपालम्भ:, नियोज्यस्तवं कनीयान्" इति। एवमपि कर्तव्यानिष्ठेव तस्य महर्षिणाऽऽविष्कृता।

---

[1] कुन्द. 1/26।
[2] कुन्द. 3/1।
[3] कुन्द अ 3, पृ. 57।
[4] कुन्द अ 6, पृ. 145।

अन्ते च सीताप्रभावोद्गतया विश्वम्भरया चारित्रशुद्धो सत्यापितायाम्- लक्ष्मणे रामदेशाज्जानकीं प्रणमन् सलज्जम् प्राह-

**"आर्ये ! बध्य: पातकी लक्ष्मण: प्रणमति।"**[1]

तदासीता-"कुतस्त्वया आत्मा निन्द्यते। एवम् गुरूनियोगवर्ती चिरंजीव।"
इति वदन्ती तस्य ज्येष्ठानुवर्तित्वमभिनन्दयति।

अथ रामो लक्ष्मणं साम्रज्येऽभिषेक्तुं महर्षिमनुज्ञामाभियाचते स्वार्थसंस्पर्शशून्यो लक्ष्मण: साञ्जलिबन्धं रामं प्रार्थयते-

"यदि प्रसन्नमार्येण, तेन तनयसंक्रामिणा युवराजशब्देन विभज्यतां चिरकालानुचर: सौमित्रि"।[2]

वाल्मीकिरपि तद्वचनं प्रशंसन् प्राह- "इक्ष्वाकुकुलसदृशमभिहितम्।"
रामेणापि-"का गति:। अनतिक्रान्तैव रामेण लक्ष्मण- प्रार्थना" इति तदनुरोधात् कुशस्याभिषेकं विधत्ते।

एवं कुन्दमालायां विविधयन्दर्भेषु प्रसंगाचिरेखाभि: सर्वथोदात्तं निर्मलतरं च सौमित्रेश्चारित्रचित्रमारचितम्।

उत्तरचरिते लक्ष्मणचरित्रविकासाय न विशेषवकाश:। तत्र प्रथमे सप्तमे चाङ्के सामान्यतया लक्ष्मणोपयोगे विहित:। प्रथमोंके स चित्रदर्शनप्रस्तावमादाय प्रविशति। तद्यथा-

"आर्य ! अर्जुनेन चित्ररेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथ्यामालिखितम्। तत्पश्यत्वार्य:।"[3]

---

[1] कुन्द अ 6, पृ. 159-160।
[2] कुन्द अ 6, पृ 162।
[3] उ. च अ 1, पृ. 23-24।

तदा रामः- "जानासि वत्स ! दुर्मनायमानां देवी विनोदयितुम्" इति तस्य दाक्षिण्यमभिनन्दति। चित्रदर्शनप्रसंगे नास्त्येवंविधः कोऽपि कार्यक्रमो येन लक्ष्मणचरित्रोन्नयनं सविशेषं सम्पद्येत। केवलं स्वाभावसिद्धं रामच्छन्दानुवर्तनं तस्य व्यज्यते। वाढम्, एको विनोदकरोऽपि प्रसंङ्गस्तत्रोपनिबद्धो यः समाकर्षति सतां चेतः। चित्रे मिथिलादृत्तान्तमध्ये विवाहमडपदृश्यं प्रदर्शयता लक्ष्मणेन- इयमार्या[1], इयमप्यार्या माण्डवी, इयमपिवधूः श्रुतकीर्तिः" ऊर्मिला संगोपिता। तद्भावं विजानन्ती एव सीता- "वत्स इयमप्यपरा का? इति सविनोदं पृच्छति। लक्ष्मणश्च- "अये ! ऊर्मिला पृच्छत्यार्या" इति प्रणयलज्जा-स्मित-सुभगं भावमाविष्कुर्वन् चमत्करोति सहृदयानां चेतः। चित्रदर्शनावसाने सीतादोदिपूर्त्ये तां भागीरथीतीरवनानि नेतुं रथपस्थापनाय लक्ष्मणो गच्छति। अत्रान्तेर दुर्मुखदुर्वृत्तेन राजा सीतानिर्वासनं समादिशति। अतस्तदादेशपालनमपि लक्ष्मणेनैव सम्पादनीयमभूत्।

सप्तमेङ्के वाल्मीकिप्रणीताभिनयदर्शनाय आतोद्यास्थाने समाजसन्निवेशाय लक्ष्मणो रामेण नियुक्तः। अग्रे च गर्भाऽङ्कदृश्यदर्शनेन मुहुर्मुहुर्मोहमापद्यमानं श्रीरामं समाश्वासयति। सीतायां लोकान्तरंगतायां यदा मूर्च्छामापन्नो रामश्चिरं नोच्छ्वसितितदालक्ष्मणः-

"भगवन्[2] वाल्मीके ! परित्रायस्य-परित्रायस्व, एष ते काव्यार्थः? इति सकरुणव्यङ्ग्यनाचष्टे। अन्ते रामेण स्वीकृतायां सीतायां प्रणमति वैदेहीम्। सीता च- "वत्स![3] ईदृशस्त्वं चिरं जीव ! इत्याशीर्भिस्तमभिनन्दति।

एतमुत्तरे निर्दिष्टसन्दर्भैर्लक्ष्मणस्य रामनुवर्तित्वमेव चिरप्रथतमुपनिबद्धम्। कुन्दमालायां तु विविधप्रसङ्गोद्भावनैः प्रतिपदमभिव्यज्यमानोत्कर्षस्तच्चारित्र्यप्रकर्ष प्रकाशतेतराम्।

वाल्मीकिः-

---

[1] उ च अ 1, पृ 32।
[2] उ च अ 7, पृ 372।
[3] कुन्द 1/27।

कुन्दमालायां महर्षेर्वाल्मीकेर्निरतिशयगौरवशालि चरित्रचित्रमारचितम्। स एव परदु:खकातर: कारुणिकमूर्धन्यो मुनिर्निर्वासितामशरणां सीतामभ्युपपत्तमुपागत:। यथा तच्छब्दैरेवातिस्फुटम्-

**आकर्ण्य जह्नुतनयां समुपागतेभ्य:,**
**सन्ध्याभिषेकविधये मुनिक्षेरकेभ्य:।**
**एकाकिनीमशरणां रुददतीमरण्ये,**
**गर्भातुरां स्त्रियमतित्वरयाऽऽगतोऽस्मि।।**[1]

वार्ताक्रमेण "इयं दशरथस्य बधू:, विदेहाधिपतेर्दुहिता सीता" इत्यवगत्य महर्षि र्वनागमनकारणं तां पृच्छति-

"किं कृतोऽयमत्रभवत्या: प्रासादतलादधोऽवतार:?"[2] इति। सीता लज्जया न किमप्युंत्तरं प्रतिपद्यते, तदा वाल्मीकिर्योगचक्षुषा सर्वं वृत्तमवेत्य ब्रूते-

"वत्से ! जनापवादभीरुणा रामेण केवलं परित्यक्ता, न तु हृदयेन। निरपराधा त्वमस्माभिरपरित्याज्यैव। एह्याश्रमपदं गच्छाव:।[3] एतमुक्तेऽपि तम् अनभिजानन्ती सीता परपुरुषशङ्कया पृच्छति-

"को नु त्वम्?"
वाल्मीकि: स्वपरिचयं प्रकाशयन्नाह-
**सोऽहं चिरन्तनसखो जनकस्य राज्ञस्-**
**तातस्य ते दशरथस्य च वालमित्रम्।**
**वाल्मीकिरस्मि विसृजान्यजनाभिशङ्काम्,**
**नान्यस्तवायमवले श्वसुर: पिता च।।**[4]

---

[1] कुन्द 1/27।
[2] कुन्द अ. 1, पृ 31।
[3] कुन्द अ 1, पृ. 31।
[4] कुन्द 1/29।

वाल्मीकेरमृतोपमया समाश्वासनगिरा लब्धविस्रम्भा सीता वन्दनपुर:सरं आह- "त्वं लोकस्य वाल्मीकेः, मम पुनस्तात् एव। तद्गच्छ स्वमाश्रमपदम्।''

पितुर्निकेतमिव तदाश्रमं गच्छन्तीं विश्वस्तां सीतां प्रति पारिवारिकं सद्भावं-सौहार्दं च समुल्लासवन् स पुनर्ब्रवीति-

**इक्ष्वाकूणां च सर्वेषां, क्रियाः पुंसवनादयः।।**
**अस्माभिरेव पच्यन्ते, मा शुचोगर्भमात्मनः।**

**कौशल्यापादशुश्रूषासौख्यं वृद्धासु लप्स्यसे।**
**पश्य सख्यो भगिन्यश्च, तवैता मुनिकन्यकाः।।**[1]

परोपकारव्यसनिनः सहृदयशिरोमणेरस्य महर्षेश्चरित्र मानवताया मस्तकं समुन्नमयितुमलम्। तच्च सविशेषं चित्रयता दिङ्नागेन नूनं स्वीकृतिर्धन्यतां नीता।

योगचक्षुषा सीताया अनुक्तमपि वृत्तं महर्षिः साक्षात्कृतवान् इति महिमा कोऽपि तस्य। अग्रेऽपि कुन्मालाङ्कितं वृत्तद्वयं वाल्मीकेस्तपः प्रभावातिरेकव्यञ्जकम्।

1. तत्प्रभावात् स्वर्गैकसुलभा अप्सरः शिरोमणिस्तिलोत्तमा रामायणसंगीतकनिमित्तम् तदाश्रभातिथिर्भवति।
2. तद्ववचनमहिम्ना आश्रमीर्घिकायां वर्तमानस्य स्त्रीजनस्य पुरुषनयनानामगोचरता सम्वृत्ता।

वाल्मीकेस्त्द्रूपं कुन्दमालाङ्कित सविशेषं सहृदयहृदयावर्जकं यदा स लोकापवाद श्रवणमात्रेण कृतसीतापरित्यागं रामं सकोपं समुपालभते। निभालनीयस्तत्रत्योऽयं प्रश्नोत्तरक्रमः-

---

[1] कुन्द 1/31-32।

"वाल्मीकिः[1]- (रामंप्रति) अथ दशग्रीववीरबध्यावसाने सीताप्रतिग्रहं प्रति कः प्रमाणीकृतो देवः प्रमाणेन?

रामः- भगवान् वैश्वानरः।

वाल्मीकिः- भोः प्रत्ययनिवृत्ते किंकारणम्?

एवं सीतासमक्षमेव वाल्मीकिना समुपालब्धो रामो निरुत्तरं मौनमालम्बते। स "हा धिक् का धिक् ममाधन्यायाः कृते एवम् अधिक्षिप्यते आर्यपुत्रः।"[2] इतिवदन्त्याः सीताया अपि सहानुभूतिपात्रतां प्राप्नोति। तथा लज्जया शिरः कण्डूयनं कुर्वन्तं तं पुनरपि महर्षिः प्राह-

वत्स[3] किमनेन शिरःकण्डूयनेन। गृहाण कुशलवौ। गच्छामः स्वमाश्रमपदम्। इति।

पुनश्च सीतां प्रति- वैदेहि![4] परिशोध्यतामात्मा- समुद्घुष्यताम्- विकारानुरूपः प्रतीकारः इति चरित्रसत्यापनप्रैषं विदधाति। एतत् प्रसङ्गसमीक्षया महर्षेः परोपकारप्रवणता सुस्पष्टवादिता, निरपेक्षता, तेजस्विता च साधु परिस्फुटतामिति। अन्ते च वसुन्धरायामन्तर्हितायाम् वाल्मीकेरादेशादेव रामः सीतां पाणौ गृह्णाति कुशाद्यमिषेकमङ्गलं च सम्पद्यते।

एवं सीताऽनुगहाणादारभ्य समाप्ति यावन्महर्षेर्भूमिकाऽतीव महत्त्वपूर्णा, सम्यगङ्किता च सा कुन्दमालायाम्। उत्तरचरिते महर्षिर्वाल्मीकिः प्रायः समग्र एव नाटके किमप्यभिसन्धायेव भवभूतिना दृश्यतया नोपस्थापितः। केवलं सप्तमेऽङ्के- "भगवन् वाल्मीके ! उपनयेदानी सीतागर्भसम्भवौ रामभद्रस्य कुशलवौ" इति अरुन्धत्यादेशात् कुशलवौ समादाय प्रविशति, ब्रवीति च-

---

[1] कुन्द अ. 6, पृ 145।
[2] कुन्द अ 6, पृ 145।
[3] कुन्द अ 6, पृ 146।
[4] कुन्द अ. 6, पृ 147।

वत्सौ! [1] एष वां रघुपतिः पिता। एष लक्ष्मणः कनिष्ठतातः। एषा सीताजननी "एष राजर्षिजनको मातामहः।" इति।

उत्तरचरिते सीता निर्वासनात् परं वाल्मीकिना नानुगृहीता, न च ा प्राप्नोति वदाश्रमम्, प्रत्युत स्वात्मानं सा गङ्गाप्रवाहे निक्षिपति, तत्रैव दारकद्वयं प्रसूते, गङ्गापृथ्वीभ्यां संरक्ष्यते च। स्तन्यत्यागानं परं गङ्गादेवी कुशलवौ वाल्मीकेरर्पयति। तयोः शिक्षा दीक्षा, पालनं पोषसां च तदाश्रमे एव सम्पद्यते। एवं कुशलवयोः संरक्षणे, स्वप्रण्णीतसरसाभिनयप्रयोगेण रहस्योद्भेदपुरस्सरं पुनः सीतारामयोः सगमने च वाल्मीकेर्महत्त्वं परोक्षतयैवोपनिबद्धं भवभूतिना। दृश्यतया यादृशं चरित्राङ्कनं कुन्दमालायां वाल्मीकेरुलभ्यते, तादशमन्यत्र कुत्रापि अनुपब्धपूर्वमेवैति बोध्यम्।

**अन्यपात्राणिः-**

**कण्वः-**

कुन्दमालायामन्यपात्रेषु वाल्मीकि- शिष्यः कण्वः किमपि वैशिष्ट्यमावहति। स महर्षिणा श्रीराममनोविनोदाय नियुक्तः। नैमिषमाहात्म्योपन्यासबन्धुरं मनोमुग्धकारि प्राकृतिकदृश्यं समुपस्थापयन् रामविनोदेन सममेव स्वज्ञानवैभवं वाक्कौशलमपि च विशदीकरोति सः। किञ्च कुशलवयो रामायणमानानन्तरं सीतापरित्यागात् परं रामायणांशं समुपन्यस्य रहस्योद्भेदं विधत्ते। यत् कायं भवभूतिना रूचिरर्भाङ्कदृश्योपन्यासेन कलात्मकरीत्या सम्पादितं, तत्कुन्दमालायां कण्व- प्रगीतश्लोकत्रयेणैव निष्पन्नम्।

**कौशिकः- (विदूषकः)-**

एकमन्यदपि पात्रं कुन्दमालायां पुरुषपात्रेषु वैशिष्ट्यमर्हति। सोऽस्ति विदूषकः कौशिकः। भासकालिदासादिवद् विदूषकोपन्यासं विधाय कुन्दमालाया रोचकता नाटकीयता च सम्बर्धिता कविना। कौशिको रामवयस्यः विदूषकसुलभमौग्ध्याद्युपेतः।

---

[1] उ च. अ 7, पृ 378-379।

चतुर्थपञ्चमयोरङ्कयोस्तस्य भूमिका नूनं चेतश्चमत्कारकारिणी। पञ्चमाङ्कगतं सन्दर्भमिम निभालयन्तु-

रामः[1]- (उत्तरीयमवलोक्य) कथमुत्तरीयमपि निमितमतिमायाविन्या। अहो ! परवञ्चनायामतिमहन्नैपुणम्?

विदूषकः- भो वयस्य ! विलक्षमुख इव दृश्यसे ! किं तया वञ्चितोऽसि?
रामः- वञ्चितः कृतोऽस्मि।
विदूषकः- किं मया श्रुतं रहस्यमन्यथा भवति।

विदूषकस्येयं भूमिका कुतूहलस्य कियतीं परां काष्ठां नयत्यभिनयमिति विभावयन्तु सचेतसः। पञ्चमेऽपि कुशलवयोः परिचयप्रसङ्गे कौशिकस्य भूमिका, विनोदकरी, नाटकोचिता चेत्यलं पल्लवितेन।

नारीपात्रेषु वेदवती- यज्ञवती चेति द्वे मुनिकन्यके सीतासखीत्वेन निर्दिष्टे तयोर्वेदवती सीताया अन्तरङ्गभूता विस्रम्भभूमिः। नागैवैतयोराश्रमयोग्यमौचित्यमावहति। सीताचारित्रप्रकाशनाय एव च एतयोरुपयोगः, नान्यत् स्वीयचरित्रगतं किमपि वैशिष्ट्यम्। अथापि वेदवत्या वाक्कौशलं सीतां प्रति स्नेहश्च हृदयमावर्जयत्येव।

दिव्यपात्ररूपतया केवलं भगवती विश्वम्भरा एवोपस्थापिता। तस्याश्चित्रणं प्रभावोदात्तं विस्मयावहं च। सर्वे कृताञ्जलयस्तामेव स्तुवन्ति-

**त्वं विभर्षि जगत्, कृत्सनं, शेषमूर्ध्ना त्वमुह्यसे।**
**काम्यानभिमतान् देवास्त्वामेव दुदुहः पुरा।।**
**उन्नतौ विन्ध्यकैलाशौ, तव देवि पयोधरौ।**
**जाह्नवी हारयष्टिस्ते, समुद्रा रत्नमेखला।।**

---

[1] कुन्द. अ 4, पृ 98।

**यज्ञाङ्गानां समुत्पत्त्यै, वासवस्त्वां प्रवर्षति।**
**रत्नानामोषधीनां च त्वां प्रसूतिं प्रचक्षते।।**[1]

देवी वसुन्धरा सीतायाः जननी, सीताप्रभावाकृष्टा प्रादुर्भूय सा तस्याश्चारित्रशुद्धिं सत्यापयति। यथा-

**रामं दाशरथिं मुक्त्वा न जातु पुरुषान्तरम्।**
**मनसाऽपि गता सीतेत्येवं, विदितमस्तु वः।।**[2] इति।

**चन्द्रकेतुः-**

उत्तररामचरितप्रयुक्तेषु पुरुष-पात्रेषु केषांचन वैशिष्ट्यं नितराम् नाटकोचितं सहृदयावर्जकं च। तत्र लक्ष्मणात्मजः कुमारश्चन्द्रकेतुः प्राथम्येन गणनीयः। शौर्य-सौहार्द-विनय-विनिश्रमस्य चरित्रं महनीयरघुकुलकुमारो चितमेव। अयम् अल्पवयस्येव दत्तदिव्यास्त्रसम्प्रदायोऽश्वमेधीयाश्वरक्षायां नियुक्तः। चिरन्तनसूतेन सुमन्त्रेण तस्य शौर्यमनुलक्ष्य साधूक्तम्-

**जातस्य ते पितुरपीन्द्रजितो निहन्तु-**
**र्वत्सस्य वत्स ! कति नाम दिनान्यमूनि।**
**तस्याप्यपत्यमनुतिष्ठति वीरधर्मं,**
**दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम्।।**[3]

एकाकिनि लवे प्रहरतः स्वसैनिकानेव धिक्करोति स वीरधौरेयः। स्वविरुद्धमेव युद्धोद्यतं लवं महानुभावः सख्येनामन्त्रयन् स शौर्य-सौहार्दयोः स्पृहणीय संभेदं कमप्याविष्करोति- यथा-

**अत्यद्भुतादपि गुणातिशयात् प्रियो मे,**

---

[1] कुन्द 6/27-28।
[2] कुन्द 6/34।
[3] उ च 5/24।

**तस्मात् सखा त्वमसि, यन्मम तत्तवैव।[1]**
**तत् किं निजे परिजने कदनं करोषि,**
**नन्वेष दर्पनिकषस्तव चन्द्रकेतुः।।**

"लवोऽपि सत्यमैक्ष्वाकः खल्वसि" इत्यमिदधानोऽभिनन्दति तत्शौर्यम्। स्वप्रतिद्वन्द्विनं लवं पदातिमवेक्ष्य रथस्थस्तेन योद्धुं लज्जमानश्चन्द्रकेतुः स्वयमपि रथादवतरति। स सुमन्त्रं मन्त्रयन् प्राह-

"अवतराम्यार्य सुमन्त्र![2] स्यन्दनात्।

सुमन्त्रः- कस्य हेतोः?

चन्द्रकेतुः- एकस्तावदयं वीरपुरुषः पूजितो भवती, अपि च खल्वार्य क्षत्रधर्मः परिपालितो भवति। न रथिनः पादचारम् अभियुञ्जन्तीति शास्त्रविदः परिभाषन्ते।

वीरधर्मपुरस्कृतेयं तदुक्तिः तस्य गाम्भीर्यशौर्य च व्यञ्जयन्ती चारित्र्योत्कर्ष प्रथयतेतराम्। लवेत श्रीरामचरित्रोपरि कृते आक्षेपे चन्द्रकेतोः क्रोधव्यञ्जनं नितरां स्वाभाविकम्। सीतात्यागमूलकेन श्रीरामस्य सन्तान विच्छेदेन भृंश सन्तप्यते तस्य चेतः। तथाहि तदुद्गारः-

**अप्रतिष्ठे कुलज्येष्ठे, का प्रतिष्ठा कुलस्य नः।**
**इति दुःखेन तप्यन्ते, त्रयो नः पितरोऽपरे।।[3]**

श्रीरामभद्रे समागते लवस्य परिचर्य प्रियवयस्यतयोपन्यस्यति सः। एवं विनयौदात्त्य-सौहार्द-गाम्भीर्य-शौर्यादिशोभनीयगुणानामपूर्वाः समवायः कुमारचन्द्रकेतौ दृश्यते। अतएव तच्चरित्रं लवामेक्षयाऽपि समधिकं सौष्ठवं संपुष्णाति। यो हि सूनृतां वाचं प्रशंसन्नपि राघवचरित्रदूषणभूषणां दृप्तां वाचं प्रयुङ्क्ते स्वयम्।

---

[1] उ च 5/10।
[2] उ च. अ 5, पृ 280।
[3] उ च 4/23।

जनक:-

उत्तरचरिते राजर्षिर्जनकोऽपि स्पृहणीयरूपेणाङ्कित:। सीताशोकेन समाप्लुतचेतसस्तस्य करुणा जनकोचितैव। तदाकलनाय एकमेव पद्यमिदं पर्याप्तं स्यात्-हा[1] वत्से! -

**नूनं त्वया परिभवं च वनं च घोरं,**
**तां च व्यथां प्रसवकालकृतामवाप्य।**
**क्रव्याद्गणेषु परित: परिवारयत्सु,**
**संत्रस्तया शरणमित्यसकृत् स्मृतोऽहम्।।**

सीताया अग्निशुद्धिपरिचर्चया स भृशमुन्मथितचेता जायते, तदुद्गारश्च प्रकाशयति तदुत्कर्षं तेजस्वितां च। यथा-

**"आ: कोऽयमग्निर्नाम अस्मत्प्रसूतिपरिशोधने?"**[2]

अहो ! निर्दयता दुरात्मनांपौराणाम्। अहो ! रामभद्रस्य क्षिप्रकारिता।
एतद् वैशसवजघोरपतनं शश्वन्ममोत्पश्यत:,
क्रोधस्य ज्वलितुं झटित्यवसरश्चापेन शापेन वा।

भृशमुद्दीप्तोऽपि तस्य क्रोध: कौशल्याया दु:खेन, अरुन्धत्या: पारिसान्त्वनेन च शनै:-शनै: प्रथमं ब्रजति। राजर्षिर्लवं विलोक्य वात्सल्यरसनिषक्तोऽतितरां समाकृष्टचेता जायते। भवभूते: कलाचणलेखन्याङ्कितम् तच्चरित्रम् अनुपम हृदयावर्जकं च। कुन्दमालाया मेवंविधचरित्राङ्कनस्याभाव एवेत्यलं तत्कथनेन। उत्तरे अष्टाचक्र-दुर्मुख सुमन्त्र-चरित्राङ्कनमा स्वस्थाने समीचीनमेव। कार्यानुरूपं दुर्मुख इति नामधेयमपि महदौचित्यमावहति। वाल्मीकि-शिष्ययो: दण्डायनसौघात् वयोश्चित्राङ्कनं नाश्रमसंस्कारानुरूपम्। तत्रापि सौघातकेवर्तालापस्तु सर्वथा तपोवनसंस्कृतिशून्य एव। यदि विदूषकोपयोगविमुखेन भवभूतिना हास्यप्रयोगसम्पूर्त्यै तदुपन्यास: कृत: स्यात्, तदापि हीनरुचिव्यञ्जकतया न स सतां मोदकर:। वटूनां

[1] उ च अ 4, पृ. 221।
[2] उ च 4/25।

चित्रणं स्वाभाविकं वालोचितौत्सुक्यादिमण्डितमिति तत् सर्वथा समीचीनम्। नारीपात्रेषु नदीदेव्यौ मुरला-तमसे तथा भगवती भागीरथी, भगवती वसुन्धरा, वनदेवता वासन्ती, एता: सर्वा दिव्यप्रकृतय: साधु चित्रिता:। प्राय: सर्वा एव सीता स्नेनसिक्तास्तत्पक्षपोषणपपराश्चित्रिता:। केवलं गङ्गा रघुकुलदेवता सविशेषं रामभद्रे सहानुभूतिमयी तत्पक्षपातिनी चेति गर्भाङ्कदृश्यप्रसङ्गे[1] स्पष्टम्।

मानवीषु श्रीराममातुश्चित्रं करुणा-वात्सल्यसंवलितं भद्रतमम्। सा सीता परित्यागकारणाद् रामभद्रदर्शनमपि परिहृतवती। महर्षेर्जनकस्य समक्षं गन्तुमपि ना नोत्सहते। तदानीन्तस्या अयं मार्मिको मानसो भाव:-

"कथं नु खलु वत्साया मे बध्वा वनगतायास्तस्या: पितूराजर्षेर्मुखं दर्शयाम्:।''[2] इति।

तस्या दु:खं विलोक्य पुत्रीनिर्वासनसंरब्धोऽपि जनक: प्रशमितनिजकोप: समवेदनासिन्धौ निमज्जति। रामस्य शैववप्रतिकृतिं लवं विलोक्य सा वात्सल्यकारुण्यतरङ्गेषु। परिप्लवमाना कां कामपि मनोभावनां गाहते।

भवभत्यङ्कितनिखिलनारीपात्रेषु जगद्वन्धाया भगवत्या अरुन्धत्याश्चरित्रं भव्यतमम्। आर्षतेजोमयी ज्ञानसौजन्यमूर्तिर्महनीयतमा सा देवी। सा रघुकुलगुरोभंगवती वशिष्ठस्य धर्मपत्नी। ऋष्यशृंङ्ग्यज्ञाद् विनिवृत्य- "नाहं वधूविरहितामयोध्यां प्रवेक्ष्यामि''[3] इति तस्या एव प्रथमाग्रह:। तदनुरोधाद्वशिष्ठस्यापि वाल्मीकितपोवननिवासाय आस्था संजाता। सीतां प्रति उदात्ततमेयं भावना तस्या:-

**शिशुर्वा वत्सा वा यदसि मम तत्तिष्ठतु तथा,**
**विशुद्धेरुत्कर्षस्त्वयि तु मम भक्ति द्रढ्यति।**
**शिशुत्विं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां,**

---

[1] उ च अ 4, पृ 359-360।
[2] उ च अ 4, पृ 218।
[3] उ च अ 2, पृ 95।

**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।।**[1]

यदा कुलगुरार्वचनेऽपि अविश्वसन्ती कौशल्यां निराशामाविष्करोति, तदा आर्षतिजोदीप्ता सा ब्रूते- यथा-

"अरुन्धती- तत् किं मन्यसे राजपत्नि ! मृषोद्य तदिति। नहीदं क्षत्रिये मन्तव्यम्।''[2]

**आविर्भूतज्योतिषां ब्राह्मणानां,**
**ये व्याहारास्तेषु मा संशयोभूत्।**
**भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता,**
**नैते वाचं विप्लुतार्थां वदन्ति।।**

एभिर्वचोविन्यासैस्तस्या आर्षतेजोमयं रूपं सुतरां साक्षात् कर्तुं शक्यते। अन्ते च गर्भाङ्कदृश्येन प्रमाणितशुद्धचारित्रां लोकान्तरादागतां सीतादेवी गङ्गापृथ्व्यौ अरुन्धत्यै एव समर्पयतः। अरुन्धत्या प्रेरितैव सीता मोहमापन्नं रामभद्रं स्वामृतस्पर्शेन संजीवयति। तदादेशादेव च महर्षिर्वाल्मीकिः कुश-लवौ रामायार्पयते। देव्या अरुन्धत्या निर्भर्त्सिताः पौरजानपदा सीतां देवीं नमस्कुर्वन्ति, अभिनन्दन्ति च। तदादेशादेव रामः सीतां स्वीकुरुते। यथा-

अरुन्धती- जगत्पते रामभद्र !

**नियोजय यथाधर्म, प्रियां त्वं धर्मचारिणीम्।**
**हिरणमय्याः प्रतिकृतेः, पुण्यां प्रकृतिमध्वरे।।**[3]

अतस्या भगवत्या महमानं साधु निरुक्तवान् नमस्यन् राजर्षिर्जनकः-

**यया पूतम्भन्यो निधिरपि पवित्रस्य महसो,**
**पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः।**
**त्रिलोकीमङ्गल्यामवनितललीनेन शिरसा,**

---

[1] उ. च. 4/11।
[2] उ. च 4/11, पृ 231।
[3] उ च 7/20।

**जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम्।।**[1]

एवं तत्तत्प्रसङ्गेषु चित्रिताया भगवत्या अरुन्धत्या आर्षं भव्यं पावनं च व्यक्तित्वं साधु संस्फुरति चमत्करोति च शेमुषीमतां चेतः।

०

आतपकठोरे मध्याह्नेऽपि निगमान्तविद्यामध्येतुम् अगस्त्याश्रमपरिसरं व्रजन्त्या अत्रेय्या आजीवनव्यापि विद्याव्यसनित्वं कस्य न हरति चेतः सचेतमः। एवं नूतनपात्रोद्भावने, वैचित्र्यशालिचरित्रनिरूपणे च भवभूतेर्दिङ्गनागापेक्षयाऽतिशायित्वं दुरपह्नवम्। भवभूतिना दिव्यपात्रसमावेशोऽपि बाहुल्येन विहितः। दिङ्गनागेन तु केवलं देवी विश्वम्भरा एव एका दिव्यत्वेनोपस्थापिता। दिङ्गनागकृतौ सर्वाण्यपि पात्राणि मानवीया भावोपेतानि स्वाभाविकगुणदोष-दौर्बल्यसमन्वितान्येवाङ्कितानि। तानि चास्माकमनुभूयमानजागतिकजीवने चिरपरिचितानीव अस्मासवन्यतमानीव च प्रतीयन्ते। भवभूतिना च सर्वेष्वेव पात्रेषु लोकोत्तरत्वम् दिव्यत्त्वं च समावेशितम्। न तैः सहास्माकर्मध्ययनयोगोऽस्ति, नेतैः सह नैकट्यपर्यवसायी सम्बन्धः शक्यते कर्तुम्। भक्त्या वन्दनीया एव ते। न तेषु सुलभा साधारणीकृतिः। इति।

श्रीकृष्णचरित्रवर्णना वैविध्यं भजतेऽधिसंस्कृतंसाहित्यम्। मर्यादापुरुषोत्तमख्य दाशरथेः श्रीरामचन्द्रस्य यादृशं शरच्चन्द्रप्रतीकाशं चरित्रवर्णनं तत्रभवताऽदिकविनावाल्मीकिना कृत, स्वोपज्ञरामायणमहाकाव्ये तदेव प्रायः परवर्तिभिरपि शतमितैः कविपुङ्गवैः ईषत्परिवर्तनैस्सार्द्धमङ्गीकृतम्। परन्तु नन्दनन्दनस्य कृष्णस्य चरित्रप्रतिपादकानि, अथ च उपजीव्यभूतानि पुराणानि संख्यया बहून्यासन्। प्रत्येकस्मिन् च पुराण-ग्रन्थे कृष्णचरित्रमपि विसंवादि संलक्ष्यतेऽपरतः। श्रीमद्भागवते समुपस्थापितः श्रीकृष्णो निखिलचराचरजगन्नियन्ता, धर्मसंरक्षणार्थमेव कृतभूतलावतारौ, लीलाविग्रहश्चास्ति। परन्तु ब्रह्मवैवर्तपुराणेऽसौ वृषभानुजास्नेह-सन्दोहदोलाधिरूढो, गोपवघूटी-प्रणयानुरञ्जन-निमज्जितमनाः ब्रजौकसां कुटुम्बौ परलिक्ष्यते। एवं खलु अन्येष्वपि पुराणेषु श्रीकृष्णचरित्रवर्णनं सपरिवर्तनं विलक्षणञ्चावलोक्यते।

---

[1] उ च 4/10।

इमान्येव उपजीव्यभूतानि प्राक्तनपुराणानि आम्नायीकृत्य, भाविनि काले तैस्तैस्साहित्यकारैः नन्दननन्दनजीवनचरितं स्वैरं चित्रितं स्वेषु काव्येषु। काव्येष्वपि, दृश्यश्रव्यतया द्विधा विभक्तेषु, क्वचिन्महाकाव्यनायकरूपेण क्वचिच्च नाट्यनायकरूपेण कृष्णचरितं समुपबृंहितम्। एकतस्तावत्पण्डितराजजगन्नाथादिप्रणीतेषु मुक्तपद्येषु कृष्णचरितं दृग्विषयीक्रियतेऽपरतस्तावच्छिशुपालवधादिपृथुतमहाकाव्येषु तच्चरितं नवनवोत्प्रेक्षणसंवलितं राराज्यते।

'रूपकाणि दश' इति दशरूपककारस्य आचार्यधनञ्जयस्य मतम्। तथापि लोकानुरञ्जनप्रवणतया, पार्थिवेतिवृत्तोपस्थापनपरायणतया, रसचर्वणैकमूलभूततया च नाटकमेवातिशेतेऽन्यान् नवमितान् रूपकभेदान्। प्रकरणभाणव्यायोगसमवकारडिमेहामृगवीथ्यङ्कप्रहसनानि च स्वस्वसंविधान-विलक्षणतयैव च परस्परं पृथग्भूतानि वर्तन्ते। क्वचिद् वैश्यो द्विजो वा नायको भवति, क्वचिच्च मकररथ्याधिवासी लम्पटो विटः। क्वचिद्देवविशेषः नयति कथावृत्तं, क्वचिच्च भीमादयो दिव्यादिव्याः पुरुषाः।

एवंभूतेऽपि भेदोपभेदपर्याकुले रूपकवाङ्मये, श्रीकृष्णचरिताश्रितानि रूपकाणि न बहूनि वर्तन्ते इति सर्वथा न। आ महाकविभासात् इदानीं यावत् परश्शतानि दृश्यकाव्यानि तत्तद्युगेषु तैस्तैः कवनपटुभिः वरटवाहिनीस्तनन्धयभूतैः कविभिः कृष्ण माश्रित्य कृतानि। तत्र च प्रथममेव भास-मुनिना रूपकद्वयं कृष्णचरिताश्रितं न्यपादिबालचरितं दूतवाक्यं च। बालचरितस्य नायकभूतः कृष्णो नायकोचितधृतिक्षमादिसर्वगुणोपपन्नः महासत्त्वोऽतिगम्भीरः अविकत्थानो धीरोदात्तश्च दृश्यते। परन्तु दूतवाक्योपवर्णितं कृष्णचरितं किञ्चिद् विलक्षणं वर्तते। अत्र वासुदेवः कृष्णः कौरवपाण्डवयोर्मध्ये शान्तिसंस्थापनार्थं तटस्थजनोचितं प्रयासं कुर्वन्, दुर्योधनादिभिर्निजभुजदण्डप्रचण्डबलोन्मत्तैः पिशुनकैः कदर्थितस्सन्, प्रकृटीकृतविश्वरूपः कृतभाविकुरुक्षेत्रमहासमरोद्घोषः संलक्ष्यते।

अनेनैव प्रकारेण मथुरादासप्रणीतवृषभानुजानाटिकायां, युवराजराजवर्मप्रणीतरुक्मिणीपरिणये, रविवर्मप्रणीतप्रद्युम्नाभ्युदये,

कुलशेखरप्रणीतसुभद्राधनञ्जये, वत्सराजप्रणीतरुक्मिणीहरणे ईहामृगे, काशीपतिप्रणीतमुकुन्दानन्दभाणे, रूपगोस्वामिप्रणीतविदग्धमाधवे, ललितमाधवे च, शंकरलालशास्त्रिकृतश्रीकृष्णचन्द्राभ्युदये च सविशेषं सविस्तरं सपरिवर्तनं च प्रविततं कृष्णचरितं संलक्ष्यते। इदानीन्तनैरपि कतिपयनाट्यलेखनदत्तचित्तैः कविभिः सुमनोहराणि, युगप्रवृत्तिपरितोषकरणि कृष्णपरकाणि रूपकाणि कृतानि विद्यन्ते।

किन्त्वस्मिन् शोधप्रबन्धे समीक्षा-विषयीकृत्य श्रीकृष्णचरित्रवैविध्यं प्रस्तुतोतुकामोऽयं शोधार्थी प्रोत्सहते। आचार्यरूपगोस्वामिप्रणीतं विदग्धमाधवं नाम नाटकं प्रथमो ग्रन्थः। काशीपतिप्रणीतो मुकुन्दानन्दो भाणश्चापरः। इमावेव ग्रन्थौ कथमूरीकृतौ कथं नान्ये? नाटकद्वयं, भाणद्वयमेव वा कथं न स्वीकृतम्? नाटकभाणयोश्च मिथः परिग्रहणे को विशेष इत्यनेके प्रश्नास्साम्प्रतं समुज्जृम्भन्तेतराम्। संग्रहवचनेनैवास्य समाधानं प्रस्तूयते।

मधुसूदनचरिताश्रितेषु समस्त-रूपकोपरूपकभेदेषु नाटकमेव स्वानुगुणतया श्रेष्ठमित्युक्तं पूर्वमेव। तत्रापि च रूपगोस्वामिप्रणीतं विदग्धमाधवं, समस्तनाट्यलक्षणोपपन्नं, रमणीयकथाविन्यासभूषितं, सन्धिसन्ध्यङ्गनाट्यवृत्तिपताका-स्थानकाकाशभाषितोपक्षेपकैश्च संयुक्तं समर्चनगृहमिव गोमयोपलेपमण्डितं स्वीक्रियते गीर्वाणगवीपर्मज्ञैः।

अस्मिन् खलु सप्ताङ्के नाटके आचार्यरूपगोस्वामिना स्वकल्पनावैशिष्ट्यैः परिभूष्य कृष्णचरितं निबद्धम् राधाऽत्र नायिका, कृष्णश्च धीरललितो नायकः।

एतद्विरुद्धं श्रीकाशीपतिप्रणीतमुकुन्दानन्दभाणे कृष्णचरितं निखिललोककदर्थनाधिष्ठानभूतं विटस्य चरितं वर्तते। अस्मिन् भाणग्रन्थे मुकुन्दीभूतो विटो भुजङ्गशेखरः वेशवाटलम्पटः, सायंप्रातः रतिपरायणासु वाराङ्गनासु समासक्तो गेहाद्गेहमाहिण्डमानः परिलक्ष्यते। साहसं खलु कविकाशीपतेः यः सकललोकाराधितः योगीश्वरचरितं खलीकृत्य भाणरूपेण प्रस्तुतयान्। क्व खलु तारापथमण्डितं चञ्चच्चन्द्रमण्डलं, क्वं च वराहकीटाद्युपसेविते मलीमसपङ्के तस्य प्रतिबिम्ब?

वस्तुतः कृष्णचरितस्येदमेव परस्परविरोधि वैविध्यं प्रदर्शयितुं प्रवृत्तोऽस्मि। अष्टाशीत्यधिकचतुर्दशशततमात् खिस्ताब्दात् समारभ्य एकनवत्यधिकपञ्चदशशततमं खिस्ताब्दं यावत् श्रीरूपगोस्वामिनो जीवनावधिरिति निश्चीयते विविधैः साक्ष्यैः। तस्य जीवनकाल एव सिकन्दरलोदिशेरशाहसूरिहुमायूंइस्लामशाहाकबरप्रभृतयस्तुरुष्य भूपतयोः भारतभुवमलञ्चक्रुः। एवमपि भण्यते यदयमेव रूपगोस्वामी कस्यचिन्मानसिंहस्य गुरुरासीत्। एतत् प्रमाणं वृन्दावने मानसिंहनिर्मापितगोविन्दमन्दिरस्य शिलालेखे वरीवर्ति। अनेनैतदुक्तं भवति यत् श्रीरूपगोस्वामिपादो नवाधिकशतवर्षदेशीयस्सन् विग्रहं त्यक्तवान्।

अस्यैव चैतन्यदेवदीक्षितशिष्यस्य, श्रीजीवगोस्वामिपितृव्यचरणस्य, बङ्गवसुन्धरोत्सङ्जातस्य, वृन्दावनविहारभूमिहृतचेतनस्य, नन्दनन्दनचरणाब्जचञ्चरीकस्य श्रीरूपगोस्वामिनः त्रयोदशकृतीनामन्यतमं वर्तते विदग्धमाधवं नाम नाटकम्।

विदग्धमाधवे राधाकृष्णयोः केलिरहोवृत्तं प्राप्यते। जानीमो वयं यत्कृष्णचरितं महाभारतश्रीमद्भागवतविष्णुपुराणब्रह्मवैवर्तपुराणपद्मपुराणेषु प्राधान्येन निबद्धं तत्रभवता कृष्णद्वैपायनेन व्यासेन। अस्यैव कृष्णचरितस्य विकला वर्णना कादाचित्कतया वायुलिङ्गाग्निमत्स्यदेवीभागवतपुराणेषु चापि प्राप्यते। गर्गसंहितायां, हरिवंशपुराणे चापि, वासुदेवकथा निबद्धा। परन्तु तथ्यमिदं सर्वथावधेयं यत्पुराणेषु सर्वत्रैव माधवसहचरी, 'राधा न दृश्यते'। केवलं ब्रह्मवैवर्तपद्मपुराणयोरेव सविस्तरं राधाकृष्णयोर्मिथश्चित्रणम्। अनेनैतदुक्तं भवति यत् विदग्धमाधरवचयिता श्री रूपगोस्वामिमहाभागः ब्रह्मवैवर्त, पद्मञ्चैव मुख्यतयोपजीव्यत्वेनाङ्गीकरोति।

विदग्धमाधवस्य नायिकाभूतेयं राधा कस्याश्चिद् गोपिकाया मुखरायाः नप्ती विद्यते। इयमेव मुखरा, नन्दगोपार्धाङ्गिन्याः यशोदाया धात्री।

मुखरायाः प्रेरणयैव राधायाः पाणिग्रहणं जटिलापुत्रोभिमन्युना गोपेन सार्धं समपाद्यते। साम्प्रतं स्पष्टमिदं यद् राधा अभिमन्युसहचरीत्वेन परकीयां कान्ता

वर्तते। एवंभूतेऽपि नन्दनन्दनेन कृष्णेन साकं तस्याः प्रणयिनीत्वं कथं सम्भवति? अभिमन्युपार्यायां श्रीकृष्णस्य निरर्गलसतताशक्तिः केषामाचारमर्यादैकपक्षपातिनां सनातनार्यपरम्परापराणां जनानां हृदयेषु जुगुप्सां, विचिकित्सां, सन्देहकन्दलं वा नोपपादयेत? पुनश्च, यदि श्रीकृष्ण एवंविधस्यैव न्यक्कृतलोकाचारस्य प्रणयवृत्तस्य सूत्रधारः, कथं तर्हि विदग्धमाधवनाटके धीरललितत्वं, प्रख्यातोदात्तचरितत्वञ्च? एवं सिद्धे सति कोटिमितानां कृष्णभक्तानामास्थापि खञ्जीक्रियते, राधाकृष्णप्रणयस्य धवलतुहिनाचलोपमख्य, कुन्देन्दुतुषारहाराट्टाहाससन्निभस्य पवित्रतापि उभयतः पाशपात्रीक्रियते। एवं हि चिन्त्योऽयं विषयः।

उच्यते साम्प्रतम्। प्रायेण सर्वेऽपि वृन्दाकगवीनिष्णाता विपश्चितो विद्वत्तल्लजाः जानन्ति यद् ब्रह्मवैवर्तपुराणेऽपि, भाण्डीरवने, राधाकृष्णयोः स्वयमेव प्रजापतिना ब्रह्मणा सम्पादितं पाणिपीडनेतिवृत्तं वर्णितं समुपलभ्यते। वस्तुतो राधा श्रीकृष्णस्यैव नित्यसहचरी न खलु तदतिरिक्तस्य कस्याप्यन्यस्य जनस्य।

विदग्धमाधवस्यापि प्रथम एवाङ्के सान्दीपनिमुनेर्माता, देवर्षिनारदस्य च शिष्या वृद्धा पौर्णमासी सोत्कण्ठं कथयति- 'येनानयोः सुभगयोरुचिता भवेयं श्रृंङ्गारमाङ्गलिकयोर्नवसङ्गमनाय'।[1] गुरुनिदेशवशात् पौणमासी निरन्तरमेव प्रयतते राधाकृष्णयोस्सङ्गमनाय। परन्तु पौणमास्याः वेविका नान्दी सङ्गम-वृन्तान्तस्य याथार्थ्यम्, औचित्यं वा नावगच्छति। परपरिग्रहेण सार्धं कस्यचित् सुभगम्मन्यनवयुवकस्य राङ्गमनं कथं न शङ्कनीयं भवेत्?

यद्यपि रूपयौवननिधानभूता राधा नानुरूपाऽभिमन्योः। परन्तु किमेतेन? पतिस्तु पतिरेव भवति। काणः खञ्जः खल्वाटो विकृतो बधिरो वा ! यः कोऽपि कीदृशोऽपि, कुतोऽपि, कथमपि भवेत् यदि पतिरूपेण प्राप्यते तर्हि तेनैव साधं जीवनयात्रा प्रवर्तयितव्येत्येव भारतीयार्षजीवनाचारसंहिता। अस्मादेव कारणात् नान्दी राधाकृष्ण सङ्गमनार्थं पौर्णमास्या क्रियमाणमुद्योगं समर्थितूं नोत्सहते। नान्दी इदमपि सुष्ठु जानाति अनुभवति च यत्रन्दनन्दनं कृष्णमन्तरेण न कोऽपि राधिकां स्वपरिग्रहीकर्तुं योग्यः। राजहंसी मानसरोवर एव शोभते न खलु पङ्किलपल्वले।

---

[1] विदग्धमाधवम् 1/12।

सिद्धसिन्धुर्गङ्गा समुद्रमेव संगच्छते न खलु अन्यं कमपि। नान्दी विज्ञापयति 'कृष्णतोऽन्ये पुरुषेण तादृशीनां करस्पर्शनम् असह्यम्।'

अस्मिन्नेव सन्दर्भे नान्द्यास्सन्देहलेशं विशकलयितुकामा देवी पौणमासी रहस्योद्घाटनं विदधाति- 'तदवचनार्थमेव स्वयं योगमायया मिथ्यैव प्रत्यायितं तद्विधानाम् उद्वाहादिकम्। नित्यप्रेयस्य एव खलु ताः कृष्णस्य।' पौर्णमास्या अनेनैव संक्षिप्तव्यवहरणेन सर्वोऽपि सन्देहो विनश्यति। अनेनैतदुक्तं भवति यद् राधा न खलु परमार्थतोऽभिमन्योः पत्नी। दुरात्मा मथुराधिपतिः कंसो राधालावण्यमरन्दलुब्धचञ्चरीकस्सन् प्रसह्य, सबबलात्कारं क्वचित्तां नापहरेदित्येव परिरक्षमाणा योगमाया मिथ्यैव अभिमन्युना गोपेन पाणिभ्यां राधिकां ग्राहितवती। अयमेव संकटस्थितिनिवारणोपायः।

वस्तुतस्तु राधा सम्प्रत्यपि कुमारी, सम्प्रत्यपि अनूढा, नन्दनन्दनप्रणयवागुराबद्धहरिणीव राराज्यते। षोडशवर्षदिशीया राधा सौन्दर्यप्रतिमूर्तिः, आनन्दकौमुदी कृष्णस्य नित्यप्रेयसी ह्लादिनीशक्तिश्च तस्य। अयमेव रूपगोस्वामिनोऽभिमतो वादः।

एवं हि, यथा खलु कविकुलगुरुणा कालिदासेन महर्षेः दुर्वासनः शापं परिकल्प्य, पद्मपुराणधिक्कृतं दुष्यन्तचरितं सौदात्यं परिरक्षितं तथैवात्र योगमायाचमत्कारं विनियोज्य तत्रभवता श्रीरूपगोस्वामिपादेन परपरिग्रहाभिलाषदूषितं, नन्दनन्दनमलीमसचरितमपि पवित्रितमित्यत्र न कोऽपि सन्देहलेशावसरः। साम्प्रतं विशदीभवति निखिलमेव सविधानकं नाटकस्य यदभिमन्युर्नः खलु राधिकाया भर्ता। कामं लोकदृष्ट्या स भवेत्तस्याः कतिपयातजनसाक्ष्यसममतः पतिः। किन्तु निर्विचिकित्समिदं यदयं विवाह वृत्तान्तो योगमायाया एव विलासविचेष्टितमासीत्। ये खलु परमार्थवादिनस्ते सुष्ठु जानन्ति अनपायसंश्रयं प्रणयं राधाकृष्णयोः। अतएव विदग्धमाधवनाटके समुपवृंहितं राधाकृष्णगणयतेतिवृत्तं सर्वथा प्राक्तनपुराणमर्यादानुगतं, समीचिनं शाश्वतं, सनातनं च सिद्धयति।

अनया खलूणपत्त्या विदग्धमाधवनाटकनायकभूतस्य श्रीकृष्णस्य चरितं गुणगणमण्डितम् सुरीभवति। राधामयं त्रिलोकं पश्यन्ननन्दन: साम्प्रतं स्वकीयं धीरललितं चरितं साधु प्रकाशते-

**राधा पुर: स्फुरति पश्चिमतश्च राधा,**
**राधाधिसव्यमिह दक्षिणतश्च राधा।**
**राधा खलु क्षितितले गगने च राधा,**
**राधामयी ननु बभूव कुतस्त्रिलोकी।।**

यद्यपि सम्पूर्णेऽपि विदग्धमाधवे नाटके श्रीकृष्णस्य धीरललितमेव चरित संलक्ष्यते। परन्तु यत्र कुत्रापि तस्य धृष्टचरितं, शठचरितं चापि द्रष्टुं शक्यते। स्थालीपाकन्यायेनैवैक: सन्दर्भो निरूप्यते। भया। विदग्धमाधवस्य चतुर्थेऽङ्के चन्द्रावल्या सार्धं कृष्णस्य एकान्तसङ्गमनं व्याख्यातं कविना। भगवति मरीचिमालिनि अस्तङ्गते सति, प्रवृत्ते च निशारम्भे पद्मासुबलयोर्मिथ: प्रयासेन चन्द्रावलीकृष्णयोस्संगमस्सम्भवति। कृष्ण: सानन्दं व्याहरति- सेयं मम लोचनेन्दीवरचन्द्रिका चन्द्रावली (इति सादरमुपेत्य) प्रिये !

**चन्द्रस्तव सुखबिम्बं चन्द्रो नखराणि चन्द्र:**
**नवचन्द्रस्तु ललाटं सत्यं चन्द्रावली त्वमसि।।**[1]

अस्मिन्नेव प्रसङ्गे 'सुन्दर ! भ्रमरस्येव नवनवानुसारिणी ते प्रकृति: कथं चिरासङ्गनीरसासु यद्मिनीषु अभिरमताम्? इति चन्द्रावल्या निगदिते सति श्रीकृष्ण: प्रतिवचनीकुरुते - प्रिये ! श्रूयताम्-

**विपिनान्तरे मिलन्ती मधुररसा शीतलस्पर्शा।**
**अमृतमयी त्वद्विरहे समजनि मम तापनुत्तये राधा।।**[2]

---

[1] विदग्धमाधव 4/8।
[2] विदग्धमाधव 4/9।

अस्मिन् आत्मकथने राधाप्रणयनिमज्जितनिखिलचित्तवृत्तिः श्रीकृष्णोऽकस्मादेव अतर्कितपूर्वम् धारायाः स्थाने 'राधा' शब्दं प्रयुङ्क्ते। तस्येदं गोत्रस्खलनं चन्द्रावल्याः कृते शल्यभूतम्। राधाशब्दं व्याहरन्नेव माधवस्स्वस्खलनं विज्ञाय तत्क्षणमेव ससम्भ्रमं 'राधा राधेति' वारद्वयं सरभसं वक्ति। अनया वर्णनया श्रीकृष्णचरितस्य शाठ्यं साधु प्रस्फुटीभवति। एकतस्तावत् राधया सार्धं विविधावितथशपथोक्तिपुरस्सरं प्रणयप्रवर्तनम्, अपरतश्च चन्द्रावल्यापि सार्धं व्यभिचरित- कन्दर्पोच्छ्वसितनिर्वहणमिति व्यवहारद्वयं शाठ्यमन्तरेण न किमप्यन्यत्।

साम्प्रतं व्याख्यायते श्रीकाशीपतिप्रणीत-मुकुन्दानन्दभाणस्य प्रतिपाद्यभूतं श्रीकृष्णस्य विटचरितम्। कौण्डिन्यगोत्रीयद्विजवंशावतंसः क्वचिद् द्रविडदेशे अष्टादशशततमे ख्रिस्ताब्दे जनिं लेभे। उत्तरभारत इति डॉक्टरवासुदेवशरणाग्रवालमहोदयः स्वीकरोति चतुर्भाणीप्रस्तावनायाम्।

अस्य भाणस्य वैशिष्ट्यद्वयम् प्राधान्येलोल्लेखनीयम्। प्रथमं तावत् निखिलेऽपि संस्कृतभाणवाङ्गमये इयमेवैका विलक्षणकृतिः यस्यां स्त्रियः प्राकृतभाषां प्रयुञ्जन्ति। अन्यथा सर्वेऽपि भाणग्रन्थाः प्रायेण आद्यन्तं संस्कृतभाषयैव निबद्धा वर्तन्ते। अस्मादेव कारणात् नाट्यशास्त्रदृष्ट्या भाषोऽयं 'मिश्रभाण' इत्युच्यते। तद्यथा स्वयमेव काशीपतिः मुकुन्दानन्दनामा मिश्रभाणः प्रयुज्यते।

द्वितीयं वैशिष्ट्यम् यदस्मिन्नेव भाणे लीलापुरुषोमः श्रीकृष्णो विटरूपेण प्रस्तुतः अन्यथा सर्वेष्वपि भाणग्रन्थेषु केवलं वेशवाटोपजीवी खण्डितवृत्तः कोऽपि अन्वर्थनामा विट एव नायको भवति। मुकुन्दानन्दभाणस्य संविधानकं विलक्षणं प्रतीयते। अस्य नायको भुजङ्गशेखरनामा विटः नन्दनन्दनीभूय रङ्गमञ्चं प्रविशति। सर्वा अपि वारयोषितोऽत्र तथैव गोपदयूटीरूपेण समुपस्थापिताः। स्वप्रियतमया मञ्जर्या वियुक्तः श्रीकृष्णस्तामेव मार्गयन् प्रातः काले पथि पुरस्सरीभवति। मध्येमार्गं नैके वियोगसन्तप्ताः सगन्धाः सुहृदः, असकृदु भुक्ता वाराङ्गनाश्च प्राप्यन्ते। विटीभूतः कृष्णः सर्वान् व्योगक्षेमान् पृच्छति, सन्तोषयति,

उपायमुपदिशति, हासपरिहासं च प्रवर्तयति। जटावत्याः प्रयत्नेन च सान्ध्यवेलायां नायकनायिकासङ्गमनं संभवति। संक्षेपत इदमेव मुकुन्दानन्दभाणस्येतिवृत्तम्।

साम्प्रतं रामदिवद् वर्तितव्यं न रावणादिवत् इत्याचार्यमम्मटाभिप्रायमुररीकृत्य पृच्छेयं मुखरायते यत् किमौचित्यं वर्ततेऽस्य विटायितकृष्णचरितचित्रणस्य? काव्यं तावत् व्यवहारविदे, शिवेतरक्षतये, सद्यः परनिर्वृतये च भवति। परन्तु चिन्त्यमिदं यदनेन, शिष्टजनोपेक्षितभुजङ्गलम्पटचरितस्य भगवद्विग्रहभूतस्य लीलापुरुषोत्तयस्य नन्दनन्दनस्योपरि आरोपमात्रेण किमुपक्रियते जगतां कविना। निजेष्टदेवभूतस्य, वृन्दावनविहारिणो गीतामृतावण्टकस्य भगवतः श्रीकृष्णस्येदं जारकर्मसमर्थनपरायणं चरितं स्मारं स्मारं कस्य भक्तिरसामृत-सिन्धुशफरायमाणस्य भक्तजनस्य चित्तं नोद्विजते? लक्ष्यतां तावदियं श्रीकृष्णविग्रहवर्णना-

**चौर्येणैव कृतं हि कुक्षिभरणं जन्मप्रभृत्यन्वहं**
**गोपीनां पणदानशून्यसुरतक्रीडाक्रणं चेत्पुनः।**
**दुर्वारं तव जन्मकेटिभिरपि त्व कृष्ण ! तत्तादृशः**
**किम्मे दास्यसि किं तवास्ति च वयं किं वा ग्रहीष्यामहे।।**[1]

एकतस्तु महामहिमशालिनो द्वारकाधीशस्येदं विजुगुप्सितं चित्रणमपरतः श्रीरूपगोस्वामिपादोऽभिव्यनक्ति-

**जातस्तम्भतया पयांसि सरितां काठिन्यमापेदिरे**
**ग्रावाणो द्रवभावसंवलनतः साक्षादमी मार्दवम्।**
**स्थैर्यं वेपथुना जहुर्मुहुरगाज्जाड्याद् गतिं जङ्गमां**
**वंशी चुम्बति हन्त यामुनतटीक्रीडाकुटुम्बे हरौ।।**[2]

---
[1] भक्तिरस्यमृतसिन्धु श्लोक- 113।
[2] विदग्धमाधवम् 2/25।

मन्ये भाणेतिवृत्तानुरोधवशादेव श्रीकाशीपतिना लोकसमर्चितं श्रीकष्णचरितं खलीकृतम्। परन्तु अनेनापि तर्केण कृष्णचरितावमानना न वितथीभवति। यदि काव्येतिवृत्तानुरोधवशादेव कविभिः स्वैराचरणं क्रियेत तर्हि कथन्न खलु केनापि कविना लङ्केशो रावणो नायकीकृतः? कथन्न खलु वृक्कोदरो भीमः प्रहसनपात्रीकृतः, कथन्न खलु कोऽपि विट एव व्यायोगनायकीकृतः? वस्तुतः कविपरम्परा हि प्रभवति कवि- कर्मणि। कृष्णस्य विटीकरणेन देवविषयिणी रतिः खण्डिता भवति, अतएव श्रृङ्गाररसचर्वणा सर्वथाऽसम्भवतीति काव्यत्वमलिम्लुचं दोषं विनिर्दिश्यैव विरम्यते।

## नायक-नायिकाभेदप्रणयेन

दृश्यकाव्यप्रणयने ये ये विषया प्राधान्येन सन्निवेशनीया भवन्ति, भवभूतेः काव्येषु तेषां याथर्थ्येन यथास्थानं सन्निवेशः कस्य न कुतूहलं जनयति। नूनं नाटककारेषु भवभूतेः स्थानं सर्वोत्कृष्टमित्यत्र न काप्यत्युक्तिः । 'उत्तरे रामचरिते भवभूतिर्विशिष्यते।'' इत्युक्तिश्च सर्वथा चारितार्थ्य भजते। सम्प्रति तस्य नाट्यासौष्टवमुद्दिश्य किञ्चित्प्रपञ्च्यते।

उत्तरचरितस्य द्वितीयाङ्कारम्भे वनदेवता नेपथ्य स्वागतमुदीरयन्ति "स्वागतं तपोर्धनायाः'' वन्देवताया अनेनोद्गारेण आत्रेय्याः आगमनं सूचितम्। रंगभूमिप्रवेशात्पूर्वमेव यदि कश्चित् जवानिकानन्तयणैत्र कञ्चिद्विषयं सूचयति तच्चूलिकेति पदेन व्यपदिश्यते- "अन्तर्जवनिकाच्छसैश्चूलिकार्थस्य सूचनम्'' इति तल्लक्षणात्। अत्र तापस्या आगमनसूचकं वनदेवतानां उक्तवचनं चूलिकाया उत्कृष्टोदाहरणम्। वीरचरितस्य चतुर्थाङ्कारम्भेऽपि चूलिकाप्रयोगकौशलं कविना प्रदर्शितम्। एवमेवाकाशभाषितस्यापि उत्कृष्टमुदाहरणं उत्तरचरितस्य षष्ठाङ्के दृश्यते।

रामचन्द्रः लवं पृच्छति- कोऽयन्यस्त्व भ्रातेति। प्रश्नसमातिसमकालमेव नेपथ्ये निम्नाङ्कितं वचनं श्रवणपथन्नमवतरति- भाण्डायन ! भाण्डायन!

**आयुष्मतः किल लवस्य नेरन्द्रसैन्ये**

**रायोधनं ननु किमात्थ सखे तथेति।**
**अद्यास्तमेतु भुवनेष्वधिकारशब्द,**
**क्षेत्रस्य शस्त्रशिखिन: शममद्य यान्तु।।**

यद्विषयको रामचन्द्रस्य प्रश्न: सशुक एव स्वयं भाण्डायनेन सह वार्त्तालापं कुर्वन, अकस्माद् दर्शकानां दर्शनपथं गत:। भवभूतिता भाण्डायनस्य रंगभूमिप्रवेशं परिहृत्याकावभाशितेन तत्सूचना दत्तेति आकाशभाषितस्यात्युत्कृष्टमदाहरणम्।

भवभूते: करुणं रस: सर्वस्वभूत: इति प्राक् कृतसङ्केतम्।

**एको रस: करुण एव निमित्तभेदाद्,**
**भिन्न: पृथक्पृथगिव श्रयते विवर्त्तान्।**
**आवर्त्तबुद्बुदतरङ्गमयान् विकारा-**
**नम्भो यथा सलिलमेव हि तत्समस्त्म्।।** इति।

स्वयं कवि: तगसामुखेन करुणरसस्यैव प्राधान्यं विज्ञपयति अन्ये रसास्तु तद्विकृतय एव। करुणरस्यैव रससार्वभौमत्वमुद्घोषितं कविना।

अष्टौ रसा:। तेषु करुणस्यैव प्राधान्यं भवभूतिनयेन। अत: 'कारुण्यं भवभूतिरेव तनुते'' इति प्रसिद्धोक्तिरपि तद्विषये सासञ्जस्यसावहति। तथा च प्राह गोवर्द्धनाचार्य आर्यासप्तशत्याम् :-

**भवभूते: सम्बन्धाद् भूधरभूतेव भारती भाति।**
**एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा।।**

'अपि ग्रावा रोदित्यपि च दलति वज्रस्य हृदयम्' इति ग्राव्णो रोदनं वज्रहृदयस्य दलनमिति न किमद्भुतं गिरा गुम्फनम्।

उत्तरचरिते करुणरस: पराकाष्ठां नीति इवावलोक्यते। तद्यथा-

**हा हा देवि स्फुटति हृदयं स्रंसते देहबन्धः,**
**शून्यु मन्ये जगदविरतज्वालमन्तर्ज्वलामि।**
**सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,**
**विश्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि।।** इति।

भवभूतिना यदि क्वचिदपशब्दप्रयोगोऽपि कृतः तर्हि सोऽपि अतीव नैपुण्येन कृतः। तद्यथा- उत्तरचरितस्य पञ्चमाङ्केलवः चन्द्रकेतुं प्रति आह :-

**वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते,**
**सुन्दस्त्रीदमन्येऽप्यखण्डयशसो लोके महान्तो हि ते।।**
**यानि त्रीण्यपराङ्मुखन्यपि पदान्यासन् खरायेधने,**
**यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः।।**

न महतां चरितान्यलोचनाविषयाणि भवन्ति। ताडकावधेऽपि रघुपतिः स्त्रीवधपातकेन न लिप्तः। इत्यादि।

यद्यपि भवभूतिना नाटकेषु यत्रतत्र वीरकरुणबीभत्सादिविविधरसानां सञ्चारः कृतः, तथापि करुणरसो यथा शिखरयितोऽस्य रचनायां तथा नाऽन्ये रसाः। करुणरसमेव स रसान्तरप्रधानत्वेनाङ्गीकरोति।

मन्यामहे आलङ्कारिका। क्वचित्क्वचिद्दोषमप्युद्भावयन्ति। तद्यथा- वीरचरितस्य द्वितीयाङ्के परशुरामराचन्द्रयाः युद्धवार्त्तामध्य एव कञ्चुकी रामचन्द्रं निवेदयति रामसन्तपुरे प्रेषयितुम्। परशुरामयाज्ञामवाप्य रामोऽप्यन्तःपूरे गतः। एतत्सन्दर्भमालङ्कारिको मम्मटाचार्यः अकाण्डच्छेददोषेण दूषयति इति। इमेऽकिञ्चित्करा दोषास्तु तत्प्रदीप्तप्रतिभाभास्वरसन्दर्भच्छटायां विलीयमाना व दृक्पथमवतरन्ति मतिमाताम्।

संस्कृतसाहित्ये यदुच्चतमस्थानं महाकवयेऽस्मै समर्पितः तन्निदान्त्वेन न केवलं भाषासौष्ठवमेव मृग्यम्, अपितु तद्व्यातिरिक्तं तद्रचनाया भारतीयसंस्कृतेः प्राचीना

परम्परा, रीतिनीतिव्यवहारा, अध्यात्मज्ज्योतिश्च परिदीप्यमानां प्राधान्येन तद्धेतुतामुपैति। एकतो वीररसमयं परिपूर्णतया प्रीणयति, अपरतोऽसौ करुणरसमुपलालयति। बीभत्सरसमपि कात्स्न्येंनोद्भासयति। अन्ये रसा यथा सन्निवेशं सौन्दर्येण निवेशिता विभाव्यन्ते। अतएव न केवलं भारतीयानामपितु माश्चात्पपण्डितानामपि हृदयपटलेषु भवभूतिकृतिभिः तत्प्रतिष्ठ्या श्रेष्ठत्वेन च पदं न्यधायि। तथा च :-

वीरचरिते - समाजपरिपाटीमृट्टङ्कयान्नह -

तृतीयाङ्के जामदग्नयं ब्राह्मणधर्म कियन्नैपुध्येनावबोधयति ब्रह्मर्षितशिष्ठमुखेन-

"अयि वत्स किमनया यावज्जीवनमायुधपिशाचिकया? श्रोत्रियोऽसि जामदग्न्यपूतं भजस्व पन्थानम्। आरण्यकश्चापि तत्प्रचिनु चित्तप्रसादनाश्चतस्रो मौत्र्यादिभावनाः। प्रसीदतु हि ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः। समाप्यतु परशुं च। तत्प्रसादजमुतम्भराभिधानमबहिःसाधनोपाधेयसर्वार्थसार्थ्यमपविद्ध- प्लवोपरागमूर्जस्व-लमन्तर्ज्योतिषो दर्शनं प्रज्ञानमपि सम्भवति। तद्धि आचरतिव्यं ब्राह्मणेन तरति येन मृत्युं पाप्मानम्।"

तदानीन्तनवैदिकसमाजे चतुर्णाम्वर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणां, ब्रह्मचारि-गृहस्थ-वानप्रस्थ-संन्यासाख्यानामश्रामणञ्च संग्रहेण परिज्ञानार्थ भवभूतिकृतवीरचरितस्योत्तररामचरितस्य पर्यालोचनं पर्याप्तम्। उत्तरचरिते चतुर्थाङ्के भांडायन-सौधातकिप्रभृतिविप्रवटूनां दैतिकचार्यामवलोक्य, द्वितीयेऽङ्के च क्षत्रियबालानाञ्च वेषाभूषाञ्च दृग्गोचरीकृत्य तदानीन्तनवेशभूषायाः परिचायो जायते। वसिष्ठागमे यदा महर्षिवाल्मीकिविद्यालयेऽनध्यायो जातस्तदा भांडायनन सौधातकिं सम्बोध्योक्तम् :-

"अपूर्वः कोऽपि बहुमानहेतुः गुरुषु सौधातके !"

**ब्राह्मणनभिलक्ष्य प्रतिपादयतिः-**

**आविर्भूतज्योतिषां ब्राह्मणनां,**

**ये व्याहारा तेषु मा संशयोऽभूत्।**

**भद्रा ह्येषां वाचि लक्ष्मीर्निषिकता,**

**नैते वाचं पिप्लुतार्थं वदन्ति।।**

एवमुत्तरचरितस्य चतुर्थाङ्के जनकेन लववेशवर्णनव्याजने क्षत्रियान्तेवासिनां लक्षणानि चित्रितानि :-

**चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतः,**

**भसम्स्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम्।**

**मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठकं,**

**पाणौ कार्मुकमक्षसूत्रवलयं दण्डः परः पैप्पलः।।**

भवभूतिना प्राचीसमाजस्य यत्प्रकृतचित्रणं कृतं स्वरचनायां, तद्विशदवर्णनमत्र नापेक्षते यद्यपि, तथापि तद्रचनासु तदानीन्तनशस्त्रीयचारव्यवहार प्रतिबिम्बस्यावभासस्तु वर्णनमर्हत्येव तच्चातुर्रीं सङ्कमयितुं बुद्धिपटलेषु विङ्मात्र, प्रदर्शनक्रमेण। यदा बहोः कालदनन्तरं, शूद्रमुनिं हन्तु, दण्डकारण्ये राममागतमवलोक्य तनसामुखेन सीतामुद्दिश्याह :-

**बिल्लुलितमतिपूरैर्वाष्पमानन्दशोकप्रभवमसृजन्ती तृष्णयोत्तालदीर्घा।**

**स्नायति हृदयेशं स्नेहनिष्यनिदनी ते, धवलबहलमुग्धा दुग्धतुल्येव दृष्टिः।।**

**इति।**

तत्र 'स्नहेनिष्यन्दिनी दुग्धकुल्येव दृष्टिः हृदयेशं स्नपयति।' इति कियन्मर्मस्पृग्वर्णनम्। नूनमेतद् भवभूतेरसाधारणकवित्वशक्तिं परिचाययति।

यद्यप्यसौ कालिदासस्य नाट्याकलतुलान्तु नाधिरोहति तथापि कविरेष सुश्रेष्ठो लब्धप्रतिष्ठश्चासीदित्यत्र न सन्देह। स्थान एवोक्त हरिहरेण कविवरेण :-

**जडानामपि चैतन्यं भवभूतेरभूद् गिरा।**

**ग्रायाऽप्यरोदीत् पार्वत्या हसतः स्म स्तनावपि।।**

कालिदासो भवभूतिश्चेत्युभावपि कवीश्वरौ संस्कृतसाहित्यस्य मूर्द्धाभिषिक्तौ नाट्यकारौ। यदि कालिदासः शृंङ्गाररससार्वभौमः, भवभूतिरपि करुणरस्य परमाचार्यः। उपभावपि स्व-स्वविषये निरुपमौ नात्र संशयलेशः। यद्यपि महापुरुषयोस्तुलना नोद्वहति खल्वौचितीम्, तथाप मानवस्वभावसुलभोऽयं विषयो यद्द्वोर्मिथः सन्तुलनन्नाम। इति हेतोरेव बहुभिः रामालोचकैस्तथा विहितं स्वस्वदृष्टिबिनछुमुद्दिश्य। तदत्राऽपि किञ्चचदिव तद्वितन्यते। भवभूतिकालिदासयोः नाट्याकलाकलापप्रपचञ्चे महदन्तरं प्रतिभाति। कालिदास्य रचनायां भूम्ना व्यञ्जनावृत्तिराश्रिता दृश्यते, भवभूतेश्च पुनरभिधावृत्तिरेव प्रायशो नृत्यति। शाकुन्तले दुष्यन्तः प्रथमदर्शन एव नितरां चमत्कृत उद्‌गृणाति 'अहो लब्धं नेत्र निर्वाणम्'। भवभूतिस्तु 'मालतीमाधवे' मालतीमवलोक्य माधवः'- 'अविरलमपि दाम्ना पौण्डरेण नद्धः स्नपित इव च दुग्धस्रोतसा निर्भरेण।' इति स्वहृदयभवमपि विशदय्याविष्करोति। यत्र कालिदासः सङ्केतमात्रं तनुते तत्र भवभूतिः विशद वर्णनमारचयित। कालिदास्य भाषा सुमधुरा शैली प्रासदिकी, भवभूतेस्य प्रौढा किञ्चित् कृत्रिमा, समासाडम्बराशालिनी च। कालिदास्य काव्यकलापे मानवीय हृदयस्य विविधरसरागराञ्जता कापि आन्तरप्रातिभप्रभा प्रभासमाना विलसित, भवभूतिरचनायां तु जीवनस्य आदर्शभूता कारुण्यस्म्प्लुता वाणी मर्त्तिमतीवावभाति, यद्यपि, काव्यकलानाट्यपाटवं, भावावेशसंश्लेषः उभायोरपनयोः कवी इवरयोरलौकिकी मार्मिकश्च वरीवर्त्ति तथापि तारतम्यदृशा मृश्यमाने त्ववगतं भवति यद् भवभूतिः कालिदास्य तुलान्तु खलु नैव संस्पृशति इति ध्रुवम्।

भारतीय नाट्यकलाकारेषु सम्राट हर्षवर्धनः (606-648) अतीव प्रसिद्धः। अस्य कृतित्वेनः प्रख्यातानि त्राणि नाटकानि, प्रियदर्शिकता-रत्नावलिनागानन्दाख्यानि। केचनात्र संशरते यदिमानि नाटकानि तेव हर्षवर्धनविरचितानि। किन्तु तेन केनाविदन्यकविना प्रणीतानि इमानि स्वनाम्ना प्रख्यापितानि। भवेन्नामैतत् किन्तु कतिपयैरन्तरङ्गप्रमाणैः साधयितुं शक्यते, यदिमानि सन्ति खल्वेकस्यैव लेखनीलतात्रसूतानीति। यतः त्रयाणामप्येषां प्रस्तावनायमेकस्यैव रचयितुर्नामोल्लेखः कृतोऽवगम्यते। प्रियदर्शिकायां नागानन्दे चोभयत्र द्वौ श्लोकौ समनौ, नाटकत्रयेऽप्येतस्मिन् सामनैव शैली समाश्रिता। एभिर्हेतुभिरस्य प्रणेतृसाम्यं

सुतरां प्रतिपत्तुं पार्यते। परन्तु कः खलु स प्रणेतेति प्रश्नस्तावदिदन्तया निर्णयमाकङ्क्षते। एतन्मतं यन्नृपवरेण हर्षवर्धनेन पुष्कलं द्रव्यं प्रदाय कविभ्योऽस्य नाटकत्रयस्य रचना प्रसाधितेति न प्रज्ञापथमवतरित साधकप्रमाणाभावात्।

यद्यपि मम्मटाचार्येण काव्यप्रकाशे द्रविणप्राप्तिमपि काव्यप्रयोजनत्वेनाङ्गीकृत्य 'श्रीहर्षादेर्धावकादीनामिव धन'मित्युदाहृतम्। टीकाकारैश्चास्याशयोऽपि उक्तकिंवदन्तीमुपपादयन्नेव दर्शितः। तथापि तन्न चारु, यतः दामोदरगुप्तेन (कैस्त 800) स्वकीयकुट्टनीसमाख्ये सन्दर्भे नृपद्वारा रत्नावलीनाटिकायाः प्रणयनस्योल्लेखः कृतः। एतदतिरिच्य हर्षवर्धनः स्वयमेकः श्रेष्ठः कविरासीदिति स्वयं बाणेन स्वरचितहर्षचरिते हर्षः किल 'गीर्हर्षः' इति विरुदेन विभूषितः। तद्यथा :-

**श्रीहर्ष इत्यवनिवर्तिषु पार्थिवेषु**
**नाम्नैव केवलमजायत वस्तुतस्तु।**
**गीर्हर्ष एष निजसंसदि येन राज्ञा,**
**संपूजितः कनककोटिशतेन बाणः।।**

किञ्च-

**'अपि चास्य प्रज्ञायाः शास्त्राणि कवित्वस्थ वाचः.........न पर्याप्तो विषयः।**
(हर्षचरिते)

अतः नाटकत्रयमप्येतन्नृपेन्द्रहर्षवर्धनविरचितमेवेति निश्चितप्रायम्।

एषु त्रिष्वपि रत्नेषु प्रियदर्शिकाऽस्य प्रथमारचना, रत्नावली द्वितीया, नागानन्दश्च खलु तृतीया रचना। तत्र प्रियदर्शिका रत्नावली चेति द्वे नाटिके। यत्र वत्सराजोदयनयोः प्राचीना लोकप्रिया च प्रणयगाथा सङ्ग्रथिता। नागानन्दे च पुनः जीमूतद्वारा नागानां गरुडात्परिरक्षणमेव कथावस्तुत्वेन प्रणिबद्धम्। नाटकमियं पञ्चभिरङ्कैर्निबद्धम्। बौद्धसिद्धान्तानां प्रभावञ्चैतत्प्रव्यक्तं व्यक्तीकरोति। क्षुद्रप्राणिनां कृतेऽपि तथाभूत आदर्शोऽनेन मनोरञ्जकतया पुरस्क्रियते। 'परोपकाराय सतां

विभूतय' इत्येवास्य ध्येयत्वेनोद्भाव्यते। जीमूतवाहनस्य मृत्युमुद्दिश्य लपिता सगद्गदं विलयति :-

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

**निराधारं धैर्यं कमिव शरणं यातु विनयः?**
**क्षमः क्षान्तिं वोढुं क इह? विरता दानपरता।**
**हतं सत्यं सत्यं व्रजतु कृपणा क्वाद्य करुणा?**
**जगज्जातं शून्यं त्वयि तनय ! लोकान्तरगते।।**

रत्नावली- चतुर्भिरङ्कैरलङ्कृतेयं नाटिका। अत्र प्रधानो रसः श्रृङ्गारः, नायकश्च धीरोदात्तो ललितः। कथावस्त्वपि कौतूहलजनकम्। धनञ्जयेन स्वकीये दशरूपके रत्नावल्या नैकानि पद्यानि उदाहरणत्वेनोद्धतानि। तेनास्य रूपकस्य सौष्ठवं प्रतिपादितं भवति। यद्यप्यत्र प्रणयस्य कोऽपि विलासविलसितं चित्रणं व्यधायि कविना तथाऽपि भारतीयसंस्कृतिमर्यादा क्वाप्युल्लङ्घिता न प्रतीता। वर्णनशैली खल्वतिमनोहारिणी। सूर्यः कमलिनीं प्रत्याह :-

**यातोऽस्मि पद्मवदने समयो ममैष सुप्ता मयैव भवती प्रतिबोधनीया।**
**प्रत्यायनार्थमतीव सरोरुहिण्याः सूर्योऽस्तमस्तकनिविष्टकरः करोति।।**[1]

रत्नावल्याः सौन्दर्यरचनां विधाय वेधा स्वयमाश्चर्योदन्वति निममज्ज :-

**"दृशः पृथुत्तरीकृता जितनिजाब्जपत्रत्विषः**
**चतुर्भिरपि साधुसाध्विति मुखैः समं व्याहृतम्।**
**शिरांशि चलितानि विस्मयवशाद् ध्रुवं वेधसो**
**विधाय ललनां जगत्त्रयललामभूताभिभाम्।।**[2]

उद्यानलतां व्यावृण्वन्नाह वत्सराज :-

---

[1] रत्नावली 3/10।
[2] रत्नावली 2/14।

**उद्दामोत्कलिकां विपाण्डुररूचं प्रारब्धजृम्भां क्षणा-**
**दायासं श्वसनोद्गमैरविरतैरातन्वतीमात्मनः।**
**अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवाम्,**
**पश्यन् कोपविपाटलद्युतिमुखे देव्याः करिष्याम्यहम्।।**

## श्रीमुरारिः

कविरयं माहिष्मतीनगर्यां कविप्रवरस्य वर्धमानस्यात्मजः मौद्गल्यगोत्रोत्पन्नः। विदुषी तन्तुमती देवी, चाप्य जननी। कलचूरीवंशोद्भवस्य कस्यचिद्राज्ञोऽयं सभापण्डितः इति तदीयानर्वराघवाख्यनाटकोपनतवर्णनेनानुमीयते। कविराजेन मङ्खकेन च ख्रैस्त 1135 तमाब्दसम्भवेन् स्वकीये श्रीकण्ठचरितनाटके मुरारेः राजशेखरात्पूर्ववर्त्तित्वमुत्कीर्तितम्। राजशेखरस्य समयः ख्रैस्तनवमशताब्दीदेशीयः। अतोऽस्यापि समयो नवमशताब्द्याः पूर्वार्द्धात्पूर्वमेव सम्भवति।

अनर्घराघवाख्यं नाटकमस्य कृतित्वेन प्रसिद्धं सप्तभिरङ्गैर्निबद्धं ताडकावधादारभ्य रामराज्याभिषेकपर्यन्तं समस्तघटनाचकालङ्कृतमतिरमणीयं रूपकम्। अस्य विलक्षणरचनाचारुतामवलोक्यैव 'मुरारेस्तृतीयः पन्थाः' इत्युक्तिः प्रचरति। बहुभिरालोचकैश्च बहुधा मुरारेः कापि निरतिशया प्रशस्तिरूपश्लोकिता :-

**मुरारिपदचिन्ता चेत्तदा माघे कतिं कुरु।**
**मुरारिपदचिन्ता चेत्तदा माऽघे मतिं कुरु।।**
**मुरारिपदचिन्तायां भवभूतेस्तु का कथा।**
**भवभूतिं परित्यज्य मुरारिमुररीकुरु।।**

शाङ्र्गधरपद्धतिकारेण तु मुरारिर्भवभूतेरप्यधिकां प्रतिष्ठामुपलम्भितः।

**भवभूतिमनादृत्य निर्वाणमतिना मया।**
**मुरारिपदचिन्तायामिदमाधीयते मनः।।**

मुरारेः कवित्वप्रौढिमा, प्रगाढपाण्डित्यञ्च भूरि भूरि प्रशंसामर्हति, अत्र न कश्चन सन्देहः। प्रौढवैय्याकरणेन भट्टोजीदीक्षितमहाभागेन सिद्धान्तकौमुद्यां नैकान्युदाहरणानि अनर्घराघवादुपगृहीतानि। तेनास्य पाण्डित्यप्रकर्षः सुतरां स्फुटीभवति। श्रीकविराजरत्नाकारेण स्वकीयहरविजये काव्येऽयमित्थं स्मृतः :-

**अङ्कोत्थनाटक इवोत्तमनायकस्य,**
**नाशं कविर्व्यधित यस्य मुरारिरित्थम्।।**

इत्यनेन रत्नाकरादपि पूर्वभवत्वमस्य सूचितं भवति। मुरारेर्गर्वोक्तयस्तु सुप्रसिद्धाः। आत्मानं परिचाययन्नसौ कवयति :-

**देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं,**
**जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः।**
**आब्धिर्लङ्घित एव वानरभटैः किन्त्वस्य गम्भीरता-**
**मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः।।**

यद्यपि भवभूतेर्नाटकानां कोटिं नाटीकतेऽस्य नाटकरत्नम्, तथापि तस्य नाटकविषये कयापि भवभङ्ग्या कटाक्षमापादयन् स्वनाटकोत्कर्षोत्थाकर्षणं प्रदर्शयन्नसौः निरूपयति :-

**तस्मै वीराद्भुतारम्भगम्भीरोदात्तवस्तवे।**
**जगदानन्दकाव्याय सन्दर्भाय त्वरामहे।।**

वस्तुतः कवेरस्य नाटकीयवस्तुतत्त्वन्तु न तथा प्रकर्षं प्रकटयति यथाऽस्य प्रौढपाण्डित्यपाटवम् इति।

**कवीश्वरी मोरिका**

इय हि खलु स्त्री कवयित्री कदाऽभूत, कतमञ्च जनपदं स्वजनुषा विभूषयामासेति। नाद्यापि विदितं मोरिकाया: पद्यानि सुभाषितग्रन्थेषु बहुश उपलभ्यन्ते। अस्या रचना रमणीया रुचिरा प्रासादिकी चेति। तद्यथा :-

**प्रियतमस्त्वमिमामनघार्हसि प्रियतमा च भवन्तमिहार्हति।**
**न हि विभाति निशारहित: शशी, न च विभाति निशापि विनेन्दुना।।**

**लिखति न गणयति रेखा निर्भरवाष्पाम्बुधौतगण्डतला।**
**अवधिदिवसावसानं मा भूदिति शङ्किता बाला।।**

**यामीत्यध्यवसाय एव हृदये बध्नातु नामास्पदं,**
**वक्तुं प्राणसमा समक्षमघृणेनेत्थं कथं पार्यते।**
**उक्तं नाम तथाऽपि निर्भरगलद्वाष्पं प्रियाया मुखं,**
**दृष्ट्वापि प्रवसन्त्यहो धनलवप्राप्तिस्पृहा मादृशाम्।।**

**मा गच्छ ममदाप्रिय प्रियशतैर्भूयस्तवमुक्तो मया,**
**बाला प्राङ्गणमागतेन भवता प्राप्नोति निष्ठां पराम्।**
**किञ्चान्यत्कुचभारपीडनसहैर्यतनप्रवृद्धैरपि-**
**त्रृट्यत्कञ्चुकजालकैरनुदिनं नि:सूत्रमस्मद्गृहम्।। इति**

नाटकचक्रे कविरत्नभट्टनारायणस्यातीव महनीयं पदमिति सर्वैरेवालङ्कारिकैरङ्गीकृतमवलोक्यते। अस्य कृतित्वेन प्रख्यातं वेणीसंहाराख्यं नाटकं निरतिशयमनोरमं वीररससम्भृतं ओजोगुणालङ्कृतञ्च। नाटकमिदं महाभारतीयमाख्यानमवलम्ब्य प्रवृत्तम् षड्भिरङ्कैर्निबद्धम्। महाकविदण्डिमहाभागोल्लेखेन ज्ञायते यदनेन काव्यत्रयं विरचितं परमधुना केवलं वेणीसंहाराख्यमेव केवलमुपलभ्यते-

**व्याप्तुं पदत्रयेणापि य: शक्तो भुवनत्रयम्।**
**तस्य काव्यत्रयव्यापतो चित्रं नारायणस्य किम्?।।** इति।

\

आलङ्कारिकेण ख्रैस्त 800 तमाब्दसम्भवेन मम्मटेन, 1000 तमाब्दसम्भवेन धनञ्जयेन, 850 तमाब्दभवेन आनन्दवर्धनेन, 800 तमाब्दजातेन च वामनेन स्वीयेषु सन्र्भेषु वेणीसंहारस्य उदाहरणानि सङ्गृहीतानि। अत: भट्टनारायणस्य समय: 725 तमाब्ददेशीय एव सम्भाव्यते। सम्भवति च यत्स भवभूतिसमकालीन एव भवेन्नाम। सप्तशतकात्पूर्वभवेन बङ्गाधिपतिना आदिशूराख्येन यज्ञसम्पादनार्थमाहूत: पञ्चभिरन्यैर्ब्राह्मणै: सह स कान्यकुब्जेभ्यो बङ्गानाजगाम। तत्रैव चान्तती वसतिं स्वीचक्रे।

नाटकमिदं संस्कृतसाहित्ये वीररसप्रधानेषु नाटकेषु प्रमुखं स्थानमधिकरोति। रचनाऽपि नाटकस्यास्य नाट्यशास्त्रनियमानुगुण्येन समपद्यत। अतएव धनञ्जयेन दशरूपकेऽस्य नैकानि पद्यानि उदाहरणत्वेन सङ्कलितानि। नाटकीयदृशाऽस्य संवादा अतीव प्रभावजनका: सम्पन्ना:। तृतीयाङ्कस्तु विशिष्य कवेर्वैशिष्ट्यपरिचायक:। भीमस्य शौर्य भीषणत्वञ्च, कर्णस्याहङ्कार:, अश्वत्थाम्नो रोष:, दुर्योधनस्य स्वार्थप्रपञ्चो विललासित्वञ्च कविना वैशद्येन प्रपञ्चितम्। यद्यपि नाटकमिदं नाटकीयवस्तुनो दिव्यदर्पणमिवाभाति तथापि क्वचित्क्वचित्तु अनौचित्वमपि पल्लवितम्। द्वितीयाङ्के सङ्गरावसरे दुर्योधनस्य भामत्या सह प्रेमानुबन्ध: प्रबन्धदृशा न खल्वौचितीमावहति। अतएव मम्मटाचार्येण 'अकाण्डे प्रथम'मिति दोषस्योदाहरणत्वेन प्रदर्शितम्। कदाचित् कविना दुर्योधनस्य नैतिकदौर्बल्यं सूचयितुमेवेदं कृतं भवेत्। धनकाचार्येण 'दशरूपकावलोके' पञ्चसन्धिविषयक चतु: षष्टिप्रभेदप्रदर्शनावसरेऽपि वेणीसंहारादुदाहरणानि सङ्कलितानि, एतेनेदं ध्वन्यते यत्सर्वेऽप्यालङ्कारिका वेणीसंहारविषये बद्धादरा: समभवन्।

अस्य शैली तु गौडीयेति स्फुटमेव। 'ओज:कान्तिमती गौडीये'ति तल्लक्षणात्। स्थान एवोक्तं केनाप्यभियुक्तेन :-

**ओज:संसूचकै: शब्दै: युद्धोत्साहप्रकाशकै:।**
**वेण्यामुज्जृम्भयन् गौडीं भट्टनारायणो बभौ।।** इति।

अस्य भाषा अतीव प्रौढा वीररससंभिन्ना च। तद्यथा :-

मथ्नामि कौरवशतं समरे न कोपाद्,
दु:शासनस्य रुधिरं न पिबाम्युरस्त:।
सञ्चूर्णयामि गदया न सुयोधनोरू,
सन्धिं करोतु भवतां नृपति: पणेन।। (भीमोक्ति:)

पुनश्च :-

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतम्,
यद्विस्मर्त्तुमपीहितं शमवता शान्तिं कुलस्येच्छता।
तद्द्यूतारणिसम्भृतं नृपसुताकेशाम्बराकर्षणै:,
क्रोधज्योतिरिदं महत्कुरुकुले यौधिष्ठिरं जृम्भते।।

यो य: शस्त्रं बिभर्त्ति स्वभुजगुरुमद: पाण्डवीनां चमूनां,
यो य: पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तकर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीप:,
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्।।
(इति अश्वत्थामोक्ति:)

चञ्चद्भुजभ्रमितचण्डगदाभिघात-संचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीम:।। इति।

यदा महाभारतसङ्गरं विजित्य कृष्ण: आह युधिष्ठिरस्य राज्याभिषेकमुद्घोषयम् किन्ते भूय: प्रियं करोमि तदा अन्ते कवि भरतवाक्यरूपेण कियदुद्बोधकं मनोहारि च वचनं प्रोवाच :-

अकृपणमति: कामं जीव्याज्जन: पुरुषायुषम्,
भवतु भगवन् भक्तिद्वैतं विना पुरुषोत्तमे।

**दयितभुवनो विद्वद्बन्धुगुणेषु विशेषविद्,**
**सततं सुकृती भूयाद् भूपः प्रसाधितमण्डलः ।।**

यद्येतादृशाः शुभकामना इदानीन्तनानां राष्ट्रनायकानां हृदयपटलेषु किञ्चिदपि पदमाधातुम्प्रभ्व्यः प्रभवेयुस्तर्हि सन्तप्तस्यास्य संसारस्य सन्तापकलापः कियद्यावन्न प्रशममुपेयादिति।

## कविराजः कृष्णमिश्रो यतिः

शान्तरसप्रधानस्य प्रबोधचन्द्रनाटकस्य रचयिता कृष्णमिश्राख्यः प्रख्यातनाट्यकलाकुशलो महीपतेः कीर्त्तिवर्मणः शासनकाले लब्धजगमपरिग्रह आसीत्। कीर्त्तिवर्मणः स्थितिकालः खैस्त 1100 मितेऽब्दे सम्भाव्यते। अतः कृष्णमिश्रस्यापि समयः तत्सस्वत्सराभ्याश एव निर्धारयितुं शक्यते सोपपत्तिकम्।

रूपकमिदं शान्तरसप्रधानमतीव भावपूर्णम्। अत्र कामक्रोधादिवृत्तीनां स्फीतस्फालनमतिरोचिष्णुसरण्या चित्रितम्। आद्यनाटकाचार्येण तत्रभवता भासमहाभागेन स्वकीये बालचरितरूपके सर्वप्रथमं काल्पनिकपात्राणाभिनयेन तादृशरूपकगुम्फने प्रयासः कृतः। परमेतादृशप्रयासस्य पूर्णतया परिणतः परिपाकः प्रबोधनामकनाटक एव सम्पन्नो दृश्यते। अस्मिन् रूपके हि कविना, विवेक-मोह-ज्ञान-विद्या-बुद्धि-दम्भ-श्रद्धा-भक्ति-आदिभावात्मकपात्राणां स्त्री-पुरुषरूपाणामभिनयनं द्वारीकृत्याध्यात्मविद्याया चारुतरं चित्रं चित्रितम्। दार्शनिकदृशा रूपकमिदं निरतिशयं महत्त्वमाबध्नाति। अतएव एतद्रूपकोपनतानि पद्यानि सुतरां हृद्यानि फलितानि प्रतिपन्नानि च सहृदयहृदयसंवेद्यानि। तद्यथा :-

**शान्तेऽनन्तमहिम्नि निर्मलचिदानन्दे तरङ्गावलि-**
**निर्मुक्ताऽमृतसागराम्भसि मनाङ्मग्नोऽपि नाचामति।**
**निःसारे मृगतृष्णिकार्णवजले श्रान्तोऽपि मूढः पिब-**

त्याचामत्यवगाहतेऽभिरमते मज्जत्यथोन्मज्जति।।[1]

उप्यन्ते विषवल्लिबीजविषमाः क्लेशाः प्रियाख्या नरै-
स्तेभ्यः स्नेहमया भवन्ति न चिराद्वज्राग्निगर्भाङ्कुराः।
येभ्योऽमी शतशः कुकूलहुतभुग्दाहं दहन्तः शनै-
र्देहं दीप्तशिखा सहस्रशिखरा रोहन्ति शोकद्रुमाः।।[2]

अग्रे अस्य संसारबीजस्य समुन्मूलनाय भगवदाराधनमेव शरणीकरणीयमित्याहः-

अमुष्य संसारतरोरबोधमूलस्य नोन्मूलविनाशनाय।
विश्वेश्वराराधनबीजजातं तत्त्वावबोधादपरोऽभ्युपायः।।

अस्यान्ये लब्धप्रचुरप्रचाराः श्लोकाः सुभाषितत्वमधिगताः भूयसा प्रचरन्ति :-

सङ्गं न केनचिदुपेत्य किमप्यपृच्छन्,
गच्छन्नतर्कितफलं विदिशं विशं वा।
शान्तेऽप्यपेत-भय-शोक-कषाय-मोहः,
स्वायंभुवो मुनिरहं भविताऽस्मि सद्यः।।

मोहान्धकारमवधूय विकल्पनिद्रा-
मुन्मथ्य कोऽप्यजति बोधतुषाररश्मिः।
श्रद्धा-विवेक-मति-शान्ति-यमादिकेन,
विश्वात्मकः स्फुरति विष्णुरहं स एव।।

फलं स्वेच्छालभ्यं प्रतिदिनमखेदं क्षितिरुहां,
पयः स्थाने-स्थाने शिशिरमधुरं पुण्यसरिताम्।

[1] प्रबोधचन्द्रनाटकम् 14/6।
[2] प्रबोधचन्द्रनाटकम् 15/16।

मृदुस्पर्शा शय्या सुललितलतापल्लवमयी,

सहन्ते सन्तापं तदिह धनिनां द्वारि कृपणाः।।

क्षमा ब्रूते :-

कमो न वाचां शिरसो न शूलं न चित्ततापो न तनोर्विमर्दः।

न चापि हिंसादिरनर्थयोगः श्लाघ्या परं कोधजयेऽहमेका।।

अपि च :-

तं पापकारिणमकारणबाधितारं

स्वाध्याय-देवपितृयज्ञ-तपःकियाणाम्।

कोधं स्फुलिङ्गमिव दृष्टिभिरुद्वमन्तं

कात्यायनीव महिषं विनिपातयामि।।

प्रायः सुकृतिनामर्थे देवा यान्ति सहायताम्।

अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति।।

कोधो ब्रूते :-

अन्धीकरोमि भुवनं बधिरीकरोमि,

धोरं सचेतनमचेतनतां नयामि।

कृत्यं न पश्यति नये न हितं श्रृणोति,

धीमानधीतमपि न प्रतिसन्दधाति।।

सहजमलिनवक्तभावभाजां भवति भवः प्रभवात्मनाशहेतुः।

जलधरपदवीमवाप्य धूम्रो ज्वलनविनाशमनुप्रयाति नाशम्।।

# कविवरो दिङ्नागः

कविवरो दिङ्नागोऽयं धीरनाग, वीरनाग इति नामान्तरद्वयेनापि प्रसिद्धः। अनेन विरचितस्य कुन्दमालानाम्नो नाटकस्य सर्वप्रथममोल्लेखः रामचन्द्रगुणचन्द्रकृते नाट्यदर्पणे समुपलभ्यते। भवभूतेः पूर्ववर्त्तिनि साहित्ये न क्वापि कुन्दमालाया उल्लेखो दृष्टिपथङ्गतः। अतः अस्या रचना भवभूतेः परवर्त्तिनी प्रतीयते। तस्माद् दिङ्नागस्य स्थितिकालः कैस्त 1000, तमशतकाभ्यांशे सम्भाव्यते। यतः कैस्त 1100 शतकात्पूर्वतने साहित्ये क्वचिदपि तन्नामस्मरणं नावलोक्यते।

दक्षिणभारते षड्भिरङ्कैरलङ्कृतायाः कुन्दमालायाः चत्वारि हस्तलिपिप्रणिबद्धानि पुस्तकानि। तान्याधारीकृत्य प्रथमं दक्षिणभारतीयग्रन्थमालायां 1923 तममिते कैस्ताब्दे नाटकमिदं प्रकाशितमिदं प्रकाशितमभूत्। तस्यातिशयलोकप्रियतामल्पीयसा समयेनैव विविधभाषास्वनुवादाः एव भूम्ना प्रत्याययन्ति।

अस्य नाटकस्य 'कुन्दमालेति' संज्ञायाम् बीजन्तु वालमीकेराश्रमे गोमतीनद्यां वहन्तीं कुन्दपुष्पमालां वीक्ष्य, तदभिज्ञानेन रामः सीतामनुस्मरतीत्येव घटनां मन्यते कविः। अस्य कथानकमपि, भवभूतिकृतोत्तररामचरितमिव उत्तरखण्डादामायणादेव सङ्कलितं गम्यते। तत्र तावत्सीतायाः परित्यागः, तदनु तदनुसन्धानम्, ततस्तन्मिलनञ्चेति। एतावतेदनुमातुं न दुष्करं यदस्य कथांशः उत्तरचरितमेवानुसन्दधाति। यद्यपि मन्यामहे दिङ्नागोऽयं भूवभूतेर्नाट्यकलां कलयापि न संस्पृशति; उत्तरचरिते, चित्रितानि प्रणयचित्राणि, अङ्किताश्च मानदमनोभावभङ्ग्यः, न मनागपि कुन्दनमालायां दृष्टिपथमवतरन्ति, तथाऽपि सर्वथैवैतन्नाटकं न निम्नश्रेणीमाश्रयते। शैली अस्य मनोज्ञा भाषायामपि दुरूहत्वाभावः, करुणरसोऽप्यस्य परिपक्वित्रमतासमापन्नः। परित्यक्तां सीतामवलोक्य मन्याः पशुपक्षिणः कियन्मात्रं व्याकुलीभूता इत्यस्य चित्रणं न कस्य मर्मस्पृक् :-

**एते रुदन्ति हरिणा हरितं विमुच्य**
**हंसाश्च शोकविधुरा करुणं रुदन्ति।**
**वृत्तं त्यजनित शिखिनोऽपि विलोक्य देवीं**
**तिर्यग्गता वरममी, न परं मनुष्याः।।1-18।।**

एकत्र रामः सीतापरित्यागं संस्मृत्य विलपति सगद्‌गदम् :-

**नीतस्तावन्मकरवसतौ बन्ध्यतां शैलसेतुः,**
**देवो वह्निर्न च विगणितः शुद्धिसाक्ष्ये नियुक्तः।**
**इक्ष्वाकूणां भुवनमहिता सन्ततिर्नेक्षिता मे,**
**किं किं मोहादहमकरवं मैथिलीं तां निरस्य।।**

भवभूतेः प्रभावस्तु कुन्दमालायां स्पष्टमनुभूयते। भवभूतिवद् दिङ्नागोऽपि प्रकृतिपटलस्योत्कटत्वमुट्टङ्कयामास :-

**नदः पातालमूलात् प्रभवति तुमुलं पूरयन् व्योमरन्ध्रं,**
**पातक्लिष्टा इवैते दिशि दिशि गिरयो मन्दमन्दाश्चरन्ति;**
**बद्धानन्दाः समन्ताल्लवणजलधयो मथ्यमाना इवासन्,**
**सीमागुल्लङ्घ्य वेगादुदनिधिसलिलैः स्वानि वेलावनानि।।**

राजशेखरो दिङ्नागविषये मौनमालम्बे। कुन्दमालामुद्दिश्य ऐदम्प्राथम्येन्नोलेखः खलु भोजदेवेन (कैस्त 1018-1060 सम्भवेन) कृतः, ततो महानाटके (कैस्ते-द्वादश-त्रयोदशशतकयोरन्तरालिखिते)। एवमेव साहित्यदर्पणेऽप्यवलोक्यते। तस्मात्कुन्दमालायाः प्रणयनकालः प्रायशः दशमशतक एव संभाव्यते।

मुद्राराक्षसनामधेयस्य नाटकस्य प्रणेता किल काव्यकलाकुशलः कविवरो विशाखदत्तो नाम। विशाखदेवनाम्नाऽप्यसौ ग्रथितः। सुभाषितसन्दर्भाणां

पर्यालोचनेनैतद्विज्ञायते यत्कविनानेन मुद्राराक्षसमतिरिच्य अन्यदपि नाटकद्वयं 'देवीचन्द्रगुप्तम्', 'राघवानन्दम्' इत्याख्यं विरचितम्। यदधुना नोपलभ्यते। एतन्मुद्राराक्षसन्नाम नाटकं समस्तसंस्कृतवाङ्मये साजात्यं नामन्त्रयते। नेदं यद्यपि नाट्यशास्त्रानुशासनं कात्स्र्न्येनानुपालयति तथाप्येतनिनरूपमं अतुलनीयञ्च सम्पन्नम्। अस्मिन् हि नाटके राजनीतेः क्रूरकौटिल्यं, कूटनीतेश्च विकटकापट्यपाटवम् अतिनैपुण्येन प्रदर्शितम्।

अस्य कथावस्तुतः केन्द्रबिन्दुत्वेन नन्दवंशस्योच्छेदनम्, चन्द्रगुप्तस्य स साम्राज्ये प्रतिष्ठापनमेव विभाव्यते। आचार्यचाणक्यस्येयमेव हार्दिकी समीहा, बलीयसी च मनः कामताऽऽसीद् यत् परम्स्वामिभक्तो राजनीतिपुरन्धरो राक्षसो नाम नन्दमुख्यामात्यः चन्द्रगुप्तस्य मुख्यसाचिव्यमङ्गीकुर्यात्। यावन्महामेधावी सत्यनिष्ठोऽयममात्यराक्षसः चन्द्रगुप्तस्य प्रशासनधुरं न स्वीकरोति तावच्चन्द्रस्य राज्यलक्ष्मीः सुस्थिरा, आपातालमबद्धमूला च नैव सम्पद्येत। अखिलमपि च चन्द्र साम्राज्यमेतत्सैकतप्रासादवत् क्षणेनैव भूमिसात् सम्भवेत्। तदेवमस्मिन् नाटकरत्ने, उभयोरपि राजनीतिधुरन्धरयोरेतयोः खलु राक्षसचाणक्ययोः कूटकापट्यघटनाचक्रचङ्क्रमणस्य विचित्रचित्रणमतीव चातुर्येण चारुतया च प्रपञ्चितम्। कविमूर्द्धन्येनामुना नाटकीयपात्राणां चित्रणं निरतिशयनैपुण्येन कृतम्। तदनयोर्द्धयोरपि मन्त्रिमुख्ययोरारचितं चरित्रचित्रणं पूर्णतया साफल्यमावहति। एकतः कुटिलः प्रगल्भः प्रौढ़ो जागरूकः विकटकूटकापट्यपटीयान् किल चाणक्यो निरतिशयाग्रहग्रहिलः अपरतः सुस्थिरमतिः, समुदारः, सौजन्यसम्भृतः, राजनीतिनिपुणः ऋजुतरोऽजिह्मश्च राक्षसो विनयशीलः। एवमेव चन्द्रगुप्त-मलयकेतु-भागुरायण-सिद्धार्थव-विरोधगुप्तप्रभृतीनां पात्राणां चरित्रनिरूपामप्यतीव पाटवेनोट्टङ्कितम्। मुद्राराक्षसे नाटकान्तरापेक्षया कापि नवीना एव सरणिरालम्बिता। सा चेयं यद् भासकालिदासादीनां रूपकेषु त्वङ्कविभाजनं दृश्यान्याश्रित्य न क्रियते किन्तु पात्राण्यभिलक्ष्य। प्रमुखपात्राणि उपक्रमादारभ्यावसानपर्यन्तं रङ्गमञ्च एवोपतिष्ठति, मुद्राराक्षसे न तथा। तत्र तु खल्वङ्किविभाजनं दृश्यमधिकृत्य कृतमालोक्यते। किञ्च मुद्राराक्षसे स्त्रीपात्राणां सर्वथा अभावः। केवलं सप्तमाङ्के एकस्मिन्नेव स्थले श्रेष्ठिप्रवरस्य चन्दनदासस्य

पत्नी वध्यस्थाने दृष्टिपथमुपयाति। अन्यत्र कुत्रापि स्त्रीपात्रस्य[1] दर्शनं न भवति। स एष खल्वपरो विशेषोऽस्य रूपकान्तरेभ्यः। श्रृङ्गाररसस्यापि नाटकेऽत्र नितरामभाव एव। केचन नाटकमेतत्केवलं वीररसप्रधानमिति प्रतिपादयन्ति। परन्त्वितरेऽत्र विप्रप्रतिपद्यन्ते। वस्तुतस्त्विदं नाटकं न रसप्रधानं प्रत्युत घटनाप्रधानमित्येव कल्पो बहुसम्मतः।

अस्मिन्नाटके नायकश्चन्द्रगुप्तो या चाणक्यो वा इति सविवादो विषयः। एके चन्द्रगुप्तं नायकं मन्यन्तेऽपरे आचार्यचाणक्यम्। वस्तुतत्त्वे विचार्यमाणे तु चाणक्यस्यैव नायकत्वं यौक्तिकं तर्कसिद्धञ्च प्रतिभाति। मुद्राराक्षसमिति नाम्नाऽपि प्रोक्तं तत्त्वमेव सिद्ध्यति। मुद्रया गृहीतो राक्षसो यस्मिन् तन्मुद्राराक्षसन्नाम नाटकम्। एतन्मुद्राया प्रवर्त्तकस्तु चाणकस्तु ऐवेति तस्यैव नायकत्वमभ्युपपन्नं भवति।

कविवरविशाखदत्तस्य शैली निरतिशयं प्रासादिकी, भाषा सुतरां मधुरा, प्राञ्जला च। समासप्रचुरा रचना न रोचतेऽस्मै, न चायमुपलालयति पद्यप्रयोगबाहुल्यम्। गद्यबन्धोऽस्य नितरामोजस्वी, भावावेशश्चातितरां प्रभविष्णुः, तत्र तन्न हास्यपुटमपि रचनासु कवेः पाटवमाख्याति। संवादोऽपि स्वभावसिद्ध इव सम्पन्ना। तद्दिङ्मात्रमिह पुरस्क्रियते विदुषा विनोदाय :-

'न प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि चेष्टते।', 'अयमपरो गण्डरपोपरि स्फोटः।', 'तन्मथाऽस्मिन् वस्तुनि न शयानेन स्थीयते।', 'सर्वज्ञतामुपाध्यायस्य चोरयितुमिच्दसि।', 'ननु वक्तव्यं राक्षस एवास्माकमङ्गुलीप्रणयी संवृत्तः।', 'कीदृशः पुनस्तणानामग्निना सह विरोधः।', 'चाणक्योऽपि जितकाशितया तैसतैराज्ञाभङ्गैश्चन्द्रगुप्तस्य चेतः पीडामुपचिनोति।', 'नूनप्रायैरेवासौ हृदयेशयशङ्कुरिवोद्धृत्य दूरीकृतः।'

एवमादि रचनाऽस्य कस्य न चेतश्चमत्कारिणी? श्लेषबन्धोऽपि बन्धुरः संवृत्तः। स्थले स्थले वस्त्वन्तरं भङ्ग्यन्तरेणाऽप्यसौ निबध्नाति। प्रायशोऽसौ

[1] विषकन्यायास्तु केवलं नाम संकीर्तनमेव, न तु तद्दर्शनम्।

गद्यनिगडितं वस्तु स्थूणानिखननन्यायेन पुनर्दृढीकरणार्थं पद्यग्रथितमपि समारचयति। विशाखदत्तस्य यथा गद्यप्रपञ्चे संस्फुरत्योज: तथैव पद्यप्रबन्धेऽपि प्रवहति कश्चनानवच्छिन्न: प्रासादिकश्च गिरां प्रवाह:। तद्यथा :-

**आस्वादितद्विरदशोणितशोणशोभाम्,**
**सन्ध्यारुणामिव कलां शशलाञ्छनस्य।**
**जृम्भाविदारितमुखस्य मुखात्फुरन्तीं,**
**को हर्त्तुमिच्छति बलात् परिभूयं दंष्ट्राम्।।**

चाणक्यस्य नीतिनैपुणीं निरुप्यन्नाह :-

**मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना,**
**मुहु: सम्पूर्णाङ्गी मुहुरतिकृशा कार्यवशत:।**
**मुहुर्नश्यद्बीजा मुहुरपि बहुप्रापितफले-**
**त्यहो चित्राकारा नियतिरिव नीतिर्नयविद:।।**[1]

नाटकेऽस्मिन् कूटनीतिपण्डितस्य परमचतुरार्यचाणक्यस्य लोकोत्तरबुद्धिसम्प्रदर्शकानामतिगम्भीराणां राजनीतितत्त्वानामुपदेश एवैतदुद्देश्यरूपेण निर्धार्यति। राजनीतिचरण: चाणक्य: स्वबुद्धिवैभवेन राज्ञो नन्ददेवस्य मुख्यमात्यवदमलङ्कुर्वाणं राक्षसमहोदयं विजित्य, चन्द्रगुप्तनृपते: साचिव्यं तं ग्राहयितुमिच्छन्, विकटकूटकापट्यपुटितकुटिलनीति जालकञ्चाभित: प्रसार्य राक्षसमृगं निगडयितुं योऽयमनितरसाधारणं बुद्धिचमत्कारं प्रदर्शितवान् स कं चक्षुष्मन्तं न विस्मापयति? अत्र नास्ति सन्देहलवोऽपि यद् यादृश: कुटिलो दूरदर्शी प्रवञ्चनाचञ्चुश्च आचार्यचाणक्यो न तादृशो राक्षस:। मन्यामहे राक्षसोऽपि परमविचक्षणी राजनीतिचणश्चासीत् परं तादृशकुटिलनीतिपाट्याभावादेव वराकश्चतुरचाणक्यस्य जटिलजाल्मजाले वन्यमृग इव बिनिपतितस्तद्दृशंवदतां गत:। तदेतदखिलं वस्तु नाटकेऽत्र निरतिशयनैपुण्येन वर्णितं महाकविनेति निश्चप्रचम्।

---

[1] मुद्राराक्षसम् 5/3।

महाकवि: विशाखदत्तोऽयमात्मानं सूत्रधारमुखेन परिचाययति स्वयमेव स्वकीयनाटके-

'अद्य सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभावपृथुसूनो: कवे: विशाखदत्तस्य कृतिर्मुद्राराक्षसं नाम नाटकं नाटयितव्यमिति।'' एतद्व्यतिरिक्तं परिचयान्तरन्तु नाद्यावधि सुलभमत: कृत्रत्योऽसौ, कस्मिन् काले च सञ्जात इतीदन्तयावधारयितुं न सुशकम्। कस्मिंश्चिन्नाटकानतरे, पृथुस्थाने भास्करदत्त इति पाठान्तदर्शनात् निश्चयोऽतितरां दुरूह: संवृत्त:। तथापि कैश्चित्पाश्चात्यपण्डितै: -

**'म्लेच्छैरुद्वेज्यमाना भुजयुगमधुना संश्रिता राजमूर्त्ते:।'**

पद्येऽस्मिन् म्लेच्छपददर्शनात्, यवनानामाक्रमणमेवात्र म्लेच्छपदस्याभिप्रेतं स्वीकृत्य कैस्तैकादशद्वादशशतकयोर्मध्य एवास्य समयो निर्धारित:। भारतीयै: पुनरपरै: -

**'सश्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्त:।'**

इत्यत्र चन्द्रगुप्तनामस्मरणात् नाटकमिदं चन्द्रगुप्तकालरचितं विभाव्यते। पद्येतत्स्यात् तर्हि पञ्चमशताब्दीभवस्य विक्रमादित्येत्यपरनामश्रेयस्य यवनहूणाविशातनस्य निखिलदेशव्याप्यैकच्छत्रशासनस्य विक्रमसम्बत्सरप्रवर्त्तकस्य चन्द्रगुप्तस्य साम्राज्यकालेऽस्य नाटकस्य प्रणयनमभिनयनञ्च सम्भाव्यते। क्वचिन्नाटकेऽस्मिन् भरतवाक्ये चन्द्रगुप्तस्थाने अवन्तिवर्मेति नामोल्लेखदर्शनात्, य: पश्चिममगवाधिप आसीत्, तस्यैव सभायां राजकविरासीत् विशाखदत्तोऽपिइति चेदतुमीयते तर्हि विशाखदत्तेनापि मगधदेशवास्तव्येनैव भवितव्यमिति। तस्य च नृपते: काल: कैस्तपञ्चमशतकसम्मित:। स एव काल: कवेरपि सम्भावनीय:।

किञ्च दशरूपकेऽपि (1/68), (2/55) मुद्राराक्षसनाटकस्योल्लेखात्, तत्पूर्वविरचितमेवैतन्नाटकं स्याद् इति सुलभानुमानम्। दशरूपकस्य च समय: कालविज्ञै: कैस्ते दशमे विभाव्यते। अतस्तदूर्ध्वमेव क्वचिन्नाटकस्यास्य काल: कल्पनीय:। सप्तमेऽष्टमे नवमे वा शतके वेति अस्य कालनिर्णयो बोद्धव्य:।

मुद्राराक्षसनाटकमतीव विलक्षणं राजनीतिपूर्णम्। आचार्यकौटिल्यस्य, महामन्त्रिराक्षसस्य नीतिचातुर्य्यचारुता, कौटिल्यकूटकापट्यञ्च कविना यादृशपाटवेनोट्टङ्कितम् न तदन्यत्र दृष्टिगोचरम्।

नाटकमिदं वीररसपधानम्। श्रृङ्गारकरुणादयो नात्रोपलालिताः। वीररस एव पूर्णपरिपाकं गतो विभाव्यते। स्त्रीपात्रं केवलं चन्दनवासपत्नी एवैका वराकी, प्रतिप्राणा सहृदयमहिलाललामभूता। नृपतिश्चन्द्रगुप्तोऽत्र नायकः। प्रधानपात्रे तु कौटिल्यराक्षसौ। यद्यपि केचन् चाणक्यस्यैव नायकत्वमभिनन्दन्ति, न चन्द्रगुप्तस्य, आचार्यस्य मतिवैचित्र्यमेवात्र कारणत्वेनोन्नेयम्। मुद्रया गृहीतो राक्षसः इति तन्नामस्मरणतदानुगुण्येन तत्साफल्ये च चाणक्यस्यैव नेतृत्वात् चाणक्यस्यैव नायकत्वं सम्भवति। तदत्र निश्चितं निर्णेतुं तु प्रेक्षावन्त एव प्रमाणम्। तदस्य चाणक्यस्य प्रधानपात्रत्वे तु नास्त्येव सन्देहलवः।

## चाणक्यस्य नीतिनैपुणी:

चाणक्योऽयं ब्राह्मणकुलललामभूतोऽनन्यसाधारणो मेधावी, राजनीतिप्रवीणः, धवलऔर्त्यधुरीणश्च आसीत्। कूटनीतिज्ञमुकुटमणिनाऽनेन नन्दवंशविध्वंसकेन स्वकीयं नीतिनैपुण्यं पूर्णतया प्रमाणीकृतम्। अपूर्वबुद्धिबलादेवार्तीं गुर्वी प्रतिज्ञां प्रतीर्णवान्। प्राह च सः-

**ये ता किमपि प्रधार्य हृदये पूर्वं गता एव ते,**
**ये तिष्ठन्ति भवन्तु तेऽपि गमने कामं प्रकामोद्यमाः।**
**एका केवलमर्यसाधनविधौ सेनाशतेभ्योऽधिका,**
**नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु भा गान्मम।।**[1]

न तेन वैवाधीनत्वं कर्मणामङ्गीकृतम्। किन्तु तेषां पौरुषप्रधानत्वं प्रसाधितम्।

---
[1] मुद्राराक्षसम् 1/26।

'दैवमविद्वांसः प्रमाणयन्तीति तदाघोषः।'' (मुद्रा 229 पृष्ठे)

कूटनीतिमहाम्भोधौ निमग्नोऽप्येष चक्षुष्मान् सर्वदैव 'पद्मपत्रमिवाम्भसा' प्रावर्तित। महामात्योऽपि सन् विशालसाम्राज्यस्य राजप्रासादान् विहाय आत्मीयपर्णकुटीमेव बहु मेने। अस्य महाभागस्य पर्णशालामुपवर्णयन् कविराह-

**उपलशकलमेतद् भेदकं गोमयानां,**
**वटुभिरपहृतानां बर्हिषां स्तोम एवः।**
**शरणमपि समिद्भिः शुष्यमाणाभिराभि-**
**र्विनमितपटलान्तं दृश्यते जीर्णकुड्यम्।।**[1]

अन्यत्र कविः चाणक्यस्य नीतिनैपुणीं तत्साफल्यञ्च प्रशस्तिभङ्ग्या उपश्लोकयन्नाह गर्वगौरवगिरा-

चाणक्यमुखेनैव-

**केनोत्तुङ्गशिखाकलापकपिलो वद्धः पटान्तः शिखी[2]?**
**पाशैः केन सदागतेरगतिता सद्यः समासादिता?**
**केनानेकपदानवासितसटः सिंहोऽर्पितः पञ्जरे?**
**भीमः केन च नैकवक्रनकरो दोर्भ्यां प्रतीर्णोऽर्णवः?**

पद्यमिदं चाणक्यचातुरीसचिवं राक्षसस्वरूपमपि प्रकटयति चाणक्यदृशा :-

**चाण्डालः- ननु नीतिनिपुणबुद्धिना आर्येणैव।**
**चाणक्यः- भद्र ! मामैवम्। नन्दकुलद्वेषिणा दैवेनेति ब्रूहि।**
(इति आत्मविनयं प्रदर्शयति)

[1] मुद्राराक्षसम् 3/15।
[2] शिखी अग्नि.।

राक्षसः- (विलोक्य स्वगतम्) अये ! अयं स दुरात्मा, अथवा अयं स महात्मा कौटिल्यः। गतः -

**आकरः सर्वशास्त्राणां रत्नानामिव सागरः।**
**गुणैर्न परितुष्यामो यस्य मत्सरिणो वयम्।।**

अपरः प्रधानपात्रं राक्षसो विष्णुगुप्तः। सोऽपि विप्रवंशावतंसः नन्दानां मुख्यो महामात्यः। स्वामिभक्तिपरायणो नन्दसाम्राज्यधुरन्धरो नीतिरीतिपुरन्दरः महामेधावी धर्मभीरुश्चासीत्। विनष्टेषु नन्दकुलेषु अतीव विषण्णः खिन्नश्च कुसुमपुरं बहौ, नन्दवंशपुनरुद्दिधीर्षयैव। "अहो राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुणः" इति चाणक्यश्चापि आश्चर्यचकितान्तःकरणः प्रशंसति। "अमात्यं विज्ञापयति चिरात्प्रभृति आर्यः परित्यक्तोचितशरीरसंस्कारः"। किञ्च,

**"अक्षीणभक्तिः क्षीणेऽस्मिन् नन्दे स्वाम्यर्थमुद्वहन्।**
**पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः।।"**

**इत्याद्युक्तिभिः कवी राक्षसस्य स्वामिभक्तिपराकाष्ठां सूचयति।**

सोऽयं राक्षसो न केवलं नीतिशास्त्रे एव कुशलोऽपि तु शस्त्रास्त्रविद्यायामपि अद्वितीयः कृतविद्य आसीत्। यथाह कौटिल्यः-

**गुरुभिः कल्पनाक्लेशैर्दीर्घजागरहेतुभिः।**
**चिरमायासिता सेना वृषलश्च मतिश्च मे।।** (अं. 7/8)

परिस्थितिवशान्मित्रकर्त्तव्यपालनार्थमेव राक्षसस्य नन्दकुलधूमकेतोश्चाणक्यस्य कूटकापट्यवशंवदतया राजश्चन्द्रगुप्तस्य मन्त्रिपदस्वीकारः न तु स्वार्थवशादिति राक्षसस्य गुणगणं भूयस्तरं प्रगुणयति। तथा च राक्षसश्चिन्तयति-

**नन्दस्नेहकणाः स्पृशन्ति हृदयं भृत्योऽस्मि तद्विद्विषां,**
**ये सिक्ताः स्वयमेव पाणिपयसा छेद्यास्त एव द्रुमाः।**
**शस्त्रं मित्रशरीररक्षणकृते व्यापारणीयं मया**
**कार्याणां गतयोविधेरपि न यान्त्यालोचनागोचरम्।।**

किञ्च :-

(जवनिकामपनीयोपसृत्य च) चाणक्यः-
'भो भो अमात्यराक्षस ! (विष्णुगुप्तोऽभिवादयते)।

राक्षसः- (स्वगतम्) अमात्य इति लज्जाकरमिदानीं विशेषणपदम्। (प्रकाशम्) भो भो विष्णुगुप्त ! न मां श्वपचस्पर्शदूषितं स्प्रष्टुमर्हसि।

चाणक्यः- नायं श्वपचः ! अयं खलु दृष्टपूर्वः सिद्धार्थकनामा राजपुरुषः।

अयमसो द्वितीयोऽपि राजपुरुषः। ताभ्यामेव सह सौहार्दमुत्पाद्य शकटदासोऽपि तपस्वी तं तादृशमजानन्नेव कपटलेखं मयैव लेखितः। इत्यादि।

राजा- (राक्षसमुपसृत्य) आर्य चन्द्रगुप्तोऽहमभिवादये।
राक्षसः- (विलोक्य स्वगतम्) अये ! अयं चन्द्रगुप्तः ! य एष-

बाल एव लोकेन सम्भावितमहोदयः।
क्रमेणारूढवान् राज्यं यूथैश्वर्यमिव द्विपः।।

(प्रकाशम्) राजन् विजयस्य !
राजा- आर्य !
जगतः किन्न जितं मयेति प्रविचिन्त्यताम्।
गुरौ षाड्गुण्यचिन्तायामार्ये चार्ये च जाग्रति।।

राक्षसः- (स्वगतम्)

सर्वथा स्थाने यशस्वी चाणक्यः।

किमेतत्सर्वं सुघटितमार्यराक्षसस्यापि वैशिष्ट्यम्माहात्म्यञ्च न सूचयति? इति दिक्।

## महाकविः शूद्रकः

### परिचयः

संस्कृतनाट्यसाहित्ये शूद्रको नाम महाकविः किमपि मानार्हपदमधिकरोति। मृच्छकटिकाभिधेयं नाटकमस्यामरकृतित्वेन प्रथितं संस्कृतवाङ्मयस्य ललामभूतं रत्नम्। शूद्रकोऽयं कश्चन कविरासीद् राजा वेति एतन्नामेति अद्यापि उपोद्वलकाभावान्न पूर्णतया निश्चितम्। वामनाचार्येण (क्रैस्त 800 सम्भवेन) स्वकीयकाव्यलङ्कारसूत्रवृत्तौ, मृच्छकटिकस्य[1] पद्यद्वयमुद्धृत्य, शूद्रक एवोक्तनाटकस्य प्रणेतृत्वेन स्वीकृतः। पाश्चात्यविद्वद्वरस्य कीथमहाशयस्य मतेन तु केनापि अज्ञातव्यक्तिविशेषेण भसकृतचारुदत्तन्नाम नाटकमेव परिवर्त्य मृच्दकटिकमिदं राज्ञः शूद्रकस्य नाम्नैव प्रसिद्धिं नीतं विभाव्यते। परन्त्वेतदप्यनुमितिविजृम्भणमेव केवलम्।

एतन्नाटकपर्यालोचनेन एतत्तु सुविदितं भवति यत्कविवरोऽयं शूद्रकः लोकवेदोभयसाहित्यस्य मार्मिको विद्वान्, यज्ञयायादिकर्मकलापानुष्ठाता चासीत्। चरमे वयसि च पुत्रं राजसिंहासने प्रतिष्ठाप्य, अश्वमेधयज्ञं महता समारम्भेण निर्वर्त्तयामास। यज्ञान्ते च तत्रैवाग्निं प्रविष्टः। तथा चोपश्लोकितम्-

**'लब्ध्वा चायुः शताब्दं दिनदशसहितं शूद्रकोऽग्निं प्रविष्टः।'**[2]

अस्य वाग्वैभवं प्रशंसन्नाह दण्डिमहाभागः -

**शूद्रकेनासकृज्जित्वा स्वेच्छया खड्गधारया।**

---

[1] मृच्छकटिकम् (1/9, 2/6)

[2] मृच्छकटिकम् 4।

जगद् भूयोऽप्यवष्टब्धं वाचा स्वचरितार्थया।। (दण्डी)

प्रसिद्धालङ्कारिकेण श्रीवामानाचार्येण न केवलं शूद्रकप्रणीतप्रबन्धानामुल्लेखः कृतः अपितु मृच्दकटिकनाटकादुद्धरणम्प्येकं द्यूतप्रशंसाविषयकं प्रदत्तम्, 'द्यूतं हि नाम पुरुषस्य असिंहासनं राज्यम्' इति। इत्थमेव दण्डिमहाभागेनाऽपि मृच्छकटिकगतस्य 'लिम्पतीव तमोऽङ्गानि' इत्यादिपद्यस्य अलङ्कारनिरूपणमतिनैपुण्येन कृतम्। इत्यनेन शूद्रकस्य दण्डिवामनयोः प्राक्कालभवत्वं सुतरामभ्युपपन्नं भवति।

किञ्च मृच्छकटिकस्य नवमाङ्के (9/33) बृहस्पतेर्मङ्गलविरोधित्वं प्रदर्शितम्। किन्तु प्रसिद्धज्यौतिषाचार्येण वराहमिहिरमहाभागेन अनयोर्ग्रह्योः मैत्रीभावः प्रतिपादितः। बृहज्जातकोल्लेखेना (2/15) वगतं भवति यत्तादृशी धारणा वराहमिहिरात्पूर्वतनाऽसीद् इति। अतः वराहमिहिरात्पूर्ववर्त्तित्वमेव शूद्रकस्य प्रतिपन्नं भवति। भासाच्च पुनः परवर्त्तित्वम्। यतो हि मृच्छकटिक-चारुदत्तयोस्तुलनया प्रतीयते यद भासनाटकस्य कथानकमादायैव शूद्रकेण मृच्दकटिकन्नाटकं विरचितं तत्र रोचिष्णुतामापादयितुमिति भासात्परभवत्वं तस्य सोपपत्तिकम्। इत्थं शूद्रकस्य समयः पञ्चगशतकगत एव न्याय्योऽङ्गीकर्त्तुम्।

नाट्यकलादृशा नाटकमिदं सुतरां हृदयावर्जकम्। नायकोऽस्य नगरश्रेष्ठी चारुदत्तः, नायिका च वसन्तसेना। वाराङ्गनाऽपि सती सा सती साध्वी स्त्रीव यद्यपि नाभिनन्दनीया भारतीयसंस्कृतिमनुरुध्य तथाऽपि न निन्दनीया। हास्यरसोऽपि नाटकेस्मिन् सुतरां परिफुल्लितः। शकारः खलु मुर्त्तिधरो हासः, मूर्खतायाः, विक्षिप्तताया, असम्बद्धप्रलापस्य च विग्रहवान्, द्विपादपुच्छश्च पशुः।

मुख्यो रसोऽत्र श्रृङ्गारः, करुणरसश्चापि समीचीनतया परिपाकमियाय। हास्यरसोऽप्यत्र चारुतया प्रासादिकः। कथनोपकथनमपि हृदयग्राहि। वसन्तसेनामदनिका-विट-मैत्रेयादिपात्राणि संवाददृशोत्तमानि। रचनाऽसामान्या पीतिकरी च। दरिद्रपुरुषस्य वर्णनं नूनं तथ्यतां बिभर्त्ति :-

दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते,
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते,
पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते।।[1]

पद्यबन्धस्तु शूद्रकस्य हृदयाकर्षकः। चन्द्रोदयं वर्णयन्नाहः-

उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-
र्ग्रहगणपरिवारो राजमार्गः प्रदीपः।
तिमिरनिकरमध्ये रश्मयो यस्य गौराः,
सुतजल इव पङ्के क्षीरधाराः पतन्ति।।[2]

अकालजलदो नाम कविरयमतीव प्रतिभाशाली आसीदिति सुभाषितग्रन्थेषु सङ्कलितैस्तद्रचितैस्तन्नाम्ना चोट्टङ्कितैः पद्यैः समीचीनतया प्रतीयते। असौ दाक्षिणात्यमहाकविराज्यशेखरस्य च पितामह आसीदिति कविराजेन राजशेखरेण स्वकीयबालरामायण-प्रस्तावनायां समुल्लिखितम् स्वपरिचयमारचयता :-

स मूर्त्या यत्रासीद् गुणगण इवाकालजलदः,
सुरानन्दः सोऽपि श्रवणपटुपेयेन वचसा।
न चान्ये गण्यन्ते तरलकविराजप्रभृतयो,
महाभागस्तस्मिन्नयमजनि यायावरकुले।। इति।।

अनेन तर्क्यते यदसौ यायावरकुलावतंसो जन्मना च दक्षिणपथमेवालञ्चकार। इत्यपि प्रतीयते यदस्य नामान्तरमन्यदेव किमप्यासीत्पुरा, यदधुना विस्मृतौ निमग्नम्। अकालजलदेति नाम तु कस्मिंश्चित् तद् गुम्फिते पद्ये 'अकालजलद' इति प्रयोगस्य चमत्कृतिमत्त्वात् एतन्नाम्नैवासौ लोके प्रसिद्धिं गतः। पद्यञ्च तन्निम्नाङ्कितम् :-

---

[1] मृच्छकटिकम् 17/36।
[2] मृच्छकटिकम् 1/57।

**भेकैः कोटरशायिभिर्मृतमिवाक्ष्मान्तर्गतं कच्छपैः,**

**पाठीनैः पृथुपङ्कपीठलुठितैर्यस्मिन् मुहूर्मूर्च्छितम्।**

**तस्मिन् शुष्कसरस्यकालजलदेनागत्य तच्चेष्टितम्,**

**येनाकण्ठनिमग्नवन्यकरिणां यूथैः पयः पीयते।।**इति।

यद्यपि अनेन कोऽपि ग्रन्थो निबद्धो नवेति त्वद्यावधि न निश्चितम्, परं यानि पद्यानि तन्नाम्ना सुभाषितग्रन्थेषु समुद्धृतानि तानि स्फुटमस्य काव्यबन्धप्रकर्ष सूचयन्ति। सुरुचिरः पदविन्यासः, प्रौढा कल्पना, गम्भीरश्च भावावेशः इति सर्वमेकपद एवास्य काव्यकलानैपुर्णी प्रख्यापयति। तदत्र तन्निदर्शनमुखेन किञ्चिदत्र प्रस्तूयते। कस्यचिद्राज्ञो यशोराशिप्रसरमभिलक्ष्य प्राह :-

**राजन ! यशो हिममिषाच्छिशिरे यदासीत्,**

**भूमौ लसत्किमुत तद्बलिसद्म यातम्।**

**तत्राप्यमादिव ततोऽद्य मधौ त्वदीयम्,**

**प्रोद्भिन्नमाशु धरणेः कुसुमच्छलेन।।**

अपि च :-

**मेघाडम्बरमम्बरं यदि तदा निर्नष्टशोभा वयं,**

**नित्यं तीक्ष्णतरेण तेन दिवसे तत्राप्यहो बाधिताः।**

**स्वामी नः शशभृल्लयोदयहतो दुःखादतीवागता,**

**उद्याने नरदेव ! सेतनपराः पुष्पच्छलात्तारकाः।।**

पुनश्च :-

**श्रीमन्नाय तवानने भगवती वाणी नरीनृत्यते,**

**तद्दृष्ट्वा कमला समागतवती लोलेति बद्धा गुणैः।**

**कीर्त्तिश्चन्द्रकरीन्द्रदन्तकुसुमक्षीरोदनीरोपमा,**

त्रासादम्बुनिधिं विलङ्घ्य भवतो नाद्यापि विश्राम्यति।।

किञ्च :-

**दिग्दन्तावलमण्डली विदलति स्वर्णाद्रिरुत्कम्पते,**
**क्षोणी क्षुभ्यति बिभ्यति प्रतिदिशं सर्वेऽपि रत्नाकरा:।**
**लङ्कातङ्कमुपैति शेवधिपति: शङ्कां परां गाहते,**
**दानाय त्वयि राजशेखरमणे ! दर्प समुद्बिभ्रति।।**

कविरसौ राजशेखरस्य पितामह इति प्रागभिहितम्। राजशेखरस्य च समय: खैस्तनवमदशमशतकयोर्वा पूर्वार्द्धे एव क्वचिन्निर्धार्यते तदनुरोधेन अकालजलदस्य समयेनाऽपि तत: पूर्वतनेन भवितव्यमिति पर्यवसितं भवति। अकालजलदोऽयं महाराष्ट्रदेशे 'महाराष्ट्रचूडामणि:' इति विशेषणेन प्रसेसिद्ध्यति। यायावरा: क्षत्रियविशेषा: तद्वंश एवासौ लब्धजन्मा। यायावरीयोऽयं वंश: कवीनां प्रसवभूमित्वेन विश्रुत:, एष एव वंश: सुरानन्द-तरल-कविराजप्रभृतिभि: बहुभि: कवीश्वरै: स्वजन्मभिर्विभूषित:।

राजशेखरोऽयं महाराष्ट्रदेशीय:। यायावरीयवंशावतंस: महाकवेरकालजलदस्य पौत्र: विद्वरस्य दर्दकस्य च पुत्र: परमविदुषी शीलवती नाम्नी देवी चास्य जननी। कान्यकुब्जाधिपतेर्महेन्द्रपालस्य च सभापण्डित:। अस्य रचनात्वेन त्रीणि रूपकाणि प्रसिद्धाति। कर्पूरमञ्जरी, बालरामायणम्, बालचरिभारतमित्याख्यानि। राजशेखर: स्वयमात्मन: परिचयमित्थं ददाति :-

**बभूव वल्पीकभव: पुरा कवि:,**
**तत: प्रपेदे भुवि भर्तृमेण्ठताम्।**
**स्थित: पुनर्यो भवभूतिरेखया**
**स वर्त्तते सम्प्रति राजशेखर:।।**

राज्ञो महेन्द्रपालस्य समयः क्रैस्त 893 तः 907 पर्यन्तं विभाव्यते। क्रैस्त 1000 देशीये विरचिते तिलकमञ्जरीसन्दर्भे राजशेखरस्य चर्चा समुपलभ्यते। अतोऽस्य समयः क्रैस्तदशमशताब्द्याः प्रथमचरणे कल्पयितुं शक्यते। उक्तग्रन्थत्रयव्यतिरिक्तमस्यकर्मन्यदपि हरविलासाख्यं महाकाव्यं, भुवनकोषः, काव्यमीमांसा चेत्यस्य कृतित्वेन प्रसिद्धाः। अस्य काव्यप्रशंसायां क्षेमेन्द्रेणोक्तम्-

**'शार्दूलक्रीडितैरेव प्रख्यातो न राजशेखरैः।**
**शिखरीव पुनर्वक्रैः सौल्लेखैरुच्चशेखरः।।''** इति।।

धनपालेनापि मुक्तकण्ठेनास्य प्रशस्तिरुट्टङ्किता-
**समाधिगुणशालिन्यः प्रसन्न-परिपक्त्रिमाः।**
**यायावरकवेर्वाचो मुनीनामिव वृत्तयः।।**

अस्य साहित्यधुरन्धरत्वं, कवित्वकलाप्रावीण्यं च सुविख्यातमासीत्। काव्यमीमांसायामनेन महाकवि-कविराजयोर्भेदं प्रतिपिपादयिषुणोक्तम्-

''योऽन्यतरप्रबन्धे प्रवीणः स महाकविः। यस्तु तत्र तत्र भाषाविशेषे, तेषु प्रबन्धेषु तस्मिन् तस्मिंश्च रसे स्वतन्त्रः स कविराजः।'' (काव्यमीमांसायाम्)

राजशेखरस्य काव्यं निरतिशयरुचिरं मनोहारि च। शङ्करवर्मणाऽस्य प्रशंसायामुल्लिखितम्-

**पातुं श्रीधरसायनं रचयितुं वाचः सतां सम्मता,**
**व्युत्पत्तिं परमामवाप्तुमवधिं लब्धु रसस्रोतसः।**
**भोक्तुं स्वादुफलञ्च जीविततरोर्यद्यस्ति ते कौतुकम्,**
**तद् भ्रातः ! श्रृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः।।**

तदस्य ताः सुधास्यन्दिनीः सूक्तीरपि रसिकाः कर्णपुटकाभ्यां किञ्चित् प्रपिबन्तु नाम।

केरलदेशं वर्णयन्नाह :-

**पर्णं नागरखण्डमार्द्रसुभगं पूगीफलैलास्तथा,**
**कर्पूरस्य च तत्र कोऽपि चतुरस्ताम्बूलयोगत्रभः।**
**देशः केरल एष केलिसदनं देवस्य श्रृङ्गारिणः,**
**तद्दृष्ट्वा कुरु कोमलाङ्गि सफले द्राघीयसी लोचने।।**

गङ्गायमुनयोरन्तरालघटितं पाञ्चालदेशं प्रपञ्चयन्नाह :-

**यत्रार्यो न तथानिरुज्यति कविर्ग्रामीणगीर्गुम्फने,**
**शास्त्रीयास्तु च लौकिकीषु च यथा भव्यासु नव्योक्तिषु।**
**पञ्चालास्तव पश्चिमेन त इमे वामा गिरां भाजना-**
**स्तद्दृष्टेरतिथीभवन्तु यमुनां त्रिस्रोतसां चान्तरा।।**

कान्यकुब्जललनानां वेशभूषां प्रशंसति :-

**यो मार्गः परिधानकर्मणि गिरां यः सूक्तिमुद्राक्रमो,**
**भङ्गी या कवरीचयेषु रचनं यद् भूषणालीषु च।**
**द्रष्टुं सुन्दरि ! कान्यकुब्जललनालोकैरिहान्यच्च यत्,**
**शिक्षन्ते सकलासु दिक्षु तरसा तत्कौतुकानि स्त्रियः।।**

सज्जनानां बुद्धिवैशद्यं विवृणोति :-

**उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम्,**
**सदा पान्थः पूषा गगनपरिमाणं कथयति।**
**इति प्रायोभावा स्फुरदवधिमुद्रामुकुलिताः,**
**सतां प्रज्ञोन्मेषः पुनरयमसीमो विजयते।।**

दानिप्रशंसाऽपि चमत्कारिणी :-

**दातुर्वारिधिरस्य मूर्धनि तडिद् गाङ्गेयश्रृङ्गारिता,**
**वृक्षेभ यः फलपुष्पदायिनि मधौ मत्तालिवृन्दस्तुतिः।**
**भीतत्रातरि वृत्तिदातरि गिरौ पूजाझरैश्चामरैः,**
**सत्कारोऽयमचेतनेष्वपि विधेः किं दातृषु ज्ञातृषु।।**

राजशेखरेण चौहानवंशीया अमरसुन्दरी नाम्नी क्षत्रियबाला परिणीता। सा न केवलं संस्कृतभाषाया अपितु प्राकृतभाषाया अपि परमपण्डिता आसीत्। राजशेखरेण काव्यमीमांसायामस्याः पाकविषये नामग्रहणमुल्लेखो विहित :-

'आग्रहपरिग्रहादपि पदस्थैर्यपर्यव्यवसायस्तस्मात्पदानां परिवृत्तिवैमुख्यं पाकं इति वामनीयाः "इयमशक्तिर्न पुनः पाकः'' इत्यवन्तिसुन्दरी। (काव्यमीमांसा)

राजशेखरः स्वयमपि बहुभाषाभिज्ञ आसीदिति तत्कृतवर्णनत एव व्यक्तोभवति-

गिरः श्रव्या दिव्याः प्रकृतिमधु रा प्राकृतधुराः,
सुभव्योऽपभ्रंशः सरसवचनं भूतवचनम्।
विभन्नाः पन्थानः किमपि कमनीयाश्च त इमे,
निबद्धा यस्त्वेषां स खलु निखिलेऽस्मिन् कविवृषा।।

अनेन षट् प्रबन्धा निबद्धा इति 'विद्धि नः षट् प्रबन्धानिति बालरामायणपद्यनावगम्यते। राजशेख़रस्य पद्यानि नितरां हृद्यानि भवन्ति सहृदयहृदयसंवेद्यानि च।

यद्यपि केचिदाशेरते यत्केरलभूपतिरेवायं कविराजो राजशेखरः परन्तु तद्विनिगमनाविरहान्न श्रद्धार्हम्।

राजशेखरकृतिषु 'काव्यमीमांसे'त्यलङ्कारग्रन्थः, 'हरविलासा'ख्यं महाकाव्यम्।

अष्टादशशताब्द्याम् प्रकाशितेषु रूपकेषुः पात्राणाम् बाहुल्यम् दृश्यते। उदाहरण रूपेण निम्नलिखितेषु रूपकेषु पात्राणाम् संख्या अत्र उल्लिख्यते।

| रूपकस्य नाम | पुरुषपात्र | स्त्रीपात्र |
|---|---|---|
| जीवन्मुक्ति-कल्याण | 18 | 12 |
| कान्तिमती-परिणय | 12 | 12 |
| सेवन्तिका-परिणय | 9 | 12 |
| नीलापरिणय | 12 | 9 |
| सभापतिविलास | 13 | 6 |
| राघवानन्द | 28 | 7 |
| जीवानन्द | 32 | 11 |
| विद्यापरिणय | 29 | 16 |
| रतिमन्मथ | 23 | 12 |
| प्रद्युम्नविजय | 20 | 13 |
| शिवलिङ्गसूर्योदय | 20 | 13 |

संस्कृतस्य संस्कृतनाटकस्य पूर्ववर्तीरूपकेषु पात्राणाम् बाहुल्यम् दृष्यते।

| रूपकस्य नाम | पुरुषपात्र | स्त्रीपात्र |
|---|---|---|
| अभिज्ञान शाकुन्तल | 23 | 12 |
| उत्तररामचरित | 18 | 10 |
| मुद्राराक्षस | 25 | 4 |
| वेणीसंहार | 21 | 11 |

श्रृंङ्गार प्रधान रूपकेषु नायकनायिका तथा विदूषकस्य प्रमुख पात्रत्वेन चित्रणम् कृतम् वर्तते। कतिपये रूपकेषु प्रतिनायकाः अपि विद्वमानाः वर्तते अधिकांश रूपकेषु नायकाः एव राजा पारंपरिक रूपकेषु सेनापतिः, मन्त्री,

युवराजः, कञ्चुकी, मुनि, ज्योतिषी, दौवारिक, चर नायिकायाः संख्या पट्टमहिषी तथा तस्याः सखि योगिन्यादि आदि पात्राणाम् चित्रणम् कृतम् वर्तते। विष्णु, लक्ष्मी, शिव, पार्वती, कार्तिकेय, तथा महेन्द्रादि, देवीदेवता रूपेण चित्रितम् दृश्यते। उद्यानपालिकाः चेटि प्रतिहारिक। रूपकस्य पात्रत्वेन चित्रितम् वर्तते। अन्यरूपकेषु गन्धर्व, विद्याधर, यक्ष, नाग, पिशाच, असुरादि अमानवीय पात्राणाम् चित्रणम् कृतम् वर्तते। प्रतीक नाटकेषु विद्या भक्ति, शान्ति, ज्ञान, प्रवृत्ति, निवृत्ति, विषयवासना, असूया, विरति, सत्सङ्ग, चर्वाक, जैन, बैद्ध, कामक्रोधादि युक्तानाम् पात्राणाम् चित्रणम् वर्तते। नीलापरिणय नाटकस्य नायकः श्रीकृष्णः द्वारकायाः राजा। सभापति विलास नाटकस्य नायकः मुनि व्याघ्रपादः उपनायकाः महाभाष्यकार पतञ्जलि। राघवानन्द नाटकस्य नायकः अयोध्यायाः रामः रतिमन्मथ नाटकस्य नायकः युवराजः मन्मथः श्रीकृष्णस्य पुत्राः। कुमारविजय नाटकस्य नेताः कार्तिकेयः साक्षात् देव एव। प्रद्युम्नविजय नाटकस्य नायकः प्रद्युम्नाः श्रीकृष्णस्य पुत्राः। मधुरानिरूध्य नाटकस्य नायकः अनिरूध्य श्रीकृष्णस्य पौत्राः। सीताराघव नाटकस्य नायकः रामः अयोध्यायाः राजाः।

श्रृंङ्गारतरङ्गिणी नाटकस्य नायकः श्रीकृष्णः। प्रमुदित गोविन्द नाटकस्य नायकः स्वयं-भगवान विष्णुः। कान्तिमती-परिणय नाटकस्य नायकः शाहजी।

अष्टादश शताब्द्याम् लिखितायाम् नायिकायाम् प्रवृत्तिद्वयम् दृश्यते आदर्शवादः यथार्थवादश्च अनेकैः नाटक कर्तृभिः विष्णु, शिव, राम, कृष्ण मन्मथा प्रद्युम्न, अनिरूध्य, कार्तिकेय पुरुषपात्राणाम् तथा लक्ष्मी, पार्वती, सीता, रूक्मिणी सत्यभामादि स्त्री पात्राणाम् चरित्र-चित्रणम् कृतम् वर्तते।

वेङ्केटश्वरकृत नीलापरिणय नाटके विष्णुविनोदप्रिय विदूषकेनसह विनोदम् करोति। चम्पकमञ्जरी रूपेण नीलादेवीयाः प्रति आसक्ताः। तेषां भयम् वर्तते यत ममपत्नी रक्ताम्बुजनायिका नीलादेव्यासह ममपरिणयम् दृष्ट्वा सा कुपिता भविष्यति। विष्णु यज्ञस्य रक्षकाः तेषां संरक्षणे गोप्रलय तथा गोभिल मुनिः यज्ञस्य संपादनम् करोति। विष्णोः आज्ञया राक्षसानाम् संहाराम् करोति।

सदाशिवस्य लक्ष्मीकल्याण नाटके विष्णु: भक्तानाम् प्रति अनुग्रहशीला:। लक्ष्म्या: प्रति आसक्ता: भवति। सा विप्राचार्यस्य वेषेण लक्ष्म्या: समीपे गत्वा प्रेमपरीक्षाम् ददाति। विष्णु विश्वे सृष्टे: पालका: तथा संहारक: अपि वर्तते। शिवादिदेवता तथा नारदादि मुनि: विष्णुमहिमाया: गुणगानं कुर्वन्ति। सदाशिवोद्गानाया: प्रमुदितगोविन्द नाटके विष्णु देवासुरान् प्रेरयित्वा समुद्रमन्थनम् कारयति। देवा: मन्दरपर्वतम् उत्थातुम् असमर्था: विष्णुसहाय्येन देवा: मन्दराचल पर्वतम् उत्थापयति समुद्रमन्थनात् आर्विभूतानि वस्तुनि विष्णु: देवान् समर्पयति। समुद्रमन्थने आविर्भूतां लक्ष्मीम् दृष्ट्वा विष्णु: अनुरक्ता भवति। तथा सह विवाहम् करोति। विष्णु लक्ष्मीं सह विवाहम् करोति। मोहिनीरूपम् धृत्वा विष्णु असुरान वञ्चयित्वा अमृतकलशं प्राप्नोति। देवानां पक्षे गृहित्वा दानवान् युद्धे पराजयम् ददाति। भगवत: शिवस्य विनयेन विष्णुस्त्री रूपेण नृत्यम् करोति। शिवसमक्षम् विष्णु मोहिनीरूपम् धृत्वा सुंदरम् नृत्यम् करोति। शिव: तान मोहिनीरूपान् दृष्ट्वा तस्य अनुसरणम् करोति। अंततो गत्वा शिव: लज्जितो भवति। सह विरचितस्य चंद्रशेखर विलाश नाटके शिव: विषपानम् करोति। देवानाम् प्रार्थनया चन्द्रम् शिरोधार्यति। वेङ्कटेश्वर विरचितस्य सभापतिविलास नाटके शिव: बालमुनि: भक्ति: सेवया प्रसन्नो भूत्वा तांडवम् प्रदर्शयति। बालमुने: याचनाम् स्वीकृत्य शिवा: वरम् ददाति।

वेङ्कटेश्वर विरचितस्य राघवानन्द नाटके राम: वनवास समये राक्षसाम् भीता सीताम् पराक्रम दर्शयित्वा आस्वस्थम् करोति। राम: सज्जनानाम् प्रशंसाम् करोति दूर्जनानाम् निंदाम् करोति। रामस्य विभीषणं प्रति अपारस्नेहा वर्तते। तथा प्रद्युम्न हरिहरोपाध्याय कृत प्रभावतीपरिणय तथा शङ्करदीक्षितरचित प्रद्युम्नविजय नाटकस्य नायक: प्रद्युम्ना श्री कृष्णस्य पुत्रा:। मन्मथस्य अवतार:। प्रभावति परिणये नाटके प्रद्युम्न: प्रभावत्या: चित्रम् दृष्ट्वा आसक्तो भवति। ताम् प्राप्तुम् प्रयत्नम् करोति। प्रद्युम्न: सुरक्षाचारी वर्तते। प्रद्युम्ना न्यायप्रिय: वर्तते।

प्रतिनायक वेङ्कटेश्वर विरचित राघवानन्द नाटकस्य प्रतिनायको अयम् रावण:। रावण: सीताया: अपहरणं करोति। हनुमत: अवहेलनाम् करोति। रावणस्य भ्राता विभीषण: तस्य त्यागम् करोमि। सीता-राघव नाटके रावण:

सीतायाः प्रति कामाशवनाः भवति। कामुक रावणाः चित्रणन् सीताम दृष्ट्वा वास्तविक सीताम् मत्वा आलिङ्गनम् कर्तुम् इच्छति। रुक्मिणीमाधवाङ्क नाटके चेदिराज शिशुपालस्य प्रतिनायक रूपेण वर्णनम् कृतम् वर्तते। शिशुपालः रूक्मिण्याः विवाहं कर्तुम् इच्छति। शम्बरासुर जगन्नाथस्य रतिमन्मथ नाटके शम्बरासुरोऽयम प्रति नायकरूपेण वर्णिताः वर्तते। रत्याः पिता शम्बरम् तर्जयति मन्मथ द्वारा पूध्ये पराजयं प्राप्नोति।

संस्कृत नाटकेषु संस्कृत रूपकेषु पात्राणां संयोजनम् सार्वभौमिकत्वेन कृतम् वर्तते। मृच्छकटिके त्रिंशत पात्राणाम् समावेशाः कृतम वर्तते। मृच्छकटिके शर्विलक नामना कश्यन ब्राह्मणा व्यवसाये चैर्य कार्य करोति। सर्वम् कार्यम् शुद्धभावेन पश्यति[1]। शर्विलक चतुर्वेदि अपरिग्रही ब्राह्मणस्य पुत्रा योगाचार्य द्वारा चैर्थकलायाः प्रशिक्षणम् प्राप्य चैर्यकार्ये निपुणताम् प्राप्तवा। वसंतसनायाः दासी मदनिकासह प्रेमव्यापारे निमग्नो अभवत्। ताम् मदनिकाम् दासत्वेन मुक्तयितुम् स चौर्यकार्यम् करोति। स ब्राह्मणदेहे चौर्य कार्यम् नैव करोति। षडयन्त्रकार्ये अपि सः कुशलाः वर्तते। राज्यपरिवर्तनाय तस्य महत्वपूर्णम् स्थानम् आसीत। संवाहका मृच्छकटिकस्य गौणपात्रम् अस्ति स चारुदत्तस्य सेवकाः। संवाहन कलायाम् निपुणः तस्य व्यवसायात द्यूतक्रीड़ाः। यदा द्यूतक्रीड़ायामृ सह पराजितो भवति तदा वसंतसेना तस्य रक्षणम् करोति। पश्चात् स बौद्धभिक्षु भवति। अष्टमे अंके वसंतसेनाया स्पर्शम् अपि न करोति। संवाहक रूपेण तस्य नैतिकम् स्थानम् वर्तते। अस्य स्पष्टवादि मानप्रतिष्ठायाम् दृढ़ प्रतिज्ञो वर्तते। शकारस्य चरित्रम् मृच्छकटिके महत्वपूर्णम् वर्तते। शकारस्य पात्रे विदूषकत्वम् खलनायकत्वम् च समाविष्टो वर्तते। हठीः, मूर्खाः, कायरा, दम्भी, क्रूरः विलासी एवम् विचित्रादि विचित्र दुर्गुणम् तस्य हृदये समाविष्टो वर्तते। तस्य भगिनी राजा पालकस्य पन्तिरूपेण अस्ति। भगिन्याः सहायेन सह राज्ये किमअपि कर्तुम् शक्नोति। नीच कुलोत्पन्ना सह यद्यापि मृच्छकटिके सह व्यभिचारिण्याः पुत्राः वर्तते। तथापि तस्य भगिनी शकारस्य पत्नीरूपेण अस्ति। न्यायाधिशान पदच्युतम् करोति। मृच्छकटिके हास्यविनोदाय महत्त्वपूर्णम् स्थानम् वर्तते। शकारोअयम् संशयात्मा। दुष्टताः, क्रूराः, मूर्खाः, खलाः। मृच्छकटिके मैत्रेय नामनाः ब्राह्मणाः विदूषकत्वेन चित्रितो

[1] सस्कृत काव्यदर्शन डॉ भोलाशङ्कर व्यास, स 2011, पृ 289, 90।

वर्तते। चारुदत्ताः सुखे-सुखी, दुःखे-दुःखी। सुख सुविधायाम् निपुणाः वर्तते। विदूषकस्य सर्वे सामान्या गुणाः सन्ति। असत्यभाषणे स भयम् अनुभवति। वसंतसेनाया गृहे भोजनम् कथमम् विश्रति पश्यात् करोति। तन्मते वसंतसेना केवल गणिका एव मृच्छकटिके वसंतसेना तथा चारुदत्तस्य पत्नि वृतायाः। स्त्री चरित्ररूपेण सर्वाधिकम् आकर्षणम् वर्तते। मृच्छकटिकस्य रचयिता शुद्रकेन वृतायाः चरित्रचित्रणम् साधवी पत्निरूपेण कृतम् वर्तते। सः पत्युः प्रतिष्ठाम् रक्षयति। धृता रूपेण शूद्रकेन आदर्श भारतीय पत्नियाः चित्रणम् प्रस्तुते कृतम् वर्तते तसंतसनाम् रात्रि पर्यन्तम् पतिगृहे निवसति। तेन सह समागमअपि करोति। किन्तु धृता विरोधम् न करोति वसंतसेना याः आदरम् तथा सह स्नेह पूर्णम् व्यवहारम् करोति। मृच्छकटिकस्य प्रथमेखण्डे नायक-नायिकायाः चरित्र - चित्रणम् समोत्त्पाटिकम् वर्तते। कविना शुद्रकेन चारूदत्तस्य चरित्रम् भारतीय संस्कृतेः अधिकत्वेन चित्रितम् वर्तते। वसंतसेना आदर्श स्त्रीपात्ररूपेण चित्रितावर्तते। चारूदत्तस्य चरित्रम् प्रधानत्वेन वर्तते। शूद्रकस्य केन्द्रबिन्दुः चारूदत्तः एव मृच्छकटिकस्य प्रायः सर्वाणी पात्राणी चारूदत्तस्य परिताः एव गमन्ति। मृच्छकटिके चौर्यकर्म द्यूतक्रीड़ाम् धूर्त, धृतता संवाहकत्वम् कुट्टिनी, वेश्याः, आरक्षकाः, राजाः। ब्राह्मणादि समाजस्य प्रत्येकेषाम् वर्णानाम् वर्णनम् एतस्मिन् नाटके कृतम् वर्तते। वसंतसेना ब्राह्मणानाम् पूजनम् करोति। स स्वयंमेव कथयति पूजनियोमे ब्राह्मणजनाः ब्राह्मणस्य कार्यम् अध्ययनम् - अध्यापनम् दान-दक्षिणा पौरोहित्यकार्यम् आसीत्। स्त्रीणाम् समाजेस्थानम् महत्त्वपूर्णम् आसीत्। समाजेगणिकायाः स्थानम् अतिव नंदनीयम् आसीत्।

विशाखदत्त प्रणीतम् मुद्राराक्षनाटकम् अद्यापि नाट्यपरम्परान् उल्लंघयति। नायकरूपेण स्वयं आचार्य चाणक्यः। नायिकारूपेण तस्य कुटिकानितिः नाटकस्य सुन्दरम् निदर्शनम् करोति। अस्य नाटकस्य ऐतिहासिकम् तथा राजनैतिकम् महत्त्वम् वर्तते। नंदानाम् विनाशाय चाणक्यस्य कुटिलता राजनीति निपुणता कार्यम् करोति। यद्यपि राक्षसाः नंदस्य स्वामिभक्ताः आसन्। आचार्य चाणक्यस्य विद्रोही आसीत् परंतु आचार्य चाणक्येन ताम् जटिल जाल्मजाले पातयित्वा वसेकृत्वा चन्द्रगुप्तस्य मंत्रीपदे स्थापयति। अद्यापि मुद्राराक्षसोऽयम् प्राचीन नाट्य परंपराम् परित्यजति। नाटके अस्मिन् स्त्री पात्राणाम् अभावः दृश्यते। नाटकस्य

अंते चंदनदासस्य पौढ़ा कर्तव्य परायणा महिलाया: स्थानम् अल्पसमये निमित्तम् दर्शयति। नाटकेअस्मिन् नवयुवत्या: मुग्धा वियोगिन्या: नायिकाया: चित्रणम् कुत्राचिदेव दृश्यते। नाटके अस्मिन् वीर रसस्य प्रधानता वर्तते। श्रृंगार करुणयो: अभाव: दृश्यते। अद्भूत रसस्य परिपाक: दृश्यते। महाकवि मुद्राराक्षसस्य शैली कालिदासयो: इव माधुर्य, प्रेम तथा सौन्दर्य युक्ता नास्ति। न भवभूति इव करूणामयी तथापि नाटके अस्मिन् कथानकस्य घटनाया: सुंदरम् संयोजनम् कृतम् वर्तते। एष: पाठक दर्शकादिनाम् नाटक दर्शनाय सर्वदा कौतुकरम जाग्रत् रूपेण मनसि व्याप्य तिष्ठति घटनाया: बाहुल्यम् दृष्यते। नाटकस्य नामकरणम् अपि ग्रन्थस्य आधारेण वर्तते। मुद्रया गृहीतम् राक्षसम् अस्मिन् तन्मुद्राराक्षस नाम् नाटकम् मुद्रा द्वारा राक्षसस्य निग्रहम् एव मुद्रा राक्षसम्। चाणक्य: प्रथमे अंके राक्षसस्य मुद्राम् प्राप्नोति। मुद्राम् प्राप्य घटनायाम् द्वयो: मुध्ये शत्रुताया: प्रारंभ: द्रष्टुम् शक्यते। अनेन कथानकस्य व्यापारमपि विस्तृतम् भवति। एतस्मिन् रूपके कथानकस्य नाट्य परंपराया: प्रसिद्धि: पताका प्रकरी नामक प्रासङ्गिक कथाया: स्थानम् वर्तते। एतस्मिन् नाटके वीररसस्य प्राधानत्वेन ओजोमय गद्यस्य विशेष रूपेण समावेशा: कृतम् वर्तते। मुद्राराक्षसे अस्मिन् चरित्र-चित्रणम् परंपराया: स्थानम् नास्ति। नाट्य परंपराया: स्थानम् वर्तते। रसस्य प्रधानतापि वर्तते। संस्कृत नाट्यशास्त्र परंपरा अनुसारेण रसस्य प्रधानतापि वर्तते। संस्कृत नाट्यशास्त्र परंपरा अनुसारेण नाटकस्य नायक: चंद्रगुप्त: परंतु अत्र चाणक्यस्य एव नायकत्वम् सिद्ध्यति। राक्षस: यद्यपि चाणक्यस्य घोर प्रतिपक्षी। चंद्रगुप्तस्य विधानकरूपेण वर्तते। परंतु तम् राक्षसम् अपि चंद्रगुप्तस्य अमात्यरूपेण स्वीकरणयाय हिन्दू साम्राज्यस्य उत्थानाय चाणक्यस्य अयम् प्रयत्ना:। तस्य नायकत्वेन सिद्धताम् स्थापयति। चाणक्य अथवा राक्षसस्य कपटपूर्णकला: नैव व्यवहारेस्य निदर्शनम् अत्र सजीव रूपेण दृश्यते। चंद्रगुप्त: तथा मलयकेतो: चरित्र-चित्रणम् कविना विशाखदत्तेन नवयुवा राजकुमाराणाम् प्रदर्शनाय चंद्रदासस्य चरित्रम् धन दानेन राज्यम् विवर्धनाय कृतम् वर्तते।

महाराजश्री हर्षचरितस्य रत्नावली नाटिकायाम् वत्सराज उद्यन: अयम् धीरललित नायकत्वेन प्रस्तुतम् वर्तते। धीरललितो अयम् नायक: निश्चिन्ता: मृदु: कलापरायणा: संगीतादि शास्त्रेषु निपुणा: वर्तते। रत्नावल्याम् वत्सराज उदयनस्य

स्वल्पीयान् अंशः एव वर्णितम् दृश्यते। तस्य मुख्यम् कारणम् अस्ति। उद्यन् सागरिकायाः प्रणय व्यापाराः एव चर्चितम् दृश्यते। उद्यनः अत्र प्रणयी रूपेण प्रविसति। सागरिका अत्र परकीया नायिका। वासवदत्ता ज्येष्ठा नायिका सागरिका कनिष्ठा। ज्येष्ठा नायिकायाः अनुमतिम् प्राप्य कनिष्ठा नायिकया सह वत्सराज उद्यनः विवाहम् करोति। अस्याम् नाटिकायाम् वत्सराज उद्यनस्य चरित्र-चित्रणम् कविना श्रीहर्षेण धीरललित नायकत्वेन परंपराम् प्रदर्शयन् कृतम् वर्तते। सागरे प्राप्ताऽयम् नायिका सागरिका इति नाम्ना प्रसद्धि जाता। सागरिका मुग्धा नायिका सागरिका विनयआर्जवादि गुणैर्युक्ता मुगधा नायिका सह स्वयं कथयति-

**दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।**
**प्रियसखि विषमं प्रेम मरणं एव शरणम्।।**[1]

वेणीसंहार नाटकस्य नायिका द्रौपदी प्रगल्भा नायिका नायकः भीमः। केचन् जनाः अस्य नाटकस्य नायकरूपेण महाराज युधिष्ठिरस्य नाम स्वीकुर्वन्ते। भारतीय नाट्य परंपराम् अनुश्रुत्य अस्य नाटकस्य नायकरूपेण युधिष्ठिरः एव प्रतिभाति। परंतु भीमः अपि नायकत्वेन स्वीक्रियते। नायकत्वेन भीमस्य भूमिका महत्त्वपूर्ण वर्तते। नाट्यसिद्धान्तत्वेन निरूपणे अस्य नाटकस्य महत्त्वपूर्णम् स्थानम् वर्तते। प्रमुखपात्रेषु भीमसेनः युधिष्ठिरः दुर्योधनः अश्वत्थामा सन्ति। वेणीसंहारनाटके प्रतिज्ञायाः पूर्त्यै घटनाक्रमान् वक्रतया परिभ्रमन्ति। अनेन भीमस्य नायकत्वम् स्वीक्रियते। द्रौपद्याः वेण्याः ग्रहणम् घटनायाः क्रमान् स्मारयति। अनेन भीमस्य धीरोदात्त नायकत्वेन स्वीकरो भवति। नाटकस्य तृतीये तथा चतुर्थे अंके भीमस्य मंचस्योपरि प्रवेशः ध्वजायाः विनाशः तृतीये नेपथ्यकोणे चतुर्थेङ्के दुःशासनस्य रक्तपालम् एवम् पञ्चमेङ्के दुर्योधनस्य विनाशः प्रतिज्ञा। सर्वान् हृदये आश्चर्यम् समुत्पातयति। अस्य नाटक्स्य मूलप्रतिपाद्यम् वीररसः करुण तथा श्रृङ्गारः सहकारीरूपेण। भीमः आलम्बनम् भीमसेनस्य सुवीरताम् ओजस्वी प्रतिज्ञापालनम् नाटकस्य नेतृत्व रक्षणम् महत्त्वपूर्णम् स्थानम् भजते नाटकेऽस्मिन्।

[1] रत्नावली 9/3।

एतस्मिन् नाटके दुर्योधनस्य स्थानम् प्रतिनायकत्वेन वर्तते। अश्वत्थामा कर्णः अस्य नाटकस्य सहप्रतिपक्षी तृतीयअंके पश्चात् अश्वत्थामा। पंचमेअंके दृष्टिगोचरे भवति। मृत्योः प्रसन्नाः सह दुर्योधनस्य समीपे गच्छति। युधिष्ठिर तथा भगवताः कृष्णस्य चरित्रम् अपि महत्त्वपूर्णम् सथानम् भजते। स्त्री पात्रत्वेन वेणीसंहार नाटकस्य पुत्रवधू द्रौपदी तथा दुर्योधनस्य पत्नी भानुमति प्रमुख स्थानम् स्वीकरोति। एतस्मिन् नाटके स्त्रीणाम् समुत्पन्ना सहज वृत्तीनाम् प्रशंसा आक्षेप, ईर्ष्याः, व्यंग्य, प्रेम, चुंबन, आंसु, हास, आदिनाम् विनियोगः उदात्तभावेन कृतम् वर्तते। सम्पूर्ण नाटकस्य अवलोकनेन इदम् ज्ञायते यत् इदम् सिद्धम् भवति यत् नाटको अयम् वीररस परिपूर्णम्। गौड़रूपेण अनेकेषां रसानाम् प्रयोगाः। अस्य मूलघटना याः बीजम् द्रौपद्योः केशाकर्षणेन जायमानाः तस्याः अपमानाः एव अस्य ग्रन्थस्य बीजरूपेण प्रस्फुटिता भवति।

महाकविभासस्य त्रयोदशनाटकान्युपलब्धानि सन्ति। एतेषु संस्कृत-प्राकृतयो-रुभयोरपि गीतीनां प्रचुरप्रचारः प्राप्यते। स्वप्नवासवदत्ते कथितमस्ति यत् महाराजउदयनः स्वप्राणप्रियायाः वासवदत्तायाः वियोगेन संतप्तो भूत्वा स्वमित्रं वसन्तकं प्रति कथयति- "मित्र ! उज्जयिनी प्रयाते यदैव मम दृष्टिरवन्तिराजपुत्र्या उपरि पतिता तदैव कामदेवेन स्वपञ्चानामपि बाणानां प्रयोगः एकतैव भमोपरि कृतः। अद्यापि तत्प्रहारेण मम हृदयं पीडितमस्ति, कथ्यताम्, यदा कामदेवः पूर्णमेव मयि पञ्चापि बाणान् निक्षिप्य तूणीरं रिक्तं कृतवान्, तदा सः इमं षष्ठबाणं मयि कथं प्रक्षिप्तवान्-

**कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते,**
**दृष्ट्वा स्वैरवन्तिराजतनयां पञ्चेष्वः पातिताः।**
**तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयम्,**
**पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः।"**[1]

[1] स्वप्नवासवदत्तम् 4/1

राम: वृक्षान् जलेन सिक्तवान्, येन वृक्षमूलेषु फेनिलं चक्रकारमभवत्। सम्प्रति तस्य फेनिलसलिलस्याबिलत्वात् पक्षिण: स्वतृषाशमनाय तत्रागत्यापि तृषिता एव तिष्ठन्ति। जलपूरिते बिले आर्द्रा: स्थलमभिगच्छन्ति। सलिले शुष्के वृक्षमभित: रेखा: सञ्जाता: सन्ति। कवि प्रतिमानाटकेऽस्य भावस्य प्रदर्शनं निम्नलिखितरीत्या कृतवान्:-

**भ्रमति सलिलं वृक्षावर्त्ते सफेनमवस्थितं,**
**तृषितपतिता नैते क्लिष्टं पिबन्ति जलं खगा:।**
**स्थलमभिपतन्त्यार्द्रा: कीटा बिले जलपूरिते,**
**नववलयिनो वृक्षा मूले जलक्षयरेखया।।**[1]

प्रकतिचित्रणप्रसङ्गेऽकसुन्दरगीतयो लिखिता: सन्ति। कवि: प्रकृतेरूग्ररूपं वर्णयन् लिखितवान्-

**अत्युष्णज्वरितेव भास्करकरैरापीतसारा मही,**
**यक्ष्मार्ता इव पादपा: प्रमुषितच्छाया दवान्याश्रयात्।**
**विक्रोशन्त्यवशदिवोच्छ्तिग्रहा व्यक्तनना पर्वता:**
**लोकोऽयं रविपाकनष्टहृदय: संयति मूर्च्छमिघ।**[2]

ग्रीष्मकालीनसूर्यस्य प्रखररश्मय: पृथ्व्या: समग्रं रसं शोषितवन्त:। यथा सा ज्वरसन्तप्ताऽभवत्। दावाग्निवृक्षपत्राणि दग्ध्वान्, तेषां यक्ष्मग्रस्तातुरसदृशी जाता: पर्वता: स्वकरन्दरामुखानि विदीर्य तापेन क्रन्दन्ति। अखिलविश्व: सूर्यस्य प्रचण्डतापेन चेतनामपहाय मूर्च्छितो भवन्निव जायते।

भासकवेरिमा: गीतय: प्रबन्धगीतिषु गण्यन्ते। एतासु वैयक्तिव हर्षशोकयोरभिव्यञ्जनाया: आधाररुपेण सत्यप्याख्याने गीतितत्त्वस्य प्राचुर्यमस्ति:

---

[1] प्रतिभानाटकम् 5/2
[2] अविमारकम् 1/2

सङ्गीतात्मकता, आत्मभिव्यञ्जना, रसानुभूतिस्तथा सौन्दर्यकल्पना गीतिकाव्ययस्य प्रमुखतत्त्वानि तासु गीतिषूपलभ्यन्ते।

महाकविकालीदासस्याभिज्ञानशाकुन्तल-मालविकाग्निमित्र-विक्रमोर्वशीयानि च त्रीणि नाटकानि सन्ति। अभिज्ञानशाकुन्तले प्रकृत्या सह मानवस्यैकात्मकता चित्रितास्ति सहृदयपितुर्हृदयस्यागाधकरूणाया: सजीवचित्रणं निम्नलिखितगीतौ जातमस्ति-

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,**
**नादत्ते प्रियमण्डनाापि भवतां स्नेहेन या पल्लवम्।**
**आदौ व: कुसुमप्रसूतिसमये यस्या: भवत्युत्सव:,**
**सेयं याति शुकन्तला पतिगृहं सर्वैरनुज्ञायताम्।।**[1]

या शकुन्तलाश्रमवृक्षाणां जलसेचनं विना जलं न पिबतिस्म तथा वृक्षान् प्रति प्रेमकारणात् स्वश्रृङ्गारार्थ पल्लवमपि न गृह्णातिस्म तथा प्रथमपुष्पफलसमये उत्सवं करोतिस्म, सैवाद्य पतिगृहं गच्छन्त्यस्ति, अत: सर्वैर्मिलित्वा सस्नेहं गन्तुमादिश्यताम्।

रमणीयं वस्तु वीक्ष्य हृदये उत्पद्यमानाया: भावनाया: चित्रणं कुर्वन् कवि: कथयति-

**रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्,**
**पर्युत्सुको भवति यत्सुखितोऽपि जन्तु:।**
**तच्चेतसा स्मरति नूनमबोधपूर्व**
**भावस्थिराणि जननान्तरसौहृदानि।।**[2]

रमणीयवस्तूनि निरीक्ष्य तथा मधुरशब्दान् श्रुत्वा सुखी पुरूषोपि यत्कस्यापिवस्तुनोऽज्ञातस्याभावमनुभवति तन्निश्चितमेव पूर्वजन्मन: प्रेम्ण:

---

[1] अभिधानशाकुन्तलम् 4/9
[2] अभिधानशाकुन्तलम् 5/2

स्थिरभावानज्ञातरूपेण स्मरति। तात्पर्यमितदस्ति यत् प्रेम्ण: सम्बन्ध: जन्मजन्मान्तरेष्वपि न त्रुट्यति तथा खण्डितरूपेण मानवमनसि स्थिरो भवित।

आकाशमार्गेण धरिव्या: वर्णनं प्रस्तुवन् कवि: कथयति-

**शैलानामवरोहतोव शिखरादुन्मज्जतां मेदिनी**
**पर्णस्वन्तरलीनतां विजहति स्कन्धोदयात् पादपा: ।**
**सन्तानैस्तनूभावन सलिला व्यक्तिं भजन्त्यापगा: ।,**
**केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वगानीगत।।**[1]

दुष्यन्तस्य रथ: स्वर्गादागमनकाले हेमकूटपर्वते नभसो नीचै: महतावेगेनावतरति। राजा मतिलं अघस्तनदृश्यं दर्शयन् कथयति-एवं प्रतीयते यथोपरि उत्तिष्ठत: शैलशिखरात् मेदिनी नीचैरवतरति। नेदानीं वृक्षाणां केवलं पत्राण्येव, प्रत्युत शाखा अपि दृश्यन्ते, कृशधारा: कृश्यमाना: नद्य: सम्प्रत्यायता: स्पष्टाश्च दृश्यन्ते। एवं प्रतीयते यथा कश्यन पृथ्वीं कन्दुकवत् वेगेनोत्क्षिप्य ममान्तिकं प्रेषयति।

अनया चित्रत्मिकया गीत्या स्पष्टमस्ति यत् महाकवि: विमानयात्राया अनुभवपूर्ण वर्णनं विहितवान्। वात्सल्यभावस्याङ्कने कविरपूर्वराफलतामधिगतवान्-

**आलक्ष्यदन्तमुकुलाननिमित्तहासै-**
**रव्यक्तवर्णरमणीयिनस्तनयान् वहन्तो**
**आश्रयप्रणयिनस्तनयान् वहन्तो**
**धन्यास्दंगरजसा नलिनीभवन्ति।।**[2]

अकारण हसित्वा श्वेतरददर्शकान्, धूलधूसरितान् अस्य वाचश्शिशून् अङ्के गृहीत्वा ये मालेनवासना: जायन्ते ते सुखिनो धन्या: सन्ति।

---

[1] अभिधानशाकुन्तलम् 7/8
[2] अभिधानशाकुन्तलम् 7/17

कर्वेश्चित्रविधायिनी शैली कीदृशी मनोरमास्ति? वीक्ष्याक्षिणी तृप्यतः। यथा-

**वामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितम्बे,**
**कृत्वा श्यामाविटपसदृशं स्त्रस्तयुक्तं द्वितीयम्।**
**पादाङ्गष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं**
**नृत्यादस्याः स्थितमतितरां कान्तमुज्वायतार्धम्।।**[1]

हस्तिसन्धौ मौनकङ्कणवन्तं वामकरं नितम्बे न्यस्य, दक्षिणकरं श्यामलताशखासदृशं नीचैः कुर्वन्ती, चरणाङ्गष्ठेण पृथ्व्यां पतितं यत्पुष्पमियमितस्ततः कुरुते, तस्यीपर्येव दृष्टि ददानायाः अस्याः ऋजुतनुशरीरमीदृशं कमनीयं जातमस्ति, यादृशं नृत्यकालेऽपि नासीत्।

**अनतिलम्बदुकूलनिवासिनी बहुभिराभरणैः प्रतिभाति मे।**
**उडुगणैरुयोन्मुखचन्द्रिका हृतहिमैरिव चैत्रविभारी।**[2]

अनतिलम्बं वसनं मुखे ददाना बहुभिराभूषणैरलङ्कृता च सा सुन्दरी शीतरहिते निर्मले नभसि नक्षत्रराजिमधुमासरजनीसमाना मनोहारिणी प्रीतीयते, यस्यां ज्योत्सना शीघ्रमेव विकसनशीला भवेत्।

उक्तगीतिषु भावानां पूर्णवरोहावरोही प्राप्येते। भावपूर्णा मूर्तिः पाठकानां समक्षमुपस्थिता जायते। यथा मानवजीवनस्य वास्तविकमहत्ता शारीरिकविशालतायाः तथा रचनायाः अपेक्षया तस्य चेनायां तञ्जीवनशक्तौ चाधिकं निर्भरमस्ति तथैव गीतिकाव्यस्योत्कर्षोऽलङ्कारादिबाह्यसौन्दर्य प्रसाधनापेक्षया कल्पनाया उर्वरतायां भाववेगस्य संजीववनशक्तौ चाधिक आधृतो विद्यते। कल्पनाया उन्मुक्ततायाः भाववेगस्य च तीव्रतायाः गीतिकाव्यस्य प्रधानतत्त्वकारणत्वात् कालिदासीनयनाटकानां गीतयः कण्ठहारायन्ते। स केवलां नवीनसौन्दर्यचेतनां बोधयित्वा समाजरुचेः परिष्कारमेव न कृतवान्, प्रत्युत तस्यामेकस्याः नवीनसर्जनप्रेरणायाः सञ्चारं कृतवान्। हृदयस्य गम्भीरभावावेशस्याभिव्यक्तिकारणात् मालविकाग्नि मित्रस्य गीतयः प्रभावोत्पादिकाः सन्ति।

---

[1] मालविकाग्निमित्रम् 2/6
[2] मालविकाग्निमित्रम् 5/7

विक्रमोर्वशीयस्याधिकांशपद्यानि गीतयः सन्ति। अत्रोदाहरणार्थमेका द्वे वा गीती समुद्धियेते। यथा-

**उष्णालुः शिशरे निषीदति तरोर्मूलालवाले शिखी,**
**निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः।**
**तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते,**
**क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं यावते।**[1]

शिशिरर्तोः मध्याह्ने व्याकुलो मयूरः वृक्षमूले निषीदति। कर्णिकारकालिकां निर्मिद्य भ्रमराः निलीयन्ते। जलकुक्कुटः वाप्याः उष्णं जलं विहाय तटकमलिया श्छायायामुपविशति तथा केलिभवने पञ्जरशुकः तृषान्र्तः सन् सलिलं याचते।

उल्लखितपद्ये राजभवनसंलग्नविलासो पवनस्य सीमितप्रकृतौ महाकवेः दृष्टिः कियत्या सूक्ष्मतया पतितास्ति, तथा केन कौशलेन स तां प्रकृतिं गीतिबद्धां चकार, एतत्रपष्टमस्ति।

मनोवैज्ञानिकचित्रणेऽपि कविकुलगुरुः पटुरस्ति। मानव्याः प्रकृतेः सूक्ष्मतापूर्वकं विश्लेषणं स कृतवान्। यथा-

**नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः**
**विघ्नितसमागमसुखो मनसिशयः शतगुणी भवति।**[2]

यथा नद्याः वेगः विषम-शिलावरुद्धोऽधिको वेगवान् भवति, तथैव संभोगसुखे विघ्निते कामदेवः शतगुणो वलवान् भवति।

वैयक्तिकगम्भीरभवानां प्रकाशने कविरन्तर्मुखो जातः। स आन्तरिकशक्तीनां विस्तारस्य पूर्णप्रयासं विहितवान्। पुरूरवसः मानसिकस्थितेः निम्नलिखितरूपेण प्रकाशनमुपलभ्यते।

---

[1] विक्रमोर्वशीयम् 2/22।
[2] विक्रमोर्वशीयम् 3/8।

1. प्रमपात्रस्योपस्थितावानन्दानुभूतिऽ (संयोगावस्था)
2. प्रेमपात्रस्यानुपस्थितौ दुःखानुभूतिः (वियोगावस्था)
3. प्रेमपात्रे सुखिनि सुखानुभुतिः।
4. प्रेमपात्रे दुःखिनि दुःखानुभूतिः।

गीतिकाव्यं संयोगजन्यानन्दानुभूतेरभिव्यक्तत्या सह विरहजन्यायाः विवशतायाः, विषादस्य, आकुलतायाश्च मार्मिकोद्गारा अपि श्रूयन्ते। विरहाग्नौ तप्त्वा प्रेमनिष्कलुषं तथा ज्योतिर्मयरूपं गृह्णाति। विरहे ऐन्द्रियवासनायाः तिरोभावो भवति तथा विशुद्धस्य मानसिकस्याध्यात्मिकस्य वा प्रेम्ण उदयो भवति। कवेः रागात्मिका वृत्तिरूर्ध्वमुखी जाता-

पुरूरवाः उर्वशीमभितोऽन्विष्यन्नेकाः लतां दृष्ट्वा तामुर्वशीं मत्वा कथयति-

**तन्वीं मेघजलार्द्रपल्लवतया धौताधरे वाश्रुभिः,**
**शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्‌भवा।**
**चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते,**
**चण्डीमामवधूय पादपतितं जातानुतापेव सा।।**[1]

एवं प्रतीयते यत् मम कोपाविष्टा प्रिया पादयोः पतितेऽपि मम यदपमानं कृतवती, तस्मादेव कारणात् सा पश्चात्तापाभिभूताऽभवत्। अयं वर्षाजलार्द्रः पल्लव एवाश्रुधौतः तदधरोऽस्ति, ऋतुकाले व्यतीतेऽस्मिन् यत्पुष्पाणि न दृश्यन्ते, तदेवाभूषणैः शून्यता वर्त्तते, भ्रमरगुञ्जनं नात्र श्रूयते, सैव मम प्रियायाः चिन्तामयी मूकता विद्यते।

इयं वाणी कियतः प्रेमार्द्रकण्ठात् निःसृतास्ति। दम्पत्योः पारस्परिकं प्रेम कियतोऽचलस्य विश्वासस्योपरि आधृतमस्ति तथा कियद् गम्भीरमस्ति, एतदनुभूतिगम्य

---

[1] विक्रमोर्वशीयम् 4/68।

विद्यते। एतेषु नाटकेषु आगताः संस्कृतार्याः प्राकृतगाथानां भावोत्कर्षे मनागपि न्यूनाः न सन्ति। भावानामेतावान् रमणीयः कोमलश्च विलासोऽत्यन्तदुर्लभोऽस्ति।

विक्रमोर्वशीयस्य प्राकृतगीतयोऽत्यन्तमनोहराः सन्तिः सहजन्यायाः नाम्न्याः अप्सरसो गीतयः भाव-कलादृष्ट्या मनोहराः सन्ति। यथा-

**चिन्ता दुम्मिअ माणसिआ सह अरिदंसण लालसिआ,**
**विअसिऊकमलमणोहरए विहरइ हंसी सरवरए।**[1]

चिन्ता व्याकुलचित्ता हंसी स्वसख्या सह मिलनोत्कण्ठया सहिता विकसितकमलैः सुशोभित सरसि विहरति।

**सहअरिदुक्खालिद्धअं सरवरअम्मि सिणिद्धअं।**
**अविरलवाहजलोल्लअं तम्मइ हंसी जुअलअं।।**[2]

सरोवरे हंसिके स्वप्रियसखीदुःखाहतेऽक्ष्णोः प्रेमाश्रुधारामविरलं प्रवाहयतः। राज्ञः पुरूरवसः वियोगगीतयोऽपि परमर्मभेदिन्य सन्ति। रुष्टोर्वशी राज्ञा मान दानेऽपि न प्रसीदति तदा गन्धमादनपर्वतस्य तस्मिन् वने गच्छति, यस्मिन् वने गमनशीला नारी कार्तिकेयानुसारं लता जायते। अतः सापि लता जाता तथा राजा तामुन्मत्तः सन्नन्विष्यति। मृगं समक्षमागच्छन्तं पृच्छति-

**सुरसुंदरि जहणभरालस पीणुत्तुंगघणत्थणी,**
**थिरजोव्वण तणुसरीरि हँस-गई।**
**गअणुज्जलकाण्णें मिअलोअणि भमंती,**
**दिट्ठी पईं तह विरह समुद्दंतरें उत्तराहि मई।**[3]

---

[1] विक्रमोर्वशीयम् 4/14।
[2] विक्रमोर्वशीयम् 4/1।
[3] विक्रमोर्वशीयम् 4/59।

स्थूलोन्नतपरस्परासक्तस्तनीं कृशाङ्गी स्थायियौवनवतीं गुरुनितम्बभारेण सालसहंसगमनां मृगनयनीं तां देवाङ्गनां यदि त्वमाकाशसमानोज्वलेऽस्मिन् वने भ्रमन्तीं दृष्टवान्, तदास्माद्विरहसागरात् उत्तारय।

पुरूरवा मयूरं कोकिलं हंसं चक्रवाकं भमरं गजं पर्वतं नदीप्रभृतिञ्च स्वप्रियास्थितिसंकेतं पृच्छन् भ्रमति। एवंप्रकारेण कविकालिदासगीतिषु तीव्रतानुभूतेर्विद्यमानास्ति, येन तासु गीतिकाव्यत्वस्य सन्निवेशोऽस्ति अन्तर्निहितायाः सङ्गीतात्मकताया तथा तीव्रानुभूतिपूर्णस्वानुभूतिमूलकतायाश्च कारणात् गीतयः श्रेष्ठगीतिकाव्यकोटौ स्थानं प्राप्तुं शक्नुवन्ति। नाटकानामिमाः गीतयः सन्दर्भनिरपेक्षा न सन्ति तथास्वाख्यानस्याग्रहोऽपि विद्यते, तथाप्यासु भावानुभूतिसघनताकारणात् गीतिमत्ताविद्यमानास्ति।

षष्ट्याः शताब्द्यां उत्तरार्द्धे कविविशाखदत्तेन मुद्राराक्षसनामकनाटकस्य रचना कृता। अस्य मुख्यविषयः राजनीतिरस्ति तथास्मिन् रक्तहीनबौद्धिकयुद्धस्य प्रदर्शनं कृतं विद्यते। विना शस्त्रयुद्धमेकस्य महतो राजनैतिकविजयस्य प्रतिष्ठा कृता विद्यते। नाटकमिदं नाटककारस्य बुद्धिवैभवस्य चूडान्तनिदर्शनमस्ति। एतस्य नाटकस्य गीतयोऽलङ्कारैराविलाः न सन्ति। उदाहरणार्थं कतिपयगीतयः प्रस्तूयन्ते-

**आस्वादितद्विरदशोणितशोणशोभां**
**सन्ध्यारुणामिव कलां शशलाञ्छनस्य।**
**जृम्भाविदारितमुखस्य मुखात् स्फुरन्तीं**
**को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्।**[1]

चाणक्यः चन्द्रगुप्तस्याहितचिन्तकान् कालमुखगमनात् विरन्तुं सतर्कान्, कुर्वन् कथयति- 'चन्द्रमसः संध्याकालीनारुणकलासदृशीं जृम्भाकाले सिंहमुखस्य विवृतां दंष्ट्रां हर्त्तुं कः समीहते, या मत्तगजेन्द्रस्य रक्तवर्णां शोभां विभर्त्ति।'

---

[1] मुद्राराक्षसम् 1/8।

कविरप्रस्तुतविधानद्वारेण प्रस्तुतस्यैतादृश्या सुन्दरतया निदर्शनं कृतवान्, यत्तस्मिन्नाधिकं सौन्दर्यमागतम्।

**एकमन्यदुदाहरणम्-**

**विपर्यस्तं सौधं कुलमिव महारम्भरचनं**
**सरः शुष्कं साधोर्हृदयमिव नाशेन सुहृदम्।**
**फलैर्हीना वृक्षा विगुणनृपयोगादिव नया**
**श्तृणैश्छन्ना भूमिर्मतिरिव कुनीतैरविदुषः।।[1]**

राजभवनं तथैव विपर्यस्तमभूत्, यथा बहुकुटुम्बः परिवारश्छिन्न-भिन्नो जायते। सरः शुष्कं जातं यथा सज्जनानां हृदयं मित्राणां नाशेनानन्दशून्यं भूत्वा विदीर्ण जायते। वृक्षास्तद्वदेव फलहीनाः दृश्यन्ते यथा गुणहीनाः राजानाः नीतिरहिताः जायन्ते। तथा मेदिनी तथैव तृणच्छन्नास्ति, यथा मूर्खाणां मतिः कूनीतिभिराच्छादिता जायते।

मृच्छकटिकस्यनाटके संस्कृतगीतीनामपेक्षया प्रकृतस्य गीतयोऽधिकसुन्दर्यः सन्ति। इहैकद्विसंस्कृतगीति-प्रस्तुतीकरणानन्तरं प्राकृतगीतीनां विश्लेषणं विधास्यते। यथा-

**उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-**
**ग्रहगणपरिवारो राजमार्गप्रदीपः।**
**तिमिरनिकरमध्ये रश्मयो यस्य गौराः।**
**स्रुतजल इव पङ्के क्षीरधाराः पतन्ति।[2]**

कामिन्या कपोलप्रान्तसदृशः पाण्डुवर्णश्चन्द्रमाः उदेति। तद्राजमार्गे तारकसमूहः प्रदीपवत् दीव्यति। चनद्रमस उज्जवलरश्मयः अन्धकारराशौ पतन्तः ईदृशाः प्रतीयन्ते, यथा जलहीनपङ्के दुग्धधाराः पतन्तः भवेयुः।

---

[1] मुद्राराक्षसम् 6/11
[2] मृच्छकटिकम् 6/56।

उपर्युक्तगीतौ प्रकृतेः कीदृशं रमणीयरूपमुपस्थितं विद्यते। उत्प्रक्षासौन्दर्य कविप्रतिभायाः महत्वं सूचयति। चन्द्रास्तचित्रणमपि मरममनोज्ञमस्ति।

**असौ हिं दत्वा तिमिरावकाशमस्तं व्रजत्युन्नातकोटिरिन्दुः।**
**जलावगाढ़स्य वनद्विपस्य तीक्ष्णं विषाणग्रमिवावशिष्टम्।**[1]

अयं चन्द्रमाः अन्धकारप्रसाराय पूर्ण स्थानं दत्वा निमज्जति। तस्याल्पोंशः दृश्यमानः जलेऽवगाहमानः वन्यगजस्य तस्य रदस्य सदृशो भाति, योऽल्पो जलोपरि निःसृतः दृश्यते।

कविःसुन्दरेणाप्रस्तुतेनास्तंव्रजतश्चन्द्रमसः रूपं रमणीयतया सहोपस्थापितवान्। प्रस्तुतप्राकृतिकदृश्याय महाकविरप्रस्तुतमपि प्रकृतिक्षेत्रादेव गृहीतवान्।

शकारस्य हास्यरसम्बन्धिन्यो गीतयः परममार्मिकाः सन्ति। तमोनिशि स उज्जयिन्याः नगर्याः प्रख्यातवेश्यां वसन्तसेनामेंकाकिनीं व्रजन्तीं वीक्ष्य तामनुसरन् कथयति-

**मम मअणमणंगमम्मथं बड्ढअन्ती**
**णिशि अ शअणके मे णिद्दअं आक्खिवंती।**
**पशलसि भअभीदा पक्खलंतो खलंती,**
**मम दशमणुजादा लावणवश्शेव कुंती।**[2]

यम मदनस्य अनङ्गस्य मन्मथस्य च बद्धिकायां रजन्यां शय्यायाः मम निद्राभङ्गकारिणी सा पतन्ती पलयते, परन्तु सेदानीं मम वशे तथैवागता यथा रावणवशे कुन्ती समागतासीत्।

**झणज्झणंतबहुभूशणशद्दमिश्शं**

---

[1] मृच्छकटिकम् 3/6।
[2] मृच्छकटिकम् 1/21।

**किं दोवदी विअ पलायशि लामभीदा।**
**एशे हिलामि शहशक्ति जधा हणूमे**
**विश्शावशुश्शबहिणिं विअतं शुभद्दम्।**[1]

रामाद् भीतायाः द्रौपद्यौः सदृशी भूषणानां झंकार कुर्वन्ती कथं पलायसे? अहमिदानीं त्वा सहसा तथैव हरिष्यामि यथा हनूमान् विश्वावसुस्वसारं सुभद्रां हृतवान्।

भाषावैचित्र्येण सह शकारस्य मूर्खतापूर्णः वार्त्ताः हास्यं जनयन्ति। पाठकाः शकारोक्तिभिः परमानन्दं लभन्ते।

प्रकृतिपरकगीतिषु वर्षाहिमन्तवसन्तानां चित्रणं रमणीयमस्ति। यथ-

**एसो असोगवुच्छो णवणिग्गमकुसुमपल्लव भादि,**
**सुभडो व्व समरमज्झे यणलोहितपंकचच्चिओ।**

अयमशोकतरुः नवपुष्पपल्लवैरीदृशः शोभितो जायते, यथा युद्धक्षेत्रे रक्तकर्दमालिङ्गितो वीरो भवेत्।

**जधा जधा वश्यदि अब्भखंडे तधा तधा तिम्मदि पुट्ठिचम्मे**
**जधा जधा लग्गदि शीदवादे तधा तधा वेवदि मे हलक्के।**[2]

यथा यथा मेघाः वर्षन्तः सन्ति, तथा तथा पृष्ठचर्मारं जायते, अथ च यथा यथा शीतलो वायुः स्पृशति, तथा तथा मम हृदयं वेपते।

चारुदत्तः प्राणदण्ड प्राप्नोति। द्वौ चाण्डालौ तं वध्यस्थलं नयतः। तौ आर्यगुणैः पूर्णपरिचितौ स्तः। तौ समुपस्थितजनान् प्रति कथयतः -

---

[1] मृच्छकटिकम् 1/25।
[2] मृच्छकटिकम् 5/10।

**किं पेक्खध छिज्जंतं शप्पुलिशं कालपलशु धालहिं।**
**शुअण शउणाधिवाशं शज्जणपुलिशद्दुमं एदम्।।**[1]

सुजनविहगाश्रयं सज्जनपुरुषतरुं कालपरशुधारेण भिद्यमानं कथं पश्यथ?

मृच्छकटिकस्य गीतिष्वनुभूतेस्तीवता सूक्ष्मता तथा वैयक्तिकता विद्यन्ते। सत्यप्याख्याने अनुरागजन्या: वेदना: लभ्यन्ते। गीतिषु विद्यते। भावातिरेकस्य सद्भावेन रागात्मिकामनुभूतिं तथा: कल्पनया कवि: विषयं वस्तु वा भावात्मकं विहितवन्तौ। उक्ता: सर्वा: गीतय: प्रबन्धगीतय: सन्ति। प्रबन्धात्मकरूपेऽपि वैयक्तिकभावमानां समावेश: विहितोऽस्ति।

गीतिकाव्यस्य सम्बन्ध: रागात्मिकयानुभूत्या सह विद्यते। अस्या: अनुभूत्या अभिव्यञ्जनायां श्रेष्ठगीतिकाव्यस्य जन्म जायते। अत्र बुद्धि: गौणा जायते तथा भावना: प्रधाना: भवन्ति तथा कवेरन्तर्वृति: वस्तुना विषयेण वा सह स्वानुरूपतां स्थापयति।

हर्षस्य त्रीणि रूपकाणि सन्ति- 1.प्रियदर्शिका 2.रत्नावली, 3.नागानन्दञ्च। रत्नावल्या: प्रियदर्शिकायाश्च सम्बन्ध: प्रणयेन सहास्ति। परं नागानन्दे प्रणय एव सर्वस्वं नास्ति। तस्मिन् त्यागमयजीवनस्य प्रतिष्ठा विहिता विद्यते। रत्नावल्या: भावपूर्ण: गीतयोऽध्ययनीया: सन्ति यथा-

**उद्दामोत्कलिकां विपाण्डुररूचं प्रारब्धजृम्भां क्षणा-**
**वायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मन:।**
**अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवम्,**
**पश्यन् कोपविपाटलद्युतिमुखं देव्या: करिष्याम्यहम्।।**[2]

[1] मृच्छकटिकम् 10/4।
[2] रत्नावली 2/3।

राजा स्वमित्रं विदूषकं प्रति परिहसन् कथयति- "अद्याहं स्वच्छन्दतापूर्वकं कलिकाभिः पूर्णां (परस्त्रीपक्षे, उद्दामकामनापूर्णाम्) पीतां (प्रेम्णापाण्डुवर्णाभ्) विकासवतीं (प्रेमोन्मादेन जृम्भां कुर्वन्तीम्) तथा मदनवृक्षालिङ्गितां (कामावेगपूर्णाम्) अस्य विलासोपवनस्य लतां परनारीसदृशीं वीक्ष्य देव्याः वासवदत्तायाः मुखमवश्यमेव क्रोधारुणं करिष्यामि !

अत्रोपमया सह श्लेषस्य ग्रहणं कुशलतापूर्वकं कृतमस्ति। भाविन्याः घटनायाः पूर्वमेव सूचनाप्रदानेनैतत् गीतिनाटके समासोक्तिमूलकस्य पताकास्थानकस्य रूपे प्रयुक्तमस्ति।

राजा सागरिकामालिङ्गनप्रार्थनां करोति। राज्ञ उदयनस्यैतत्कथनं परमभावपूर्णं मार्मिकञ्चास्ति।

**शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ,**
**रम्भागर्भनिभं तवारुयुगलं बाहू मृणालोपमौ।**
**इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-**
**मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय।।**[1]

हे प्रिये ! ममाङ्गानि ज्वलन्त्यनङ्गतापैः। त्वमागच्छ तथा दृढ़तापूर्वकं मांमालिङ्ग्य मम तापं निवारय। यतस्तव मुखं चन्द्रोऽस्ति (यस्मिन् अमृतमधरामृतमस्ति) तवक्षिणी कमलतुल्ये तथा करौ पद्मसदृशौ (शीतलावानन्ददायकौ च) स्तः। तव जङ्घे कदलीस्मम्भण्ध्यर्वित्त-भागसदृशे कोमल स्तः तथा बाहू कमलनालसदृशी स्तः। एवं प्रकारेण हे सुन्दरि ! तव सर्वाण्यङ्गानि आह्लादकरणाणि सन्ति।

श्रृंङ्गारेण सह भयानकरसस्याभिव्यञ्चनायापि कविर्निपुणो विद्यते। ओजस्विपदेशु भयस्य मूर्तित्तमद्रूपमङ्कितमस्ति। महाराज्ञी वासदया यस्मिन् भवने

---

[1] रत्नावली 3/11।

सागरिकां वन्दिनीं विधाय रक्षितवती, तस्मिन् भवनेऽस्मात् वह्निदाहो जायते। तद्दृश्यं निभाल्य महाराज्ञया: हृदयं करुणा पूर्ण जायते-

**हर्म्याणांहेमश्रृंङगश्रियमिवशिखरैरर्चिषमादधान:,**
**सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभिताप: ।**
**कुर्वन् कीडामहीध्रं सजलजलधरश्यामलं दृष्टिपातै-**
**रेषप्लोर्षातयोषिज्जन इह सहसैवोत्थितोन्त:पुरेऽग्नि: ।।**[1]

अन्त: पुरे सहसाग्नि: प्रज्वलित:। यस्योर्ध्वगामिन्य: शिखा: राजभवनस्य स्वर्णशिखरशोभां विभ्रति। रामणीयविलासोपवनस्य वृक्षाणां ज्वलन्त: श्रृंगा: अस्य तीक्ष्णाभितापं प्रकटयन्ति। क्रीडाशैलोपरि पतन् धूमराशिरेवं प्रतीयते यथा जलपूर्णा: श्याममेघा आगता: भवेयु:। तीव्रदाहेनान्त:पुरस्य नार्य: उच्चैरार्त्तक्न्दनं सन्ति कुर्वन्त्य: ।

कविरग्निदाहस्य भयानकं हृदयद्रावकञ्च कृतवान्। इयं चित्राविधायिनी गीति: कवेरुच्चप्रखरप्रतिभाया: परिचायिकास्ति। रमणीयप्रकृतिचित्रणै: कतिपयासु गीतिषु कवि: सहृदयताया: परिचयं दत्तवान्। यथा-

**उदयतटान्तरितरितप्राची सूचयति दिङ्निशानाथम्,**
**परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी।।**[2]

इयं प्राची दिशा स्वपीतेन मुखनोदयाचलतटप्रान्तप्रछन्नां चन्द्रमसं तथैव सूचयति, यथा रमण्या: पीतं मुखं तद्धृदयस्थितं प्रियं सूचयति।

नागानन्दनाटके कविना तपोवन-मलयपर्वततुप्रभृतिचित्रणे सुन्दरगीतीनां योजना विहिता। नाटकेऽस्मिन् मानवस्य कोमलोग्रचित्तवृत्त्यो: सफलचित्रणं कृतमस्ति। जीमूतवाहनेन शंखचूडस्य जीवनरक्षायौ स्वशरीरं गरुडाय समर्पितम्। गरुड: प्रतिदिनं

---

[1] रत्नावली 4/14।
[2] रत्नावली 1/24।

नागमेवं भक्ष्यति स्म। किन्तु यस्मिन् दिनेऽसौ जीमूतवाहनं प्राप्तवान्, तद्दिने परमहिंसकगरुणडस्यापि चित्ते परमोद्वेगोऽजनि। गरुडश्चिन्तितोऽभवत् तथा तेन जीमूतवाहनस्य लोकोत्तरगुणानां वर्णनं कृतम्। संदर्भेऽस्मिन्नागताः समस्ताः गीतयोऽत्यन्तसरसाः सन्ति।

भयानकमुग्रप्रकृतिञ्चवलम्ब्य नागानन्दे याः गीतय उपलभ्यन्ते, ताः भवभूतिगीतीनां समकक्षतामर्हन्ति। ध्वन्यात्मिकायां समस्तपदावल्यां समुद्रस्योच्चं सङ्कलनिर्धोयं वर्णितवान्। भावानुगामिनी पदयोजना कवेरुच्चप्रतिभायाः प्रमाणमस्ति। गरुडप्रतीक्षायामुपविष्टः राजाजीमूतवाहनः प्रकृतेः भयोत्पादकपरिवर्त्तनेनैव गरुडस्या गमनमनुभवति। तदनीन्तनं वातावरणं भयोत्पादकदृश्यैः पूर्णं सम्पद्यते।

नागानन्दस्य गीतियोजना भावपूर्णास्ति। अस्मिन् हृदयस्य गम्भीरभावावेशः प्राप्तयते। आत्मनिञयाः समावेशः प्रबन्ध-सन्दर्भेषु जातो विद्यते। वैयक्तिकतया सहाबाधकल्पना, असीमभावुकता विशुद्धभावात्मकता च विद्यमानाः सन्ति। सत्यप्यख्यानाधरे नागानन्दनाटकस्य संस्कृतप्राकृतयोरुभयोरपि भाषयोः गीतयः वैयक्तिकाः विद्यन्ते। सत्यपि विषयनिष्ठतवे कविः गीतीनामात्मनिष्ठतानिर्माणे प्रयतितवान्। गेयतायाः रसपेशलतायाः समवायोऽपि प्राप्यते।

वेणीसंहारनाटकं वीररसप्रधानमस्ति। अस्य संस्कृतगीतिष्वोजोऽयन्तं परिपूर्णमस्ति। भीमस्य दर्पपूर्णसूक्तषु प्राप्याः गीतयः सार्वजनीनाः सत्योऽपि वैयक्तिकाः सन्ति। द्रौपद्याः केशकर्षणवस्त्रापहरणयोरपमानज्वालया दग्धो भीमः सन्धिवार्त्तां श्रुत्वा ओजस्विषु शब्देषु प्रतिज्ञां करोति। भीमसेनस्य क्षुब्धोग्रमूर्त्तेः गीतिषु प्रस्तुतीकरणं कवेः महत्याः क्षमतायाः यथार्थ प्रत्यक्षञ्च प्रमाणिमस्ति। अश्वत्थामोग्रभयङ्कररूपमपि गीतिषु चित्रितमस्ति। भीमसेनाय जलाञ्चलिदानकाले युधिष्ठिरस्य करुणविलापे गीतेः सर्वाणि तत्त्वानि निहितानि सन्ति। यथा-

**मया पीतं पीतं तदनु भवताम्बास्तनयुगं**
**मदुच्छिष्टैर्वृत्तिं जनयरि रसैर्वत्सलतया।**
**वितानेष्वप्येवं तवम म च सोमे विधिरभू-**

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

**न्निवापाम्भः पूर्वं पिबसि कथमेवं त्वमधुना।।**[1]

हे वत्स भीमसेन ! मया पीतयोः मातुः स्तनयोः पश्चात् त्वया पानं कृतम्। मदुच्छिष्टं दुग्धं त्वं प्रेमपूर्वकमपिबः, यज्ञसमये सोमलतायाः रनपानकालेऽपि त्वमेवमेवाकरोः। तत्कथय कथमिदानीं पितृदेवतप्रणजलमद्य मत्पूर्वमेव पिबसि?

उक्तगीतौ करुणाभावस्यानुपमाभिव्यक्तिः विद्यते। शब्देष्वपरवेदनायाः सागरः तरङ्गते। तं वीक्ष्य सहृदयजन एव तस्मिन्नावगाहनं कर्तुं शक्नुवन्ति। गीतिदृष्ट्या भट्टनारायण एवः सफलो रससिद्धश्च कविरस्ति।

भवभूतेस्त्रीणि रूपकाणि सन्ति महावीरचरितम् उत्तररामचरितम् मालतीमाधवञ्च। मालतीमाधवे माधवद्धारेण मालत्याः शरीरवर्णनसन्दर्भे तथा मालत्याः प्राप्त्यर्थं स्वाभिलाषव्यक्तीकरणप्रसङ्गे सुन्दरगीतयाऽङ्गिताः सन्ति। माधवप्रेम मालतीं प्रति पुरातनसंस्कारवशमेतादृशं प्रगाढं जातं यत् स प्रत्येकं वस्तु मालतीरूपमेवापश्यत्। प्रेम्णेऽस्मिन् चरमोत्कर्षे हृदयस्य यथार्थाभिवपञ्चना जाता। वियोगी माधवो वक्ति-

**लेनेव प्रतिबिम्बितेव लिखितेवास्कीर्णरूपेव चः**
**प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव चः**
**सा नश्चेतसि कीलितेव विशिखैश्चवेतोभुव पञ्चभिः,**
**चिन्तासन्ततितन्तुजालनिविडस्तूतेव लग्ना प्रिया।।**[2]

मम प्रिया मम मनसि लीनेवाऽभवत्, चित्रितेवाऽभवत्, तन्मूतिमनस्युत्कीर्णेव वर्त्तते। चित्रमन्तः पटलेऽङ्कितमस्ति। वज्रलेपेन घटितेव, अन्तर्निखतेव प्रतीयते। मम चेतनायां कामदेवस्य पञ्चभिर्वाणैः कीलितेवास्ति। सा गणितचिन्तासूत्रजाले दृढ़ीकृता इव वर्त्तते।

---

[1] वेणीसहार 6/21।
[2] मालतीमाधवे 5/10।

प्रेमिणश्चिन्ताकुलहृदयस्य संश्लिष्टचित्र प्रस्तुतमस्ति। एतद्धि गीतिवकाव्यस्योत्कृष्टं निदर्शनमस्ति। एतत् प्रेमाम्बुधौ लयनस्य पूर्णसामर्थ्यमस्ति।

कवेरुत्तरामचरितं करूणरसस्य सर्वोत्कृष्टं निदर्शनमस्ति। अस्मिन् दाम्पत्यप्रेम्ण: आदर्श: चित्रितो विद्यते। कविरुक्तवान् यत् आदर्शदाम्पत्ये सुखदु:खसयोरुभयो: दशयो: न कीदृशमपि परिवर्त्तनं भवति। एतत् सर्वास्ववस्थासु हृदयाय विश्रान्तिं ददाति वृद्धावस्क्थायामपि नास्यानन्द: क्षीणो भवति। विवाहकलालादारभ्यान्तं यावत् यान्निरन्तरं परिपक्वं भवत् परिपक्वं भवत् स्नेहतत्त्वोपरि स्थितं भवति। इदृशमुदात्तं मङ्गलमयं प्रेम कश्चन भाग्यशाल्येव प्राप्नोति। एवं विमु भावं गीतिबद्धं विधाय दाम्पत्यजीवनस्य रूपं समुपस्थापितमस्ति। उत्तररामचरितस्य मालिनी-शिखरिणी-बद्ध: गीतय: परममनोज्ञा: सन्ति। तासु अर्थसौन्दर्यादधिकं नादसौन्दर्य प्राप्यते। उदाहरणार्थ गीतिद्वयं समुपस्थाप्यते-

**इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो:,**
**असावस्या: स्पर्शो वपुषि बहुलश्चन्दन रस:।**
**अयं कण्ठे बाहु: शिशिरमसृणो मौक्तिकसर:,**
**किमस्या न प्रयो यदि परमसह्यन्तु विरह:।।**[1]

इयं सीता गृहे साक्षाल्लक्ष्मीरस्ति, उक्ष्णो: कृतेऽमृतशलाकास्ति। अस्या: स्पर्श: शरीरकृते चदरसवत् आनन्दप्रदोऽस्ति। कण्ठेऽस्या इमौ बाहू शिशिरसदृशौ शीतलौ तथा मुक्तामालासमानौ सुन्दरौ स्त:। किमधिकम्? कियस्या: नाह्लादकम्? केवलमत्या: विरह एवासह्योऽस्ति-

**व्यतिषजति पदा..........कोऽपि हेतु:**
**न खलु वहिरुपाधीन् प्रीतय: संश्रयन्ते।**
**विकसति हि पतङ्गस्योदये पुण्डरीक**
**दवति च हिमरश्मावुद्रते चन्द्रकान्त:।।**[2]

---

[1] उत्तररामचरितम् 1/38।
[2] उत्तररामचरितम् 6/12।

प्रेम बाह्यकारणानामश्रितं न भवति, किमप्यलक्षितकराणमेव पदार्थान् परस्परं मेलयति। कमलं सूर्योदय एव विकसति तथा चन्द्रकान्मणि चन्द्रदर्शनेनैव द्रवति। क्व चन्द्र:? एतयो: किमपि बाह्यकारणं सम्बद्धतया: नप दृश्यते। अत एतत् मान्यं भवति यत् प्रेम कस्यचिददृश्यस्यैव कारणस्योपर्यवलम्बितम् भवति, न बाह्यकारणोपरि।

मुरारिकवेरनर्घराघवे पर्याप्तं गीतिकाव्यस्योदाहरणमस्ति। एवमेव राजशेखरस्य कर्पूरमञ्चर्यामनेकरमणीयगीतय: प्राप्यते। प्रकृति-नारी-चित्रणे कविना मनोहरा: गीतयो लिखिता:। दोलादोलनावसरे गीतिरुपस्थितास्ति-

**रणंतमणिणेउरं झणझणंतहारच्छडं,**
**कलक्कणिदं किंकिणोमुहरमेहलाडंवरं।**
**विलोलवलआवलीजणितमंजुसिंजारावं,**
**कस्य मणमोहणं ससिमुहीअहिंदोलणं।।**[1]

अस्या: गीत्या: पदशय्येदृशी मधुरास्ति, यच्छब्दा कथितदृश्याणि साक्षात्कुर्वन्त: सन्ति। एतन्नादसौन्दर्य गीतिकाव्योत्कर्षे विशेषसहायकमस्ति। कर्पूरमञ्जरी गीतिनाट्यसंज्ञामप्यर्हति।

बालरामायणे, बालभारते, बिद्धशालभञ्चिकायञ्च समागत: गीतय: स्वसौन्दर्यविशेषताकारणात् वक्रोक्तिजीविते, अलङ्कारसर्वस्वे काव्यानुशासने तथा साहित्यदर्पणादिलक्षणग्रन्थेषु उद्धृता: सन्ति। वसन्तवर्णने (बिद्ध. 1/13) वियोगवर्णने (बिद्ध. 2/21) प्रयुक्ता: गीतय: सर्वा सुन्दर्य: सन्ति। बालरामायणस्य (1/36, 1/63, 1, 42) गीतिष्वपि भावनोत्कर्षो लभ्यते।

विल्हणस्य कर्णसुन्दर्यां नाटिकायां 147 संस्कृतगीतय: सन्ति। एतस्य श्रृंङ्गारगीतयोऽत्यन्तरमणीया: रसपेशलाश्च सन्ति।

[1] कर्पूरमञ्जरी 2/32।

जयदेवस्य प्रसन्नाराघवे कियत्यः सुन्दरगीतयः समाविष्टाः सन्ति। एतासु गीतिषु मनोवेदनायाः ररसाभिव्यञ्जना विद्यते। वामनभट्टस्य पार्वतीपरिणये, धीरनागस्य कुन्दमालाया, वत्सराजस्य रुक्मिणीपरिणये तथा त्रिपुरदाहेऽपि संस्कृतप्राकृतगीतय आगताः सन्ति। हस्तिमल्लस्याञजनापवञ्चये, मैथिलीकल्याणे, विक्रन्तकौरवे, सुभद्रानाटिकायाञ्च सरसगीतयः समाहिताः सन्ति। रामचन्द्रस्य सत्यहरिश्चन्द्रे, नलविलापे, मल्लिकामकरन्दे, प्रबुद्धरौहिणेये चोपलब्धासु गीतिषु भावप्रवणतयाः सह मार्मिकतापि प्राप्यते। जयसिंहसूरेः हम्मीरमर्दनेऽपि गीतयः सन्ति।

नाटकसाहित्यातिरिक्ते महाकाव्येषु लक्षणग्रन्थेषु चानेकसरसंस्कृतगीतय उपलभ्यन्ते। काव्यालङ्कार-काव्यप्रकाश-ध्वन्यालोक-वक्रोक्तिजीवित-काव्यानुशासन-दशरूपक-प्रभृतिग्रन्थेषुद्वृत्तगीतयः काव्यमूल्यदृष्ट्या यावन्महत्वपूर्णाः सन्ति, गीति तत्वदृष्ट्या ततोऽधिकमहत्वपूर्णा विद्यन्ते। अतएव सत्यपि स्वतन्त्ररूपेण गीतिकाव्यविकासे काव्य-नाटक-कथाख्यायिकादिषु गीतयो निबद्धाः सन्ति।

# कथाषु नायक-नायिकाभेद विमर्शः

वेदादेव गद्यलेखन पद्धत्याः प्रसारः अभवत् इति न काचिदतिशयोक्तिः, तथापि वेदानां पद्यबहुलत्वात्केवलं गद्यनिर्देशकाः एव खलु ते इत्येवं शक्यते प्रतिपत्तुम्। परन्तु वेद-व्याख्यनरूपाणि ब्राह्मणनि गद्यमयत्वाद् गद्यप्रवर्त्तकानीति कथने तु नास्ति कापि विप्रतिपत्तिः। एवमेत्र तच्छेषभूतानि आरण्यकानि, आरण्यकोत्तरकाले प्रवृत्तानि च उपनिषद्ग्रन्थरत्नानि इति।

एषां ब्राह्मणादारम्य उपनिषदन्तानां गद्यप्रपञ्चपर्यालोचनेनावगतं भवति यद् वाग्विलासप्रसरे क्रमिकविकासः सुतरां पल्लवितः। वेदे गद्यप्रवाहः खलु छान्दसप्रयोगबहुलः, ततो ब्राह्मणारण्यकग्रन्थेषु स किञ्चित् परिष्कृतः, उपनिषत्सु पुनः स परिष्कृततम इति न तिरोहितम्। उपनिषदां भाषा यथा सरला, व्याकृतिनियमान् प्रायशोऽनुल्लङ्घमाना काव्यमयी, माधुर्यसुधास्यन्दिनी त न तथा ब्राह्मणादीनाम्। अतः वैदिकसाहित्येऽपि गद्यबन्धप्रपञ्चः पदं सुतरामादधात्येवेति निर्विशङ्कम्।

तदेवं लौकिकसाहित्यस्योदयः साक्षात्परम्परया वा वैदिकसाहित्यादेव।

**हा कष्टं तटवासिनोऽपि विफलप्राग्भारमालोक्य मा-**
**मन्यत्रैव पिपासवः प्रतिदिन गच्छन्त्यनी जन्तवः।**
**इत्थं व्यर्थजलातिभारवहनप्रोद्भूतखेदादिव,**
**स्वां मूर्त्तिं वडवानले जलनिधिर्मन्ये जुहोत्यन्वहम्।।**
**रत्नोज्ज्वलाः प्रविकिरैल्लहरीः समीरे-**
**रब्धिः क्रियेत यदि रुद्धतटाभिमुख्यम्।**
**दोषोऽर्थिनः स खल भाग्यविपर्ययाणां**
**दातुर्मनागपि न तस्य तु दातृतायाः।।**
**भुजवनतरुच्छायां येषां निषेव्य महौजसां,**
**जलधिरशना मेदिन्यासीदसावकुतोभया।**

**सृतिमपि न ते यान्ति क्ष्माया बिना यदनुग्रहं**
**प्रकृतिमहते कुर्मः स्वस्मै नमः कविकर्मणे।**

नूनं संस्कृतसाहित्ये एवंविधं काव्यकलासम्पन्नमैतिहासिकं काव्यं नास्ति। यद्यप्यन्येऽपि सन्ति केचनैतिहासिकाः सन्दर्भाः परन्तेऽस्य कलातुलामधिरोढुं नार्हन्ति।

**'वृत्तगन्धोज्झितं गद्यम्'**[1] इति लक्षणाद् वृत्तरहितं सुललितपदविन्यासालङ्कृतं वाक्यं गद्यपदेन परिभाष्यते। तच्च गद्यं, वृत्तगन्धि-उत्कलिकाप्राय-चूर्णकमुक्तकभदाज्चतुर्विधम्। गद्येन गुम्फितं काव्यम् गद्यकाव्यम्। तदपि कथाख्यायिकाभेदाद् द्विविधम्। अल्पाक्षरैरनल्पार्थविबोधपुरस्सरं ओजःसमासभूयस्त्वं हि नाम इति। एतादृशलक्षणलक्षितमेव गद्यमस्माभिः प्राचीनेषु समुट्टङ्कितमवलोक्यते। तद्यथा प्रयागविजयस्तम्भे :-

"महाराजाधिराजश्रीसमुद्रगुप्तस्य कीर्तिमितस्त्रिदशपतिभवनगमनावाप्तललित-सुखविचरणमाचक्षाण इव भुवां बाहुरयमुच्छ्रितः स्तम्भः।" इति।

अपि च क्षत्रपरुद्रदाम्नो गिरनारशिलालेखैषु-

"प्रमाणमानोन्सान-स्वरगतिवर्ण-सरस्वतादिभेः, परमलक्षणव्यञ्जनैरुपेतकान्त-मूर्तिना स्वयमधिगतमहाक्षत्रनाम्ना नरेन्द्रकन्या - स्वयस्वरानेकमाल्यप्राप्तदाम्ना महाक्षत्रपेन रुद्रदाम्ना सेतुं सुदर्शनतरं कारितम्।" इति।

परन्तु वैदिकसाहित्योपनतगद्यलेखनसरणिस्तु सुतरां विभिन्ना। न तत्र समासभूयस्तवं, न व प्रौढः पदविन्यासविलासः, नापि श्लेषसंश्लेषः। तत्रत्यो गद्यप्रपञ्चस्त्वतीव सरलः सुगमः, 'ह' 'वै' 'उ' प्रभृतिभिर्वाक्यालङ्कारभूतैरव्ययै-रन्तरान्तरा च प्रणिबद्धः अतीव रोचिष्णुः प्रसादिको हृदयावर्जकश्चोल्लसति। तत्त्वदृग्भिस्सोऽपि निदर्शननिदशा किञ्चित्प्रणिभालनीयः। तद्यथा-

---

[1] काव्यालङ्कार सूत्रवृत्ति

"व्रात्य आसीदीयमान एव स प्रजापतिं सगरयत्। स प्रजापतिः सवर्णमात्मात्मान्यपश्यत्। तदेकमभवत्, तल्ललागमभवत् तन्महद भवत्, तज्ज्येष्ठमभवत् तद्ब्रह्माभवत् तत्तपोऽपवत् तत्सत्यमभवत्: तेन प्राजायत।''[2] इति।

एवं ब्राह्मणग्रन्थेष्वपि-

'अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण रार्वा अन्या देवताः। आन्नावैष्णवं पुरोडाशं निर्वपन्ति। दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्ति।[3]

अपि च-

'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति, तद् भूमा। अथ यत्रान्यत्पश्यति, अन्यच्छृणोति, अन्यद् विजानाति, तदल्पम्। यो वै भूमा तदमृतमथ पदल्यं तन्मर्त्यम्।''[4]

एवं पुराणसाहित्येऽपि गद्यबन्द सुमनोहर -

'यथैव व्योम्नि वह्निपिण्डोपमं त्वामहसपश्यं तथैवाऽद्याग्रतो गतमप्यत्र भगवता किञ्चिन्न प्रसादीकृतं विशेषमुपलक्षयामीत्युक्तेन भगवता सूर्येण निजकण्ठादुन्सुच्य स्यमन्तकन्नाम महामणिपरमवतार्य एकान्ते न्यस्तम्।''[5]

अन्यश्च गद्यबन्धप्रसरः दर्शनानां भाष्येषु दृष्टिपथमवतरित। सोऽपि विदुषामवधानमर्हति। तद्यथा प्रौढमीमांसकः तत्रभवान् शबरस्वमी-

"इच्छयात्मानमुपलभामहे। कथामिति। उपब्धपूर्वे ह्यभिप्रेते भवतीच्छा। यथा मेरुमुत्तरेण यान्यस्मज्जातीयैरनुपलब्धपूर्वाणि स्वादूनि वृक्षफलानि तानि प्रत्यस्माकमिच्छा भवति।[6]

एवमेव श्रीमद्भगवच्छङ्कराचार्यस्य गद्यगुम्फनशैली विलक्षणैव विद्वन्मूर्द्धन्येन सर्वतन्त्ररवतन्त्रेण श्रीवाचस्पतिमिश्रमहाभागेन श्रीशंङ्कराचार्याणामनवद्यगद्यधारा

---

[2] अथर्ववेद 15 1।
[3] एतरेय ब्राह्मण 119।
[4] छान्दोग्योपनिषद् 7 24।
[5] विष्णुपुराण 4 13 1 14।
[6] शबरस्वामी 9.915।

प्रसन्नगम्भीरवदेन विभूषिता। नूनमाचार्यस्यास्य तादृशो वाक्प्रवाह: अस्खलद्यति:, सरस्वतीप्रसादमन्तरा न सुलभोद्भव:। अस्य प्रवल्भगिरां माधुरी धरा श्रुतौ प्रस्रवन्ती श्रोतृन निवरां निमज्जयति आनन्दोदन्वति। तद्रसोऽपि किञ्चिदास्वाद्यतां सिकै :-

"सर्वो हि पुरोऽवस्थिते विषयान्तरमध्यवस्यति, युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते- न तावदयमेकान्ततो नाऽविषय, अस्मत्प्रत्ययविषयत्वात् न चायमस्ति नियम: पुरोवस्थित एव विषये विषयन्तरमध्यवसितव्यमिति। अप्रत्यक्षेऽपि हि आकाशे बालास्तलमलिनतामध्यवस्यन्ति।'' इति।

एवमेव वैशेषिकदर्शनस्य प्रमाणभूतानां भाष्यकाराणां श्री प्रशस्तपादाचार्याणां सा काऽपि प्रगल्भा गद्यगुम्फनशैली कस्य न विस्मयमुपजनयति। तथाहि परमाणुवादं विशवयन्नाह :-

"इहेदानीं चतुर्णां महाभूतानां सृष्टिसंहारविधिरच्येत। ब्राह्मणेन मानेने वर्षशतान्तेन वर्त्तमान्स्य ब्रह्मणोऽपवर्गकाले संसारखिन्नानां स्र्वप्राणिनां निशि विश्रामार्थ सकलभुवनपतेर्महेश्वरस्य संजिहीषसिपकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्सगतानां अदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्मागुसंयोगजकर्मभ्य: शरीरेन्द्रियकारणाणुविभागेभ्य: तत्संयोगनिवृतौ तेषामापरमाण्वन्ता विनाश: तथा पृथिव्युदकज्वलनपवनानापमपि महाभूतानां अनेनैव क्रमेण उत्तरस्मिन् सति पूर्वस्य नाश:, तत: प्रविभक्ता: परमाणवोऽवतिष्ठन्ते।'' इति

अन्यस्यैकस्य न्यायदर्शनाचार्यस्य न्यायमञ्जरीप्रणेतु: श्री जयन्तभट्टस्य गद्यलेखनवातुरी ह्यपि सचेतसां चेतश्चमत्कारिणी। स एष खलु तार्किकसार्वभौम: चतुर्णामपि वेदानां समानभावेन प्रामाण्यमुपपादयन्नाह :-

"तेन प्रामाण्याधिगमोपायविशेषात् समानयोगक्षेमतया चत्वारोऽपि वेदा: प्रमाणम्। व्यवहारोऽपि सर्वेषां सारतरविचारचतुरचेतसां चतुर्भिरपि वेदैश्चतुर्णा वर्णाश्रमाणां चतसृषु दिक्षु चतुरब्धिमेखलायामवनौ प्रसिद्ध इति कोऽयमत्रान्यथात्वभ्रम:।

श्रुतिस्मृतिमूलश्चार्यावर्त्तिनां भवति व्यवहार। ते च श्रुतिस्मृती जतुरोऽषि वेदान् समानकक्षानभिवदत:। ऋग्यजु:सामवेदेष्वपि अथर्वविदाशंसीन भूयांसि वचांसि भवन्ति।'' इत्यादि।

एवं विद्यमानेऽपि बृहतरे गद्यसाहित्यप्रसरे, संस्कृतवाङ्मये यदि कश्चिब् गद्यवैरल्यमेवावलोकेत तर्हि 'नायं स्थाणोरपराधो यदेनमन्धो न पश्यती'ति निरुक्तोक्तिमेव चरितार्थयति किल स वराक:।

प्रत्यक्षमेवैतद् यावन्ति गणनातीतानि पद्यमयानि ग्रन्थरत्नानि विलसन्ति संस्कृतसाहित्ये न तावन्ति गद्यमयानि। गद्यमयानि त्वल्पीयांस्येव, अङ्गुलिगणनार्हाणि। तत्रापि खलु कारणं तु मृग्यमेव। तदत्र, गद्य[7] काव्यवैरल्यस्य कारणत्वेन प्रतिपादितानि बहूनि बहुविधानि न मतानि उपलभ्यन्ते। केचन आचक्षते यत्पद्यापेक्षाया गद्यलेखनं किञ्चित् क्लिष्टतरम्। पद्यरचनायसेकद्विविसुभगपद्यविन्यासो हि यथा सौन्दर्यमादधाति न तथा गद्ये। पद्यमयप्रबन्धेषु, तावदेकस्मिन्नप्यंशविशेषे चमत्कृति-सन्निवेशात् समस्तमेव पद्यं चमत्कृतिमत्तया यथा प्रशस्यते न तथा गद्यमये सन्दर्भे। गद्ये तु सर्वाङ्गीणमेव मौष्ठवं प्रशंसाधाकं भवति न जात्वाशिकम्। पद्येषु पुनश्छन्द:पारवश्यात् स्वच्छन्दपद प्रयोगोऽवकाशमेव नोपलभते। तत्र प्रसङ्गप्रस्तुतं स्वल्पमपि वस्तु क्वचिद्विस्तृतिमधिगच्छति, अनल्पञ्च पुनर्नियताक्षरनिबद्धत्वात् समवागाहेत संक्षेपत्वमपि। तत्र तथानुतिष्ठन्नपि कवि: तादृशछन्दोबन्धनपारवश्यवशात् व केवलं समालोचकानां विगेयता व्रजति, अपितु क्षन्तव्यतामप्यधिकरोति। परं गद्यगुम्फाने तु कवि: सर्वथा स्वतन्त्र: यथार्हपदप्रयोगं कर्त्तुञ्च क्षम: सन्नपि, यदि सयथेष्टपद प्रायोगे न लभते साफल्यं तदा किल वराक:कविरेव वचनीयतामापद्यते ताक्षन्तव्य ताया अवसर एक खलु कुत:। इत्यपि महीयान् हेतु: प्रतीयते गद्यसाहित्यवैरल्ये। नूनं निकाषायते हि खलु तत् कवीनां सौष्ठवविचारणायां यद् गद्यगुम्फानं नाव। उक्तञ्च युक्तमेवाभियुक्तै:-

---

[7] गद्य लक्षयन् आचार्य दण्डी प्राह -
"अपाद पादसस्थान गद्यमाख्यायिका कथा।''
साहित्य दर्पणकारश्च -
"कथाया सरस वस्तु गद्यैरेव विनिर्मितम्।'' इति।

"गद्यं कवीनां निकर्षं वदन्ति"[8] इति

अन्ये तु तर्कयन्ति - यत् पद्यानां संगीतमयत्वात् मनसो निरतिशयानन्दकरत्वाच्च कवयः पद्यरचनामेव बहुशोऽभिनन्दन्ति। अहो नु खलु पद्यबन्धु आनन्दतरङ्गितान्तरङ्गोल्लासविलासोच्छ्वसितः सङ्गीतरूपेण परिणतः अपूर्वाह्लादजनकः कोऽपि नादो नाम। पद्यरूपमाकलयन्ती किल कस्य मानसं आनन्दतुन्दिलं न विदधाति। गद्यरचना तु पुनरतत्र वरीवर्त्ति वावंयमैव। इति हेतोरपि गद्य साहित्यस्य वैरल्यं नयनविषयतां याति। भवतु यद्वा तद्वा, परन्तु गद्यरचनावैरल्यमस्ति कस्यापि साहित्यप्रपञ्चस्यातीव दोषावहमित्यत्र तु नोदेति कश्चन संशयलेशोऽपि सदसद्विवेचनचणानामिति।

गद्यवाङ्मयस्याद्यः कविः संस्कृतसाहित्यसिन्धुरत्रभवन् महाकविः सुबन्धुरेव किल। सोऽयं बहोः प्राचीन कालात्प्रचलितां पद्यमयप्रबन्धप्रणयनसर-णिप्रणालिभुल्लङ्यानवद्य गद्यलेखनपाटवाय क्रमेण सर्वतः प्रागुपाचके गद्यग्रन्थवैरल्यम् प्रख्यातां वासवदत्तख्यां रम्यामाख्यायिकां संप्रणीयेति। ततः प्राक् प्रायशः समस्तमपि संस्कृतवाङमयं पद्यमयेमेवासीत् गद्यन्तु क्वचिदेव गीर्वाणवाण्यां वैरल्येन लोचनपथमवतरति स्म। अयमेव सुगृहीतनामा कविकुलललामः कवित्वकलाकलापप्रवीणः पदवाक्यप्रमाणपारावारीणोऽभूद् गद्यमयसाहित्यस्याद्यः प्रवर्त्तयः। अस्य दासवदतानाम गद्यमयं महाकाव्यमोलोक्य स्थान एव भणितिरियं प्रचरित :-

"कवीनामगलद्दर्पो नूनं वासवदत्त्यां।"
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोत्तरम्।।[9]

एष हस्तामलकीकृतसकलसाहित्यसर्वस्वः स्वनामधर्नो गद्यकविमूर्द्धन्यः आत्मीयेन कवित्वकौशलेन, निरतिशयरसगर्भित-प्रत्यक्षरश्लेषविशेषानु- बन्धिगिरां गम्फप्रबन्धासु, प्रलन्बसमासबहुलसालङ्कृतिरचनाचर्चितवचना वलिषु सुधास्पर्द्धिमाधुर्यनिष्यनिन्दसान्द्र

[8] काव्यालङ्कार सूत्रवृत्ति
[9] हर्षचरितम्।

सासु तत्रभवतो वसुबन्धोः सूक्तिमुक्तावलिषु को नाम सहृदयः सशिरःकम्पममन्दमानन्दं नोपविन्देत?

शब्दालङ्काररसरीतिसौष्ठवैर्वासवदत्ततुलामधिरोढुं न काचिदन्या गद्य रचना समुत्सहत इति निर्विवादम्।

सुबन्धोः प्रबन्धमनुवाचयतां विदुषां हृदयपटलादद्यापि नापसर्पन्ति तानि श्रवणयोः सुधानिष्यन्दीनि मधुरमधुराणि, सुललितपदावलिप्तमलङ्कृतानि धचांसि गरीयांसि इति निर्व्याजं वक्तुं शक्यते। तद्दिङ्मात्रमिह प्रदर्श्यते विदुषा मनस्तोषाय। तत्र रसिकैसतावत्कवेरस्यानुप्राससचिवश्लेषोपसाद्यलङ्कारच्छटाः किञ्चिन्नयनविषयतां नेयाः। तद्यथा :-

"अभूदभूतपूर्वः सर्वोर्वीपतिचक्रचूडायणिश्रेणीशाणकोणकषणनिर्मलीकृतचरण-नखमणिः नृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मय, कृष्ण इव कृतवसुदेवतर्पणो, नारायण इव सौकर्यसमासादितधरणिमण्डलः, कंसारातिरिव जनितयशोदानन्दसमृद्धि...., इत्यादि।

एवं विरोधाभासोऽपि प्रणिभालनीयः-

"विद्याधरोऽपि सुमना, धृतराष्ट्रोऽपि गुणप्रियः, क्षमानुगतोऽपि सुधर्म्माश्रित, बृहन्नलानुभावोऽपि अन्तःसरलो, महिषीसम्भवोऽपि वृषोत्वाद्यः तरलोऽपि महानायको राजा चिन्ततामणिर्नाम।'' पुनश्च :-

'यत्र शासित धरणिमण्डलं, छल निग्रहप्रयोगो, वादेषु, नास्तिकना चार्वाकेषु, कण्टकयोगो नियोगेषु परीवादो वीणासु, खलसंयोगः शालिषु, द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु, करच्छेदः क्लृप्तकरग्रहणेषु नेत्रोपाटनं मुनीनां, द्विजराजविरुद्धता पङ्कजानां......सूचीभेदो मणीनाम् इत्यादि।......।''

किञ्च यमकालङ्कारोऽप्यस्रू कुतूलावह :-

"राजसेनरहितो रजासेन रहितो ध्रुवम्। विशारदा विशरदाभ्रविशदा, विशदात्मनीनमहिमा, महिमानरक्षणक्षमा, क्षमातिलक ! धीरताधीरता भूतता, भूततावचसि, साहसेन! साहसेन कमला-कमलापराजिता पराजिता.......इत्यादि।''

विस्मयावह :-

"कुररखरनखरशिखरखण्डितपृथुरोमाविलम्, अविरलशकुलशल्कजलनकुलोच्चारं, क्रोष्टुकुलोत्सृष्टविकटकर्कटकर्परपरम्परापरिगतोपन्तम्, अतितरलतरजलरयुलुलितचटुलशफरकुलकवलनकृतमति-निभृतबकशकुनिनिवहधवलितपरिसरम्, अतिचपलजलकपिकुलविहरण-लुलितनलिलिकणनिकरजनितपकवरयपरिमिलतिशिशिरतरम्, अतिजवनपवनविधुतजलधि-जलपटल-विनटननिपतित-मणिगणपरिगतपरि सरम् जलनिधिभुजगनिर्मुक्तनिर्मोकपट्टमिव, दर्पणमिव वसुन्धरायाः स्फटिवकुट्टिममिव वरुणस्य, विपुलं पुलिनजलमाससाद।'' इत्यादि।

भूयोऽप्यस्य श्लेषसौन्दर्यम् :-

"अस्मिन् संसारे केन किं वा न कृतम्? तथाहि- गुरुदार ग्रहणं द्विजराजोऽकरोत्। पुरुरवा ब्राह्मणधनतृष्णया विनाश। नहुषः परकलनदोहदी महाभुजङ्ग आसीत्। ययातिर्विहितब्राह्मणीपाणिग्रहणः पपात। सुद्युम्नः स्त्रीमय इवाभवत्। सोमकस्य विख्याता जन्तुवधनिर्घृणता। पुरुकुत्सः कुत्स आसीत् कुवलयोश्वोऽश्वतरकन्यामपि जहार। नृगः कृकलासतामगमत्। नलं कलिरभिभूतवान्। संवरणो मित्रदुहितरि विक्लवतामगमत्। दशरथ इष्टरामोन्मादेन मत्युमवाप। कार्त्तवीर्यो गोब्राह्मणपीडया पञ्चत्वमयासीत्। युधिष्ठिर समरशिरसि सत्यमुत्ससर्ज। शान्तनुरतिव्यसनाद्वने विललाप। इत्थं नास्त्यकलङ्कः कोऽपि।''

यद्यपि सत्यम् एवञ्जातीयको वचोविन्यासः क्लिष्टतां संश्लिष्यति, दुरूहतां, विभर्ति, जहाति निसर्गसुभगताम् संकेतयति कृत्रिमताम् शिथिलयति कथावस्तु, क्लिश्नाति वाचकान् समुच्छिनत्ति माधुर्यं, व्याकुलीकरोति चाध्येतृन्। नात्र सन्देहः तथापि सा कापि सुबन्धोर्वाक्सरणिः यमक-श्लेष--विरोधालङ्कारच्छटाभिः प्रकृतिचित्रणचातुरीचारुताभिः श्रृंगारिकवर्णनकलाभिः, मधुरकोमलकल्पनाभिः परिमाण्डिता कस्य सहृदयस्यान्तरङ्गं नोद्वेल्लयति आनन्दतरङ्गैः। मन्यामहे नास्ति तत्र दण्डिनः

पदलालित्यं, बाणस्य च प्रातिभं जयोतिः तथापि श्लेषादि गुम्फनम्, अनेकार्थसमर्यवत्तोविन्यासवैदग्ध्यं, काव्यरससुधानिष्पन्दसान्द्रतां को नाम, स्योद्भटकवेश्चोरयितुमुत्सहेत। नूनं समासे स्यरमाधर्यम्, अनुप्रासे मधुरसङ्गीतं, रचनायां कोऽपि लोकोत्तरः सुस्फीती रसोल्लासोऽय रचनासु सर्वोत्कर्षत्वेनावभाति। प्रशंसति चैने ताद्रूप्येणैव व्यमनभट्ट बाण :-

**प्रतिकविभेष्नयाणः कवितातरुगहनीविहरणमयूरः।**
**सहृदयलोकसुबन्धुर्जयति श्रीभट्टबाणकविराजः।।**

अस्य कवेर्वक्रोक्तिनैपुणीमुपवर्णयन्नाहः-

**सुबन्धुर्वाणभट्टश्च कविराज इति त्रयः।**
**वक्रोक्तिमार्गनिपुणाः चतुर्थो विद्यते न वा।।**

नूनं कविरयम् :-

**सरस्वतीदत्तवरप्रसादाच्चके सुबन्धुः सुजनैकबन्धुः।**
**प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदगध्यनिधिर्निबन्धम्।।**[10]

इत्यस्मिन् पद्ये प्रणिबद्धाया प्रतिज्ञासरितो नैपुण्येन पारमियाय इत्यत्र नास्ति संशयलवः।

गद्यबन्धवत् पद्यरचनायामप्यतिकुशल्कलाकारोऽयं चातुरीमात्मनो निपुणतयाविष्करोति :-

**"सं जयति हिमकरलेखा चकास्ति यस्योभयोत्सुकान्निहिता।**
**नयनप्रदीपकज्जलजिघृक्षया रजतशुक्तिरिव।।**
**भवति सुभगत्वमधिकं विस्तारितपरगुस्य सुजनस्य।**
**वहति विकासितकुमुदो द्विगुणरुचिं हिमकरोद्योतः।।**

[10] वासवदत्ता।

विषधरतोऽप्यतिविषमः खल इति मृषा वदन्ति विद्वांसः।
यदयं नकुलद्वेषी स कुलद्वेषी पुनः पिशुनः।।
अतिमलिने कर्त्तव्ये भवति खलनामतीव मलिना धीः।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते चक्षुः।।
गुणिनामपि रूपप्रतिपत्तिः परत एव सम्भवति।
स्वमहिमदर्शनमक्ष्णोर्मुकुरतले जायते यस्मात्।।

स्वभावोक्त्या केसरिणं विवृष्वन्नाह :-

पश्योदञ्चदवाञ्चदञ्चितवपुः पश्चार्द्धपूर्वार्द्धभाक्,
स्तब्धोत्तानितपृष्ठनिष्ठतमनाग् भुग्नाग्रलाङ्गूलभृत्।
दंष्ट्राकोटिविशङ्कटास्यकुहरः कुर्वन् शटामुत्कटा
मुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी।। इति।

## सुबन्धोः कालः

सुबन्धो कालः नाद्यावधि इदन्तया निर्णीतिङ्गतः। यच्च केचन क्रीष्टीय-षष्ठशतकमध्यभागे सुबन्धुस्थितिकालं निर्णयन्तिक, व तत्र वयं काञ्चिवद् बलवतीं विनिगमनां पश्यामः। अपरे विद्वांसः सुबन्धुं बाणपरवर्त्तिनं, स्वमतोद्वोल्कत्वेन च पुरस्कुर्वन्ति यत्, सुबन्धुना कृतो वारावदत्तायामिन्द्रायुधप्रयोगो कादम्बर्याः चन्द्रापीडश्वमेव सङ्केतयति, वासवदत्तायाः कथांशोऽपि च कादम्बरीच्छायां निषेवते, तेनेदं प्रतिपत्तु न दुष्करं यद् सुबन्धुर्बाणपरकालवर्त्ती एवेति। किन्त्वन्येषामत्र महती विप्रतिपत्तिः तेऽत्र प्रत्यवतिष्ठमाना एव प्रतिपादयनिन्त यद् बाणविरचिते हर्षचरिते वासवदत्तायाः संस्मरणं- 'कवीनामलगद्दर्पो नूनं वासवदत्तयेति सुतरां सुबन्धोर्बाभट्टपूर्वकालभवत्वं सूचयति। किञ्च कादम्बार्याः उपक्रमे -

द्विजेन तेनाक्षतकण्ठकौण्ठ्यया, महामनोमोहमलीमसान्धया।

**अलब्ध वैदग्ध्यविलासमुग्धय, धिया निबद्धेयमतिद्वयी कथा।।**[11]

इत्यत्र 'अतिद्वयी'तिपदं गुणाढ्यकृतां बृहत्कथां सुबन्धुविरचिताञ्च वासवदत्तामेव परामृशाति इति चन्द्रभानु प्रभृतयः कादम्बरीटीककृत आशेरते इति स्फुटं बाणात् सुबन्धोः पूर्वकालिकत्वं प्रमाणयति। किञ्च तवभक्ता महामहोपाध्यायेन श्रीकाणेमहाभागेन सप्रमाणं प्रपञ्चितम् यद् हर्षचरिते कादम्र्याञ्च 'वासवदत्ता' पदेन धाणः सुबन्धुकृतां वासवदत्तामेवाभिप्रैति। कैस्त 800 तमरुतकभवो वामनोऽपि स्वकीयकाव्यालङ्कारसूत्रवृत्तौ सुबन्धुकृतवासवदत्तयाः, बाणकृतकादम्ब्र्याश्च समुद्धुतोदाहरणैररुकतार्थमेव साधयति। यतः द्वावप्यमू कैसत 750 तमाब्दात् पूर्वमेव सम्भवेताम्। ख्रैस्त 1200 तमाब्दे लब्धजन्मना कविराजेन कविराजेन स्वकीयरावघवपाण्डवीये -

**सुबन्धुर्बार्णभट्टश्च कविराज इति त्रयः,**
**वक्रोक्तिमार्गनिपुणाश्चर्थो विद्यते न वाः।।**

इति पद्ये त्रयाणमप्यमीषां वक्रोक्तिकलाकुशलानां सङ्ग्रन्थनं तेषा स्थितिकालक्रममनुरुध्यैव कृतमवगम्यते।

किञ्च ख्रैस्त 736 तमाब्दावतरितेन वाक्पतिराजेन स्वकीये 'गौडवहो' इत्याख्ये प्राकृतभाषानिबद्धे काव्ये सुबन्धुरचनायाः समुल्लेखः कृतः परन्तु बाणस्य तत्र नामाऽपि न स्मृतम्। एतदपि ध्वनयति यदस्य समये सुबन्धोः ख्यातिर्यथा दिग्दिगन्तव्यापिनी बभूव न तथा बाणस्य, कदाचिद् बाणस्तदवधि अप्रसिद्ध एवासीदिति। एतावताऽपि सुबन्धोर्बाणपूर्ववर्त्तित्वमभ्युपपन्नं भवति, एवं मङ्खककविविरचिते 'श्रीकण्ठचरिते सुबन्धुबाणयोर्यौ गपद्येनैव प्रशस्तिरवलोक्यते :-

**"मेण्ठे स्वर्द्विरदाधिरोहिणि वशं याते सुबन्धौ विधेः।**
**शन्ते हन्त च भारवौ विघटिते बाणे विषादस्पृशः।।"**

इत्येतेनापि कालत्रयमालम्ब्य वर्णनेन, सुबन्धोर्बाणपूर्ववत्तिवमेव प्रत्याय्यते।

---

[11] कादम्बरी श्लोक 20।

पुनश्च यासवदत्तोपनतवर्णनेन सह भवभूतिकृत मालतीमाधवीयं वर्णनं यत्र कुत्र भूम्ना साजात्यं भजते। तद्यथा :-

"हृदयं विलिखितमिव, उत्कीर्णमिव, प्रत्युप्तमिव, कीलितमिव, वज्रलेपघटितमिव,......मर्मान्तरस्थितमिव,......कन्दर्पकेतुं मन्यमाना।''[12] (वासवदत्ता)

मालतीमाधवे च-

**लीनेव, प्रतिबिम्बितेव, लिखितेवोत्कीर्णरूपेण वा,**
**पत्युप्तेव च वज्रलिम्पघटितेवान्तर्निखानेव च।**
**सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिः,**
**चिन्तासन्ततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया।।**[13]

मह कविभवभूतिरचनासु कालिदासीयरचनायस्तदीयभावानाञ्च प्रभावः स्फुट दृग्गोचरीक्रियते। सम्भवेन्नाम यत्सुबन्धोरपि शब्दाउम्बरेण भावाविशेन भवभूतिरपि प्रभावितो भवेत्। इत्यनुमित्यनुरोधेनापि कैस्तसप्तमशतकसम्भवाद् भवभूतेः प्राक्कालीनः सुबन्धुः सम्भपति इति।

अथापि पाश्चात्यवद्विद्वरेण श्री कायमहाभागेनापि समुद्रङ्कितम्-यत् सुबन्धुना वासवदतायां रमणीये रमणीवर्णने "न्यायस्थितिमिवोद्योत्वरस्वरूपां, बौद्धसंगतिमिवालङ्कारभूषिताम्'' इत्यस्मिन् श्लेषेण नैयायिकोद्योतकरस्य बौद्ध सूरिविरचितस्य बौद्धसङ्गत्यलङ्कराख्यग्रन्थस्योपन्यासः कृतः, अनयोर्लेखकयोः समयः खैस्तसप्तमशताद्या आरम्भे निर्णीतः। अतः तदभिलक्ष्य, सुबन्धुसमयः खैस्तषष्ठशतके एव सम्भवति।

खैस्त 640 तमाब्दभवो बाणभट्टः खलु स्वयमेव वासवदत्ताया नामकीर्त्तनं करोतीति प्रागभिहितम्। तस्माद् बाणभट्टात्पूर्वकालभवत्वमेव सुबन्धोः सम्भवति। यतः हर्षवर्द्धनस्य शासनकालः, यदाश्रितो बाण आसीत् खैस्तष्ट्शतोत्तरपष्ट्तमदेशीयो

---

[12] वासवदत्ता।
[13] मालतीमाधवे 5/10।

कालविद्भिर्विभाव्यसे इत्येव ताम्रपत्रतश्चाप्यागम्यते। पुनश्च "सारसवत्ता विहता न बका विलसन्ति चरति नो कङ्कः। सरसीव कीर्त्तिशेषं गतवतिभुवि विक्रमादित्ये" इति सुबन्धुः स्वयं पद् विक्रमादित्यं संस्मरति, राजशेखरात्पूर्वभवः कविराजश्च बाणात्पूर्वजं व्यवस्थापयति, तेन सुबन्धोः स्थितिकालः ख्रिस्तीयषष्ठशतकनमध्यान्तर्घटित एवेत्युपपद्यतेतराम्। परमन्येऽत्र केचन विप्रतिपद्यमाना ब्रुवन्ति, यदि बाणभट्टात्सुबन्धोः पूर्वकालभवत्वं, केवलं विक्रमादित्यस्य नाममात्रकीर्त्तनात् विक्रमादित्यः कच्चित् शकारातिः विक्रम एव? उतान्यो वा कश्चिद् भवेदिति? यतोऽन्येपि किल बहवो नृपा विक्रमादित्य-विरुदभाजोऽभूवन् भारते। तेपु खलु कतमोऽयं सुगृहीतनामा यस्य नाम सुबन्धुना सङ्कीर्त्तितम् चेन्नाम स एव शकारातिर्विक्रमः यादयम् तर्ह्यपि तदीयकालस्यापि अद्यावधि इदन्तया अनिर्णीतत्वात् सुबन्धोः कालोऽपि दुरुपपादः स्यात्। यद्यपि सति एवं विधे व्यतिकरे, सुबन्धो काचिन्निश्चिता कालोपपत्तिस्तु न सुकरा निधारियितुम् तथाऽप्येतत्पार्यते प्रतिपत्तुं यदस्य महाकवेः कालः क्वचित् ख्रैस्तसप्तमशतकमध्यान्तर्घटित एव नूंन सम्भवेदिति।

सुबन्धोः पदविन्यासः समासबहुलः, अनुप्रासच्छटोट्टङ्कितः ओजस्वी कान्तिम चेति समभिलक्ष्य प्राधान्येनायं गौडीशेलीमेवोपाललयामासेति न दुष्टकरमूहितम्। अस्य रचनायां श्लेष-विरोधाभासाद्यलङ्कारागामुपन्यासोऽतीव हृदयावर्जकः पल्लवितः इति प्राक् प्रदर्शितप्रायम्। क्वचित्क्वचिद्विरोधाभासविलासस्तु निरतिशयो रमणीयः सम्पन्नः। तद्यथा :-

"विद्याधरोऽपि सुमनाः, धृतराष्ट्रोऽपि गुणप्रियः, क्षमानुगतोऽपि सुधर्माश्रितः" इति।

श्लेषोऽपि पुनः किञ्चित् :-

"नन्दगोप इव यशोदयान्वितः जरासन्ध इव घटितसन्धिविग्रहः भार्गव इव सदानभोगः दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च, दिलीप इव सुदक्षिणान्वितः रक्षितगुश्च, राम इव जनितकुशलववयोरुपच्छायः" इत्यादि।

अन्यामहे- "ओजःसमासभूयस्त्वमेतद् गद्यस्य जीवितम्" इति दण्डिकृतं गद्यलक्षणं, यदि क्वाचित् पूर्णतया परिपक्विमत्वेन संघटते तर्हि सुबन्धोर्गद्यबन्ध एवेति।

यद्यपि सुबन्धुः, श्लेषाद्यलङ्कृतभाषागुम्फनप्रलोभनपाशबद्धतया क्वचित्कथावस्तुप्रवाहमुच्छिनत्ति, अन्यत्र यथार्हरसाभिव्यक्तिमपि व्याकुलीकरोति, समुल्लङ्वयति च क्वचिदौचितीसीमाम्, धूसरयति रम्यान भावावेशान् आरचयति च केवलां शब्दाडम्बरविडमबनाम् तथापि नासौ तावता काव्यकलाकौशलात्किञ्चित्प्रच्यवी। किन्नु खलु ध्वन्यालोककृता श्रीमतानन्दवर्द्धनाचार्येण- 'दृश्यन्ते च कवयोऽलङ्कारनिबन्धनैकरसा अनपेक्षितरमाः प्रबन्धेषु'' इति सुबन्धु मभिलक्ष्यैव तु न लिखितं भवेत्? अस्तु।

मन्यामहे, यद्यपि वासवदत्तायां न दृश्यं दण्डिनो वाग्विलासः, हास्यरसोल्लासः, प्रसादप्रमोदो वा, नापि च लभ्यते बाणस्य सरसस्वारस्यप्रभावः, भव्यभावमाधुरी च तथापि तद्रवनाया या किल विलक्षणा स्वरमाधुरी, अपूर्वा च वर्णनचातुरी, यच्च प्रखरपदप्रयोगप्रावीण्यं तत्तु तस्य को नाम सुधीरपह्नोतुं पारयेत। मन्यामहे यद्यपि स्वात्तत्र मृद्धी मृद्धीकरसमाधुर्यधुर्यता, तथापि प्रकाण्डपौण्ड्रकाण्डरसमाधुरीं तु खल्वस्य को नाम पण्डितश्चोरयितुं प्रभवेदिति दिक्।

गद्यसाहित्ये संस्कृतगद्यकविमण्डले महाकविर्बाणभट्टः सर्वमूर्द्धाभिषिक्तः अनितर साधारणप्रतिभावान् महामेधावी, वश्यवाचामग्रणीश्चासीत्। स्वजीवनविषये, स्ववंशवृत्तान्तमुद्दिश्य चायं स्वविरचिते हर्षचरिते[14], आद्यद्वयोरुच्छ्वासयोःकिञ्चित् तृतीयेऽपि च समासेन सञ्जुगुम्फ। एवमसौ कादम्बर्या[15] अपि आरम्भोद्भात्ते स्वपारिवारिकं परिचयमपि कश्चिदनवद्यपद्यैनिबबन्ध। यत्तस्मिवेवातिप्राचीने विद्यातपोभ्यां परिपूते वत्सदधीचिप्रभूतिमहर्षीणां यशोषवलिते वंशे तज्जन्म ज्योतिरुदयमाससाद, येषां तपः प्रकर्षो वैदुषीविभवश्न अखिलमहीमण्डले विश्रुत आसीत्। आलोऽयं हन्त ! बाल्यकाल एव दैवदुर्विलसितादुपसन्नया जनन्या व्ययुज्यत। अतः समुपजातस्नेहः पितृसुलभवात्सल्यसंवलितोऽस्य जनक एवास्य मातृस्वमकरोत्। विधिपूर्वकं यथ्ज्ञाकालञ्च समरिपितोपनयनादिसंस्फारस्थास्यें पित्रैव विद्यारम्भसंस्कारो महमा समारम्भेण निर्वर्तित्ततः। यदाऽसौ कुशांग्रधीर्वटुः, अधीयानो व्याकरणादीनि शास्त्राणि

[14] "स बाल एव विधेर्बलवतो वशादुपसन्नया व्यपुज्यत जनन्या। जात स्नेहस्तु नितरा पितैवाऽस्य मातृतामकरोत्। (हर्षचरिते)

[15] बभूव वात्सायनवशसम्भवो द्विजो जगदृगीतगुणोऽग्रणी सताम्।
अनेन प्तार्चितपादपङ्केज कुबेरनामाश इव स्वयम्भुव ।।

चतुर्दशवर्षीयोजात: तदा दैवदुर्विपाकाज्जनकोऽप्यस्य बालममुमजातपक्षशुकुन्तमिप परित्यज्य पुरन्दरपुरं प्रतस्थे। तदुसंस्थिते पितरि महता शोकवह्निना दन्दह्यमानहृदयोऽयंकिञ्चित्कालं स्वग्राम[16] एव उषित्वा दिनानि अनैषीत् । ततोऽप्रतिमप्रतिभाशाली बालकविरयं यदा यौवने पदमधत्त तदा निरङ्कुशयोवनप्रणोदितस्यास्य मनसि देशदेशान्तरपर्यअनोत्सुकत्वमाविरभूत्। बालतया निघ्नतामुपगते देशान्तरावलोकनकौतुकाक्षिप्तहृदय: सत्स्वपि पितृपितामहोपात्तेषु ब्राह्मणजनोचितेषु विभवेषु सति चावच्छिन्ने विद्याप्रसङ्गेऽसौ सुहृद्गणै: परीत: गुहान्निरगात्। अगाच्च तथाकुर्वाण: स्वतेजाद्वेषिण महतां वचनीयताम्। ततो देशाटनने तृप्तो यदा स्वजन्मभुवं प्रीतिकूटनाम्ना प्रसिद्ध प्रत्यावर्त्तत तदा तस्य कुलबन्धुभि: सुहृद्वर्गैश्च महता समारम्भेण साडम्बरं तत्सागतोत्सवो निरवर्त्ति। तदनु कियच्चिरं तत्रैव मित्रबन्धुवर्गै: सह स्वर्गीयसुखसहोदरं मोदं प्रमोदञ्चानुभवन् सुतरामनैषीत् कमपि रसमयं समयम्।

अथैवं व्रजति काले तेनैकदा राज्ञो हर्षदिवस्य यवीयसो भ्रातु: कृष्णस्य सन्देशो मेखलक इत्याख्यसन्देशहरद्वाराऽधिगत:, यत्केनापे भवत्तेजोद्वेषिणा कणेजपेन पिशुनेन स राजधिराज: श्रीहर्ष: भवन्तं प्रति कलुवितान्त:करण: कृत:। यद्यप्यस्मादृशै: सुपरिचितत्वत्कुलशीलै: यथाकथञ्चिन्महाराजस्य त्वद्विषये तादृशकलङ्कपङ्कप्रक्षालनादिना बहुतरमनाविलीकृतं दूषितमन्त:करणम् तथापि भवान् सुतरां विजानात्येव यद्राजान: प्रायश उच्छृङ्खलवृत्तयो भवन्ति, क्षृण्वन्ति च भूम्ना कर्णेजपानेव, आकलयन्ति च तानेव स्वहितवादिन:, व्याकुलयन्ति तथ्यस्मभृानर्थानपि, कदर्थयन्ति च सदर्थान् भूरिश हति हेतो: भवद्भिरविलम्बमेव राज्ञ: समभ्यर्णे प्रत्युपस्थाप्यात्मानं सर्वेऽपि तादृशा दोषाभासा: सर्वात्मना निबर्हणीय: समूलङ्कषं संकषणीयाश्चेति। सन्देशहरमुखैन वृत्तमिदमाकर्ण्य तप्दृशमरुन्तुदं, मर्माहत इव, वृश्चिकदष्ट इव, सर्पाघ्रात इव, विदीर्णहृंदयोऽयं बाणो 'मणितारा' समीपे 'अजिरावती' नाम्नि सैन्यशिविरे विराजमानं राजानं श्रीहर्षदिवं दिदृक्षु त्वरितमेव तत्समभ्यर्णेऽभ्यगात्। तमापापतो दृष्ट्वैव नराधिप: निजसमीपे विराजमानं मालवाधिपतिं श्रीमाधवगुप्तमाह सक्षोभं 'महानयं भुजङ्ग:' इति। तद्वचनमाकर्ण्य हालाहलविषमिव च तच्छ्रूवणपुटकाभ्यो निपीय कथञ्चिदाश्वास्य

[16] ब्राह्मणाधिवासाख्ये ग्रामे।

हृदयं, ब्रह्मतेज:समुत्तेजितमुखमण्डल: बालरविरिवरुणभासा समुद्भासयन् दिग्दिगन्तरालं बाणो व्याजहार अनन्यसामान्य प्रगल्भय गिरा, 'देव! नार्हसि ममन्यथा सम्भावयितुमविशिष्टमिव जनम् ब्राह्मणोऽपि जात: सोमपायिनां वंशे वात्सायनानाम्। यथासमयमुपनयनादय: कृत: संस्कारा:, सम्यक् पठित: साङ्गो वेद:, श्रुतानि यथाशक्ति शास्त्राणि। दारपरिग्रहादारभ्यागारिकोऽमि, का मे भुजङ्गता[17]?'' श्री हर्षदेवेश्च तन्निशम्य किञ्चिन्वमुग्ध इव आलेख्यार्पित इव वाचंयमतामभजत। ततो गच्छति किञ्चित्काले- 'यावदस्य स्वयमेव गृहीतस्वभाव: पृथिवीपति: प्रसादवानभूत'। स्वल्पैरेव चाहोभि: परमप्रीतेन नरेन्द्रणाऽसौ प्रसादजन्मनो मानसप्रेम्णी विश्रम्भस्य द्रविणस्य नर्मण: प्रभावस्य च परां कोटिमनीयत। तदनु महाकविर्बाणोऽपि नरधिपात् तादृशमा-दरातिशयमवाप्य आनन्तस्य परां कोटिमधिजगाहे। सहर्षञ्च राज्ञ: प्रशस्तिापरं, हर्षचरितसमाख्यमेकमनवद्यं गद्यमयं प्रबन्धं निबबन्ध। यद्यपीयमभ्य आद्या एव गद्यमयी रचना तथाऽपि अत्र सा नाम काऽपि अवर्णनीया वर्णनशैली, साऽलङ्कारा वाक्यनिर्झरी अद्भुता च कवित्वकलापूर्णा वाग्धारा, यामवलोक्य सचेतसां चेतोऽद्याप्यतितरां हठात् तच्चारुत्वचमत्कृतं सञ्जायते इति।

बाणभट्टस्येदं हर्षचरिताख्यं निरवद्यगद्यगुम्फितनाद्यं गद्यमहाकाव्यं नवभिरुच्छ्वासै: प्रणिबद्धं बृहद्ग्रन्थरन्त्नं निरुपमतया विलसतिं समाप्तिलक्षणानुपलम्भादनुगोयते यदेतदस्त्यपूर्णमेव। अस्मिन् हि सन्दर्भे कान्यकुब्जेश्वरय हर्षवर्धनस्य चरितं कथावस्तुरूपेणोपन्यस्तम। महाकविरसौ स्वकीयं परिचयमपि सङ्ग्रहेणारचयति। हर्षचरितमुद्दिश्य सम्प्रति टीकाद्वयमुपलभ्यते। राजानकरुप्यक-कविप्रणीता 'हर्षचरितवार्त्तिका' नाम्नी, शङ्करकविविरचिता 'हर्षचरितसङ्केत' नाम्नी च।

अस्मिन् हि काव्ये पल्लविता कापि चारुरचनाचातुरी, लोकोत्तरपदविन्यासोल्लास: सुरुचिरञ्च तत्मकथावस्तुचित्रणं न कस्य सचेतसो चेतश्चमत्कारोति? तद्दिङ्मात्रमत्रोदाह्रियते काव्यरसिकानां मनस्तोषपोषाय :-

---

[17] 'का मे भुजङ्गता' इति द्व्यर्थकोऽय वाक्यविन्यास। प्रथमार्थो स्पष्ट। का खलु रमणी ने भुजपाशङ्गता भुजपाशबद्धा भवति इति द्वितीयोऽर्थ। कामे किल भुजङ्गतानुश्रयत इति तृतीयोऽर्थ।

"यस्मिश्च राजनि निरन्तरैर्यूपनिकरैरङ्कुरितमिव कृतयुगेन, दिङ्मुखविसर्पिभिरद्ध रधूमैः पठायितभिव कालिना, ससुधैः सुरालवैरिवावतीर्णामिव स्वर्गेण, सुरालयशिखरोद्धूयमानैर्धवलध्वजैः पल्लवितमिय धर्मेण; बहिरुपचरित-विकटसभासत्रप्रपाप्रागवंशमण्डपैः प्रसूतिमिव ग्रामैः, काञ्चनमयसर्वोपकरणैविभवेर्विशीर्णमिव मेरुणा, द्विजदीयमानैरर्थकुशलैः फलितमिव भाव्यसम्पदा।'' इति।

अहो कीदृशो विस्मयावहो मधुरवाग्धाराप्रवाहो वाचाम्?

वस्तुतः हर्षचरितमेव केवलं श्लेषविरोधाभासोपमोत्प्रेक्षाद्यलङ्कारविशेषै समलङ्कृतं मृदुलपदावलिसंवलितं नूंन प्रख्यापयति अस्योद्भटकवेः भट्टबाणस्य गद्यरचनाचातुरीचारुतामित्यत्र नास्ति सन्देहलवोऽपि। मन्ये यथाऽसौ वर्णनीयं वस्तुतत्त्वं चित्रार्पितमिवारचयति यथार्हतया न तथाऽयस्तद्वितराः। तथाहि :-

"स्थानेषु च मन्दमन्दमास्फाल्यमानालिङ्गयकेन शिञ्जानमञ्जुवेणुकेनानुत्तालाबुवीणेन कलकांस्यकोशीक्वणितकोलाहलेन समकालदीयमानानुत्तालतानकेनातोद्यवाद्येनाऽनुगम्यमानाः, पदे-पदे झण्झणितरवैरपि सहृदयैरिवानुवर्त्तमाना तालालयाः, कोकिला इव मदकलकाकिलीकोमलालापिन्यः विटानां कर्णामृतान्यश्लीलरासकपदानि गायन्त्यः, कुङ्कमप्रमृष्टरुचिरकायाः काश्मीरकिशोर्य इव वल्गन्त्यः।...... कुमुदिन्य इब रात्रावनुपजातनिद्राः आविष्टा इव नरेन्द्रपृन्दपरिपृताः, प्रीतय इव हृदयमाहरन्त्यः गतय इव रागमुद्दीपयन्त्यः, पुष्टाय इवानन्द मुत्पाथत्यः, मदमपि मदयन्त्य इव, रागमपि रजयन्त्य इव, आनन्दमपि आनन्दयन्त्य इव, नृत्यमपि नर्तयगाना इव, उत्सवमपि उत्सुकयन्त्य इव कदाक्षितेषु पिबन्त्य इवापाङ्गशुक्तिभिः, तर्जनेषु संयमन्त्य इव, खमयूखपाशैः कोमलाभिनयेषु ताडयन्त्य इव भ्रूलताविभागैः प्रणयसम्भाषणेषु वर्षन्त्य इव सर्वरसान्, चतुरचङक्रमणेषु विकिरन्त्य इव विकारान् पण्यविलासिन्यः प्रानृत्यन्।''[18]

[18] हर्षचरिते चतुर्थ उच्छ्वासे।

इति कीदृशं याथार्थ्यमतिक्रममाणा वर्णना। पण्याङ्गनानां विभ्रमविलासस्त्वालेख्यबद्ध इवाङ्कितः खल्वत्र। यं कमपि रसमादाय प्रसरति बाणस्य वाणि तन्तं पूर्णपरिपाकमेवावतारयति कातर्न्येनेति नात्र कश्चन संशयावकाश इति।

## कादम्बरी

कादम्बरी बाणभट्टस्य द्वितीय अद्भुता रचना। हर्षचरितम् कादम्बरी चेति द्वे एव बाणस्य रचनात्वेन सुप्रसिद्धे गद्यमहाकाव्ये। यद्यपि अस्मिन् काव्यद्वयेऽपि बाणस्य अलौकिक काव्य-कलाकौशलं, प्रदीप्तं प्रतिभावैभवञ्च सञ्चकास्ति समीचीनतया तथाऽपि कादम्बरीतुलां तु नाधिरोढुमुत्सहते कस्यापि कवेः गद्यकृतिरद्यावधि। अस्य वाग्विन्यासविलासं विलोक्य रसिका आनन्दमदोन्मत्ता जायन्ते[19]। पुलिन्दभट्टस्य एव वचोविन्यास सुतरां चरितार्थ एव किल यत् :-

कादम्दरीरसभरेण समस्त एव, मत्तो न किञ्चिदपि चेतयते जनोऽयम्।' इति।

## कादम्बर्याः कथानकम्

कादम्बर्याः कथानकं गुणढ्यविरचितबृहत्कथातः सङ्कलितम्प्रतिभीत। तां साधारणीं कथा बाणः रसगुणालङ्कारद्यलङ्कृतां विधाय कादम्बरीरूपेण प्राचीकशत्। दैवदुर्विलसितात्कविधुरन्धरोऽयं बाणः कादम्बरीमपूर्णामिव परित्यज्य पुरन्दरपुरं ययौ। कादम्बर्याः पूर्वार्द्धभाग एव बाणप्रणीतः। उत्तरार्द्धमागस्तु बाणात्मजेन पुलिन्दभट्टापरनाम्ना भूषणभट्टेन बाणशैलीमवलम्ब्यैव विरचितः।

कादम्बर्या, बाणेन याद्भुत्ता प्रतिभाद्युतिः प्रदर्शिता सापि पराकाष्ठां प्राप्त। श्लेषगुम्फनमतीव कुतूहलजनकं, निदर्शनरूपेण च विन्ध्याटवीं वर्णयन्नसौ व्यलिखत् :-

'प्रेताधिपनगरीव सदासन्निहितमृत्युभीषणा महिषाधिष्ठिता च, समरोद्यतपताकिनीव बाणासनारोपितशिलीमुखा विमुक्तसिंहनादा च, कात्यायनीव

[19] बाणस्य लोकोत्तरा काव्यकलाकमनीया शब्दसम्पदाढ्यता विभाव्य भणितिरिय- "बाणोच्छिष्ट जगत्सर्वम्।'' इति नून चतुरस्रता बिभर्ति।

प्रचलितखड्गभीषणा रक्तचन्दनालङ्कृता च, कर्णीसुतकथेव सन्निहितविपुलाचला शशोपनता च, कल्पान्तप्रदोषसन्ध्येव प्रनृत्तनीलकण्ठा पल्लवारुणा च, चन्द्रमूर्त्ति रिव सततमृक्षसार्थानुपता, गिरितनयेव स्थाणुसङ्गता मृगपतिसेविता च, जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च, कामिनीव चन्दनमृगमदपरिमलवाहिनी रुचिरागुरुतिलकभूषिता च, सोत्कठेव विविधपल्लवानलवीजिवा समदना च, बालग्रीवेव व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभणा च, पानभूमिरिव प्रकटितमधुकोशशता प्रकीर्णविविधकुसुमा च, क्वचित्प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमण्डला, क्वचिद्दशमुखनगरीव चटुलवानरवृन्दभज्यमानतुङ्गशालाकुला, क्वचिदचिरवृत्त-विवाहभूमिरिव हरितकुशसमित्कुसुमशमीपलाशशोभिता, क्वचिदुद्धतमृगपतिनादभीतेव कण्टकिता, क्वचिन्मत्तेव कोकिलकुलकलाप्रलापिनी, क्वचिदुन्मत्तेव वायुवेगकृतततालशब्दा, क्वचिद्विधवेवोन्मुक्ततालयपत्रा, क्वचित्समरभूमिरिव शरशतनिचिता, वचिदमरपतिनुरिव नेत्रसहस्रसङ्कुला, क्वचिन्नारायणमूर्त्तिरिव तमालनीला, क्वचित्पार्थरथपताकेव कप्याक्रान्ता,.......'' इत्यादि ।

अपि च शाल्मलीतरुवर्णनमपि अतिकोतुकावहं श्लेषरूपेण चमत्करोति चेतांसि सचेतसाम् । तथा हि :-

"दुर्योधन इवोपलक्षितशकुनिपक्षपात:, दलिननाभ इव वनमालोपगूढ:, नवजलधरव्यूह इव नभसि दर्शितोन्नति:, अखिलभुवनतलावलोकप्रसाद इव वन देवतानाम्, अधिपतिरिव दण्डकारण्यस्य, नायक इव सर्ववनस्पतीनाम् सखैव विन्ध्यस्य, शाखाबाहुभिरूपगुह्येव विन्ध्याटवीं स्थितो महाज्जीर्ण: शाल्मलीतरु: ।''[20]

न केवलं शब्दालङ्करणविशेष: श्लेष एवास्य प्राशस्त्यमर्हति अपितु भावसम्भृतलोककल्याणौपथिकव्यवहार्यापरिहार्यरम्यरीतिराजनीतिविषयका: साम्योपदे-शास्तात्त्विकसुभगसन्देशाचापि अस्य कवे: सौष्ठवस्य परां कोटिमाटीकमाना विलसन्ति । तथाहि शुकनासोपदेश :-

[20] कादम्बरी पृष्ठ 52 ।

"समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन शुकनासः सविस्तरमुवाच- 'तात चन्द्रापीड ! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमपि उपदेष्टव्यमस्ति केवल च निसर्गत एवाभानु भेद्यपरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। अपरिणायोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्त्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम्। अशिशिरोपचारहार्योऽतितीव्रो दर्पदाहज्वरोष्मा। सततममलमन्त्रगम्यो विषयो विषयविषादास्वदमोहः। नित्यनस्नानशौचवध्यो रागमला वलेपः। अजस्रमक्षपाऽवसानमबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति विस्तरेणाभिधीयसे। गर्भेश्वरत्वमभियौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा सर्वा। अविनयानाभैकैमप्येषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलताऽपि सरागैव भवति यूनां दृष्टिः। अपहरित वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततदुरन्तेयमुपभोगभृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनानि उपदेशानाम् अपगतमले हि स्फटिकमणाविव रजनिकरगभातयो विशन्ति सुखैनोपदेशगुणः। गुरुवचनसममलमपि सलिलमिव सहदुपजनर्या, श्रवणस्थितं शूलमभव्यस्य इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति। हरति अतिमलिनमन्धकारमिव दोषजातं प्रदो समयनिशांकर इव। गुरूपदेशः प्रशमहेतुर्वयःपरिणाम इव पलितरूपेण शिरस्जिस्जजालममलीकुर्वन्गुणरूपेण तदेव परिणमयति। अयमेव चानास्वादितविषयरसर। ते काल उपदेशास्य। कुसुमशरशरप्रहार जर्जरिते हि हृदि जलमिव गलत्युपदिष्टम। अकारणं च भवति दुष्प्रकृतेरन्वयः श्रुतश्चाविनयस्य। चन्दनप्रभवो न दहति किमनलः? वि‍ा प्रशमहेतुनापि न प्रचण्डतरो भवति वडवानलो वारिणा? गुरूपदेयश्च नाम पुरुषाणामखिलमलक्ष्यमजलं स्नानम्। अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्। अनारोपितमदोदोषं गुरूकरणम् अतीतज्योतिरालोकः, नोद्वेगकरः प्रजाररः विशेषशराज्ञाम्। विरला हि तेपामुपदेष्टारः। प्रतिशब्दक व राजवचनमनुगहटि जनो भयाद्। उद्दामदर्पाश्च पृथुम्यगित्श्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वन्ति। शृण्वन्तोऽपि गजनिमीलितेनावधीरयन्तः खैदयन्ति हितोपदेशदानिनो गुरून्। अहङ्कार

दाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकारीणि धनानि। राज्यविषविकारतन्द्राप्रदा राजलक्ष्मीः। अवलोकयतु तावत्कल्याणभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि खड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्य रागम् इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवण श्चञ्चलताम् कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभयणेर्नैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता। न ह्येवंविवमपरिचितमिह किञ्चिदस्ति यथेयमनार्या। लब्धापि खलु दुःखैल परिपाल्यते। दृढगुणसन्दाननिस्पन्दीकृतापि नश्यति। उद्दामदर्पभटसहस्रोल्लसितासिलतापञ्जरविधृताप्यपकामति। मदजलदुर्दिनान्धकारगजघटितवनटापरिपालितापि प्रण्लायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्त्तति। न शीलं पश्यति। न वैदगध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुयते। न त्यागभाद्रियते। न विशेषज्ञतां विवारयति। न चाचारं पालयति। न सत्यमनुबध्यते। न लक्षणं प्रमाणीकरोति। गन्धर्वनगरलेखैव पश्यत एव नश्यति। आद्याथरूढमन्दरपरिवर्त्तावर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति। कमलिनीसञ्चणव्यतिकरलग्ननलिननालकण्टकेव न क्वचिदपि निर्भरमाबध्नाति पदम्। अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविधगन्धगजगण्डमधुपानमतेव परिस्खलति। पारुष्यमिवोपशिक्षितुमसिधारासु निवसति। विश्वरूपत्वमित्र ग्रहीतमुश्रिता नारायणमूर्त्तिम्। अप्रत्ययबहुला च दिवसान्तकमलमिव सनुपस्थितमूलदण्डकोश मण्डलमपि मुञ्चति भृभुजम्। लतेव विटपकानध्यारोहति। नङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला। दिवराकरगतिरिव प्रकटितविविधसङ्कान्तिः। पाताल गुहेव तमोबहुल। हिडम्बेव भीमसाहसकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितान्कपुरुषच्छाया स्वल्पसत्वमुन्मत्तीकरोति। सरस्वतीपरिगहीतमीष्याव नालिङ्गति। जनं गुणवन्तमपवित्रमिव न स्पृशति। उदारसत्वममङ्गलमिव न बहु मन्यते। सज्जनमनिमित्तमिवोपहसति। परस्परविरुद्धञ्चन्द्रजालमिव लङ्घयति। शूरं कणकमिव परिहरति। दातारं स्वप्नमिव न स्मरति। विनीतंपातकिनमिव नोपसपति। मनस्वितमुन्भत्तमिवोपहसति। परस्परविरुद्धञ्चेन्द्रजालमिव दर्शयन्ती वाकटयति जगति निजं चरितम्। तथाहि सन्तमूष्माणमुपजनयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानाऽपि नीचस्वभावतामाविष्करोति। तोयराशिसंभवाऽपि तृष्णां संवर्धयति। ईश्वरतां दधानापि अशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति।

अमृतसहोदराऽपि कटुकविपाका। विग्रहवत्यपि अप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया। .......नहि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुषगूढः यो वा न विप्रलब्ध.........'' इत्यादि।

अन्ते च "तदेवंप्रायाऽतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन् महामोहकारिणि च यौवने, कुमार ! तथा प्रयतेथा यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्कियसे गुरुभिः, नोपलभ्यसे सुहृद्भिः, न शोच्यस विद्वद्भिः, यथा च न प्रकाश्यसे विटैः न प्रतार्यसेऽकुशैलैः, नास्वाद्यसे भुजङ्गैः, नावलुप्यसे सेवकवृकैः न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः, न विडम्ब्यसे लक्ष्या, न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, माक्षिप्यसे विषयेः, नावकृष्यसे रागेण, नापह्रियसे सुखैन। कामं भवान् धीरः मित्रा च समारोपित सस्कारः, तरलहृदयमप्रतिबद्धञ्च मदयन्ति धनानि। तथापि भवद्गुणसन्तोषो मामेव 'मुखरीकृतवान्। इदमेव च पुनः पुनरभिधीयसे। विद्वांसमपि सचेतनमपि करोति राजलक्ष्मीरिति। सर्वथा पित्रा कल्याणैः क्रियामाणमनुभवतु भवान्नवयौवराज्याभिज्ञषेकमङ्गलम्। कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्। अवनमय द्विषतां शिरांसि, उन्नमय स्वबन्धुवर्गम्। अभिषेकानन्तरञ्च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्। अयं च ते कालः प्रतापमारं पथितुम्। आरूढप्रतापो त्रैलोक्यदर्शीव सिद्धादेशो भवति इत्येतदभिधायोपशशाम। उपशान्तवचसि शुकनासे चन्द्रापीडः ताभिरुपदेशवाग्भिः, प्रक्षालित इव, उन्मीतिल इव, स्वच्छीकृत इव, निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, प्रीतहृदयो मुहूत्त स्थित्वा स्वभवनमाजगाम।''[21]

अहो तु खल्वेषा वाचामगोचरया, गम्भीरार्थकल्पनया व्यङ्ग्यभङ्ग्या विभूषिता वाणीयं बाणभट्टस्य न कस्य हृदयवतो हृदये प्रमोदमातनुते।

बाणस्तु पाञ्चालीप्रियः -

**शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते।**
**शिलाभट्टारिकावाचि बाणोक्तिषु च सा मता।।**

---

[21] कादम्बरी।

बाणेन प्रायशः स्वरुचरासु पाञ्चालीरीतिरेवाश्रिता विभाव्यते। अस्य रचनासु पदपदार्थानां मनोभावावेशानां यादृशं सुरुचिपूर्ण समाञ्जस्यमभिलक्ष्यते न तादृगन्यत्र क्वचिदवतरति दृष्टिप्रथम्। वर्ण्यवस्त्वनुरूपः पदविन्यासविलास एवास्य रचनाया वैशिष्ट्यम् विकटविन्ध्याटवीं हि वर्णयन्नसौ प्रयुङ्क्ते विकटानेव शब्दाटोपान् "क्वचित् प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमण्डला, क्वचिदुत्कृतमृगपतिनादभीतेव कण्टकिता'' इत्यादि। वसन्तवर्णनप्रसङ्गे समुपललयत्यसौ कामपि मृदुलामतिकोमलाञ्च पदावलीम्। तथाहि :-

"अशोकतरुताडनरणितरमणीगणिनूपुरझङ्कारसहस्रमुखरेषु सकलजीवलोकहृदयानन्ददायकेषु, मधुमासदिवसेषु इति।''

अनुप्रासविन्यासोऽप्यस्य कमप्यद्भुतमेव चमत्कारमादधाति :-

"इभकलभकल्लोनपल्लववेल्लितलवलीलयैः मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुड्मलेषु।''

महाकवेरस्योपमापरम्पराया अपि किञ्चिन्निदर्शनम् :-

"क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसम इव मधुकरेण, मधुकर इव मदेन, नवयौवनेन पदम्।

अस्य विरोधाभासविलासोऽपि दर्शनीयः- "शिशिरस्यापि रिपुजनसन्तापकारिणः, स्थिरस्यापि अनवरतं भ्रमतः निर्मलस्यापि मलिनीकृतारातिवनितामुखकमलद्युतेः, अति धवलस्यापि सर्वजनरागकारिणः।''

अर्थापत्त्यलङ्कारचमत्कारोऽपि किञ्चिदालोचनीयम्- "किं बहुना तापसाग्निहोत्रधूमलेखाभिरुत्सर्पन्तोभिरनिशमुपपादितकृष्णाजिनोत्तरासङ्गशोभाः फलमूलभूती वल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इव लक्ष्यन्तेऽस्य भगवतः समीपवर्त्तिनः, किं पुनश्चेतनाः प्राणिन।''

बाणस्य कृतिषु मधुरपदविन्यास-समासझङ्कृतिरेव सर्वत्र कर्णकुहरमह्लादयन्तीवानुश्रूयते। यथा :-

"वशीकर्तुकामं काममिव सनियमम्, हर्षजलकणनीहारिणि वियद्विहारिणि मनोहारिणि, कर्पूरधूलिधूसरेषु मलयजरसलवलुलितेषु बकुलावलीवलयेषु स्तनेषु।'' इति।

बाणस्य प्रकृतिचित्रणं विविधालङ्कृत्यनुप्राणितं तस्य सूक्ष्मनिरीक्षाशक्तित्वं प्रमाणयित :-

'एकदा तु नातिदूरोदिते नवनलिनदलसम्पुटभिदि, किञ्चिदुन्मुक्तपाटलिम्नि, भगवति मरीचिमालिनि, अत्रारुणवर्णवक्तस्तररुणादनमणेर्वर्णनेन कविना को नाम कोविदो नाप्यायित:? एवमेव - 'दिवसावस्तने लोहिततारका तपोवनधेनुरिव कपिला परिवर्त्तमाना सन्ध्या'' अत्र सन्ध्यां कपिलया धेन्वा सहोपमिमान: कवि: कस्यान्तरङ्गं नानन्दतरङ्गितं करोति?

किञ्च:- "यौवनमिवोत्कलिकाबहुलं, षण्मुखचरितमिव श्रूयमाणकौञ्चवनिता-विलापम्, भारतमिव पाण्डवधार्त्तराष्ट्रकुलकृतक्षोभं, कद्रूस्तनयुगलमिव नागसहस्रपीतपयोगण्डूषमच्छोदं नाम सरो दृष्टवान्।'' इति अच्छोदसरोवर्णनं कस्य नातनोति मनोमोदम्।

"अनेन च समयेन परिणतो दिवस:, स्नानोत्थितेन मुनिजनेनार्घविधिमुपपादयता य: क्षितितले दत्तहस्तमम्बरतलगत: साक्षादिव रक्तचन्दनाङ्गरागं रविरुदवहत। ऊर्ध्वमुखैरर्कबिम्बविनिहितदृष्टिभिरूष्मपैसतपोधनैरिव परिपीयमानतेज: प्रसर:, विरलातपो दिवसस्तनिमानमभजत। उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षयेव संहृतपाद: पारावतचरणपाटलरागो रविरम्बरतलादलम्बत। विहाय धरणितलमुन्मुच्य कमलिनीवनानि शुककपय इव दिवसावसाने तपोवनतरुशिखरेषु पर्वताग्रेषु रविकिरणा: स्थितिमकुर्वत।'' कीदृशमिदं सूर्यास्तवर्णनं चित्राङ्कितमिवोट्टङ्कितम्।

वस्तुतः काव्यादर्शनिर्दिष्टलक्षणं सर्वतोभावेन यदि कुत्रविद् घटते तर्हि तदत्र बाणकृतावेति निर्विशङ्कम्।

**'ओजःसमासभूयस्त्वमेतद् गद्यस्य जीवितम्।'** इति।

स्वयं बाणोप्याह हर्षचरिते गद्यशैल्या दुष्करत्वं विवृण्वन् :-

**नवोऽर्थो जातिरग्राम्या श्लेषोऽश्लिष्टः स्फुटो रसः।**
**विकटाक्षरबन्धश्च कृत्सन्मेकत्र दुष्करम्।।**

परं हर्षचरिते कादम्बर्याञ्च एषां कातस्न्र्येन सङ्गमसतु नूनं हृदयङ्गम एव सम्पन्न। अपि च मदनव्यथापीडितस्य पुण्डरीकस्य, कपिञ्जलमुखैन कीदृश्या प्राञ्जलया प्रौढया च वाण्या भर्त्सनां विदधाति :-

'सखै पुण्डरीक ! नैतदनुरूपं भवतः। क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः। किं यः कश्चित्प्राकृत इवात्मानं विक्लवीभवन्तं न रुणत्सि। कुतस्तवाऽपूर्वोऽयमद्येन्द्रियविप्लवो, येनास्येवं कृतः क्व ते तद्धैर्यना क्वासाविन्द्रियजयः।... .निराकारो गुरूपदेशविवेकः, निष्प्रयोजना प्रबृद्धना निष्कारणं ज्ञानम् यदत्र यवादृश अपि रागाभिषङ्गैः कलुषीक्रियन्ते प्रमादैश्चभियन्ते।'' इति।

वस्तुतः बाणवाणी कामपि अनन्यसाधारणीं नैपुणीमाविष्करोति, न कदापि औचितीमतिक्रमते। अनुबध्वाति सर्वदैवोर्वरां कल्पनाम्। उपलक्षयति सूक्ष्मनिरीक्षणधियम् प्रकटीकरोति लब्धावसरं विकटपदप्रयोगपाटवम्। उपलालयति पदलालित्यम। ग्रथ्नाति गम्भीरभावकुसुमस्तबकम्। व्यक्तीकरोति प्रलम्ब समासव्यासवैदुषीम् आलम्बते च शब्दाडम्बरमपि यथास्थानम्। क्वचित्तर्जनं करोति, अन्यत्र मर्त्सनम, इतरत्र गर्जनम्। एकत्र निर्दिशति, अपरत्रोपदिशति। सर्वत्र परिपुष्णाति भारतीयसंस्कृतिम्, अनुपालयति आर्यमर्यादाम्। संस्तौति ऋषीन् निन्दति क्षुद्रान्। धर्म प्रबलयति, अवहेलयत्यधर्मम्। किं किन्न करोति सत्कविसमुचितमखिलमेव। बिभर्त्ति च प्राचीनपरम्पराम्। प्रकर्षयति विप्रान्। उत्कर्षयति क्षत्रियान्। विनसयति लक्ष्मीम् सरसयति सरस्वतीम्। प्रदर्शयति आदर्शम्। निदर्शयति जीवनपथम् समीचीनतया। इत्यत्र तु नास्त्येव सन्देहलवः।

स्थान एवं खलु विदग्धमुखमण्डनकृद् विदग्धशिरोमणि: श्रीधर्मराजो बाणवसणीमधस्तनयार्यया प्रशंसति :-

**रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति।**
**सा किं तरुणि ! नहि नहि वाणी बाणस्य मधुरशीलस्य।।**

त्रिलोचनमहाभागेनापि सम्यगालोचितम् :-

**हृदि लग्नेन बाणेन यन्मन्दोऽपि पदक्रम:।**
**भवेत्कविकुरङ्गाणां चापलं तत्र कारणम्।।**

गोवर्धनाचार्येण तु इयद् यावल्लिखितं यत् सरस्वत्या स्वयं वाक्प्रागल्भ्यमवाप्तुं पुंरूपेण बाणवतारी गृहीत:। तथाहि :-

**जाता शिखण्डिना प्राक् यथा शिखण्डी तथाऽवगच्छामि।**
**प्रागल्भ्यमधिकमाप्तुं वाणी कणो बभूव ह।।**

नलनम्पूकृत् त्रिविक्रमभट्टमहोदयोऽपि बाणस्य लोकप्रियतामभिलक्ष्यशंसति :-

**शश्वद्बाणद्वितीयेन नमदाकारधारिणा।**
**धनुषेव गुणाढ्येन नि:शेषो रञ्जितो जन:।।**

अपि च :-

**वाणीपाधिपरामृष्ट - वीणानिक्वाणहारिणीम्।**
**भावयन्ति कथं वाऽन्ये भट्टबाणस्य भारतीम्।।**

सर्वलोकप्रथितां ''बाणोच्छिष्टं जगत्सर्वम्'' इत्युक्तिस्तु बाणप्रशंसाया: परां कोटिमवजगाहे।

यद्यपि केचन हर्षचरितमभिलक्ष्य :-

**बाणस्य हर्षचरिते निशितामुदीक्ष्य।**

**शक्तिं नवेऽत्र कवितास्त्रमदं त्यजन्ति।।**

इत्युद्घोषयन्ति, किन्तु सम्भवेत्कदाचित्कादम्बरीरचनापूर्वतनं वृत्तमिदम्। मन्यामहे, यद्रचनासौन्दर्यदृशा हर्षचरितमादधति लोकोत्तरं वैषिष्टयम्। आविष्करोति च पदे-पदे बाणस्याद्भुतवर्णनाशक्तिं चरित्रचित्रणचारुताञ्च। वयमपि च तो समाद्रियामहे। प्रभाकरवर्धनस्य यदपूर्व वर्णनमालेख्यार्पितमिव कृतं हर्षचरिते न तद्वाग्विष्यतामवगाहते। यद्यपि षष्ठतमें उच्छ्वासे च सिंहनादस्योपदेश: कादम्बरीगतशुकनासोपदेशेन सह स्पर्द्धां विधत्ते, तथाऽपि कादम्तरी कादम्बरी एवं हर्षचरितञ्च हर्षचरितम्। को नाम समुत्सहेत हर्षचरितं कादम्बरीतुलामधिरोहयितुम्। युक्त मेवोक्त केनाप्यभियुक्तेन:-

**श्लेषे केचन शब्दगगुम्फविषये केचिद्रसे चापरे -**
**अऽलङ्कारे कतिचित्सदर्थविषये चा ये कथावर्णने।**
**आ: सर्वत्र गभीरधीरकविता-विन्ध्याटवी-चातुरी-**
**सञ्चारी कविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चानन:।।**

पार्वतीपरिणये च बाण: कविसार्वभौमत्वेन संस्तुत :-

**"अस्ति कविसार्वभौमो यत्सान्वयजलधिकौस्तुभो बाण:।**
**नृत्यति यद्रसनायां वेधोमुखरंगलासिका वाणी।।** इति

अस्य महाकवेरनुपमकवित्ववैभववशात् प्रहृष्टमना श्रद्धान: श्रीहर्ष: श्रीबाणाय अमितां द्रव्यराशिं विततार। तथा उपश्लोकितम् केनापि :-

**'हेम्नो भारशतानि वा मदमुचां वृन्दानि वा दन्तिनाम्,**
**श्रीहर्षेण समर्पितानि कवये बाणाय कुत्राद्य तत्।**
**या वाणेन तु तस्य सूक्तिनिकरैरुट्टङ्किता कीर्तय-**
**स्ता: कल्पप्रलयेऽपि यान्ति न मनव मन्ये परिम्लानताम्।।**

स्थाने खल्वेतत् प्रशंसोल्लासविजृम्भणम् हृदयवतामृ इति। नूनमप्रतिमप्रतिभाचमत्कृता बाणस्य कृतिरनन्यसाधरणतया संस्कृतवाङ्मयेऽभितो विलसति।

**को नाम तस्याश्चमत्कृतिचारुतामपह्नोतुं प्रकल्पेत इति।**

यतो बाणभट्टोऽयं कान्रूकुब्जाधिपस्य हर्षदेवस्य सभापण्डितः आसीत्; हर्षदेवस्य च स्थितिकालः क्रैस्त 606 तमोऽवधारितः कालविद्भिरतो बाणभट्टस्याऽपि ए एव समयोऽतीति सन्देहातीतम् कतिपयैरन्तरङ्गप्रमाणैरप्येदेव निश्चीयते।

क्रैस्त 1150 तमसम्भवेन आलङ्कारिकेण रुप्यकेण स्वकीये अलङ्कार सर्वस्वे हर्षचरितस्योल्लेखः कृतः। क्रैस्त 1050 तमभवेन क्षेमेन्द्रेण स्वरचनासु बाणनाम्न उल्लेखः कृतः। क्रैस्त 1069 जातेन रुद्रटकृतकाव्यालङ्कारस्य टीकाकारेण नेमिसाधुना यत्रतत्र कादम्बरी-हर्षचरितयोरुद्धरणानि प्रदत्तानि। एवमेव भोजदेवेनाऽपि क्रैस्त 1024 तमे लब्धस्थितिकेन स्वकीये सरस्वतीकण्ठाभरते 'यादृग्गद्यविधौ बाणः पद्यबन्धे न तादृश' इति बाणस्य प्रशस्तिरारचिता। क्रैस्त 1000 सम्भवेन धनञ्जयेन दशरूपके बाणः संस्मृतः। इत्थमेव आनन्दवर्धनेन वामनेनापि बाणो न मुक्तः किं बहुना, द्वादशशताबद्या आरभ्य अष्टमशतक पर्य्यन्तजातैः प्रधानभूतैः सर्वैरपि ग्रन्थकृद्भिः महामहिमशालिनो बाणस्य नाम कीर्तितम्। तेन अपरिहार्यतया सप्तमी शताब्द्येव बाणस्य समय इति निश्चप्रचम् इति दिक्।

गद्यकविकुलललामभूतो भरतभूमण्डलमण्डनायमानः, महामेधावी, वश्यवाचामग्रणीः गद्यबन्धधुरन्धरः, पण्डितपुरन्दरोऽयं दण्डी नाम महाकविः संस्कृतसाहित्यमहाम्बरेऽम्बरमणिरिव प्राचाकशीति- इति सर्वेषां काव्यकलानुशीलनपराणां विदितमेव। कवेरस्य सुललितपदविन्यासशालीनि, मधुरमधुरतरभावावेशसम्भृतानि, प्रसादगुणगुम्फितानि काव्यरत्नानि कव्य खलु रसिकस्य मनःप्रीतिं नोपजनयन्ति। नूनमसौ सविद्ये गद्यकविकदम्बके परां ख्यातिगलभत, इत्यत्र नास्ति कस्यापि वैमत्यम्। अतएव- "कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः" इत्याभणितिः अस्य विषये सुप्रसिद्धा।

अत्रभवतो दण्डिनः कृतित्वेन त्रय एव सन्दर्भाः विलतन्ति प्राधान्येन। गद्यमयं काव्यं दशकुमारचरितम्, अलङ्कारमयो ग्रन्थः काव्यादर्शः, छन्दःशास्त्रमया छन्दोविचितिश्चेति। उक्तञ्च कविराजेन राजशेखरेण :-

**त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः।**

**त्रयो दण्डिग्रन्थाश्च त्रिषु लोकेषु विश्रुताः।।**[22]

परं तत्र छन्दोविचितिविषये विमर्शका विप्रतिपद्यन्तेः केचन व्यवस्थापयन्तियत् 'लिम्पतीव तमोऽङ्गानि' इत्यादिपद्यस्य कावरूादर्शे मृच्छकटिके[23] चोभयत्रैव दर्शनात्, एवं मृच्छकटिकदशकुमारचरितयोः सामाजिकचित्रणसाजात्याच्च, मृच्छकटिकनाटकमेव दण्डिनस्तृतीयो ग्रन्थ इति। एके 'मल्लिकामारुतं' जाम नाटकमेव दण्डिनस्तृतीयप्रबन्धत्वेनाभिप्रयन्ति। परं नाटकमिदं मालाबारप्रान्तीयस्य उद्दण्उरङ्गनाथकवेः[24] कृतित्वेन कालविद्भिरधुना निश्चितत्वात् नेदं दण्डिप्रणीतमिति निर्विशङ्कम।

अपरे 'द्विसन्धान'नामकं काव्यमेव दण्डिनः तृतीया कृतिः इति प्रतिपादयन्ति, भोजदेवमतमालम्ब्य। तथा चोपपत्तिरूपेण च निम्नाङ्कितपद्यमपि ते पुरस्कुर्वन्ति :-

**उवरमहिमारामः प्रजानां हर्षवर्धनः।**

**धर्मप्रभव इत्यासीत् ख्यातो भरतपूर्वजः।।** इति।।

अन्ये तु 'अवन्तिसुन्दरी'नामकं गद्यकाव्यमेव अस्य तृतीयकृतित्वेनाभि मन्यते। अवन्तिसुन्दररी-दशकुमारचरितयोः कथावस्तुसाम्यमेवोक्तनिर्णये विनिगमकत्वे नाङ्गीकुर्वन्ति। एव यद्यपि बहवो बहुविधमत्र व्यवतिष्ठन्ते, तथापि तत्त्वतो विमृश्यमाने, अवन्तिसुन्दरी कथा एवास्य तृतीया कृतिरित्येव कल्पः साधीयान् प्रतिभाति। यतः अवन्तिसुन्दरीकथानकं, दशकुमारचरितकथानकेन सह साजात्यं भजते। काव्यादर्शस्व जङ्घालकृतटीकाव्याञ्च अवन्तिसुन्दरीकथाया उल्लेखोऽपि खल्वमुमेवार्थ

---

[22] पद्यमिद शाङ्र्गधरपद्धतौ समुद्धृत राजशेखरनाम्ना।

[23] काव्यदर्श्रे 2/26। मृच्छकटिके 1/34।

[24] रङ्गनाथस्य व स्थितिकाल कैस्त 1500 तमवर्षदेशीय।

समर्थयति। छन्दोविचितिमेवास्य तृतीयकृतित्वेनाङ्गीकुर्वतां मतं तु न श्रद्धेयम्। यतः छन्दोविचितिरिति छन्दःशास्त्रस्यैवाभिधनान्तरमिति गभीरगवेषणया निश्चितप्रायं सम्प्रति। न खलु कस्यचिद् ग्रन्थान्तरस्य नामैतत्। किञ्च "सा विद्या नौर्विवक्षूणाम्।" इत्यत्र कविता सा विद्यारूपेण स्मृता न खलु ग्रन्थरूपेण, इत्यपि वचनम् छन्दोविचितेर्ग्रन्थान्तरत्वप्रतिषेधे विनिगमकं भवति। यद्यपि, केचन, अवन्तिसुन्दरीकथायां भाषायाः क्लिष्टत्वं श्लिष्टत्वमाश्रित्य, दण्डिशैलीभेदानुरोधन च, तां दण्डिकृतित्वेन नाभिनन्दन्ति, तथापि मतभूयस्त्वबलेन अवन्तिसुन्दरीकथाया एव दण्डिकृतित्वेनाङ्गीकारो न दोषाय। ये तु खलु दशकुमारचरितस्यापि, तत्र दण्डिकृतकाव्यदर्शोपलालितनियमभङ्गदर्शनाद् दण्डिकृतित्वमङ्गीकर्तु नोत्स्हस्ते तेऽपि न श्रद्धेयाः। दशकुमारचरितस्य, काव्या दर्शसम्भवात्प्राक्तनाकालाविर्भावस्म्भवात्। ये च पुनः 'काव्यादर्शे' कलापरिच्छेदपरामर्शात् 'कलापरिच्छेद' मेवास्य तृतीवग्रन्थत्वेनाभिप्रयन्ति मन्ये न तेऽप्यादरणीयाः, काव्यादर्शपरिशिष्टत्वेन कलापरिच्छेदाङ्गीकारान्न तु स्वतन्त्रग्रन्थरूपेणेति दिक्।

तत्र दशकुमारचरितं हि दाण्डिनः परमप्रसिद्धं कवित्वकलालङ्कृतं, निरतिशयहृद्यमनवद्यञ्च गद्यमयं काव्यम्। तच्चैतत् पूर्वपीठिका, चरितं, उत्तरपीठिकेति त्रिविभागैर्गुम्फितमष्टाभिरुच्छ्वासैरुपनिबद्धम्। अस्य भाषाभङ्गीमुद्दिश्य केवलं चरिताख्यं मध्यभागमेव दण्डिकृतमभिमन्यन्ते परीक्षकाः। यथा मध्यभागस्य भाषा सुललितपदावलिसमलङ्कृता, प्रसादगुणगुम्फिता मधुरमधुरा च वरीवर्त्ति न तथा पूर्वोत्तरखण्डयोः इति भाषाकृतभेदमवष्टभ्य पूर्वोत्तरखण्डौ न दण्डिविरचितावित्यनुमिन्वन्ति केचनालोचकाः। किन्तु तथाविधं भाषाभेदं पुरस्कृत्य तादृशानुमानं न खलु मानर्हम्। भाषाभङ्ग्या विषयानुबन्धित्वात् कवेस्तात्कालिकमनोवृत्तितरङ्गनिबन्धनाच्च एक एव कविः कदाचित सुश्लिष्टक्लिष्टपदानि प्रयुङ्क्ते कदाचिच्च कोमलानि सरलानि च ! न तावता तत्कृतेः भिन्न-कर्त्तृकत्वानुमानं समाञ्जस्यमुद्वहति।

अस्मिन् हि दशकुमारचरिते, दशराजकुमाराणां देशविदेशाटनानुभवानामुच्चावचक्रियाकलापोपक्रमाणा, विविधपराक्रमाणाञ्च मनोरञ्जकं वर्णनमन्न्यसाधारण्या सहृदयहृदयग्राहिण्या सुललितमधुरया च वाण्या कृतमस्ति।

सुबन्धुरिव नासौ 'प्रत्यक्षरश्लेषमयप्रबन्धबन्धे निबध्नाति मनः। नापि बाणभट्टवदस्मै रुचिरस्वरवर्णपदानि रोचन्ते। प्रसादमधुराणि ललितललितानि भावगर्भितानि पदान्येवास्मै स्वदन्ते। बाणभट्टवत् प्रलम्बसमाससंवलितो वाक्यविन्यासोऽप्यस्य नाकर्षणविषयः। पदार्थ-विस्पष्टता, भव्यभावसमभिव्यक्तिः, कोमलकल्पना-कमनीयता, विचारवैशारद्यमेव च दण्डिनो गद्यमयप्रबन्धस्य खल्वनितरसंस्पृष्टं वैशिष्ट्यम। प्रसादमाधुरीभृतोऽनुप्रासमयपदविन्यासप्रयास एवास्य कवेः सकलातिशायी श्लाघार्हो गुणः।

किञ्चास्य महाकवेस्ततचचरित्रचित्रणमपि विलक्षणमेव भाति। पात्राणां स्तीवता, रोचिष्णुर्हास्यविलासः, हृदयङ्गमा व्यङ्गयाभङ्गी, अनन्यादृशच्छलछद्मपरिच्छा-दाच्छन्नधूर्त्तानां, कूटकपटकौटिल्ययुतानां विप्रवेशधराणां नराणांपुश्चलीनाञ्च कुट्टिनीनां वाराङ्गनानां, तदानीन्तनजनसमाजे प्रवर्त्तमानानामाचारव्यवहारणाञ्चानुरूपतयोपनतं किमपि हृदयावर्जकं विस्फुटं वर्णनं न कस्य सचेतसश्चेतश्चुलुकयति।

नूनमत्र कस्यापि अभियुक्तस्यातिशयोक्तिरियं सुतरां सङ्गच्छतेतरां दण्डिनः प्रशस्तिविषयं पुरस्कृत्य -

**कविरविरुदितो दण्डी भूमण्डलमप्डनीभूतः सततम्।**
**यस्य हि कवितासार्थं सुधासदृशं बुधा भजन्ते।।**

तदस्य रचनायाः स्वरूपनिदर्शनदिशा किञ्चिदिवात्र प्रदर्शयामः। तद्यथाः-

"अयुगाशरः शरशयने शाययिष्यति,' 'असत्येनास्य नास्यं ससृज्यते', 'अनेकस्यानेक आतङ्केश्चिरं चिकित्स्कैरसंहार्यः संहृतः', 'स्वदेशो देशान्तरमिति नेयं गणना विदग्धस्य पुरुषस्य', 'आत्मानमात्मनाऽनवसाद्यैवोद्धरन्ति सन्तः', 'न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम्', 'इह जगति न निरीहं देहिनं श्रियः श्रयन्ते', 'जीवित हि नाम जन्मवतां चतुःएञ्चाप्यहानि', इति।

किञ्च- "एवं मिलितेन कुमारमण्डलेन सह चौडोपनयना दिसंस्कारजातमलभत। ततः सकललिपिज्ञानं, निखिलदेशीयभाषापाण्डित्यं, षडङ्गसहितवेद

समुदायकोविदत्वम्, काव्यनाटकाख्यायिकेतिहासचित्रकथासमन्वितपुराणगण नैपुण्यम्, धर्मशब्दज्योतिस्तर्कमीमांसादिसमस्तशास्त्रनिकरचातुर्यम्, कौटिल्यकामन्दकीयादिनीतिपटलकौशलम्, वीणाद्यशेषवाद्यदाक्ष्यम्, सङ्गीतसाहित्यहारित्वम्, मणिमन्त्रौषधादिमायाप्रपञ्चचञ्चुत्वम्, मातङ्गतुरङ्गादिवाहनारोहणपाटवम्, विविधायुधप्रयोगचणत्वं, चौर्यदुरोदरादिकपटकलापप्रौढत्वञ्च तत्तदा चार्येभ्यः सम्यग्1 लब्ध्वा यौवनेन विलसन्तं, कृत्येष्वनलसं तं कुमारनिकरं निरीक्ष्य स महीवल्लभः 'अहं शत्रुजनदुर्लभ::' इति परमानन्दममन्दमविन्दत।'' इति।

अपि च- ''कुमारा माराभिरामा रामास्त्रपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणाा रणाभियानेनाभ्युदयाशंसं राजानमकार्षुः।

दण्डिनः कालनिर्णिनीषवः बहवो बहुविधं प्रतिपादयन्ति।। केचनामुं गद्यकाव्यकृतामग्रणीं मन्यन्ते। अयमेव संस्कृतसाहित्रूपे गद्यबन्धस्य आद्यः प्रवर्त्तक इति स्वीकुर्वन्ति। अपरे दण्डिनं बाणभट्टपूर्वकालभवं, अपरे तदुत्तरकालभवमभ्युपयन्ति। एवं दण्डिनः प्रादुर्भावकालमालम्ब्य नास्ति कश्चिदेकः सर्वसम्मतो निर्णयः। केचन खैस्त 800 मितः काल एवास्य स्थितिकालः। अपरे खैस्त 846 शताब्दादारम्भ्य 866 मितपर्यन्त एवास्य निश्चितः कालः इति व्यवस्थापयन्ति इति।

परन्तु दण्डिप्रणीतकाव्यादर्शावलोकनेनैतदनुमातुं न दुःशकम्। यदयं कविकुलगुरोः कालिदासदवरज एव। यतोऽस्थि काव्यादर्शसन्दर्भपठितेषु कतिपयेष्ज़ु पद्येषु कालिदासीयपद्यानां प्रभावः प्रव्यक्तं प्रतीयते। तद्यथा:- कालिदास्य ''मलिनमपि हिमांशोर्लक्षम लक्षमीं तनोति'' इत्यंशस्य, दण्डिना स्वकाव्यादर्शे ''लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः'' इति रूपेणोद्धरणं कृतम्। इति हेतोः कालिदासादवरजोऽयमिति प्रतिपद्यते। दण्डिनो निम्नाङ्कितं पद्यम्-

**[25]अरत्नालोकसंहार्यमवार्य सूर्यरश्मिभि।**
**दृष्टिरोधकरं यूनां यौवनप्रभवं तम।।** इति।[26]

---

[25] केवल निसर्गत एवभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमति गहन तमो यौवनप्रभवम्।
[26] काव्यादर्शे 2/197।

बाणवाणंतशुकनासोपदेशमाधारीकृत्यैव रचितं प्रतीयते। अपि च दण्डिना बाणमयूरयोः प्रशस्तिरप्यारचिता:-

**भिन्नतीक्षणमुखेनापि चित्रं बाणेन निर्व्यथः।**
**व्यावहारेषु जहौ लीलां न मयूर.....।।**

किञ्चावन्तिसुन्दरीकथायां कदम्बरीवर्णन, बापस्य प्रसिद्धकथपा सह साजात्यं भजते, अतः दिण्डनो बाणपायत्कालभवत्वं साध्यति। परन्तु दण्डिनः शैली बाणशैलीतो नितरो विद्यते। बाण क्लिष्टश्लिष्टसमासबहुलां वक्रोकित्प्रभृत्यलङ्कारालङ्कृतां भाषां समुपलालयति, दण्डी च पुनः सरलां प्रासदिकगुणगम्फितां भाषामभिनन्दति। यदि नाम दण्डी बाणतो परवर्त्ती स्यात् तस्य भाषऽपि बाणकृतरचनाशैल्याऽऽवश्यकत्वेन प्रभाविता भवेत्। न च मात्रयाऽपिव तथा प्रतीयते अतः न स बाणपरवर्त्तीति निर्विशङ्कम्।

डॉ. वार्नेटमहोदयश्च प्रतिपादयति यत् हिंलिभाषायां 'स्वभाषालङ्कार' नामकस्यालङ्कारग्रन्थस्य रचना खैस्त 846-866 मितः। किञ्च खैस्त 814 तमे कर्मादकीयअलङ्कारग्रन्थे कविराज-मार्गनाम्नि काव्यादर्शस्य पुष्कला छाया प्रतीयते अतः दण्डितः समयः खैस्त 800 अब्दमितात्प्राक्तन एव सम्भवेत्।

एतदतिरिक्तमिदमपि विचार्यम् यत् काव्यदर्शे पञ्चमशताब्दीभवस्व राज्ञाप्रवरसेनेन विरचितस्य सेतुबन्धुकाव्यस्यापि नाम स्पर्यते तेनाऽपि प्रतिपत्तं शक्यते यद् दण्डिन आविर्भावकालः क्वचित् खैस्त 500 तः आरप्य 800 शतकमध्यग एव प्रतिभाति। किञ्च दशकुमारचरितस्य भौगोलिकं वर्णनं राजनीतिचित्रणञ्च राज्ञो हर्षवर्धनात्पूर्वतनस्य भारतस्य स्थितिं। सूचयति। अतः दण्डिनः स्थितिकाः खैस्त 600 तमदेशीयः प्रायशः सम्भवेदिति युक्तमनुमातुम्।

दण्डिनः काव्यादर्शमुद्दिश्य कैश्चिदभिधीयत तत्नस्यचिद् राज्ञो राजवर्मणः सूनुमध्यापयितुमेव दण्डी दशकुमारचरितस्य रचनां पदधात्। राजवर्मा चैष काञ्चीशासकः शैवधर्मावलम्बी चासीत्। अस्य शासनकालः कालविद्भिः खैस्त 690 तः आरभ्य खैस्त 724 पर्यन्तः निर्णतः। अवन्तिसुन्दरीकथामनुरुध्य दण्डिसमयः

खैस्तसप्तमशताब्द्या अन्तिमे चरणे सम्भवति। पुष्णन्ति चामुमेव कल्पं प्रमाणान्तराण्यपि। विद्वद्वरकाणेमहाभागेनापि कवेरस्य समय: खैस्त 600 मित: एव निर्धारित:।

केवलं निसर्गत एवभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमति गहनं तमो यौवनप्रभवम्।

**नीलोत्पलदलश्यामां विज्जकां मामजानता।**
**वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती।।**

इति शाङ्र्गधरपद्धतिपठितेन श्लोकेन विभाव्यते, यद् अस्या विज्जकाया: पद्यानि खैस्त 840 तमदेशीपविरचितेषु ग्रन्थेषु उपलभ्यन्ते। आतोऽस्य समय: खैस्त 840 त: पूर्वतन एव सम्भवेत्। किञ्च-

**सरस्वती कर्णाटी विजयाङ्का जयत्यसौ।**
**या विदर्भगिरा वास कालिदासदनन्तरम्।।**

इत्यनेनाऽपि शाङ्र्गधरपद्धतिरमृतेन सम्भाव्यते यदि नाम विजयाङ्को विज्जका च एकैव भवेत् तर्हि सा द्वितीयपुलकेशिन: सूनो: चद्रादित्पस्य महिषी विजयभट्टारिका विजयाङ्केतिनाम्ना प्रसिद्धा। तस्या: समय: खैस्त 660 तमान्तिके पर्यवस्यति। तदेवं दण्डिन: काल: खैस्ते 600 तमशतके एव विभावनीय:।

दण्डिनो जीवनवृतं यद्यप्यद्यावधि न पूर्णतया ज्ञातम् किन्तु सम्प्रति अवन्तिसुन्दरीकथाभिधो ग्रन्थ: समुपलब्ध: ग्रन्थोऽयं दण्डिविरचित एव सम्भाव्यते अस्मिन् ग्रन्थे दण्डिनो जीवनवृत्तं किञ्चिद्विस्तरश: समुद्ग्रथिम्। तेनावधार्यते यद्दण्डी महाभाग: विद्वद्वरस्य दामोदरस्य प्रपौत्र असीत्। दामोदरोऽयं भारविरेवाथवा भारवे: कश्चिदन्तरङ्ग: सखा सम्भेवत्। श्री दामोदरस्य सूनु: मनोरथ: मनोरथस्यापि वेदा इव चत्वार: पुत्ररत्नानि जातानि। तेषु लघिष्ठोऽपि सन् वीरदत्तेऽतिप्रोढौ दार्शनिक:। तस्माद् गौरीनाम्न्यां विदुष्यां लब्धजन्मपरिग्रहोऽयं पण्डितमण्डलमण्डनो दण्डीति।

काञ्चीपुरी चास्य निवास्थानम्। बाल्यकाले एवास्य पितरौ पुरन्दरपुरं ययतुः। असौ च दण्ड[27] धारी नैष्ठिकब्रह्मचारी आसीत्। अस्य विषये एकः प्रवादः प्रचरित यद् वर्षासु ब्रह्मचारिणां नगरनिवासो विहितः।

तद्विधानानुगुण्येन यदा दण्डी कस्मिंश्चिन्नगरे वासमुपकल्पयामास तदा तन्नगराधिपतिना स्वकन्याजनानां शिक्षणाय स शिक्षकपदे न्ययोजि। तथा नियोजितस्य तस्य रसिकताप्रकर्षं स्वकन्यामुखैन निशम्य स राजा तदीयनिष्ठासु सशङ्केः समपद्यत। अवगतवृन्तान्तो दण्ड्यापि राजानं दारिद्र्यामुपवर्णयितुं सुभृश मनुरुरोध। तथानुरुद्धश्च राजादारिद्र्याष्अकं विरच्य यदैव दण्डिने समर्पयति, तदैव दण्डिनं सस्मितवदनमवलोक्य विदिततामनोभावो राजा निश्चिकाय सद् 'अनुभूतदारिद्र्यास्थापि यथा मम तद्ववर्णनप्रकर्षस्तथैवास्य नैष्ठिकस्यापि कृत्रिमा रसिकता न तु वास्तविकी'ति तदवधि तस्य तपः पूतमनासो बह्मचर्यप्रकर्षं निश्चित्य सम्मानविशुषमारचयत्।

अपि च दण्डिनो निसर्गसुभगामलौकिकीं लालित्यसंवालिरचनावचनावलिंप्रख्यापयितुमेका कपोलकल्पिता कथा विरचिता विभाति तत्प्रशंसकजनैरिति यदे कदा दण्डिकालिदासयोः कतरो जयायान् इत्यत्र साक्षात्सरस्वत्या निर्णयमभिकाङ्क्षिभिः. सरस्वत्या आवाहनमारचितम्। ततः प्रत्यक्षीभूता भारतीकयाऽपि दिव्यया गिरा उदाजहार यद्- "कविर्दण्डी कावर्दण्डी कविर्दण्डी न संशयः।'' तदा किञ्चित्क्षुब्धः कालिदासः प्रप्रच्छ- "कोऽहं रण्डे?''

तदा सा प्राह- त्वमेवाहं त्वमेवाहं त्वन्तु साक्षात् सरस्वती।।'' इति।

अपरे विमर्शकास्तु कविशब्दस्य बहुवचनं दण्डि-प्रादूर्भावोत्तरकाल एव सञ्जातम् पूर्वन्तु द्विवचनमेवासीत्:-

**जाते तगति वाल्मीकौ कविरित्यभिधाऽभवत्।**
**कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि।।** इति।

'मधुराविजया'ख्यकाव्यकवयित्र्या कयाचित्तत्रभवत्या गङ्गादेव्या आचार्य दण्डिनः निरतिशयप्रशंसनमुपश्लोकितम्। तद्यथा-

[27] अत एवासौ दण्डीति नाम्ना प्रसिद्ध ।

आचार्यदण्डिनो वाचामाचान्तामृतसम्पदाम्।
विकासो वेधसः पत्न्या विलासमणिदर्पणम्।। इति।

इति सर्वतन्त्रस्वतन्त्रैः पदवाक्यप्रमाणपारावारीणैः श्रीमदाचार्यद्विजेन्द्रनाथशास्त्रिसिद्धान्तशिरोमणिभिर्विरचिते संस्कृत साहित्यविमर्शाख्या ग्रन्थे दशमः परिच्छेदः।

इत्यस्य श्लोकस्य चतुर्थे चरणे 'एवं'इत्यत्रानुस्वारोऽधिकः सञ्जातः। भवभूतिना कालिदास्यैतन्निर्देशमनुसन्धय 'रात्रिरेव व्यरंसीदि'ति पाठं स्वीकृत्यासुस्वारोऽपाकृतः। प्रवादममुमवष्टभ्य भवभूतेः कालिदासस्य समसामयिकतां प्रतिपादयतं वाचोयुथ्कतर्नावितरति बुद्धिपद्धतिम्। निराधारात्। कतुः? उच्च्यते भोजप्रबन्धे पठ्याये, "वाराणसीतः समागतः कोऽपि भवभूतिर्नामा कविर्द्वारि तिष्ठति" इति। भूजानेर्भोजदेवस्य शासनकालस्यायं वृत्तान्तः। भोजदेवश्च मुञ्जभ्रातजः। यदि भोजदेवस्य शासने भवभूते। महारजानुञ्जदेवस्य शासनकाले सम्पन्नः 'दशरूपक' नामालङ्गारग्रन्थः। तत्र भवभूतिकृतानाटकस्य कतिपयश्लोका उदाहृता दृश्यन्ते, भवभूतिः मञ्जुदेवादपि प्राक्कलभव इति तैः श्लोकैः सम्भाव्यते। एवं सति भोजप्रबन्धस्योक्तनिर्देशः नितरामसाङ्गत्यं भजते। अतो भेजप्रबन्धस्योक्तयः इतिवृत्तदिशा तु न कर्हिचित्प्रामाण्यमर्हन्ति। यो भोजप्रबन्धाख्यः सन्दर्भः कालिदासं, माघ, मल्लिनाथञ्च एकस्मिन्नेव समयसूत्रे निवघ्नाति, तस्य कालनिर्णयः क्रियन्मात्रं प्रामाणिको भवितुमर्हतीति मतिमन्तः स्वयं प्रणिभालयन्तु। अतः प्रावनिर्दिष्टः काल एव भवभूतेः सुनिश्चितः काल इति निरवद्यम्।